वायुपुराणम् ।

——:o:——

महर्षिवेदव्यासप्रणीतम् ।

——:o:——

श्रीलश्री—

वङ्गदेशीयासियातिक्-सोसाइट्याख्यसमाजानुज्ञया

Vo II

श्रीराजेन्द्रलालमित्रेण

परिशोधितम् ।

प्रथमखण्डः ।

कलिकाताराजधान्यां

कालिकायन्त्रे मुद्रितञ्च ।

संवत् १९३७।

1937

1880 AD

श्रीगणेशाय नमः ।

वायुपुराणम् ।

अथोत्तरभागे

प्रथमोऽध्यायः ।

पृथिवीदोहनं ।

शांशपायन उवाच । क्रमं मन्वन्तराणान्तु ज्ञातुमिच्छामि तत्वतः ।
दैवतानाञ्च सर्वेषां ये च यस्यान्तरे मनोः ॥१॥
सूत उवाच । मन्वन्तराणां यानि स्युरतीतानागतानि ह ।
समासाद्विस्तराच्चैव ब्रुवतो वै निबोधत ॥ २ ॥
स्वायम्भुवो मनुः पूर्वं मनुः स्वारोचिषस्तथा ।
औत्तमस्तामसश्चैव तथा रैवतचाक्षुषौ ।
षडेते मनवोऽतीता वक्ष्याम्यष्टावनागतान् ॥ ३ ॥
सावर्णाः पञ्चरौच्यश्च भौत्यो वैवस्वतस्तथा[१] ।
वक्ष्याम्येतान् पुरस्तात्तु मनोर्वैवस्वतस्य ह ॥ ४ ॥
मनवः पञ्च येऽतीता मानवांस्तान् निबोधत ।
मन्वन्तरं मया चोक्तं क्रान्तं स्वायम्भुवस्य ह ॥ ५ ॥

१ सावर्णा मम्बरौचाश्चेति ट० ।

अत ऊर्द्धं प्रवक्ष्यामि मनोः स्वारोचिषस्य ह।
प्रजासर्गं समासेन द्वितीयस्य महात्मनः॥ ६॥
आसन् वै तुषिता देवा मनुस्वारोचिषेऽन्तरे।
पारावताश्च विद्वांसो द्वावेव तु गणौ स्मृतौ॥ ७॥
तुषितायां समुत्पन्नाः क्रतोः पुत्राः स्वरोचिषः।
पारावताश्च शिष्टाश्च द्वादशौ तौ गणौ स्मृतौ।
छन्दजाश्च चतुर्विंशद्देवास्ते वै तदा स्मृताः॥ ८॥
धैवस्यशोऽथ वामान्यो गोपा देवायतस्तथा(१)।
अजश्च भगवान् देवो दुरोणश्च महाबलः॥ ९॥
आपश्चापि महाबाहुर्महौजाश्चापि वीर्यवान्।
चिकित्वान्(२) निभृतो यश्च अंशो यश्चैव पद्यते।
इत्येते क्रतुपुत्रास्तु तदासन् सोमपायिनः॥१०॥
प्रचेताश्चैव यो देवो विश्वेदेवास्तथैव च।
समञ्जो विश्रुतो यश्च अजिह्मश्चारिमर्द्दनः॥ ११॥
अजिह्मानमहीयानौ विद्यावन्तौ तथैव च।
अजोषौ च(३) महाभागौ यवीयश्च महाबलः॥१२॥
होता यज्वा च इत्येते पराक्रान्ताः(४) परावताः।
इत्येता देवता ह्यासन्मनुस्वारोचिषेऽन्तरे॥१३॥
सोमपास्तु तदा ह्येतास्चतुर्विंशतिदेवताः।
तेषामिन्द्रस्तदा ह्यासीद्विधश्च लोकविश्रुतः॥१४॥

---

१ देवायनस्तथेति क०। २ विविल्वानिति ङ०।
३ आजाख्यौ चेति ख०। ४ पदक्रान्ता इति ङ०, ट० च।

ऊर्ज्जो वसिष्ठपुत्रस्तु स्तम्भः काश्यप एव च ।
भार्गवश्च तदा द्रोणो ऋषभोऽङ्गिरसस्तथा ॥१५॥
पौलस्त्यश्चैव दत्तात्रिरात्रेयो निश्चलस्तथा ।
पौलहस्य च धावांस्तु एते सप्तर्षयः स्मृताः ॥१६॥
चैत्रः कविरुतश्चैव कृतान्तो विश्रुतो रविः[१] ।
वृहद्गुहो नवश्चैव सुताश्चैते[२] नव स्मृताः ॥१७॥
मनोः स्वारोचिषस्यैते पुत्रा वंशकराः स्मृताः ।
पुराणे परिसङ्ख्याता द्वितीयञ्चैतदन्तरं ॥१८॥
सप्तर्षयो मनुर्देवाः पितरश्च चतुष्टयं ।
मूलं मन्वन्तरस्यैते तेषाञ्चैवान्तरे प्रजाः ॥१९॥
ऋषीणां देवताः पुत्राः पितरो देवसूनवः ।
ऋषयो देवपुत्राश्च इति शास्त्रविनिश्चयः ॥२०॥
मनोः क्षत्रं विशश्चैव सप्तर्षिभ्यो द्विजातयः ।
एतन्मन्वन्तरं प्रोक्तं समासान्न तु विस्तरात् ॥२१॥
स्वायम्भुवेन विस्तारो ज्ञेयः स्वारोचिषस्य तु ।
न शक्यो विस्तरस्तस्य वक्तुं वर्षशतैरपि ।
पुनरुक्तबहुत्वात्तु प्रजानां वै कुले कुले ॥२२॥
तृतीयस्त्वथ पर्य्याय औत्तमस्यान्तरे मनोः ।
पञ्च चैव गणाः प्रोक्तास्तान् वक्ष्यामि निबोधत ॥२३॥
सुधामानश्च देवाश्च ये चान्ये वशवर्त्तिनः ।

---

१ विश्रुतो रविरिति ङ० ।
२ शुभाश्चैत इति ट० ।

प्रतर्द्दनाः शिवाः सत्या गणा द्वादश वै स्मृताः ॥२४॥
सत्यो धृतिर्दमो दान्तः क्षमः क्षामो धृतिः शुचिः ।
ईषोर्ज्जाश्च तथा ज्येष्ठो वपुश्मांश्चैव द्वादश ।
इत्येते नामभिः क्रान्ताः सुधामानस्तु द्वादश ॥२५॥
सहस्रधारो विश्वात्मा शमितारो वृहद्वसुः ।
विश्वधा विश्वकर्मा च मनस्वन्तो विराड्यशाः[1] ॥२६॥
ज्योतिश्चैव विभाव्यश्च कीर्त्तिवान् वंशकारिणः ।
अन्यानाराधितो देवो वसुधिष्णो विवस्वसुः[2] ॥२७॥
दिनक्रतुः सुधर्मा च धृतवर्मा यशस्विनः[3] ।
केतुमांश्चैव इत्येते कीर्तितास्तु प्रमर्द्दनाः ॥२८॥
हंसस्वरोऽह्विहा चैव प्रतर्द्दनयशस्करौ ।
सुदानो वसुदानश्च सुमञ्जसविषावुभौ ॥२९॥
जन्तुवाहयतिश्चैव सुवित्तसुनयस्तथा ।
शिवा ह्येते तु विज्ञेया यज्ञिया द्वादशापराः ॥३०॥
सत्यानामपि नामानि निबोधत यथामतं ।
दिक्पतिर्वाक्पतिश्चैव विश्वः शम्भुस्तथैव च ॥३१॥
स्मृड़ीकोऽधिपश्चैव[4] वर्च्चोधा मुह्यसर्व्वशः[5] ।

---

१ विराड् यश इति ङ० ।
२ वसुधिष्ठो विवस्वसुरिति ङ० ।
३ यशस्विजा इति ङ०, ट० च ।
४ अमृताकोऽधिपश्चैवेति ख० ।
५ पाठोऽयं आदर्शसम्मतो मुद्रितः, परन्त्वयमादर्शदोषेण समीचीनो भवितुं नार्हतीति ।

वासवश्च सदाश्वश्च क्षेमानन्दौ तथैव च ॥३२॥
सत्या ह्येते परिक्रान्ता यज्ञिया द्वादशापराः ।
इत्येता देवता ह्यासन्नौत्तमस्यान्तरे मनोः ॥३३॥
अजश्च परशुश्चैव दिव्यो दिव्यौषधिर्नयः ।
देवानुजश्चाप्रतिमो महोत्साहौशिजस्तथा ॥३४॥
विनीतश्च सुकेतुश्च सुमित्रः सुबलः शुचिः ।
औत्तमस्य मनोः पुत्रास्त्रयोदश महात्मनः ।
एते क्षत्रप्रणेतारस्तृतीयञ्चैतदन्तरम् ॥३५॥
औत्तमे परिसङ्ख्यातः सर्गः स्वारोचिषेण तु ।
विस्तरेणानुपूर्व्या च तामसांस्तान्निबोधत ॥३६॥
चतुर्थे त्वथ पर्याये तामसस्यान्तरे मनोः ।
सत्याः स्वरूपाः सुधियो हरयश्चतुरो गणाः ॥३७॥
पुलस्त्यपुत्रस्य सुतास्तामसस्यान्तरे मनोः ।
गणस्तु तेषां देवानामेकैकः पञ्चविंशकः ॥३८॥
इन्द्रियाणां शतं यद्धि मुनयः प्रतिजानते ।
सत्यप्राणास्तु शीर्ष्ण्यास्तमश्चैवाष्टमस्तथा ।
इन्द्रियाणि तदा देवा मनोस्तस्यान्तरे स्मृताः ॥३९॥
तेषाञ्च प्रभुर्देवानां शिविरिन्द्रः प्रतापवान् ।
सप्तर्षयोऽन्तरे चैव तान्निबोधत सत्तमाः ॥४०॥
काव्यो हर्षस्तथा चैव काश्यपः पृथुरेव च ।
आत्रेयश्चाग्निरित्येव ज्योतिधामा च भार्गवः ॥४१॥
पौलहो वनपीठश्च गोत्रे वासिष्ठ एव च ।

चैत्रस्तथापि पौलस्त्य ऋषयस्तामसेऽन्तरे ॥४२॥
जनुघण्डस्तथा शान्तिर्नरः ख्यातिर्भयस्तथा ।
प्रियभृत्यो ह्यवक्षिश्च पृष्टलोढो दृढोद्यतः(१) ।
ऋतश्च ऋतबन्धुश्च तामसस्य मनोः सुताः ॥४३॥
पञ्चमे त्वथ पर्य्याये मनोश्चारिष्णवेऽन्तरे ।
गणास्तु सप्तमाख्याता देवतानां निबोधत ॥४४॥
अमृताभाभूतरजोविकुण्ठाः ससुमेधसः ।
चरिष्णोस्तु शुभाः पुत्रा वसिष्ठस्य प्रजापतेः ।
चतुर्द्दश च चत्वारो गणास्तेषान्तु भास्वराः ॥४५॥
स्वत्रविप्रोऽग्निभासश्च प्रत्येतिष्ठामृतस्तथा ।
सुमतिर्वाविरावश्च वाचिनोदः स्ववास्तथा ॥४६॥
प्रविराशी च वादश्च प्राशश्चेति(२) चतुर्द्दश ।
अमृताभाः स्मृता ह्येते देवाश्चारिष्णवेऽन्तरे ॥४७॥
मतिश्च सुमतिश्चैव ऋतसत्यौ तथैव च ।
आवृतिर्विवृतिश्चैव मदो विनय एव च ॥४८॥
जेता जिष्णुः सहश्चैव द्युतिमान् स्ववसस्तथा ।
इत्येतानीह नामानि आभूतरजसां विदुः ॥४९॥
वृषभेत्ता जयो भीमः शुचिर्दान्तो यशो दमः ।
नाथो विद्वानजेयश्च कृशो गौरो ध्रुवस्तथा ।
कीर्त्तितास्तु विकुण्ठा वै सुमेधास्तु निबोधत ॥५०॥

---

१ दृढ़ेषुधृदिति ङ०, ट० च ।
२ प्रतश्चेतीति ङ०, ट० च ।

मेधा मेधातिथिश्चैव सत्यमेधास्तथैव च ।
पृश्निमेधाल्पमेधाश्च भूयोमेधादयः प्रभुः ॥५१॥
दीप्तिमेधा यशोमेधा स्थिरमेधास्तथैव च ।
सर्वमेधाश्वमेधाश्च प्रतिमेधाश्च यः स्मृतः ।
मेधावान् मेधहर्त्ता च कीर्त्तितास्तु सुमेधसः ॥५२॥
विभुरिन्द्रस्तदा तेषामासीद्विक्रान्तपौरुषः ।
पौलस्त्यो वेदवाहुश्च यजुर्नामा च काश्यपः ॥५३॥
हिरण्यरोमाङ्गिरसो वेदश्रीश्चैव भार्गवः ।
ऊर्द्धवाहुश्च वासिष्ठः पर्जन्यः पौलहस्तथा ।
सत्यनेत्रस्तथात्रेय ऋषयो रैवतान्तरे ॥५४॥
महापुराणसम्भाव्यः प्रत्यङ्गपरहा शुचिः ।
बलबन्धुर्निरामित्रः केतुश्रृङ्गो दृढव्रतः ।
चरिष्णवस्य पुत्रास्ते पञ्चमश्चैतदन्तरं ॥५५॥
स्वारोचिषोत्तमश्चैव तामसो रैवतस्तथा ।
प्रियव्रतान्वया ह्येते चत्वारो मनवस्तथा ॥५६॥
षष्ठे खल्वथ पर्याये देवा ये चाक्षुषेऽन्तरे ।
आद्याः प्रसूता भाव्याश्च पृथुकाश्च दिवौकसः ।
महानुभावलेखाश्च पञ्च देवगणाः स्मृताः ॥५७॥
दिवौकसः सर्ग एष प्रोच्यते मातृनामभिः ।
अत्रेः पुत्रस्य नप्तार आरण्यस्य प्रजापतेः ।
गणाश्च तेषान्देवानामेकैको ह्यष्टकः स्मृतः ॥५८॥
अन्तरीक्षो वसुहयो ह्यतिथिश्च प्रियव्रतः ।

श्रोता मन्ता सुमन्ता च आद्या ह्येते प्रकीर्त्तिताः ॥५९॥
श्येनभद्रस्तथा पश्यः पथ्यनेत्रो महायशाः ।
सुमनाश्च सुवेताश्च रेवतः सुप्रचेतसः ।
द्युतिश्चैव महासत्त्वः प्रसूताः परिकीर्त्तिताः ॥६०॥
विजयः सुजयश्चैव मनोद्यानो तथैव च ।
सुमतिः सुपरिश्चैव विज्ञातोऽर्थपतिश्च यः ।
भाव्या ह्येते स्मृता देवाः पृथुकांस्तु निबोधत ॥६१॥
अजिष्टः शाक्यनो देवो वानपृष्ठस्तथैव च ।
शाङ्करः सत्यधृष्णुश्च विष्णुश्च विजयस्तथा ।
अजितश्च महाभागः पृथुकास्ते दिवौकसः ॥६२॥
लेखांस्तथा प्रवक्ष्यामि ब्रुवतो मे निबोधत ।
मनोजवः प्रघासस्तु प्रचेतास्तु महायशाः ॥६३॥
वातो ध्रुवक्षितिश्चैव अद्भुतश्चैव वीर्यवान् ।
अवनो वृहस्पतिश्चैव लेखाः संपरिकीर्त्तिताः ॥६४॥
मनोजवो महावीर्य्यस्तेषामिन्द्रस्तदाऽभवत् ।
उन्नतो भार्गवश्चैव हविष्मानङ्गिरःसुतः ॥६५॥
सुधामा काश्यपश्चैव वासिष्ठो विरजस्तथा ।
अतिमानश्च(१) पौलस्त्यः सहिष्णुः पौलहस्तथा ।
मधुरात्रेय इत्येते सप्त वै चाक्षुषेऽन्तरे ॥६६॥
ऊरुः पूरुः शतद्युम्नस्तपस्वी सत्यवाक् कृतिः ।
अग्निष्णुदतिरात्रश्च सुद्युम्नश्चेति ते नव ॥६७॥

१ अभिमानश्चेति ङ०, ट० च ।

अभिमन्युश्च दशमो नाड्वलेया मनोः सुताः ।
चक्षुषस्य सुता ह्येते षष्ठस्यैव तदन्तरम् ॥६८॥
वैवस्वतेन सञ्जातस्तस्य सर्गो महात्मनः ।
विस्तरेणानुपूर्व्या च कथितं वै मया द्विजाः ॥६९॥
ऋषय ऊचुः । चाक्षुषस्य तु दायादः सम्भूतः कश्यपान्वये ।
तस्यान्ववाये येऽप्यन्ये तन्नो ब्रूहि यथातथं ॥७०॥
सूत उवाच । चाक्षुषस्य निसर्गन्तु समासाच्छ्रोतुमर्हथ ।
तस्यान्ववाये सम्भूतः पृथुर्वैण्यः प्रतापवान् ॥७१॥
प्रजानां पतयश्चान्ये दक्षः प्राचेतसस्तथा ।
उत्तानपादं जग्राह पुत्रमत्रिः प्रजापतिः ॥७२॥
दत्तकस्य तु पुत्रोऽस्य राजा ह्यासीत् प्रजापतेः ।
स्वायम्भुवेन मनुना दत्तोऽत्रेः कारणं प्रति ॥७३॥
मन्वन्तरमथासाद्य भविष्यं चाक्षुषस्य ह ।
षष्ठन्तदनुवक्ष्यामि उपोद्घातेन वै द्विजाः[१] ॥७४॥
उत्तानपादाच्चतुरा सूनृता वित्तभाविनी ।
उत्पन्ना चाधिधर्म्मेण ध्रुवस्य जननी शुभा ।
धर्म्मस्य पत्न्यां लक्ष्म्यां वै उत्पन्ना सा शुचिस्मिता ॥७५॥
ध्रुवञ्च कीर्त्तिमन्तञ्च अयस्मन्तं वसुन्तथा ।
उत्तानपादोऽजनयत् कन्ये द्वे च शुचिस्मिते ।
मनस्विनीं स्वराञ्चैव[२] तयोः पुत्राः प्रकीर्त्तिताः ॥७६॥

---

१ सूत उवाचेत्यादिः उपोद्घातेन वै द्विजा इत्यन्तः पाठो न पूर्व्वापरसङ्गतः ।
२ मनस्वतीं स्वरास्वैवेति ख० ।

ध्रुवो वर्षसहस्राणि दश दिव्यानि वीर्यवान् ।
तपस्तेपे निराहारः प्रार्थयन् विपुलं यशः[१] ॥७७॥
त्रेतायुगे तु प्रथमे पौत्रः स्वायम्भुवस्य सः ।
आत्मानं धारयन् योगात्[२] प्रार्थयन् सुमहद्यशः ॥७८॥
तस्मै ब्रह्मा ददौ प्रीतो ज्योतिषां स्थानमुत्तमं ।
आभूतसंप्लवं ह्यमस्तोदयविवर्जितं ॥७९॥
तस्यातिमात्रामृद्धिञ्च महिमानं निरीक्ष्य ह ।
दैत्यासुराणामाचार्यः श्लोकमप्युशना जगौ ॥८०॥
अहोऽस्य तपसो वीर्यमहो श्रुतमहो कृतं ।
स्थिताः सप्तर्षयः कृत्वा यदेनमुपरि ध्रुवं ।
ध्रुवे दिवं समासक्तमीश्वरः स दिवस्पतिः ॥८१॥
ध्रुवात्पुष्टिञ्च भव्यञ्च[३] भूमिः सा सुषुवे नृपौ ।
स्वां छायामाह वै पुष्टिर्भव नारी तु तां विभुः ॥८२॥
सत्याभिव्याहृते तस्य सद्यः स्त्री साऽभवत्तदा ।
दिव्यसंहननाच्छाया दिव्याभरणभूषिता ॥८३॥
छायायां पुष्टिराधत्त पञ्च पुत्रानकल्मषान् ।
प्राचीनगर्भं वृषकं[४] वृकञ्च वृकलं धृतिं[५] ॥८४॥

---

१ सुमहद् यश इति ङ० ।
२ आत्मानं गौरवञ्चैवेति क० ।
३ ध्रुवात् पुष्टिञ्च धान्यञ्चेति ट०
४ वृषभमिति ङ० ।
५ द्युतिमिति ङ० ।

पत्नी प्राचीनगर्भस्य सुवर्चा सुषुवे नृपं।
नाम्नोदारधियं पुत्रमिन्द्रो यः पूर्वजन्मनि ॥८५॥
संवत्सरसहस्रान्ते सकृदाहारमाहरत्।
एवं मन्वन्तरं युक्तमिन्द्रत्वं प्राप्तवान्विभुः ॥८६॥
उदारधेः सुतं भद्राऽजनयत्सा दिवञ्जयं।
रिपुं रिपुञ्जयं जज्ञे[१] वराङ्गी सा दिवञ्जयात् ॥८७॥
रिपोराधत्त बृहती चाक्षुषं सर्वतेजसम्।
व्यजीजनत् पुष्करिण्यां वारुण्यां चाक्षुषो मनुम्।
प्रजापतेरात्मजायां अरण्यस्य महात्मनः ॥८८॥
मनोरजायन्त दश नड्वलायां शुभाः सुताः।
कन्यायां वै महाभाग वैराजस्य प्रजापतेः ॥८९॥
ऊरुः पुरुः शतद्युम्नस्तपस्वी सत्यवाक् कविः।
अग्निष्टुदतिरात्रश्च सुद्युम्नश्चेति ते नव।
अभिमन्युश्च दशमो नड्वलायां मनोः सुताः ॥९०॥
ऊरोरजनयत् पुत्रान् षडाग्नेयी महाप्रभान्।
अङ्गं सुमनसं ख्यातिं क्रतुमङ्गिरसं शिवं ॥९१॥
अङ्गात् सुनीथाऽपत्यं वै वेणमेकं व्यजायत।
अपचारेण वेणस्य प्रकोपः सुमहानभूत् ॥९२॥
प्रजार्थमृषयस्तस्य ममन्थुर्दक्षिणं करं।
वेणस्य पाणौ मथिते सम्बभूव महान्नृपः।
वैण्यो नाम महीपालो यः पृथुः परिकीर्त्तितः ॥९३॥

---

१ जनधातोरकर्म्मकत्वेनात्र सकर्म्मकप्रयोग आर्षः।

स धन्वी कवची जातस्तेजसा प्रज्वलन्निव।
पृथुर्वैण्यः सर्व्वलोकान् ररक्ष क्षत्रपूर्वजः ॥९४॥
राजसूयाभिषिक्तानामाद्यः स वसुधाधिपः।
तस्य स्तवार्थमुत्पन्नौ निपुणौ सूतमागधौ ॥ ९५॥
तेनेयं गौर्महाराज्ञा दुग्धा सस्यानि धीमता।
प्रजानां वृत्तिकामानां दैवैर्ऋषिगणैः सह ॥९६॥
पितृभिर्दानवैश्चैव गन्धर्व्वैरप्सरोगणैः।
सर्व्वैः पुण्यजनैश्चैव वीरुद्भिः पर्वतैस्तथा ॥९७॥
तेषु तेषु तु पात्रेषु दुह्यमाना वसुन्धरा।
प्रादाद्यथेप्सितं क्षीरं तेन लोकांस्त्वधारयत् ॥९८॥
ऋषय ऊचुः। विस्तरेण पृथोर्जन्म कीर्त्तयस्व महामते।
यथा महात्मना दुग्धा पूर्व्वं तेन वसुन्धरा ॥९९॥
यथा देवैश्च नागैश्च यथा ब्रह्मर्षिभिः सह[१]।
यथा यक्षैः सगन्धर्व्वैरप्सरोभिर्यथा पुरा ॥१००॥
तेषां पात्रविशेषांश्च दोग्धारं क्षीरमेव च।
तथा वत्सविशेषांश्च तन्नः प्रब्रूहि[२] पृच्छतां ॥१०१॥
यस्मिंश्च कारणे पाणिर्वैण्यस्य मथितः पुरा।
क्रुद्धैर्महर्षिभिः पूर्वं तत् सर्वं कथयस्व नः ॥१०२॥
सूत उवाच। वर्णयिष्यामि वो विप्राः पृथोर्वैण्यस्य सम्भवं।
एकाग्राः प्रयताश्चैव शुश्रूषध्वं द्विजोत्तमा. ॥१०३॥

---

१ ब्रह्मर्षिभिश्च हेति ट०।
२ तत्क्षतः ब्रूहीति ढ०।

नाशुश्रूषवेनापि पापाय नाशिष्यायाहिताय च ।
वर्णयेयमिमं पुण्यं नाव्रताय कथञ्चन ॥१०४॥
स्वर्ग्यं यशस्यमायुष्यं पुण्यं वेदैश्च सम्मितं ।
रहस्यं ऋषिभिः प्रोक्तं शृणुयाद्यो न सूयकः ॥१०५॥
यश्चेमं श्रावयेन् मर्त्यः पृथोर्वैण्यस्य सम्भवं ।
ब्राह्मणेभ्यो नमस्कृत्य न स शोचेत्कृताकृतं ।
गोप्ता धर्मस्य राजाऽसौ बभूवात्रिसमः प्रभुः ॥१०६॥
अत्रिवंशसमुत्पन्नो ह्यङ्गो नाम प्रजापतिः ।
यस्य पुत्रोऽभवद्वेणो नात्यर्थं धार्म्मिकस्तथा ॥१०७॥
जातो मृत्युसुतायां वै सुनीथायां प्रजापतिः ।
स मातामहदोषेण वेणः कालात्मजात्मजः ॥१०८॥
स धर्म्मं पृष्ठतः कृत्वा कामाल्लोभे व्यवर्त्तत ।
स्थापनं स्थापयामास धर्म्मापेतं स पार्थिवः ॥१०९॥
वेदशास्त्राण्यतिक्रम्य ह्यधर्म्मे निरतोऽभवत् ।
निःस्वाध्यायवषट्काराः प्रजास्तस्मिन् प्रशासति ।
आसन् न च पपुः सोमं हुतं यज्ञेषु देवताः ॥११०॥
न यष्टव्यं न होतव्यमिति तस्य प्रजापतेः ।
आसीत् प्रतिज्ञा क्रूरेयं विनाशे प्रत्युपस्थिते ।११११॥
अहमिज्यश्च पूज्यश्च सर्वयज्ञे द्विजातिभिः ।
मयि यज्ञो विधातव्यो मयि होतव्यमित्यपि ॥११२॥
तमतिक्रान्तमर्यादमाददानमसाम्प्रतं ।
ऊचुर्महर्षयः सर्वे मरीचिप्रमुखास्तथा ॥११३॥

वयं दीक्षां प्रवक्ष्यामः संवत्सरशतान् बहून् ।
माऽधर्मं वेण कार्षीस्त्वं नैष धर्मः सनातनः ।
निधने च प्रसूतोऽसि प्रजापतिरसंशयः ॥११४॥
पालयिष्ये प्रजाश्चेति त्वया पूर्वं प्रतिश्रुतं ।
तांस्तथा वादिनः सर्व्वान् ब्रह्मर्षीनब्रवीत्तदा ॥११५॥
स प्रहस्य तु दुर्बुद्धिरिदं वचनकोविदः ।
स्रष्टा धर्मस्य कश्चान्यः श्रोतव्यं कस्य वै मया ॥११६॥
वीर्यश्रुततपःसत्यैर्मया वा कः समो भुवि ।
महात्मानमनूनं मां यूयं जानीत तत्त्वतः ॥११७॥
प्रभवः सर्वलोकानां धर्माणाञ्च विशेषतः ।
इच्छन् दहेयं पृथिवीं प्लावयेयं जलेन वा ।
सृजेयं वा ग्रसेयं वा नात्र कार्या विचारणा ॥११८॥
यदा न शक्यते स्तम्भान्मानाच्च भृशमोहितः ।
अनुनेतुं नृपो वेणस्ततः क्रुद्धा महर्षयः ॥११९॥
निगृह्य तं महाबाहुं विस्फुरन्तं यथाऽनलं ।
ततोऽस्य वामहस्तं ते ममन्थुर्भृशकोपिताः ॥१२०॥
तस्मात् प्रमथ्यमानाद्वै जज्ञे पूर्वमभिश्रुतः ।
ह्रस्वोऽतिमात्रं पुरुषः कृष्णश्चापि तथा द्विजाः ॥१२१॥
स भीतः प्राञ्जलिश्चैव स्थितवान् व्याकुलेन्द्रियः ।
तमार्त्तं विह्वलं दृष्ट्वा निषीदेत्यब्रुवन् किल ॥१२२॥
निषादवंशकर्त्ताऽसौ बभूवानन्तविक्रमः ।
धीवरानसृजत्सोऽपि वेणकल्मषसम्भवान् ॥१२३॥

ये चान्ये विन्ध्यनिलयास्तुम्बुराः[१] तुवराः खसाः ।
अधर्मरुचयश्चापि सम्भूता वेणकल्मषात् ॥१२४॥
पुनर्महर्षयस्तस्य पाणिं वेणस्य दक्षिणं ।
अरणीमिव संरब्धान्ममन्थुर्जातमन्यवः ॥१२५॥
पृथुस्तस्मात् समुत्पन्नः कराःस्फालनतेजसः ।
पृथोः करतलाद्वापि यस्मात् जातः पृथुस्ततः ।
दीप्यमानः स्ववपुषा साक्षादग्निरिवोज्ज्वलन् ॥१२६॥
आद्यमाजगवं नाम धनुर्गृह्य महारवं ।
शरांश्च बिभ्रद्रक्षार्थं कवचञ्च महाप्रभं ॥१२७॥
तस्मिन् जातेऽथ भूतानि संप्रहृष्टानि सर्वशः ।
समुत्पन्ने महाराज्ञि वेणस्य त्रिदिवङ्गतः ॥१२८॥
समुत्पन्नेन राजर्षिः स सत्पुत्रेण धीमता ।
पुरुषव्याघ्रः पुन्नाम्नो नरकात्त्रायते ततः ॥१२९॥
तं नद्यश्च समुद्राश्च रत्नान्यादाय सर्व्वशः ।
समागम्य तदा वैण्यमभ्यषिञ्चन्नराधिपं ।
महता राजराज्येन महाराजं महाद्युतिं ॥१३०॥
सोऽभिषिक्तो महाराजा देवैरङ्गिरसः सुतैः ।
आदिराजो महाराजः पृथुर्वैण्यः प्रतापवान् ॥१३१॥
पित्रापरञ्जितास्तस्य प्रजास्तेनानुरञ्जिताः ।
ततो राजेति नामास्य अनुरागादजायत ॥१३२॥
आपस्तस्तम्भिरे चास्य समुद्रमभियास्यतः ।

---

१ तुम्बरा इति ङ० ।

पर्वताश्च विशीर्यन्ते ध्वजभङ्गश्च नाभवत् ॥१३३॥
अकृष्टपच्या पृथिवी सिद्ध्यन्त्यन्नानि चिन्तया ।
सर्वकामदुघा गावः पुटके पुटके मधु ॥१३४॥
एतस्मिन्नेव काले च यज्ञे पैतामहे शुभे ।
सूतः सुत्यां समुत्पन्नः सौत्येऽहनि महामतिः ।
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः ॥१३५॥
ऐन्द्रेण हविषा चापि हविः पृक्तं बृहस्पतेः ।
जुहावेन्द्राय देवेन ततः सूतो व्यजायत ॥१३६॥
प्रमादस्तत्र सञ्जज्ञे प्रायश्चित्तञ्च कर्म्मसु ।
शिष्यहव्येन यत् पृक्तं अभिभूतं गुरोर्हविः ।
अधरोत्तरचारेण जज्ञे तद्वर्णवैकृतं ॥१३७॥
यच्च क्षत्रात्समभवद् ब्राह्मण्यां हीनयोनितः ।
सूतः पूर्वेण साधर्म्मतुल्यधर्म्मः प्रकीर्त्तितः ॥१३८॥
मध्यमो ह्येष सूतस्य धर्म्मः क्षत्रोपजीवनं ।
रथनागाश्वचरितं जघन्यञ्च चिकित्सितं ॥१३९॥
पृथोस्तवार्थं तौ तत्र समाहूतौ सुरर्षिभिः ।
तामूचुर्मुनयः सर्वे स्तूयतामेष पार्थिवः ।
कर्मैतदनुरूपं वां पात्रं स्तोत्रस्य चाप्ययं ॥१४०॥
तावूचतुस्तदा सर्वांस्तानृषीन् सूतमागधौ ।
आवां देवानृषींश्चैव प्रीणयावः स्वकर्मभिः ॥१४१॥
न चास्य कर्म्म वै विद्मः न तथा लक्षणं यशः ।
स्तोत्रं येनास्य कुर्यावो राज्ञस्तेजस्विनो द्विजाः ॥१४२॥

ऋषिभिस्तौ नियुक्तौ तु भविष्यैः स्तूयतामिति ।
दानधर्म्मरतो नित्यं सत्यवान् स जितेन्द्रियः ।
ज्ञानशीलो वदान्यस्तु संग्रामेष्वपराजितः ॥१४३॥
यानि कर्म्माणि कृतवान् पृथुश्चापि महाबलः ।
तानि शीलेन बद्धानि स्तुवद्भिः सूतमागधैः ॥१४४॥
ततस्तवान्ते सुप्रीतः पृथुः प्रादात् प्रजेश्वरः ।
अनूपदेशं सूताय मगधं मागधाय च ॥१४५॥
तदा वै पृथिवीपालाः स्तूयन्ते सूतमागधैः ।
आशीर्वादैः प्रबोध्यन्ते सूतमागधवन्दिभिः ॥१४६॥
तं दृष्ट्वा परमप्रीताः[१] प्रजा ऊचुर्महर्षयः ।
एष वो वृत्तिदो वैण्यो भवत्विति नराधिपः ॥१४७॥
ततो वैण्यं महाभागं प्रजाः समभिदुद्रुवुः ।
त्वन्नो वृत्तिं विधत्स्वेति महर्षेर्वचनात्तदा ।
सोऽभिद्रुतः प्रजाभिस्तु प्रजाहितचिकीर्षया ॥१४८॥
धनुर्गृहीत्वा बाणांश्च वसुधामार्द्दयद्बली ।
अस्यार्द्दनभयत्रस्ता गौर्भूत्वा प्राद्रवन्मही॥१४९॥
तां पृथुर्धनुरादाय द्रवन्तीमन्वधावत ।
सा लोकान् ब्रह्मलोकादीन् गत्वा वैण्यभयात्तदा ।
ददर्श चाग्रतो वैण्यं कार्मुकोद्यतधारिणं ॥१५०॥
ज्वलद्भिर्विशिखैर्बाणैर्दीप्ततेजसमच्युतं ।

---

१ तं दृष्ट्वा ब्रह्मभूयिष्ठमिति ख० ।

महायोगं महात्मानं दुर्द्धर्षममरैरपि ॥१५१॥
अलभन्ती तदा त्राणं वैण्यमेवान्वपद्यत ।
कृताञ्जलिपुटा देवी पूज्या लोकैस्त्रिभिः सदा[१] ॥१५२॥
उवाच वैण्यं नाधर्म्मं स्त्रीबधे परिपश्यसि ।
कथं धारयिता चासि प्रजा राजन्मया विना ॥१५३॥
मयि लोकाः स्थिता राजन् मयेदन्धार्य्यते जगत् ।
मदृते च विनश्येयुः प्रजाः पार्थिवसत्तम ॥१५४॥
न मामर्हसि वै हन्तुं श्रेयश्चेत्त्वं चिकीर्षसि ।
प्रजानां पृथिवीपाल शृणु चेदं वचो मम ॥१५५॥
उपायतः समारब्धाः सर्वे सिद्ध्यन्त्युपक्रमाः ।
हत्वापि मां न शक्तस्त्वं प्रजानां पालने नृप ॥१५६॥
अन्नभूता भविष्यामि जहि कोपं महाद्युते ।
अबध्याश्च स्त्रियः प्राहुस्तिर्य्यग्योनिगतेष्वपि ।
सत्वैवं पृथिवीपाल धर्म्मं न त्यक्तुमर्हसि ॥१५७॥
एवं बहुविधं वाक्यं श्रुत्वा राजा महामनाः ।
क्रोधं निगृह्य धर्मात्मा वसुधामिदमब्रवीत् ॥१५८॥
एकस्यार्थाय यो हन्यादात्मनो वा परस्य वा ।
एकं प्राणं बहून् वापि कामंस्तस्यास्ति पातकं ॥१५९॥
यस्मिंस्तु निहते भद्रे लभन्ते बहवः सुखं ।
तस्मिन् हते शुभे नास्ति पातकञ्चोपपातकं ॥१६०॥

---

१ दृष्टा लोकैस्त्रिभिस्तदेति ट० ।

सोऽहं प्रजानिमित्तन्त्वां बधिष्यामि वसुन्धरे ।
यदि मे वचनं नाद्य करिष्यसि जगद्धितं ॥१६१॥
त्वां निहत्याद्य वाणेन मच्छासनपराङ्मुखीं ।
आत्मानं प्रथयित्वेह धारयिष्याम्यहं प्रजाः[१] ॥१६२॥
सा त्वं वचनमासाद्य मम धर्मभृतां वरे ।
सञ्जीवय प्रजा नित्यं शक्ता ह्यसि न संशयः ॥१६३॥
दुहितृत्वञ्च मे गच्छ एवमेतं महद्वरं ।
नियच्छे त्वान्तु धर्मार्थं प्रयुक्तं घोरदर्शने ॥१६४॥
प्रत्युवाच ततो वैण्यं एवमुक्ता सती मही ।
एवमेतदहं राजन् विधास्यामि न संशयः ॥१६५॥
वत्सन्तु मम तं यच्छ क्षरेयं येन वत्सला ।
समाञ्च कुरु सर्वत्र मां त्वं धर्मभृतां वर ।
यथा विष्यन्दमानञ्च क्षीरं सर्वत्र भावये ॥१६६॥
तत उत्सारयामास शिलाजालानि सर्वशः ।
धनुःकोट्या ततो वैण्यस्तेन शैला विवर्द्धिताः ॥१६७॥
मन्वन्तरेष्वतीतेषु[२] विषमासीद्वसुन्धरा ।
स्वभावेनाभवंस्तस्याः समानि विषमानि च ॥१६८॥
न हि पूर्वनिसर्गे वै विषमे पृथिवीतले ।
प्रविभागः पुराणां वा ग्रामाणां वापि विद्यते ॥१६९॥

---

१ प्रजापालयिता स्वयमिति ख० ।
२ मन्वन्तरेषु सर्व्वेष्विति ख० ।

न सस्यानि न गोरक्षा न कृषिर्नबणिक्पथः ।
चाक्षुषस्यान्तरे पूर्वमेतदासीत् पुरा किल ।
वैवस्वतेऽन्तरे तस्मिन्[१] सर्वस्यैतस्य सम्भवः ॥१७०॥
समत्वं यत्र यत्रासीत् भूयस्तस्मिंस्तदेव हि ।
तत्र तत्र प्रजास्ता वै निवसन्तिस्म सर्वदा ॥१७१॥
आहारः फलमुलन्तु प्रजानामभवत्किल ।
वैण्यात् प्रभृति लोकेऽस्मिन् सर्वस्यैतस्य सम्भवः ॥१७२॥
कृच्छ्रेण महता सोऽपि प्रनष्टास्वोषधीषु वै ।
स कल्पयित्वा वत्सन्तु चाक्षुषं मनुमीश्वरः ।
पृथुर्दुदोह सस्यानि स्वतले पृथिवीं ततः ॥१७३॥
सस्यानि तेन दुग्धानि वैण्येन तु वसुन्धरां ।
मनुञ्च चाक्षुषं कृत्वा वत्सम्पात्रे च भूमये ।
तेनान्नेन तदा ता वै वर्त्तयन्ते प्रजाः सदा ॥१७४॥
ऋषिभिः स्रूयते वापि पूनर्दुग्धा वसुन्धरा ।
वत्सः सोमस्त्वभूत् तेषां दोग्धा चापि बृहस्पतिः ॥१७५॥
पात्रमासीत्तु छन्दांसि गायत्र्यादीनि सर्व्वशः ।
क्षीरमासीत्तदा तेषां तपो ब्रह्म च शाश्वतं ॥१७६॥
पुनस्तुत्वा देवगणैः पुरन्दरपुरोगमैः ।
सौवर्णं पात्रमादाय अमृतं दुदुहे तदा ।
ते नैव वर्त्तयन्ते च देवा इन्द्रपुरोगमाः ॥१७७॥

---

१ वैवस्वतेऽन्तरे पूर्व्वमिति ख० ।

नागैश्च स्रूयते दुग्धा विषं क्षीरं तदा मही ।
तेषाञ्च वासुकिर्दोग्धा काद्रवेयो महौजसः ॥१७८॥
नागानां वै द्विजश्रेष्ठ सर्पाणाञ्चैव सर्व्वशः ।
तेनैव वर्त्तयन्त्युग्रा महाकाया महोल्वणाः ।
तदाहारास्तदाचारास्तद्वीर्य्यास्तु तदाश्रयाः ॥१७९॥
आमपात्रे पुनर्दुग्धा त्वन्तर्द्धानमियं मही ।
वत्सं वैश्रवणं कृत्वा यक्षैः पुण्यजनैस्तथा ॥१८०॥
दोग्धा च जतुनाभस्तु पिता मणिवरस्य सः ।
यक्षात्मजो महातेजा वशी स सुमहाबलः ।
तेन ते वर्त्तयन्तीति परमर्षिरुवाच ह ॥१८१॥
राक्षसैश्च पिशाचैश्च पुनर्दुग्धा वसुन्धरा ।
ब्रह्मोपेतस्तु दोग्धा वै तेषामासीत् कुवेरकः ॥१८२॥
रक्षः सुमाली बलवान् क्षीरं रुधिरमेव च ।
कपालपात्रे निर्दुग्धा अन्तर्द्धानञ्च राक्षसैः ।
तेन क्षीरेण रक्षांसि वर्त्तयन्तीह सर्वशः ॥१८३॥
पद्मपात्रे पुनर्दुग्धा गन्धर्व्वैरप्सरोगणैः ।
वत्सञ्चित्ररथङ्कृत्वा शुचीन् गन्धांस्तथैव च ॥१८४॥
तेषां विश्वावसुस्त्वासीद् दोग्धा पुत्रो मुनेः शुचिः ।
गन्धर्व्वराजोऽतिबलो महात्मा सूर्यसन्निभः ॥१८५॥
शैलैश्च स्रूयते दुग्धा पुनर्देवी वसुन्धरा ।
तत्रौषधीर्मूर्त्तिमती रत्नानि विविधानि च ॥१८६॥
वत्सस्तु हिमवांस्तेषां मेरुर्दोग्धा महागिरिः ।

पात्रन्तु शैलमेवासीत्तेन शैलः प्रतिष्ठितः ॥१८७॥
स्त्रूयते वृक्षवीरुद्भिः पुनर्दुग्धा वसुन्धरा ।
पलाशपात्रमादाय दुग्धं छिन्नप्ररोहणं ॥१८८॥
कामधुक् पुष्पितः शैलः प्लक्षो वत्सो यशस्विनी ।
सर्व्वकामदुघा दोग्ध्री पृथिवी भूतभाविनी ॥१८९॥
सैषा धात्री विधात्री च धारणी च वसुन्धरा ।
दुग्धा हितार्थं लोकानां पृथुना इति नः श्रुतं ।
चराचरस्य लोकस्य प्रतिष्ठायोनिरेव च ॥१९०॥

इति श्रीमहापुराणे वायुप्रोक्ते पृथिवीदोहनं नाम
प्रथमोऽध्यायः ।

अथ द्वितीयोऽध्यायः ।

पृथुवंशानुकीर्त्तनं ।

सूत उवाच । आसीदियं समुद्रान्ता मेदिनीति परिश्रुता ।
वसु धारयते यस्माद् वसुधा तेन चोच्यते ॥१॥
मधुकैटभयोः पूर्वं मेदसा संपरिप्लुता ।
ततोऽभ्युपगमाद्राज्ञः पृथोर्वैण्यस्य धीमतः ॥२॥
दुयच्चासीत् समुद्रान्ता मेदिनीति परिश्रुता ।
दुहितृत्वमनुप्राप्ता पृथिवीत्युच्यते ततः ॥३॥
प्रथिता प्रविभक्ता च शोभिता च वसुन्धरा ।
सस्याकरवती राज्ञा पत्तनाकरमालिनी ।
चातुर्वर्ण्यसमाकीर्णा रचिता तेन धीमता ॥४॥
एवं प्रभावो राजासीद्वैण्यः स नृपसत्तमः ।
नमस्यश्चैव पूज्यश्च भूतग्रामेण सर्व्वशः ॥५॥
ब्राह्मणैश्च महाभागैर्वेदवेदाङ्गपारगैः ।
पृथुरेव नमस्कार्य्यो ब्रह्मयोनिः सनातनः ॥६॥
पार्थिवैश्च महाभागैः प्रार्थयद्भिर्महद्यशः ।
आदिराजा नमस्कार्य्यः पृथुर्वैण्यः प्रतापवान् ॥७॥
योधैरपि च संग्रामे प्रार्थयानैर्जयं युधि ।
आदिकर्त्ता नराणां वै नमस्यः पृथुरेव हि ॥८॥

यो हि योद्धा रणं याति कीर्त्तयित्वा पृथुन्नृपं ।
स घोररूपे संग्रामे क्षेमी तरति कीर्त्तिमान् ॥९॥
वैश्यैरपि च राजर्षिर्वैश्यवृत्तिसमास्थितैः ।
पृथुरेव नमस्कार्य्यो वृत्तिदाता महायशाः ॥१०॥
एते वत्सविशेषाश्च दोग्धारः क्षीरमेव च ।
पात्राणि च मयोक्तानि सर्व्वाण्येव यथाक्रमं ॥११॥
ब्रह्मणा प्रथमं दुग्धा पुरा पृथ्वी महात्मना ।
वायुङ्कृत्वा तदा वत्सं वीजानि वसुधातले ॥१२॥
ततः स्वायम्भुवे पूर्वन्तदा मन्वन्तरे पुनः ।
वत्सं स्वायम्भुवं कृत्वा दुग्धा ग्रीष्मेण वै मही ॥१३॥
मनौ स्वारोचिषे दुग्धा मही चैत्रेण धीमता ।
मनुं स्वारोचिषं कृत्वा वत्सं सस्यानि वै पुरा[१] ॥१४॥
उत्तमेऽनुत्तमेनापि दुग्धा देवभुजेन तु ।
मनुङ्कृत्वोत्तमं वत्सं सर्वसस्यानि धीमता ॥१५॥
पुनश्च पञ्चमे[२] पृथ्वी तामसस्यान्तरे मनोः ।
दुग्धेयं तामसं वत्सं कृत्वा तु बलबन्धुना ॥१६॥
चारिष्णवस्य देवस्य संप्राप्ते चान्तरे मनोः ।
दुग्धा मही पुराणेन वत्सञ्चारिष्णवं प्रति ॥१७॥
चाक्षुषेऽपि च सम्प्राप्ते तदा मन्वन्तरे पुनः ।
दुग्धा मही पुराणेन वत्सं कृत्वा तु चाक्षुषं ॥१८॥

---

१ श्लोकोऽयं कचिल्लिखितपुस्तके नास्ति ।
२ तामसस्य चतुर्थमनुत्वात् पञ्चमे इत्ययं पाठो न समीचीनः ।

चाक्षुषस्यान्तरेऽतीते प्राप्ते वैवस्वते पुनः।
वैण्येनेयं मही दुग्धा यथा ते कीर्तितं मया ॥१९॥
एतैर्दुग्धा पुरा पृथ्वी व्यतीतेष्वन्तरेषु वै।
देवादिभिर्म्मनुष्यैश्च तथा भूतादिभिश्च या ॥२०॥
एवं सर्वेषु विज्ञेया ह्यतीतानागतेष्विह।
देवा मन्वन्तरेष्वस्य पृथोस्तु शृणुत प्रजाः ॥२१॥
पृथोस्तु पुत्रौ विक्रान्तौ जज्ञातेऽन्तर्द्धिपालिनौ।
शिखण्डिनी हविर्द्धानमन्तर्द्धानाद् व्यजायत ॥२२॥
हविर्द्धानात् षडाग्नेयी धिषणाऽजनयत् सुतान्।
प्रचीनवर्हिषं शुक्रं गयं कृष्णं व्रजाजिनौ[१] ॥२३॥
प्राचीनवर्हिर्भगवान् महानासीत् प्रजापतिः।
बलश्रुततपोवीर्य्यैः पृथिव्यामेकराड़सौ।
प्राचीनाग्राः कुशास्तस्य तस्मात् प्राचीनवर्ह्यसौ[२] ॥२४॥
समुद्रतनयायान्तु कृतदारः स वै प्रभुः।
महतस्तमसः पारे सवर्णायां प्रजापतेः।
सवर्णाऽधत्त सामुद्री दश प्राचीनवर्हिषः ॥२५॥
सर्व्वे प्रचेतसो नाम धनुर्वेदस्य पारगाः।
अपृथग्धर्म्मचरणास्तेऽतप्यन्त महत्तपः।
दशवर्षसहस्राणि समुद्रसलिलेशयाः ॥२६॥
तपश्चरत्सु पृथिवीं प्रचेतःसु महीरुहाः।
अरक्ष्यमाणामावव्रुर्ब्बभूवाथ प्रजाक्षयः ॥२७॥

---

१ व्रताजिनाविति क०, ङ० च। २ पाठोऽयं न समीचीनः।

प्रत्याहृते तदा तस्मिन् चाक्षुषस्यान्तरे मनोः ।
नाशकन्मारुतो वातुं वृतं खमभवद्द्रुमैः ।
दशवर्षसहस्राणि न शेकुश्चेष्टितुं प्रजाः ॥२८॥
तदुपश्रुत्य तपसा सर्वे युक्ताः प्रचेतसः ।
मुखेभ्यो वायुमग्निञ्च ससृजुर्ज्जातमन्यवः ॥२९॥
उन्मूलानथ तान् वृक्षान् कृत्वा वायुरशोषयत् ।
तानग्निरदहद्घोर एवमासीद्द्रुमक्षयः ॥३०॥
द्रुमक्षयमथो बुद्ध्वा किञ्चिच्छेषेषु शाखिषु ।
उपगम्याब्रवीदेतान् राजा सोमः प्रचेतसः ॥३१॥
दृष्ट्वा प्रयोजनं सर्व्वं लोकसन्तानकारणात् ।
कोपन्त्यजत राजानः सर्व्वे प्राचीनवर्हिषः ॥३२॥
वृक्षाः क्षित्यां जनिष्यन्ति शाम्येतामग्निमारुतौ ।
रत्नभूता तु कन्येयं वृक्षाणां वरवर्णिनी ॥३३॥
भविष्यं जानता ह्येषा मया गोभिर्व्विवर्द्धिता ।
मारिषा नाम नाम्नैषा वृक्षैरेव विनिर्मिता ।
भार्य्या भवतु वो ह्येषा सोमगर्भविवर्द्धिता ॥३४॥
युष्माकं तेजसोऽर्द्धेन मम चार्द्धेन तेजसः ।
अस्यामुत्पत्स्यते विद्वान् दक्षो नाम प्रजापतिः ॥३५॥
स इमां दग्धभूयिष्ठां(१) युष्मत्तेजोमयेन वै ।
अग्निनाग्निसमो भूयः प्रजाः संवर्द्धयिष्यसि ॥३६॥
ततः सोमस्य वचनाज्जगृहुस्ते प्रचेतसः ।
संहृत्य कोपं वृक्षेभ्यः पत्नीं धर्म्मेण मारिषां ॥३७॥

---

१ दुःखभूयिष्ठामिति ख० ।

मारिषायां ततस्ते वै मनसा गर्भमादधुः ।
दशभ्यस्तु प्रचेतोभ्यो मारिषायां प्रजापतिः ॥३८॥
दक्षो जज्ञे महातेजाः सोमस्यांशेन वीर्यवान् ।
असृजन्मानसानादौ[१] प्रजा दक्षोऽथ मैथुनात् ॥३९॥
अचरांश्च चरांश्चैव द्विपदोऽथ चतुष्पदान् ।
विसृज्य मनसा दक्षः पश्चादसृजत स्त्रियः ॥४०॥
ददौ स दश धर्माय कश्यपाय त्रयोदश ।
कालस्य नयने युक्ताः सप्तविंशतिमिन्दवे ॥४१॥
एभ्यो दत्त्वा ततोऽन्या वै चतस्रोऽरिष्टनेमिने ।
द्वे चैव बाहुपुत्राय द्वे चैवाङ्गिरसे तथा ।
कन्यामेकां कृशाश्वाय तेभ्योऽपत्यं निबोधत ॥४२॥
अन्तरं चाक्षुषस्यात्र मनोः षष्ठन्तु हीयते ।
मनोर्वैवस्वतस्यापि सप्तमस्य प्रजापतेः ॥४३॥
तासु देवाः खगा गावो नागा दितिजदानवाः ।
गन्धर्व्वाप्सरसश्चैव जज्ञिरेऽन्याश्च जातयः ॥४४॥
ततः प्रभृति लोकेऽस्मिन् प्रजा मैथुनसम्भवाः ।
सङ्कल्पाद्दर्शनात् स्पर्शात् पूर्वेषां सृष्टिरुच्यते ॥४५॥
ऋषय ऊचुः । देवानां दानवानाञ्च देवर्षीणाञ्च ते शुभः ।
सम्भवः कथितः पूर्वं दक्षस्य च महात्मनः ॥४६॥
प्राणात् प्रजापतेर्जन्म दक्षस्य कथितं त्वया ।
कथं प्राचेतसत्वञ्च पुनर्लेभे महातपाः ॥४७॥
एतन्नः संशयं सूत व्याख्यातुं त्वमिहार्हसि ।

---

१ असृजन्मनसा चादाविति ट० ।

स दौहित्रश्च सोमस्य कथं श्वशुरताङ्गतः ॥४८॥
सूत उवाच। उत्पत्तिश्च निरोधश्च नित्यं भूतेषु सत्तमाः।
ऋषयोऽत्र न मुह्यन्ति विद्यावन्तश्च ये नराः ॥४९॥
युगे युगे भवन्त्येते सर्वे दक्षादयो द्विजाः।
पुनश्चैव निरुध्यन्ते विद्वांस्तत्र न मुह्यति ॥५०॥
ज्यैष्ठ्यं कानिष्ठ्यमप्येषां पूर्वं नासीत् द्विजोत्तमाः।
तप एव गरीयोऽभूत् प्रभावश्चैव कारणं ॥५१॥
इमां विसृष्टिं यो वेद चाक्षुषस्य चराचरं।
प्रजानामायुरुत्तीर्णः स्वर्गलोके महीयते ॥५२॥
एष सर्गः समाख्यातश्चाक्षुषस्य समासतः।
इत्येते षड् विसर्गा हि क्रान्ता मन्वन्तरात्मकाः।
स्वायम्भुवाद्याः संक्षेपाच्चाक्षुषान्ता यथाक्रमं ॥५३॥
एते सर्गा(१) यथाप्रज्ञं प्रोक्ता वै द्विजसत्तमाः।
वैवस्वतनिसर्गेण तेषां ज्ञेयस्तु विस्तरः ॥५४॥
अनन्ता नातिरिक्ताश्च सर्वे सर्गा विवस्वतः।
आरोग्यायुःप्रमाणेन धर्मतःकामतोऽर्थतः।
एतानेव गुणानेति यः पठत्यनसूयकः ॥५५॥
वैवस्वतस्य वक्ष्यामि साम्प्रतस्य महात्मनः।
समासाद्व्यासतः सर्गं ब्रुवतो मे निबोधत ॥५६॥

इति श्रीमहापुराणे वायुप्रोक्ते पृथुवंशानुकीर्त्तनं
नाम द्वितीयोऽध्यायः॥

---

१ सर्व्वे इति क०।

अथ तृतीयोऽध्यायः।

वैवस्वतसर्गवर्णनं।

सूत उवाच। सप्तमे त्वथ पर्य्याये मनोर्वैवस्वतस्य ह।
मारीचात्कश्यपाद्देवा जज्ञिरे परमर्षयः ॥१॥
आदित्या वसवो रुद्रा साध्या विश्वे मरुद्गणाः।
भृगवोऽङ्गिरसश्चैव ह्यष्टौ देवगणाः स्मृताः ॥२॥
आदित्या मरुतो रुद्रा विज्ञेयाः कश्यपात्मजाः।
साध्याश्च वसवो विश्वे धर्म्मपुत्रास्त्रयो गणाः ॥३॥
भृगोस्तु भार्गवो देवो ह्यङ्गिरोऽङ्गिरसः सुतः।
वैवस्वतेऽन्तरे ह्यस्मिन् नित्यं ते छन्दजाः सुराः ॥४॥
एष सर्गस्तु मारीचो विज्ञेयः साम्प्रतः शुभः।
तेजस्वी साम्प्रतस्तेषामिन्द्रो नाम्ना महाबलः ॥५॥
अतीतानागता ये च वर्त्तन्ते ये च साम्प्रतं।
सर्वे मन्वन्तरेन्द्रास्तु विज्ञेयास्तुल्यलक्षणाः ॥६॥
भूतभव्यभवन्नाथः सहस्राक्षः पुरन्दरः।
मघवन्तश्च ते सर्वे शृङ्गिणो वज्रपाणयः।
सर्वैः क्रतुशतेनेष्टं पृथक् शतगुणेन तु ॥७॥
त्रैलोक्ये यानि सत्त्वानि गतिमन्त्यबलानि च।
अभिभूयावतिष्ठन्ते धर्म्माद्यैः कारणैरपि ॥८॥

तेजसा तपसा बुद्ध्या बलश्रुतपराक्रमैः ।
भूतभव्यभवन्नाथा यथा ते प्रभविष्णवः ।
एतत्सर्वं प्रवक्ष्यामि ब्रुवतो मे निबोधत ॥९॥
भूतं भव्यं भविष्यन्तत् स्मृतं लोकत्रयं द्विजैः ।
भूर्लोकोऽयं स्मृतो भूमिरन्तरीक्षं भुवं स्मृतं ।
भव्यं स्मृतं दिवं ह्येतत् तेषां वक्ष्यामि साधनं ॥१०॥
ध्यायता पुत्रकामेन ब्रह्मणाग्रे विभाषितं ।
भूरिति व्याहृतं पूर्वं भूर्लोकोऽयमभूत्तदा ॥११॥
भूसत्तायां स्मृतो धातुस्तथाऽसैा लोकदर्शने ।
भूतत्वाद्दर्शनत्वाच्च भूर्लोकोऽयमभूत्ततः ।
अतोऽयं प्रथमो लोको भूतत्वाद्भूर्द्विजैः स्मृतः ॥१२॥
भूतेऽस्मिन् भवदित्युक्तं द्वितीयं ब्रह्मणा पुनः ।
भवत्युत्पद्यमानेन कालशब्दोऽयमुच्यते ॥१३॥
भवनात्तु भुवर्लोको निरुक्तज्ञैर्निरुच्यते ।
अन्तरीक्षं भुवस्तस्मात् द्वितीयो लोक उच्यते ॥१४॥
उत्पन्ने तु भुवर्लोके तृतीयं ब्रह्मणा पुनः ।
भव्येति व्याहृतं यस्मात् भव्यो लोकस्तदाऽभवत् ॥१५॥
अनागते भव्य इति शब्द एष विभाव्यते ।
तस्माद्भव्यो ह्यसैा लोको नामतस्तु दिवं स्मृतं[१] ॥१६॥
स्वरित्युक्तं तृतीयोऽन्यो भाव्यो लोकस्तदाऽभवत् ।
भाव्य इत्येष धातुर्वै भाव्ये काले विभाव्यते ॥१७॥

---

१ भवनात्तु भुवर्लोक इत्यादिः दिवं स्मृतमित्यन्तः पाठः क०पुस्तके नास्ति ।

भूरितीयं स्मृता भूमिरन्तरीक्षं भुवं स्मृतं।
दिवं स्मृतं तथा भाव्यं त्रैलोक्यस्यैष संग्रहः ॥१८॥
त्रैलोक्ययुक्तैर्व्याहारैस्तिस्रो व्याहृतयोऽभवन्।
नाथ इत्येष धातुर्वै धातुज्ञैः पालने स्मृतः ॥१९॥
यस्माद्भूतस्य लोकस्य भव्यस्य भवतस्तदा।
लोकत्रयस्य नाथास्ते तस्मादिन्द्रा द्विजैः स्मृताः ॥२०॥
प्रधानभूता देवेन्द्रा गुणभूतास्तथैव च।
मन्वन्तरेषु ये देवा यज्ञभाजो भवन्ति हि ॥२१॥
यक्षगन्धर्व्वरक्षांसि पिशाचोरगदानवाः।
महिमानः स्मृता ह्येते देवेन्द्राणान्तु सर्व्वशः ॥२२॥
देवेन्द्रा गुरवो नाथा राजानः पितरो हि ते।
रक्षन्तीमाः प्रजाः सर्व्वा धर्म्मेणेह सुरोत्तमाः ॥२३॥
इत्येतल्लक्षणं प्रोक्तं देवेन्द्राणां समासतः।
सप्तर्षीन् सम्प्रवक्ष्यामि साम्प्रतं ये दिवि स्थिताः ॥२४॥
गाधिजः कौशिको धीमान् विश्वामित्रो महातपाः।
भार्गवो जमदग्निश्च ऊरुपुत्रः प्रतापवान् ॥२५॥
वृहस्पतिसुतश्चापि भारद्वाजो महातपाः।
औतथ्यो गौतमो विद्वान् शरद्वान्नाम धार्मिकः ॥२६॥
स्वायम्भुवोऽत्रिर्भगवान् ब्रह्मकोशस्तु पञ्चमः।
षष्ठो वाशिष्ठपुत्रस्तु वसुमान् लोकविश्रुतः ॥२७॥
वत्सारः काश्यपश्चैव सप्तैते साधुसम्मताः।
एते सप्तर्षयः सिद्धा वर्त्तन्ते साम्प्रतेऽन्तरे ॥२८॥

इक्ष्वाकुश्चैव नाभागो धृष्टः शर्यातिरेव च[१]।
नरिष्यन्तश्च विख्यातो नाभ उद्दिष्ट एव च ॥२९॥
करूषश्च पृषध्रश्च वसुमान् नवमः स्मृतः।
मनोर्वैवस्वतस्यैते नव पुत्राः प्रकीर्त्तिताः।
कीर्त्तिता वै मया ह्येते सप्तमञ्चैतदन्तरं ॥३०॥
इत्येष वै मया पादो द्वितीयः कथितो द्विजाः।
विस्तरेणानुपूर्व्या च भूयः किं वर्णयाम्यहं ॥३१॥

इति श्रीमहापुराणे वायुप्रोक्ते वैवस्वतसर्गवर्णनं नाम तृतीयोऽध्यायः। समाप्तोऽयमनुषङ्गपादः।

———

१ यायातिरेव चेति क०, ङ०, ट० च।

अथ चतुर्थोऽध्यायः ।

प्रजापतिवंशानुकीर्त्तनं ।

ऋषय ऊचुः । श्रुत्वा पादं द्वितीयन्तु क्रान्तं सूतेन धीमता ।
अतस्तृतीयं पप्रच्छ पादं वै शांशपायनः ॥१॥
पादः क्रान्तो द्वितीयोऽयमनुषङ्गेण यस्त्वया ।
तृतीयं विस्तरात्पादं सोपोद्घातं प्रकीर्त्तय ।
एवमुक्तोऽब्रवीत्सूतः प्रहृष्टेनान्तरात्मना ॥२॥
सूत उवाच । कीर्त्तयिष्ये तृतीयञ्च सोपोद्घातं सविस्तरं ।
पादं समुदयाद्विप्रा गदतो मे निबोधत ॥३॥
मनोर्वैवस्वतस्येमं साम्प्रतस्य महात्मनः ।
विस्तरेणानुपूर्व्या च निसर्गं शृणुत द्विजाः ॥४॥
चतुर्युगैकसप्तत्या सङ्ख्यातः पूर्वमेव तु ।
सह देवगणैश्चैव ऋषिभिर्दानवैः सह ॥५॥
पितृगन्धर्व्वयक्षैश्च रक्षोभूतगणैस्तथा(१) ।
मानुषैः पशुभिश्चैव पक्षिभिः स्थावरैः सह ॥६॥
मन्वादिकं भविष्यान्तं आख्यानैर्बहुविस्तरं ।
वक्ष्ये वैवस्वतं सर्गं नमस्कृत्य विवस्वते ॥७॥
आद्ये मन्वन्तरेऽतीताः सर्गाः प्रावर्त्तकाश्च ये ।

---

१ रक्षोभूतगणैरपीति ख०, ङ० च ।

स्वायम्भुवेऽन्तरे पूर्वं सप्तासन् ये महर्षयः ।
चाक्षुषस्यान्तरेऽतीते प्राप्ते वैवस्वते पुनः ॥८॥
दक्षस्य च ऋषीणाञ्च भृग्वादीनां महौजसां ।
शापान्महेश्वरस्यासीत् प्रादुर्भावो महात्मनां ॥९॥
भूयः सप्तर्षयस्ते च उत्पन्नाः सप्त मानसाः ।
पुत्रत्वे कल्पितांश्चैव स्वयमेव स्वयम्भुवा ॥१०॥
प्रजासन्तानकृद्भिस्तैरुत्पद्यद्भिर्महात्मभिः ।
पुनः प्रवर्त्तितः सर्गो यथापूर्वं यथाक्रमं ॥११॥
तेषां प्रसूतिं वक्ष्यामि विशुद्धज्ञानकर्म्मणां ।
समासव्यासयोगाभ्यां यथावदनुपूर्वशः ॥१२॥
येषामन्वयसम्भूतैर्लोकोऽयं सचराचरः ।
पुनः स पूरितः सर्गो ग्रहनक्षत्रमण्डितः ॥१३॥
एतत् श्रुत्वा वचस्तस्य मुनीनां संशयोऽभवत् ।
ततस्तं संशयाविष्टाः सूतं संशयनिश्चये ।
सत्कृत्य परि पप्रच्छुर्मुनयः शंसितव्रताः ॥१४॥
ऋषय ऊचुः । कथं सप्तर्षयः पूर्व्वमुत्पन्नाः सप्त मानसाः ।
पुत्रत्वे कल्पितांश्चैव तन्नो निगद सत्तम ।
ततोऽब्रवीन्महातेजाः सूतः पौराणिकः शुभं ॥१५॥
कथं सप्तर्षयः सिद्धाः[१] ये त्वै स्वायम्भुवेऽन्तरे ।
मन्वन्तरं समासाद्य पुनर्वैवस्वतं किल ॥१६॥

---

१ शुद्धा इति ङ० ।

भवाभिशापात्संविद्धा ह्यप्राप्तास्ते तदा तपः।
उपपन्ना जने लोके सकृदागामिनस्तु ते ॥१७॥
ऊचुः सर्वे ततोऽन्योन्यं जनलोके महर्षयः।
ऊचुरेव महाभागा वारुणे वितते क्रतौ ॥१८॥
सर्वे वयं प्रसूयामश्चाक्षुषस्यान्तरे मनोः।
पितामहात्मजाः सर्वे ततः श्रेयो भविष्यति ॥१९॥
स्वायम्भुवेऽन्तरे शप्ताः सप्तार्थं ते भवेन तु।
जज्ञिरे वै पुनस्ते ह जनलोकाद्दिवं गताः(१) ॥२०॥
देवस्य महतो यज्ञे(२) वारुणीं बिभ्रतस्तनुं।
ब्रह्मणो जुह्वतः शुक्रमग्नौ पूर्वं प्रजेप्सया।
ऋषयो जज्ञिरे पूर्वं द्वितीयमिति नः श्रुतं ॥२१॥
भृगुरङ्गिरा मरीचिः पुलस्त्यः पुलहः क्रतुः।
अत्रिश्चैव वसिष्ठश्च अष्टौ ते ब्रह्मणः सुताः ॥२२॥
तथास्य वितते यज्ञे देवाः सर्वे समागताः।
यज्ञाङ्गानि च सर्वाणि वषट्कारश्च मूर्त्तिमान् ॥२३॥
मूर्त्तिमन्ति च सामानि यजूंषि च सहस्रशः।
ऋग्वेदश्चाभवत्तत्र पदक्रमविभूषितः ॥२४॥
यजुर्वेदश्च वृत्ताढ्य ॐकारवदनोज्ज्वलः।
स्थितो यज्ञार्थसंपृक्तसूक्तब्राह्मणमन्त्रवान् ॥२५॥

---

१ जनलोकादिहागता इति ख०, ङ०, ट० च।
२ देवस्य महतो यज्ञ इति ट०।

सामवेदस्य वृत्ताढ्यः सर्व्वगेयपुरःसरः ।
विश्वावस्वादिभिः सार्द्धं गन्धर्व्वैः सम्भृतोऽभवत् ॥२६॥
ब्रह्मवेदस्तथा घोरैः कृत्याविधिभिरन्वितः ।
प्रत्यङ्गिरसयोगैश्च द्विशरीरशिरोऽभवत्(१) ॥२७॥
लक्षणानि स्वरा स्तोभा निरुक्तस्वरभक्तयः ।
आश्रयस्तु वषट्कारो निग्रहप्रग्रहावपि ॥२८॥
दीप्ता दीप्तिरिला देवी दिशः प्रदिशगीश्वराः(२) ।
देवकन्याश्च पत्न्यश्च तथा मातर एव च ॥२९॥
आयुः सर्वत एवैते देवस्य यजतो मुखे ।
मूर्त्तिमन्तः स्वरूपाख्या वरुणस्य वपुर्भृतः ॥३०॥
स्वयम्भुवस्तु ता दृष्ट्वा रेतः समपतद्भुवि ।
ब्रह्मर्षेर्भावभूतस्य विधानाच्च न संशयः ॥३१॥
कृत्वा जुहाव स्रुग्भ्याञ्च स्रुवेण परिगृह्य च ।
आज्यवत्सुक्रवाञ्चक्रे मन्त्रवच्च पितामहः ॥३२॥
ततः स जनयामास भूतग्रामं प्रजापतिः ।
तस्यार्व्वाक्तेजसस्तस्य यज्ञे लोकेषु तैजसं ।
तमसाभावव्याप्यत्वं तथा सत्त्वं तथा रजः(३) ॥३३॥
सगुणात्तेजसो नित्यं आकाशे तमसि स्थितं ।
तमसस्तेजसत्वाच्च सर्व्वभूतानि जज्ञिरे ॥३४॥

---

१ द्विशरीरशिरस्थितोऽभवदिति ख० ।
२ पाठोऽयं न समीचीनः ।
३ तमसाभावमाप्यत्वमाप्यत्वञ्च तथा रज इति ट० ।

यदा तस्मिन्नजायन्त काले पुत्रास्तु कर्म्मजाः[१]।
आज्यस्थाल्यामुपादाय स्वशुक्रं हुतवांश्च ह ॥२५॥
शुक्रे हुतेऽथ तस्मिंस्तु प्रादुर्भूता महर्षयः।
ज्वलन्तो वपुषा युक्ताः सप्त वै प्रसवैर्गुणैः ॥२६॥
हुते चाग्नौ सकृच्छुक्रे ज्वालाया निःसृतः कविः।
हिरण्यगर्भस्तं दृष्ट्वा ज्वालां भित्त्वा विनिःसृतं।
भृगुस्त्वमिति होवाच यस्मात्तस्मात् स वै भृगुः ॥२७॥
महादेवस्तथोद्भूतं दृष्ट्वा ब्राह्मणमब्रवीत्।
ममैष पुत्रकामस्य दीक्षितस्य त्वऽयं प्रभो।
विजज्ञेऽथ भृगुर्देवो मम पुत्रो भवत्वऽयं ॥२८॥
तथेति समनुज्ञातो महादेवः स्वयम्भुवा।
पुत्रत्वे कल्पयामास महादेवस्तथा भृगुं।
वारुणा भृगवस्तस्मात् तदपत्यञ्च स प्रभुः ॥२९॥
द्वितीयन्तु ततः शुक्रमङ्गारेष्वपतत् प्रभुः।
अङ्गारेष्वङ्गिरोऽङ्गानि संहितानि ततोऽङ्गिराः ॥४०॥
सम्भूतिं तस्य तां दृष्ट्वा वह्निर्ब्रह्माणमब्रवीत्।
रेतोधास्तुभ्यमेवाहं द्वितीयोऽयं ममास्त्विति ॥४१॥
एवमस्त्विति सोऽप्युक्तो ब्रह्मणा सदसत्पतिः।
तस्मादङ्गिरसश्चापि आग्नेया इति नः श्रुतं ॥४२॥
षट्कृत्यस्तु पुनः शुक्रे ब्रह्मणा लोककारिणा[२]।

---

१ सगुणात्तेजस इत्यादिः कर्म्मजा इत्यन्तः पाठः क०, ट० पुस्तके नास्ति।
२ लोकधारिणेति ख०।

कृते समभवंस्तत्र षड्ब्रह्माण इति श्रुतिः ॥४ ३॥
मरीचिः प्रथमस्तत्र मरीचिभ्यः समुत्थितः।
क्रतौ तस्मिन् सुतो जज्ञे यतस्तस्मात्स वै क्रतुः ॥४ ४॥
अहं तृतीय इत्यर्थस्तस्मादत्रिः स कीर्त्त्यते।
केशैश्च निशितैर्भूतः पुलस्त्यस्तेन स स्मृतः ॥४ ५॥
केशैर्लम्बैः[१] समुद्भूतस्तस्मात्तु पुलहः स्मृतः।
वसुमध्यात् समुत्पन्नो वसुमान् वसुधाश्रयः ॥४ ६॥
वशिष्ठ इति तत्त्वज्ञैः प्रोच्यते ब्रह्मवादिभिः।
इत्येते ब्रह्मणः पुत्रा मानसाः षण्महर्षयः ॥४ ७॥
लोकस्य सन्तानकरास्तैरिमा वर्द्धिताः प्रजाः।
प्रजापतय इत्येवं पठ्यन्ते ब्रह्मणः सुताः ॥४ ८॥
अपरे पितरो नाम एतैरेव महर्षिभिः।
उत्पादिता ऋषिगणाः सप्त लोकेषु विश्रुताः ॥४ ९॥
मारीचा भार्गवाश्चैव तथैवाङ्गिरसोऽपरे।
पौलस्त्याः पौलहाश्चैव वाशिष्ठाश्चैव विश्रुताः।
आत्रेयाश्च गणाः प्रोक्ताः पितॄणां लोकविश्रुताः ॥५०॥
एते समासतस्तात पुरैव तु गुणास्त्रयः।
अपूर्व्वाश्च[२] प्रकाशाश्च ज्योतिष्मन्तश्च विश्रुताः ॥५१॥
तेषां राजा यमो देवो यमैर्व्विहितकल्मषाः।

---

१ केशैर्लोलैरिति ङ०, ट० च।
१ अमर्त्ताश्चेति ट०।

अपरे प्रजानां पतयस्तान् शृणुध्वमतन्द्रिताः[१] ॥५२॥
कर्द्दमः कश्यपः शेषो विक्रान्तः सुश्रुवास्तथा ।
बहुपुत्रः कुमारश्च विवस्वान् सशुचिस्तवाः ॥५३॥
प्रचेतसोऽरिष्टनेमिर्बहुलश्च प्रजापतिः ।
इत्येवमादयोऽन्येऽपि बहवश्च प्रजेश्वराः ॥५४॥
कुशोच्चया बालखिल्याः सम्भूताः परमर्षयः ।
मनोजवाः सर्व्वगताः सार्व्वभौमाश्च तेऽभवन् ॥५५॥
जाता भस्मव्यपोहिन्यां ब्रह्मर्षिगणसम्मताः ।
वैखानसा मुनिगणास्तपःश्रुतपरायणाः ॥५६॥
श्रोतोभ्यस्तस्य चोत्पन्नावश्विनौ रूपसम्मितौ ।
विदुर्जन्मात्तरजसो विमला नेत्रसम्भवाः ॥५७॥
ज्येष्ठाः प्रजानां पतयः श्रोतोभ्यस्तस्य जज्ञिरे ।
ऋषयो रोमकूपेभ्यस्तथा स्वेदमलोद्भवाः ॥५८॥
दारुणा हि रुते मासा[२] निर्यासाः पत्तसन्धयः ।
वत्सरा ये लहोरात्राः पित्तं ज्योतिश्च दारुणं ॥५९॥
रौद्रं लोहितमित्याहुर्लोहितं कनकं स्मृतं ।
तन्मैत्रमिति विज्ञेयं धुमश्च पशवः स्मृताः ॥६०॥
येऽर्च्चिषस्तस्य ते रुद्रास्तथादित्याः समुद्भवाः ।
अङ्गारेभ्यः समुत्पन्ना ज्योतिषो दिव्यमानुषाः ॥६१॥

---

१ प्रजानां पतयः सर्व्वे तान् शृणुध्वं समाहिता इति ख० ।
२ पाठोऽयमादर्शसम्मतो मुद्रितः । परन्त्वयं न समीचीनः ।

आदिमानस्य लोकस्य ब्रह्मा ब्रह्मसमुद्भवः ।
सर्वकामदमित्याहुस्तत्र कन्यामुदाहरन् ॥६२॥
ब्रह्मा सुरगुरुस्तत्र त्रिदशैः संप्रसीदति ।
इमे वै जनयिष्यन्ति प्रजाः सर्वाः प्रजेश्वराः ॥६३॥
सर्वे प्रजानां पतयः सर्वे चापि तपस्विनः ।
तत्प्रसादादिमान् लोकान् धारयेयुरिमाः क्रियाः[१] ॥६४॥
इन्द्रं संवर्द्धयामास तत्र तेजो विवर्द्धनं ।
देवेषु वेदविद्वांसः[२] सर्वे राजर्षयस्तथा ॥६५॥
वेदमन्त्रपराः सर्वे प्रजापतिगुणोद्भवाः ।
अनन्तं ब्रह्म सत्यञ्च तपश्च परमं भुवि ॥६६॥
सर्वे हि वयमेते च तवैव प्रसवः प्रभो ।
ब्रह्म च ब्राह्मणाश्चैव लोकाश्चैव चराचराः ॥६७॥
मरीचिमादितः कृत्वा देवाश्च ऋषिभिः सह ।
अपत्यानीह सञ्चिन्त्य तेऽपत्यङ्कामयामहे ॥६८॥
तस्मिन् यज्ञे महाभागा देवाश्च ऋषिभिः सह ।
एतद्वंशसमुद्भूताः स्थानकालाभिमानिनः ॥६९॥
न च तेनैव रूपेण स्थापयेयुरिमाः प्रजाः ।
युगादिनिधनाच्चैव स्थापयेयुरिमाः प्रजाः ॥७०॥
ततोऽब्रवील्लोकगुरुः परमित्यविचारयन् ।

---

१ प्रजा इति ख० ।
२ सर्व्वे वै देवदेवेष्विति क० ।

एवं देवा विनिश्चित्य मया सृष्टा न संशयः ।
भवतां वंशसम्भूताः पुनरेते महर्षयः ॥७१॥
तेषां भृगोः कीर्तयिष्ये वंशं पूर्वमहात्मनः ।
विस्तरेणानुपूर्व्या च प्रथमस्य प्रजापतेः ॥७२॥
भार्या भृगोरप्रतिमे उत्तमेऽभिजने शुभे ।
हिरण्यकशिपोः कन्या दिव्या नाम परिश्रुता ।
पुलोम्नश्चापि पौलोमी दुहिता वरवर्णिनी ॥७३॥
भृगोस्त्वजनयद्दिव्या काव्यं वेदविदां वरं ।
देवासुराणामाचार्यं शुक्रङ्कविसुतं ग्रहं ॥७४॥
स शुक्रस्तोशनाः ख्यातः स्मृतः काव्योऽपि नामतः ।
पितॄणां मानसी कन्या सोमपानां यशस्विनी ।
शुक्रस्य भार्याङ्गी[(१)] नाम विजज्ञे चतुरः सुतान् ॥७५॥
ब्राह्मेण तेजसा युक्तः स जातो ब्रह्मवित्तमः ।
तस्यामेव तु चत्वारः पुत्राः शुक्रस्य जज्ञिरे ॥७६॥
त्वष्टा वरूत्री द्वावेतौ शण्डामर्कौ च तावुभौ ।
ते तदादित्यसङ्काशा ब्रह्मकल्पाः प्रभावतः ॥७७॥
रजनः पृथुरश्मिश्च विद्वान्यश्च बृहद्गिराः ।
वरूत्रिणः सुता ह्येते ब्रह्मिष्ठाः सुरयाजकाः ७८॥
दुज्याधर्म्मविनाशार्थं मनुमेत्याभ्ययोजयन् ।
निरस्यमानं वै धर्मं दृष्ट्वेन्द्रो मनुमब्रवीत् ॥७९॥

---

१ पाठोऽयं चादर्शसम्मतो मुद्रितः ।

एतैरेव तु कामं त्वां प्रापयिष्यामि याजनं[१]।
श्रुत्वेन्द्रस्य तु तद्वाक्यं तस्माद्देशादपाक्रमन् ॥८०॥
तिरोभूतेषु तेष्विन्द्रो धर्मपत्नीञ्च चेतनां।
ग्रहेण मोचयित्वा तु ततः सोऽनुससार तां ॥८१॥
तत इन्द्रविनाशाय यतमानान्यतींस्तु तान्।
तत्रागतान् पुनर्दृष्ट्वा दुष्टानिन्द्रः प्रहन्य तु।
सुष्वाप देवदेवस्य वेद्यां वै दक्षिणे ततः ॥८२॥
तेषान्तु भक्षमाणानां तत्र शालावृकैः सह।
शीर्षाणि न्यपतंस्तानि खर्जूराण्यऽभवंस्ततः ॥८३॥
एवं वरूत्रिणः पुत्रा इन्द्रेण निहताः पुरा।
यजन्यान्देवयानी च शुक्रस्य दुहिताऽभवत् ॥८४॥
त्रिशिरा विश्वरूपस्तु त्वष्टुः पुत्रोऽभवन्महान्।
विश्वरूपानुजश्चापि विश्वकर्म्मा यमः स्मृतः ॥८५॥
भृगोस्तु भृगवो देवा जज्ञिरे द्वादशात्मजाः।
देव्यान्तान् सुषुवे सर्वान् काव्यश्चैवात्मजान्[२] प्रभुः ॥८६॥
भुवनो भावनश्चैव अन्यश्चान्यायतस्तथा।
क्रतुः श्रवाश्च मूर्द्धा च व्यजयो व्यश्रुषश्च यः।
प्रसवश्चाप्यजश्चैव द्वादशोऽधिपतिः स्मृतः ॥८७॥
इत्येते भृगवो देवाः स्मृता द्वादश याज्ञिकाः।
पौलोम्यजनयत्पुत्रं ब्रह्मिष्ठं वसिनं विभुं ॥ ८८ ॥

---

१ याजयन्निति ख०।
२ काव्यस्चैवानुजानिति ङ०, ट० च।

व्याधितः सोऽष्टमे मासि गर्भक्रूरेण कर्म्मणा।
च्यवनाच्च्यवनासोऽथ चेतनस्तु प्रचेतसः।
प्राचेतसाच्च्यवनक्रोधाद्ध्वानं पुरुषादजः[१] ॥८९॥
जनयामास पुत्रौ द्वौ सुकन्यायाञ्च भार्गवः।
आत्मवानं[२] दधीचञ्च[३] तावुभौ साधुसम्मतौ ॥९०॥
सारस्वतः सरस्वत्यां दधीचाच्चोपपद्यते।
रुची पत्नी[४] महाभागा आत्मवानस्य नाहुषी ॥९१॥
तस्य ऊर्वोऋर्षिर्जज्ञे ऊरू भित्त्वा महायशाः।
और्व्वश्चासीदृचीकस्तु दीप्ताग्निसदृशप्रभः ॥९२॥
जमदग्निर्ऋचीकस्य सत्यवत्यां व्यजायत।
भृगोश्च रुचिपर्य्याये[५] रौद्रवैष्णवयोस्तथा ॥९३॥
जमनाद्वैष्णवस्याग्नेर्जमदग्निरजायत।
रेणुका जमदग्नेस्तु शक्रतुल्यपराक्रमं।
ब्रह्मक्षत्त्रमयं रामं सुषुवेऽमिततेजसं ॥९४॥
और्वस्यासीत्पुत्रशतं जमदग्निपुरोगमं।
तेषां पुत्रसहस्राणि भार्गवाणां परस्परात् ॥९५॥
ऋष्यन्तरेषु वै वाह्या वहवो भार्गवाः स्मृताः।

---

१ श्लोकार्द्धमिदं न समीचीनं।
२ आत्मानं वेति ङ०।
३ दधीचिश्चेति ख०।
४ रुचिपत्नीति ख०।
५ रुचिपर्य्यासे इति ङ०।

वत्सो विश्वोऽश्विवेणश्च[१] पाण्डुः पथ्यः सशौनकः।
गोत्रेण सप्तमा ह्येते पत्ता ज्ञेयास्तु भार्गवाः ॥९६॥
शृणुताङ्गिरसो वंशमग्नेः पुत्रस्य धीमतः।
यस्यान्ववाये सम्भूता भारद्वाजाः सगौतमाः।
देवाश्चाङ्गिरसो मुख्यास्त्रिषुमन्तो महौजसः ॥९७॥
सुरूपा चैव मारीची कार्द्दमी च तथा स्वराट्।
पथ्या च मानवी कन्या तिस्रो भार्य्यास्त्वथर्व्वणः।
इत्येताङ्गिरसः पत्यस्तासु वक्ष्यामि सन्ततिं ॥९८॥
अथर्व्वणस्तु दायादास्तासु जाताः कुलोद्वहाः।
उत्पन्ना महता चैव तपसा भावितात्मनां ॥९९॥
वृहस्पतिः सुरूपायां गौतमः सुषुवे स्वराट्।
अबन्ध्यं वामदेवञ्च उतथ्यमुशिजन्तथा ॥१००॥
धिष्णुः पुत्रस्तु पथ्यायां संवर्त्तश्चैव मानसः।
विचित्तश्च तथायस्यः शरद्वांश्चाप्युतथ्यजः ॥१०१॥
अशिजो दीर्घतमा वृहदुत्थो वामदेवजः।
धिष्णोः पुत्रः सुधन्वान ऋषभश्च सुधन्वनः ॥१०२॥
रथकाराः स्मृता देवा ऋषयो ये परिश्रुताः।
वृहस्पतेर्भरद्वाजो विश्रुतः सुमहायशाः ॥१०३॥
अङ्गिरसस्तु संवर्त्तो देवानङ्गिरसः शृणु।
वृहस्पतेर्यवीर्यांसो देवा ह्यङ्गिरसः स्मृताः ॥१०४॥
औरसाङ्गिरसः पुत्राः सुरूपायां विजज्ञिरे।

---

१ पाठोऽयं आदर्शसम्मतो मुद्रितः।

श्रोदार्यायुर्दनुर्दक्षो दर्भः प्राणस्तथैव च ।
हविष्मांश्च हविष्णुश्च क्रतुः सत्यश्च ते दश ॥१०५॥
अयस्यस्तु उतथ्यश्च वामदेवस्तथोशिजः ।
भारद्वाजाः शाङ्कृतिका गार्ग्यकान्वरथीतराः ॥१०६॥
मुद्गला विष्णुवृद्धाश्च हरिता वायवस्तथा ।
तथा भाचा भरद्वाजा आर्षभाः किम्भयास्तथा ॥१०७॥
एते ह्यङ्गिरसः पक्षा विज्ञेया दश पञ्च च ।
स्त्र्यन्तरेषु वै वाह्या वहवोऽङ्गिरसः स्मृताः ॥१०८॥
मारीचं परिवक्ष्यामि वंशमुत्तमपूरुषम् ।
यस्यान्ववाये सम्भूतं जगत् स्थावरजङ्गमं ॥१०९॥
मरीचिरापश्चकमे ताभिध्यायन् प्रजेप्सया[१] ।
पुत्रः सर्व्वगुणोपेतः प्रजावान् सुरुचिर्दितिः ।
संपूज्यते प्रशस्तायां मनसा भाविता प्रभुः ॥११०॥
आहूताश्च ततः सर्वा आपः समवसत् प्रभुः ।
तासु प्रणिहितात्मानमेकः सोऽजनयत् प्रभुः ॥१११॥
पुत्रमप्रतिमन्नाम्नाऽरिष्टनेमिः प्रजापतिः ।
पुत्रं मरीचं सूर्याभं वधोवेशो[२] व्यजीजनत् ॥११२॥
प्रध्यायन् हि सतां वाचं पुत्रार्थी सलिले स्थितः ।
सप्तवर्षसहस्राणि ततः सोऽप्रतिमोऽभवत् ॥११३॥
कश्यपः सवितुर्विद्वांस्तेन सः[३] ब्रह्मणः समः ।

---

१ प्रजेच्छयेति ख० ।
२ पाठोऽयमसमीचीनः ।
३ तेजसेति ख० ।

मन्वन्तरेषु सर्व्वेषु ब्राह्मणांशेन जायते ॥११४॥
कन्यानिमित्तमित्युक्ते दक्षेण कुपिताः प्रजाः ।
अपिबत्स तदा कश्यं कश्यं मद्यमिहोच्यते ॥११५॥
हास्येकसा हि[1] विज्ञेया ब्रह्मणः कश्य उच्यते ।
कश्यं मद्यं स्मृतं विप्रैः कश्यपानात्तु कश्यपः ॥११६॥
करोति नाम यद्वाचो वाचं क्रूरमुदाहृतं ।
दक्षाभिशप्तः कुपितः कश्यपस्तेन सोऽभवत् ॥११७॥
तस्माच्च कश्यपेनोक्तो ब्रह्मणा परमेष्ठिना ।
तस्माद्दक्षः कश्यपाय कन्यास्ताः प्रत्यपद्यत ।
सर्वाश्च ब्रह्मवादिन्यः सर्वास्ता लोकमातरः ॥११८॥
इत्येतमृषिसर्गन्तु पुण्यं यो वेद वारुणं ।
आयुष्मान् पुण्यवान् हृष्टः सुखमाप्नोत्यनुत्तमं ।
धारणात् श्रवणाच्चैव सर्वपापैः प्रमुच्यते ॥११९॥
अथाब्रुवन् पुनः सर्वे मुनयो रोमहर्षणं ।
विनिवृत्ते प्रजासर्गे षष्ठे वै चाक्षुषस्य ह ।
निसर्गः सम्प्रवृत्तोऽयं मनोर्वैवस्वतस्य ह ॥१२०॥
सूत उवाच । प्रजाः सृजेति व्यादिष्टः स्वयं दक्षः स्वयम्भुवा ।
ससर्ज दक्षो भूतानि गतिमन्ति ध्रुवाणि च ।
उपस्थितेऽन्तरे ह्यस्मिन् मनोर्वैवस्वतस्य ह ॥१२१॥
ततः प्रवृत्तो दक्षस्तु प्रजाः स्रष्टुञ्चतुर्विधाः ।
जरायुजा अण्डजाश्च उद्भिज्जाः स्वेदजास्तथा ॥१२२॥

---

१ पाठोयमादर्शसम्मतो मुद्रितः। परन्त्वयमसमीचीनः।

दशवर्षसहस्राणि तप्त्वा घोरं महत्तपः।
सम्भावितो योगबलैरणिमाद्यैर्विशेषतः ॥१२३॥
आत्मानं व्यभजत् श्रीमान् मनुष्योरगराक्षसान्।
देवासुरसगन्धर्वान् दिव्यसंहननप्रजान्।
ईश्वरानात्मनस्तुल्यान् रूपद्रविणतेजसा ॥१२४॥
तथैवान्यानि मुदितो गतिमन्ति ध्रुवाणि च।
मानसान्येव भूतानि सिसृक्षुर्विविधाः प्रजाः ॥१२५॥
ऋषीन् देवान् सगन्धर्वान् मनुष्योरगराक्षसान्।
यक्षभूतपिशाचांश्च वयःपशुमृगांस्तथा ॥१२६॥
यदास्य मनसा सृष्टा न व्यवर्द्धन्त ताः प्रजाः।
अपध्याता भगवता महादेवेन धीमता ॥१२७॥
मैथुनेन च भावेन सिसृक्षुर्विविधाः प्रजाः।
असिक्नीं(१) चावहत्पत्नीं वीरणस्य प्रजापतेः ॥१२८॥
सुतां सुमहता युक्तां तपसा लोकधारिणीं।
यया धृतमिदं सर्व्वं जगत् स्थावरजङ्गमं ॥१२९॥
अत्राप्युदाहरन्तीमौ श्लोकौ प्राचेतसं प्रति।
दक्षस्योद्वहतो भार्यामसिक्नीं वीरणीं परां(२) ॥१३०॥
कूपानां नियुतं दक्षः सर्पिणां साभिमानिनां।
नदीगिरिषु सर्व्वांस्ताः पृष्ठतोऽनुययौ प्रभुः ॥१३१॥
तं दृष्ट्वा ऋषिभिः प्रोक्तं प्रतिष्ठास्यति वै प्रजाः।

---

१ असृक्नीमिति ट०।
२ पुरेति ट०।

प्रथमात्र द्वितीया तु दक्षस्येह प्रजापतेः ॥१२२॥
तथागच्छद् यथाकालं कृपानां नियुते तु सः ।
असिक्नीं वैरिणीं यत्र दक्षः प्राचेतसोऽवहत् ॥१२३॥
अथ पुत्रसहस्रं स वैरिण्यामभितौजसा ।
असिक्न्यां जनयामास दक्षः प्राचेतसः प्रभुः ॥१२४॥
तांस्तु दृष्ट्वा महातेजाः स विवर्द्धयिषून् प्रजाः ।
देवर्षिः प्रियसंवादो नारदो ब्रह्मणः सुतः ।
नाशाय वचनं तेषां शापायैवात्मनोऽब्रवीत् ॥१२५॥
यः स वै प्रोच्यते विप्रः कश्यपस्येति कृत्रिमः ।
दक्षशापभयाद्भीतो ब्रह्मर्षिस्तेन कर्म्मणा ॥१२६॥
यः कश्यपसुतस्याथ परमेष्ठी व्यजायत ।
मानसः कश्यपस्येह दक्षशापभयात् पुनः ॥१२७॥
तस्मात् स कश्यपस्याथ द्वितीयं मानसोऽभवत् ।
स हि पूर्व्वसमुत्पन्नो नारदः परमेष्ठिनः ॥१२८॥
येन दक्षस्य पुत्रास्ते हर्य्यश्वा इतिविश्रुताः ।
निन्दार्थं नाशिताः सर्व्वे विनष्टास्र न संशयः ॥१२९॥
तस्योद्यतस्तदा दक्षः क्रुद्धो नाशाय वै प्रभुः ।
ब्रह्मर्षीन् वै पुरस्कृत्य याचितः परमेष्ठिना ॥१४०॥
ततोऽभिसन्धितं चक्रे दक्षस्तु परमेष्ठिना ।
कन्यायां नारदो मह्यं तव पुत्रो भवत्विति ॥१४१॥
ततो दक्षः सुतां प्रादात् प्रियां वै परमेष्ठिने ।
तस्मात् स नारदो जज्ञे भूयः शान्तो भयादृषिः ॥१४२॥

तदुपश्रुत्य विप्रास्ते जातकौतूहलाः पुनः।
अपृच्छन् वदतां श्रेष्ठं सूतं तत्त्वार्थदर्शिनं ॥१४३॥

ऋषय ऊचुः। कथं विनाशिताः पुत्रा नारदेन महात्मना।
प्रजापतिसुतास्ते वै प्रजाः प्राचेतसात्मजाः ॥१४४॥
स तथ्यं वचनं श्रुत्वा जिज्ञासासम्भवं शुभं[१]।
प्रोवाच मधुरं वाक्यं तेषां सर्वगुणान्वितं ॥१४५॥
दक्षपुत्रास्तु हर्य्यश्वा विवर्द्धयिषवः प्रजाः।
समागता महावीर्या नारदस्तानुवाच ह ॥१४६॥
बालिशा वत यूयं वै न प्रजानीथ भूतलं।
अन्तमूर्द्धमधश्चैव कथं स्रक्ष्यथ वै प्रजाः ॥१४७॥
किं प्रमाणन्तु मेदिन्याः स्रष्टव्यानि तथैव च।
अविज्ञायेह स्रष्टव्यं अन्यथा किं नु स्रक्ष्यथ।
अल्पं वापि बहुर्वापि तत्र दोषस्तु दृश्यते ॥१४८॥
ते तु तद्वचनं श्रुत्वा प्रयाता सर्व्वतो दिशः।
वायुन्तु समनुप्राप्य[२] गतास्ते वै पराभवं ॥१४९॥
अद्यापि न निवर्त्तन्ते भ्रमन्तो वायुमिश्रिताः।
एवं वायुपथं प्राप्य भ्रमन्ते ते महर्षयः ॥१५०॥
स्वेषु पुत्रेषु नष्टेषु दक्षः प्राचेतसः पुनः।
वैरिण्यामेव पुत्राणां सहस्रमसृजत् प्रभुः ॥१५१॥
प्रजा विवर्द्धयिषवः शवलाश्वाः पुनस्तु ते।

---

१ पुनरिति ख०।
२ वायुन्तु नाशनं प्राप्येति ख०, ङ०, ट० च।

पूर्वमुक्तं वचस्तत्र श्राविता नारदेन ह ॥१५२॥
तच्छ्रुत्वा वचनं सर्व्वे कुमारास्ते महौजसः।
अन्योऽन्यमूचुस्ते सर्व्वे सम्यगाह महानृषिः।
भ्रातॄणां पदवी चैव गन्तव्या नात्र संशयः ॥१५३॥
ज्ञात्वा प्रमाणं पृथ्व्याश्च सुखं स्रच्यामहे प्रजाः।
तेऽपि तेनैव मार्गेण प्रयाताः सर्व्वतो दिशम्।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः ॥१५४॥
ततः प्रभृति वै भ्राता भ्रातुरन्वेषणे रतः।
प्रयातो नश्यति तथा तन्न कार्य्यं विजानता ॥१५५॥
नष्टेषु शबलाश्वेषु दक्षः क्रुद्धोऽभवद्विभुः।
नारदं नाशमेहीति गर्भवासं वसेति च ॥१५६॥
तथा तेष्वपि नष्टेषु महात्मसु पुरा किल।
षष्टिकन्याऽसृजद्दक्षो वैरिण्यामेव विश्रुताः ॥१५७॥
तास्तदा प्रतिजग्राह पत्न्यर्थे कश्यपः प्रभुः।
धर्म्मः सोमस्तु भगवांस्तथैवान्ये महर्षयः ॥१५८॥
इमां विसृष्टिं दक्षस्य कृत्स्नां यो वेद तत्त्वतः।
आयुष्मान् कीर्त्तिमान् धन्यः प्रजावांश्च भवत्युत[१] ॥१५९॥

इति श्रीमहापुराणे वायुप्रोक्ते प्रजापतिवंशानुकीर्त्तनं नाम चतुर्थोऽध्यायः।

---

१ अत्राध्याये बहुषु स्थानेषु पूर्व्वापरसङ्गतिराहित्येनासमीचीनत्वेन च पाठः प्रतिभाति।

अथ पञ्चमोऽध्यायः ।

कश्यपीयप्रजासर्गः ।

ऋषय ऊचुः। देवानां दानवानाञ्च दैत्यानाञ्चैव सर्व्वशः ।
उत्पत्तिं विस्तरेणेह ब्रूहि वैवस्वतेऽन्तरे ॥१॥
सूत उवाच। धर्म्मस्य तावद् वक्ष्यामि निसर्गं तं निबोधत।
अरुन्धती वसुर्यामी लम्बा भानुर्मरुत्वती ॥२॥
सङ्कल्पा च मुहूर्त्ता च साध्या विश्वा तथैव च।
धर्म्मपत्न्यो दश त्वेता दक्षः प्राचेतसो ददौ ॥३॥
साध्या पुत्रांस्तु धर्मस्य साध्यान् द्वादश जज्ञिरे ।
साध्या नाम महाभागाश्छन्दजा यज्ञभागिनः ।
देवेभ्यस्तान् परान् देवान् देवज्ञाः परिचक्षिरे ॥४॥
ब्रह्मणो वै मुखात् सृष्टा जया देवाः प्रजेप्सया ।
सर्व्वे मन्त्रशरीरास्ते स्मृता मन्वन्तरेष्विह ॥५॥
दर्शश्च पौर्णमासश्च वृहद्यश्च रथन्तरं ।
चित्तिश्चैव विचित्तिश्च आकूतिः कूतिरेव च ॥६॥
विज्ञाता चैव विज्ञातो मनो यज्ञश्च ते स्मृताः ।
नामान्येतानि तेषां वै जयानां प्रथितानि च ॥७॥
ब्रह्मशापेन ते जाताः पुनः स्वायम्भुवे जिताः ।
स्वारोचिषे वै तुषिताः सत्याश्चैवोत्तमे पुनः ॥८॥
तामसे हरयो नाम वैकुण्ठा रैवताऽन्तरे ।

साध्याश्च चाक्षुषे नाम्ना छन्दजा जज्ञिरे सुराः ॥९॥
धर्मपुत्रा महाभागाः साध्या ये द्वादशामराः ।
पूर्वं स्म अनुस्तूयन्ते चाक्षुषस्यान्तरे मनोः ॥१०॥
स्वारोचिषेऽन्तरेऽतीता देवा ये वै महौजसः ।
तुषिता नाम तेऽन्योन्यमूचुर्वै चाक्षुषेऽन्तरे ॥११॥
किञ्चिच्छिष्टे तदा तस्मिन् देवा वै तुषिताऽब्रुवन् ।
इतरेतरं महाभागान् वयं साध्यान् प्रविश्य वै ।
मन्वन्तरे भविष्यामस्तन्नः श्रेयो भविष्यति ॥१२॥
एवमुक्त्वा तु ते सर्व्वे चाक्षुषस्याऽन्तरे मनोः ।
तस्माद्द्वादशसम्भूतान् धर्म्मान् स्वायम्भुवात् पुनः ॥१३॥
नरनारायणौ तत्र जज्ञाते पुनरेव हि ।
विपश्चिदिन्द्रो यश्चासीत् तथा सत्यो हरिश्च तौ ।
स्वारोचिषेऽन्तरे पूर्वमास्तान्तौ तुषितौ सुरौ ॥१४॥
तुषितानान्तु साध्यत्वे नामान्येतानि वक्ष्यते ।
मनोऽनुमन्ता प्राणश्च नरो यानश्च[१] वीर्यवान् ॥१५॥
चित्तिर्हयो नयश्चैव हंसो नारायणस्तथा ।
प्रभवोऽथ विभुश्चैव[२] साध्या द्वादश जज्ञिरे ॥१६॥
स्वायम्भुवेऽन्तरे पूर्वं ततः स्वारोचिषे पुनः ।
नामान्यासन् पुनस्तानि तुषितानां निबोधत ॥१७॥
प्राणोऽपानस्तथोदानः समानो व्यान एव च ।

---

१ नरोपानश्चेति ख०, ङ०, ट०, ठ० च ।
२ प्रभवो विभवश्चैवेति क० ।

चक्षुः श्रोत्रं तथा[१] प्राणः स्पर्शो बुद्धिर्मनस्तथा ॥१८॥
प्राणापानावुदानश्च समानो व्यान एव च।
नामान्येतानि पूर्व्वन्तु तुषितानां स्मृतानि ह ॥१९॥
वसोस्तु वसवः पुत्राः साध्यानामनुजाः स्मृताः।
धरो ध्रुवश्च सोमश्च आपश्चैवानलोऽनिलः।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥२०॥
धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा।
ध्रुवपुत्रो भवो नाम्ना कालो लोकप्रकालनः ॥२१॥
सोमस्य भगवान् वर्चा बुधश्च ग्रहबोधनः।
रोहिण्यां तौ समुत्पन्नौ त्रिषु लोकेषु विश्रुतौ ॥२२॥
धारोर्मिकलिलाश्चैव त्रयश्चन्द्रमसः सुताः।
आपस्य पुत्रो वैतण्ड्यः श्रमः शान्तस्तथैव च ॥२३॥
स्कन्दः सनत्कुमारश्च जज्ञे पादेन तेजसः।
अग्निपुत्रः कुमारस्तु शरस्तम्बे व्यजायत।
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजाः ॥२४॥
अनिलस्य शिवा भार्य्या तस्याः पुत्रो मनोजवः।
अविज्ञातगतिश्चैव द्वौ पुत्रावनिलस्य च ॥२५॥
प्रत्यूषस्य विदुः पुत्र ऋषिर्नाम्ना तु देवलः।
द्वौ पुत्रौ देवलस्यापि क्षमावन्तौ मनीषिणौ ॥२६॥
बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मचारिणी।

---

१ नसः इति ख०।

योगसिद्धा जगत्कृत्स्नमसक्ता विचरत्युत ॥२७॥
प्रभासस्य तु या भार्य्या वसूनामष्टमस्य ह ।
विश्वकर्मा सुतस्तस्या जातः शिल्पिप्रजापतिः ॥२८॥
स कर्त्ता सर्वशिल्पानां त्रिदशानाञ्च वर्द्धकिः ।
भूषणानाञ्च सर्वेषां कर्त्ता कारयिता च सः ॥२९॥
सर्वेषाञ्च विमानानि दैवतानां करोति सः ।
मानुषाश्चोपजीवन्ति यस्य शिल्पानि शिल्पिनः ॥३०॥
विश्वेदेवास्तु विश्वाया जज्ञिरे दश विश्रुताः ।
क्रतुर्दक्षः श्रवः सत्यः कालः कामो धुनिस्तथा[१] ॥३१॥
कुरुवान् प्रभवांश्चैव रोचमानश्च ते दश ।
धर्मपुत्राः स्मृता ह्येते विश्वायां जज्ञिरे शुभाः ॥३२॥
मरुत्वत्यां मरुत्वन्तो भानवो भानुजाः स्मृताः ।
मुहूर्त्ताश्च मुहूर्त्तायां घोषं लम्बा व्यजायत ॥३३॥
सङ्कल्पायान्तु संजज्ञे विद्यान् सङ्कल्प एव च ।
नागवीथ्यस्तु[२] जाम्याञ्च पथत्रयसमाश्रिताः[३] ॥३४॥
पृथिवीविषयं सर्व्वमरुन्धत्यां व्याजायत ।
एष सर्गः समाख्यातो विद्वान् धर्मस्य शाश्वतः ॥३५॥
मुहूर्त्ताश्चैव तिथ्यश्च पतिभिः सह सुव्रताः ।
नामतः संप्रवक्ष्यामि ब्रुवतो मे विबोधत ॥३६॥

---

१ मधुस्तथेति ख० ।
२ नव वीथ्यस्त्विति ख०, ङ०, ट०, ठ० च ।
३ पथत्रयसमाश्रिता इति ङ० ।

अहोरात्रविभागश्च नक्षत्राणि समासतः ।
मुहूर्त्ताः सर्वनक्षत्रा अहोरात्रविदस्तथा ॥३७॥
अहोरात्रकलानान्तु षट्शतीत्यधिका स्मृता ।
रवेर्गतिविशेषेण सर्वेषु ऋतुमिच्छतः ॥३८॥
ततो वेदविदश्चैतां तिथिमिच्छन्ति पर्वसु ।
अविशेषेषु कालेषु योज्यः स पितृदानतः ॥३९॥
रौद्रः सार्वस्तथा मैत्रः पिण्डावासव एव च ।
आप्योऽथ वैश्वदेवश्च ब्राह्मो मध्याह्नसंश्रितः ॥४०॥
प्राजापत्यस्तथा ऐन्द्रः[१] तथेन्द्रो निर्ऋतिस्तथा ।
वारुणश्च तथार्य्यम्णो भागाश्चापि दिनाश्रिताः ॥४१॥
एते दिनमुहूर्त्ताश्च दिवाकरविनिर्मिताः ।
शङ्कुच्छायाविशेषेण वेदितव्याः प्रमाणतः ॥४२॥
अजास्तथाहिर्बुध्नश्च पूषा हि यमदेवताः ।
आग्नेयश्चापि विज्ञेयः प्राजापत्यस्तथैव च ॥४३॥
ब्रह्मसौम्यस्तथादित्यो बार्हस्पत्योऽथ वैष्णवः ।
सावित्रोऽथ तथा त्वाष्ट्रो वायव्यश्चेति संग्रहः ॥४४॥
एकरात्रिमुहूर्त्ताः स्युः क्रमोक्ता दश पञ्च च ।
इन्दोर्गत्युदया ज्ञेया नालिकाः पादिकास्तथा ।
कालावस्थास्त्विमास्त्वेते मुहूर्त्ता देवताः स्मृताः ॥४५॥
सर्वग्रहाणां त्रीण्येव स्थानानि विहितानि च ।
दक्षिणोत्तरमध्यानि तानि विद्याद् यथाक्रमं ॥४६॥

---

१ तथोपेन्द्र इति क० ।

स्थानं जारद्गवं मध्ये तथैरावतमुत्तरं।
वैश्वानरं दक्षिणतो निर्द्दिष्टमिह तत्त्वतः ॥४७॥
अश्विनी कृत्तिका याम्या नागवीथिरिति स्मृता।
पुष्योऽश्लेषापुनर्व्वसू वीथिरैरावती मता।
तिस्रस्तु वीथयो ह्येता उत्तरे मार्ग उच्यते ॥४८॥
पूर्वोत्तरे फाल्गुन्यौ च मघा चै वार्य्यमी स्मृता।
हस्तचित्रे तथा स्वाती गोवीथीत्यभिशब्दिता ॥४९॥
ज्येष्ठा विशाखानुराधा वीथी जारद्गवी स्मृता।
एतास्तु वीथयस्तिस्रो मध्यमे मार्ग उच्यते ॥५०॥
मूलञ्चाषाढे द्वे चापि अजवीथ्यभिशब्दिता।
श्रवणञ्च धनिष्ठा च गार्गी शतभिषक्तथा ॥५१॥
वैश्वानरी भाद्रपदे रेवती चैव कीर्त्तिता।
स्मृता वीथ्यस्तु तिस्रस्ता मार्गे वै दक्षिणे बुधैः ॥५२॥
सप्तविंशत्तु याः कन्या दक्षः सोमाय ता ददौ।
सर्व्वा नक्षत्रनाम्न्यस्ता ज्योतिषे चैव कीर्त्तिताः।
तासामपत्यान्यभवन् दीप्तान्यमिततेजसा ॥५३॥
यास्तु शेषास्तदा कन्याः प्रतिजग्राह कश्यपः।
चतुर्दश महाभागाः सर्व्वास्ता लोकमातरः ॥५४॥
अदितिर्दितिर्दनुः काला अरिष्टा सुरसा तथा[१]।
सुरभिर्विनता चैव ताम्रा क्रोधवशा इरा[२]।

---

१ अदितिर्दितिर्दनुर्दावा अरिष्ठा नायुषस्तथेति ङ०, ट० च।
२ सुरभिर्विनता नाम्ना मुनिः क्रोधवशा इरेति ख०। क्रोशवशा इरेति ङ०।

कद्रुर्मुनिश्च धर्म्मज्ञः प्रजास्तासां निबोधत ॥५५॥
चारिष्णवेऽन्तरेऽतीते ये द्वादश पुरोगमाः ।
वैकुण्ठा नाम ते साध्या बभूवुश्चाक्षुषेऽन्तरे ॥५६॥
उपस्थितेऽन्तरे ह्यस्मिन् पुनर्वैवस्वतस्य ह ।
आराधिता ह्यदित्या ते समेत्याहुः परस्परं ॥५७॥
एतामेव महाभागामदितिं संप्रविश्य वै ।
वैवस्वतेऽन्तरे ह्यस्मिन् योगादर्द्धेन चेतसः ॥५८॥
गच्छामः पुत्रतामस्यास्तन्नः श्रेयो भविष्यति ।
अदित्यास्तु प्रसूतानामादित्यत्वं भविष्यति ॥५९॥
एवमुक्ता तु ते सर्व्वे चाक्षुषस्याऽन्तरे मनोः ।
जज्ञिरे द्वादशादित्या मारीचात् कश्यपात्पुनः ॥६०॥
शतक्रतुश्च विष्णुश्च जज्ञाते पुनरेव हि ।
वैवस्वतेऽन्तरे ह्यस्मिन् नरनारायणौ सुरौ ॥६१॥
तेषामपि हि देवानां निधनोत्पत्तिरुच्यते ।
यथा सूर्यस्य लोकेऽस्मिन् उदयास्तमयावुभौ ।
प्रजापतेश्च विष्णोश्च भवस्य(१) च महात्मनः ॥६२॥
श्रेष्ठानुश्रविके यस्माच्छक्राः शब्दादिलक्षणे ।
अष्टात्मकेऽणिमाद्ये च तस्मात्ते जज्ञिरे सुराः ॥६३॥
इत्येष विषये रागः सम्भूत्याः कारणं स्मृतं ।
ब्रह्मशापेन सम्भूता जयाः स्वायम्भुवे जिताः ॥६४॥
स्वारोचिषे वै तुषिताः सत्याश्चैवोत्तमे पुनः ।

---

१ हरस्येति ख० ।

तामसे हरयो देवा जातास्तारिष्णवे तु वै ।
वैकुण्ठाश्चाक्षुषे साध्या आदित्याः साम्प्रते पुनः ॥६५॥
धाताऽर्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ।
इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः ॥६६॥
ततस्त्वष्टा ततो विष्णुरजघन्योऽजघन्यजः ।
इत्येते द्वादशादित्याः कश्यपस्य सुताः स्मृताः ॥६७॥
सुरभी कश्यपाद्रुद्रानेकादश विजज्ञिरे ।
महादेवप्रसादेन तपसा भाविता सती ॥६८॥
अङ्गारकं तथा सर्पं निर्ऋतिं सदसत्पतिं ।
अजैकपादहिर्बुध्नमूर्द्धकेतुं ज्वरं तथा ॥६९॥
भुवनञ्चेश्वरं मृत्युं कपालञ्चैव[१] विश्रुतं ।
देवानेकादशैतांस्तु रुद्रांस्त्रिभुवनेश्वरान् ।
तपसा तेन महता सुरभी तानजीजनत् ॥७०॥
ततो दुहितरावन्ये सुरभी द्वे व्यजायत ।
रोहिणी चैव रुद्राभा गान्धारी च[२] यशस्विनी ॥७१॥
रोहिण्यां जज्ञिरे कन्यास्चतस्रो लोकविश्रुताः ।
सुरूपा हंसकीला च[३] भद्रा कामदुघा तथा ।
सुषुवे कामदुघा तु सुरूपा तनयद्वयं ॥७२॥
हंसकीला नृपमृषीन्[४] भद्रायास्तु व्यजायत ।

---

१ कापालञ्चैवेति ख० ।
२ गान्धर्व्वी चेति ङ० ।
३ हंसकाली चेति क० ।
४ पाठोऽयं न समीचीनः ।

विश्रुतास्तु महाभागा गन्धर्व्वा वाजिनः सुताः ॥७३॥
उच्चैःश्रवास्तदा जाताः खेचरास्ते मनोजवाः ।
श्वेताः श्येनाः पिशङ्गाश्च सारङ्गा हरितार्जुनाः ।
रुद्रा देवोपवाह्यास्ते गन्धर्व्वयोनयो हयाः ॥७४॥
भूयो जज्ञे सुरभ्यास्तु श्रीमान् चन्द्राभसुप्रभः ।
स्रग्वी ककुद्मी द्युतिमानमृतालयसम्भवः ।
सुरभ्यनुमते दत्तो ध्वजो माहेश्वरस्तु सः ॥७५॥
इत्येते कश्यपसुता रुद्रादित्याः प्रकीर्त्तिताः ।
धर्मपुत्राः स्मृताः साध्या विश्वे च वसवस्तथा ॥७६॥
अरिष्टनेमिपत्नीनामपत्यानीह षोडश ।
बहुपुत्रस्य विदुषश्चतस्रो विद्युतः स्मृताः ।
प्रत्यङ्गिरसजाः श्रेष्ठा ऋचो ब्रह्मर्षिसत्कृताः ॥७७॥
कृशाश्वस्य तु देवर्षेर्देवप्रहरणाः स्मृताः ।
एते युगसहस्रान्ते जायन्ते पुनरेव हि ॥७८॥
सर्वे देवगणा विप्रास्त्रयस्त्रिंशत्तु छन्दजाः ।
एतेषामपि देवानां निरोधोत्पत्तिरुच्यते ॥७९॥
यथा सूर्यस्य लोकेऽस्मिन् उदयास्तमयावुभौ ।
एते देवनिकायास्ते सम्भवन्ति युगे युगे ॥८०॥
ऋषय ऊचुः । साध्याश्च वसवो विश्वे रुद्रादित्यास्तथैव च ।
अभिजात्या प्रभावैश्च कर्मभिश्चैव विश्रुताः ॥८१॥
प्रजापतेश्च विष्णोश्च भवस्य च महात्मनः ।
अन्तरं ज्ञातुमिच्छामो यश्च यस्माद् विशिष्यते ॥८२॥

यश्च यस्मात् प्रभवति यश्च यस्मिन् प्रतिष्ठितः।
ज्यायान्यो मध्यमश्चैव कनीयान् यश्च तेषु वै ॥८३॥
प्रधानभूतो यस्तेषां गुणभूतश्च तेषु यः।
कर्म्मभिश्चाभिजात्या च प्रभावेण च यो महान्।
एतत् प्रब्रूहि नः सर्वं त्वं हि वेत्थ यथायथं ॥८४॥
सूत उवाच। अत्र वो वर्णयिष्येऽहमन्तरन्तेषु यत् स्मृतं।
यद्ब्रह्मविष्णुरुद्राणां शृणुध्वं मे विवक्षतः ॥८५॥
राजसी तामसी चैव सात्त्विकी चैव ताः स्मृताः।
तन्वः स्वयम्भुवः प्रोक्ताः काले काले भवन्ति याः ॥८६॥
एतासामन्तरं वक्तुं नैव शक्यं द्विजोत्तमाः।
गुणवृद्धिनिबन्धत्वाद्विधानुग्रहबन्धतः ॥८७॥
प्रवृत्तिश्च निवृत्तिश्च गुणवृद्धिमिह द्विजाः।
यथाशक्त्या प्रवक्ष्यामि तनूनां तन्निबोधत ॥८८॥
एका तु कुरुते तासां राजसी सर्वतः प्रजाः।
एका चैवार्णवस्था तु सानुगृह्णाति सात्त्विकी।
एका सङ्क्षिपते काले तामसी ग्रसते प्रजाः ॥८९॥
रजसा तु समुद्रिक्तो ब्रह्मा सम्भवते यदा।
पुरुषाख्या तदा तस्य सात्त्विकी विनिवर्त्तते ॥९०॥
यदा भवति कालात्मा उद्रेकात्तमसस्तु सः।
ब्रह्माख्या सा तदा तस्य राजसी विनिवर्त्तते ॥९१॥
सत्त्वोद्रेकात्तु पुरुषो यदा भवति स प्रभुः।
कालाख्या सा तदा तस्य पुनर्न भवतीति वै ॥९२॥

क्रमात्तस्य निवर्त्तन्ते रूपं नाम च कर्म च ।
त्रैलोक्ये वर्त्तमानस्य सर्वानुग्रहनिग्रहैः ॥९३॥
यदा भवति ब्रह्मा च तदा चान्तरमुच्यते ।
यदा च पुरुषो ब्रह्मा न चैव पुरुषस्तु सः ॥९४॥
मणिर्विभजते वर्णान् विचित्रान् स्फटिके यथा ।
वैमल्यादाश्रयवशात्तद्वर्णः स्यात्तदञ्जनः ॥९५॥
तदा गुणवशात्तस्य स्वयम्भोरनुरञ्जनं ।
एकत्वे च पृथक्त्वे च प्रोक्तमेतन्निदर्शनं ॥९६॥
एको भूत्वा यथा मेघः पृथक्त्वेनावतिष्ठते ।
रूपतो वर्णतश्चैव तथा गुणवशात्तु सः ॥९७॥
भवत्येको द्विधा चैव त्रिधा मूर्त्तिविनाशनात् ।
एको ब्रह्मान्तकश्चैव पुरुषश्चेति ते त्रयः ॥९८॥
एकस्यैताः स्मृतास्तिस्रस्तनवस्तु स्वयम्भुवः ।
ब्राह्मी च पौरुषी चैव अन्तकारी च ते त्रयः ॥९९॥
तत्र या राजसी तस्य तनुः सा वै प्रजाकरी ।
या तामसी तु कालाख्या प्रजाक्षयकरी तु सा ।
सात्त्विकी पौरुषी या तु सानुग्रहकरी स्मृता ॥१००॥
राजस्या ब्रह्मणोंऽशेन मरीचिः कश्यपोऽभवत् ।
तामसी चान्तकाख्या तु तदंशेनाभवद्भवः ॥१०१॥
सात्त्विकी पौरुषी या सा तस्याः शौचिष्णुरुच्यते ।
त्रैलोक्ये ताः स्मृतास्तिस्रस्तनवस्तु स्वयम्भुवः ॥१०२॥
नानाप्रयोजनार्थां हि कालोऽवस्थां करोति यः ।

ब्रह्मत्वेन प्रजाः सृष्ट्वा विष्णुत्वेनानुगृह्य च।
वैष्णव्यानुगृहीतास्ता रौद्र्यानुग्रसते पुनः ॥१०३॥
एकः स्वयम्भुवः कालस्त्रिभिस्त्रीन् वै करोति सः।
सृजते चानुगृह्णाति प्रजाः संहरते तथा ॥१०४॥
इत्येताः कथितास्तिस्रस्तनवस्तु स्वयम्भुवः।
प्रजापत्या च रौद्री च वैष्णवी चैव ताः स्मृताः ॥१०५॥
एका तनुः स्मृता वेदे धर्मशास्त्रे पुरातने।
साङ्ख्ययोगपरे वीरैः पृथक्त्वैकत्वदर्शिभिः।
अभिजातप्रभावज्ञैर्ऋषिभिस्तत्त्वदर्शिभिः ॥१०६॥
एकत्वे च पृथक्त्वे च तासु भिन्नाः प्रजास्त्विह।
इदं परमिदं नेति ब्रुवतो भिन्नदर्शनाः ॥१०७॥
ब्रह्माणं कारणं केचित् केचित् प्राहुः प्रजापतिं।
केचिच्छिवं परत्वेन प्राहुर्विष्णुं तथाऽपरे।
अविज्ञानेन संसक्ताः सक्ता रत्यादिचेतसा ॥१०८॥
तत्त्वं कालञ्च देशञ्च कार्य्याण्यवेक्ष्य तत्त्वतः।
कारणञ्च स्मृता ह्येता नानार्थेष्विह देवताः ॥१०९॥
एकं निन्दति यस्तेषां सर्व्वानेव स निन्दति।
एकं प्रशंसमानस्तु सर्वानेव प्रशंसति।
एकं यो वेत्ति पुरुषं तमाहुर्ब्रह्मवादिनं ॥११०॥
अद्वेषस्तु सदा कार्य्यो देवतासु विजानता।
न शक्यमीश्वरं ज्ञातुमैश्वर्य्येण व्यवस्थितं ॥१११॥
एकात्मा स त्रिधा भूत्वा सम्मोहयति यः प्रजाः।

एतेषाञ्च त्रयाणान्तु विचरन्त्यन्तरं जनाः॥११२॥
जिज्ञासन्तः परीक्षन्तः सक्ता रूपाविचेतसः ।
इदं परमिदं नेति वदन्ति भिन्नदर्शिनः ॥११३॥
यातुधानान् विशन्त्येताः पिशाचांश्चैव तान्नरान् ।
एकत्वेन पृथक्त्वेन स्वयम्भूर्व्यवतिष्ठते ॥११४॥
गुणमात्रात्मिकाभिस्तु तनुभिर्मोहयन् प्रजाः ।
तेष्वेकं यजते यस्तु स तदा यजते त्रयं ॥११५॥
तस्माद्देवास्त्रयो ह्येते नैरन्तर्य्ये व्यवस्थिताः ।
तस्मात् पृथक्त्वमेकत्वसञ्ज्ञा सञ्ज्ञागतागतं ।
एकत्वं वा बहुत्वं वा तेषु को ज्ञातुमर्हति ॥११६॥
यस्मात् सृष्ट्वानुगृह्णीते ग्रसते चैव ते प्रजाः ।
गुणात्मकत्वात्त्रैकाल्ये तस्मादेकः स उच्यते ॥११७॥
रुद्रं ब्रह्माणमिन्द्रञ्च लोकपालान् ऋषीन् दनून् ।
देवं तमेकं बहुधा प्राहुर्नारायणं द्विजाः ॥११८॥
प्राजापत्या तनुर्या च तनुर्या चैव वैष्णवी ।
मन्वन्तरे च कल्पे च आवर्त्तन्ते पुनः पुनः॥११९॥
तेजसा यशसा बुद्ध्या श्रुतेन च बलेन च ।
जायन्ते तत्समाश्चैव तानपीह निबोधत॥१२०॥
राजस्या ब्राह्मणोऽंशेन मरीचिः कश्यपोऽभवत्।
तामस्यास्तस्य चांशेन कालात्मा रुद्र उच्यते ।
सात्त्विक्या पुरुषांशेन यज्ञे विष्णुरभूत्तदा ॥१२१॥
त्रिषु कालेषु तस्यैता ब्रह्मणस्तनवोंऽशजाः ।

कालो भूत्वा पुनश्चासौ रुद्रः संहरते प्रजाः ॥१२२॥
सम्प्राप्ते चैव कल्पान्ते सप्तरश्मिर्दिवाकरः ।
भूत्वा सम्वर्त्तकादित्यो लोकांस्त्रीन्स तदादहत् ॥१२३॥
विष्णुः प्रजानुगृह्णाति नामरूपविपर्य्यये ।
तस्यान्तस्यामवस्थायां तत्तदुत्पत्तिकारणं ॥१२४॥
सत्त्वोद्रिक्ता तु या प्रोक्ता ब्रह्मणः पौरुषी तनुः ।
तस्यांशेन विजज्ञे स इह स्वायम्भुवेऽन्तरे ।
आकूत्यां मनसो देव उत्पन्नः प्रथमे विभुः ॥१२५॥
ततः पुनः स वै देवो प्राप्ते स्वारोचिषेऽन्तरे ।
तुषितायां समुत्पन्नो ह्यतीतस्तुषितैः सह ॥१२६॥
औत्तमे चान्तरे चैव तुषितस्तु विदुः स वै ।
वशवर्त्तिभिरुत्पन्नो वशवर्त्ती हरिः पुनः ॥१२७॥
सत्यायामभवत्सत्यः सत्यैः सह सुरोत्तमैः ।
तामसस्यान्तरे चापि सम्प्राप्ते पुनरेव हि ।
भार्य्यायां हरिभिः सार्द्धं हरिरेव बभूव ह ॥१२८॥
चारिष्णवेऽन्तरे चापि हरिर्देवः पुनस्तु सः ।
वैकुण्ठायामसौ जज्ञे ह्याभूतरजसैः सह ।
वैकुण्ठः स पुनर्देवः सम्प्राप्ते चाक्षुषेऽन्तरे ॥१२९॥
धर्म्मो नारायणः साध्यः साध्यैः सह सुरैरभूत् ।
स तु नारायणः साध्यः प्राप्ते वैवस्वतेऽन्तरे ॥१३०॥
मारीचात् कश्यपाद्विष्णुरदित्यां सम्बभूव ह ।
त्रिभिः क्रमैरिमान् लोकान् जित्वा विष्णुरुरुक्रमं ॥१३१॥

प्रत्यपादयदिन्द्राय देवेभ्यश्चैव स प्रभुः।
इत्येतास्तनवस्तस्य व्यतीताः सप्त सप्तसु।
मन्वन्तरेष्वतीतेषु याभिः संरक्षिताः प्रजाः॥१३२॥
तस्माद्विष्टमिदं सर्वं वामनेनेह जायता।
तस्मात्स वै स्मृतो विष्णुर्विशेर्धातोः प्रवेशनात्॥१३३॥
इत्येते ब्रह्मणश्चैव वामनस्य महात्मनः।
एकत्वञ्च पृथक्त्वञ्च विशिष्टत्वञ्च कीर्त्तितं॥१३४॥
देवतानामिहांशेन जायन्ते यास्तु देवताः।
तासान्तास्तेजसा बुद्ध्या श्रुतेन च बलेन च।
जायन्ते तत्समाश्चैव ता वै तेषामनुग्रहात्॥१३५॥
यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छध्वं विष्णोस्तेजोंऽशसम्भवं॥१३६॥
स एवं जायतेऽंशेन केचिदिच्छन्ति मानवाः।
ततोऽपरे ब्रुवन्तीममन्योन्याऽंशेन जायते॥१३७॥
एवं विवदमानास्ते दृष्ट्वा तान्वै ब्रुवन्ति ह।
यस्मान्न विद्यते भेदो मनसश्चेतसश्च ह।
तस्मादनुग्रहास्तेषां चेत्रज्ञास्ते भवन्त्युत॥१३८॥
एकस्तु प्रभुशक्त्या वै बहुधा भवतीश्वरः।
भूत्वा यस्माच्च बहुधा भवत्येकः पुनस्तु सः॥१३९॥
तस्मात्तु मनसो भेदाज्जायन्ते तेजसश्च ह।
मन्वन्तरेषु सर्वेषु प्रजाः स्थावरजङ्गमाः।
सर्गादौ सकृदुत्पन्नास्तिष्ठन्तीह प्रसंशया॥१४०॥

प्राप्ते प्राप्ते तु कल्पान्ते रुद्रः संहरति प्रजाः।
जायन्ते मोहयन्तोऽन्यानीश्वरा योगमायया ॥१४१॥
ऐश्वर्य्येण चरन्तस्ते मोहयन्ति[१] ह्यनीश्वराः।
तस्माद्दोषप्रचारेषु युक्तायुक्तं न विद्यते ॥१४२॥
भूतापवादिनो दुष्टा मध्यस्था भूतभाविनः[२]।
भूतापवादिनः शक्तास्त्रयो वेदाः प्रवादिनां ॥१४३॥
दृढपूर्वश्रुतत्वाच्च प्रवादाच्चैव लौकिकात्।
चतुर्भिः कारणैरेभिर्यथातत्त्वं न विन्दति ॥१४४॥
पूर्वमर्थान्तरे न्यस्ताः[३] कालान्तरगता अपि।
तेनान्यात् सन्तमप्यर्थं द्वेषन्न प्रतिपद्यते ॥१४५॥
दर्शानां द्रव्यभूतो यो गुणभूतस्तु तेषु यः।
कर्म्मणां मनसां कर्त्ता अभिजात्या च यो महान्।
श्रुतज्ञैः कारणैरेतैश्चतुर्भिः परिकीर्त्त्यते ॥१४६॥
अशक्तदृष्टो जानाति देवताः प्रविभागशः।
इमौ चोदाहरन्त्यत्र श्लोकौ योगेश्वरं प्रति ॥१४७॥
आत्मनः प्रतिरूपाणि परेषाञ्च सहस्रशः।
कुर्य्याद्योगबलम्प्राप्य तैश्च सर्वैः सहाचरेत् ॥१४८॥
प्राप्नुयाद्विषयांश्चैव तथैवोग्रतपश्चरन्।
संहरेच्च पुनः सर्वान् सूर्यतेजो गुणानिव ॥१४९॥

इति श्रीमहापुराणे वायुप्रोक्ते कश्यपीयप्रजासर्गो नाम पञ्चमोऽध्यायः।

---

१ मादयन्तीति ङ०।
२ भूतिभाविन इति ख०।
३ पूर्व्वमन्वन्तरे न्यस्ता इति ख०।

अथ षष्ठोऽध्यायः।

कश्यपीयप्रजासर्गः।

ऋषय ऊचुः। एतच्छ्रुत्वा वचस्तस्य नैमिषेयास्तपस्विनः।
पप्रच्छुर्ऋषयः श्रेष्ठं वचनस्य यथाक्रमं॥१॥
सप्तस्विह कथं देवा जाता मन्वन्तरेष्विह।
इन्द्रविष्णुप्रधानास्ते आदित्यास्तु महौजसः।
एतत् प्रब्रूहि नः सर्वं विस्तराद्रोमहर्षण॥२॥
एवमुक्तस्तदा सूतो विनयी ब्रह्मवादिभिः।
उवाच वदतां श्रेष्ठो यथा पृष्टो महर्षिभिः॥३॥
सूत उवाच। ब्रह्मणो वै मुखात् सृष्टा यथा देवाः प्रजेप्सया।
सर्वे मन्त्रशरीरास्ते स्मृता मन्वन्तरेष्विह॥४॥
दर्शश्च पौर्णमासश्च वृहद्यच्च रथन्तरं।
आकूतः प्रथमस्तेषां ततस्त्वाकूतिरेव च॥५॥
विचित्तिश्चैव सुविचित्तिश्च आकूतिः कूतिरेव च
अधीष्टस्तु ततो ज्ञेयः अधीतिश्चैव तत्त्वतः।
विज्ञातिश्चैव विज्ञातो मानवो ये च द्वादश॥६॥
ज्ञेयो द्वादशपुत्रस्य यस्माब्देन(१) समाजयेत्।
तं दृष्ट्वा चाब्रवीद्ब्रह्मा जया देवानसूयत॥७॥
दाराग्निहोत्रसंयोगे मिथ्यामारभतेति च।
एवमुक्त्वा तु तं ब्रह्मा तत्रैवान्तरधीयत॥८॥

---

१ पश्चाब्देनेति ख०।

ततस्ते नाभ्यनन्दन्त तद्वाक्यं परमेष्ठिनः ।
सत्यस्येह तु कर्माणि वाङ्मनःकर्मजानि तु ॥९॥
य एवाप्यवतिष्ठन्ते दोषं दृष्ट्वा तु कर्मसु ।
क्षयातिशययुक्तन्तु ते दृष्ट्वा कर्मणां फलं ॥१०॥
जुगुप्सन्तः प्रवृत्तिञ्च निस्तन्द्रा निर्ममाभवन् ।
अजस्रं काङ्क्षमाणास्ते विरक्ता दोषदर्शिनः ॥११॥
अर्थं धर्मञ्च कामञ्च हित्वा ते वै व्यवस्थिताः ।
पौरुषं ज्ञानमास्थाय तेजः संक्षिप्य चास्थिताः ॥१२॥
तेषाञ्च तमभिप्रायं ज्ञात्वा[१] ब्रह्मा चुकोप ह ।
तानब्रवीत्तदा ब्रह्मा निरुत्साहान् सुरानथ ॥१३॥
प्रजार्थमिह यूयं वै प्रजास्त्रष्टाऽस्मि नान्यथा ।
प्रसूयध्वं जयध्वञ्चेत्युक्तवानस्मि यत् पुरा ॥१४॥
यस्माद्वाक्यमनादृत्य मम वैराग्यमास्थिताः ।
जुगुप्समानाः स्वं जन्म सन्ततिं नाभिनन्दथ ॥१५॥
कर्म्मणाञ्च कृतो न्यासो ह्यमृतत्त्वाभिकाङ्क्षया ।
तस्माद्यूयमनादृत्य सप्तकृत्वस्तु यास्यथ ॥१६॥
ते शप्ता ब्रह्मणा देवा जयास्तं वै प्रसादयन्[२] ।
क्षमास्माकं महादेव यदज्ञानात् कृतं विभो ॥१७॥
प्रणिपत्य सानुनयं ब्रह्मा तानब्रवीत् पुनः ।
लोके मयाननुज्ञातः कः स्वातन्त्र्यमिहार्हसि ॥१८॥

---

१ दृष्ट्वेति ख० ।
२ एकवचनान्तपाठो न समीचीनः ।

मया परिगतं सर्वं कथमच्छन्दतो मम ।
प्रतिपत्स्यन्ति भूतानि शुभं वा यदि वाऽशुभं ॥१९॥
लोके यदस्ति किञ्चिद्वै सत्त्वासत्त्वव्यवस्थितं ।
बुद्ध्यात्मना मया व्याप्तं को मां लोकेऽतिसन्धयेत् ॥२०॥
भूतानान्तर्कितं यच्च यच्चाप्येषां विधारितं ।
तथा विचारितं यच्च तत्सर्वं विदितं मम ॥२१॥
मया स्थितमिदं सर्वं जगत्स्थावरजङ्गमं ।
आशामयेन तत्त्वेन कथं छेत्तुमिहोत्सहे ॥२२॥
यस्माच्चाहं विवृत्तो वै सर्गार्थमिह नान्यथा ।
इह कर्म्माण्यनारभ्य को मे छन्दाद्विमोच्यते ॥२३॥
परिभाष्य ततो देवान् जयान् वै नष्टचेतसः ।
अब्रवीत्स पुनस्तान् वै धृतान् दण्डे प्रजापतिः ॥२४॥
यस्मान्ममाभिसन्धाय सन्न्यासो वः कृतः पुरा ।
यस्मात्स विफलोऽयत्नो ह्यपारस्त्वेष यः कृतः ।
भविताऽतः सुखोदर्को देवा भावेषु जायतां ॥२५॥
आत्मच्छन्देन वो जन्म भविष्यति सुरोत्तमाः ।
मन्वन्तरेषु संमूढाः षट्सु सर्वे गमिष्यथ ॥२६॥
वैवस्वतान्तेषु सुरास्तथा स्वायम्भुवादिषु ।
तान् ज्ञात्वा ब्रह्मणा तत्र श्लोको गीतः पुरातनः ॥२७॥
त्रयीं विद्यां ब्रह्मचर्य्यं प्रसूतिं श्राद्धमेव च ।
यज्ञञ्चैव तु दानञ्च एषामेव तु कुर्वतां ।
स हि स्म विरजा भूत्वा वसतेऽन्यप्रसंश्रया ॥२८॥

स एवं श्लोकं दृष्ट्वा तु जया देवानथाब्रवीत् ।
वैवस्वतेऽन्तरेऽतीते मत्समीपमिहेष्यथ ॥२९॥
ततो यूयं मया सार्द्धं सिद्धिं प्राप्स्यथ शाश्वतीं ।
एवमुक्त्वा तु तान् ब्रह्मा तत्रैवान्तरधीयत ॥३०॥
ततो देवास्तिरोभूते ईश्वरे ह्यकुतोभयं ।
प्रपन्ना अणिमाद्यैश्च युक्ता योगबलान्विताः ॥३१॥
ततस्तेषान्तु यास्तन्वस्ताऽभवन् द्वादश ह्रदाः ।
जया इति समाख्याताः जातास्तोदधिसन्निभाः ॥३२॥
ततः स्वायम्भुवे तस्मिन् सर्गे ते जज्ञिरे सुराः ।
अजितायां रुचेः पुत्रा अजिता द्वादशात्मकाः ॥३३॥
विधिश्च मुनयश्चैव क्षेमो नन्दोऽव्ययस्तथा ।
प्राणोऽपानः सुधामा च क्रतुशक्तिव्यवस्थिताः ।
इत्येते मानसाः सर्व्वे अजिता द्वादश स्मृताः ॥३४॥
ते च यज्ञे सुरैः सार्द्धं यज्ञभाजस्तदा स्मृताः ।
स्वायम्भुवेऽन्तरे पूर्वं ततः स्वारोचिषे पुनः ।
तुषितायां समुत्पन्नाः पुनः पुत्राः स्वरोचिषः ॥३५॥
तुषिता नाम ते ह्यासन् प्राणाख्या याज्ञिकाः सुराः ।
पुनस्ते तुषिता देवा उत्तमे त्वन्तरे स्वयं ॥३६॥
उत्तमस्य तु ते पुत्राः सत्यायां जज्ञिरे शुभाः ।
ततः सत्याः स्मृता देवा उत्तमे चान्तरे तदा ॥३७॥
अभजन् यज्ञभाजस्ते तृतीये द्वापरान्तरे ।
ते तु सत्याः पुनर्द्देवाः सम्प्राप्ते तामसेऽन्तरे ॥३८॥

हर्षा ये तमसः पुत्रा जज्ञिरे द्वादशैव तु ।
हरयो नाम ते देवा यज्ञभाजस्तथाऽभवन् ॥३९॥
ततस्ते हरयो देवाः प्राप्ते चारिष्णवेऽन्तरे ।
वैकुण्ठायां ततस्ते वै चरिष्णोर्जज्ञिरे सुराः ।
वैकुण्ठा नाम ते देवाः पञ्चमस्यान्तरे मनोः ॥४०॥
ततस्ते वै पुनर्द्देवा वैकुण्ठाः प्राप्य चाक्षुषं ।
साध्यायां द्वादश सुता जज्ञिरे धर्म्मसूनवः ॥४१॥
ततस्ते वै पुनः साध्याः संक्षीणे चाक्षुषेऽन्तरे ।
उपस्थिते मनोः सर्गे पुनर्वैवस्वतस्य ह ॥४२॥
आद्ये त्रेतायुगमुखे प्राप्ते वैवस्वतस्य तु ।
अंशेन साध्यास्तेऽदित्यां मारीचात् कश्यपात् पुनः ॥४३॥
जज्ञिरे द्वादशादित्या वर्त्तमानेऽन्तरे पुनः ।
यदा त्वेते समुत्पन्नास्ताक्षुषस्याऽन्तरे मनोः ॥४४॥
ततः स्वायम्भुवे साध्या जज्ञिरे द्वादशामराः ।
एवमाद्या जयास्ते वै शापात्सम्भवंस्तदा ॥४५॥
य इमां सप्तसम्भूतिं देवानां देवशासनात् ।
पठेद्यः श्रद्धया युक्तः प्रत्यवायं न गच्छति ॥४६॥
इत्येते भूतयः सप्त जयानां सप्तलक्षणाः ।
परिक्रान्ता मया चाद्य किम्भूयः श्रोतुमिच्छथ ॥४७॥
ऋषय ऊचुः। दैत्यानां दानवानाञ्च गन्धर्व्वोरगरक्षसां ।
सर्व्वभूतपिशाचानां पशूनां पक्षिवीरुधां ।
उत्पत्तिं निधनञ्चैव विस्तरात् कथयस्व नः ॥४८॥

एवमुक्तस्तदा सूत उवाच ऋषिसत्तमान्।
दितेः पुत्रद्वयं जज्ञे कश्यपादिति नः श्रुतं ॥४९॥
कश्यपस्यात्मजौ तौ वै सर्व्वेभ्यः पूर्वजौ स्मृतौ।
सुत्येऽहन्यतिरात्रस्य कश्यपस्याश्वमेधिके ॥५०॥
हिरण्यकशिपुर्नाम प्रथमं ऋत्विगासनं।
दित्या गर्भाद्विनिःसृत्य तत्रासीनोऽत्रसंसदि।
हिरण्यकशिपुस्तस्मात् कर्मणा तेन सः स्मृतः ॥५१॥
ऋषय ऊचुः। हिरण्यकशिपोर्नाम जन्म चैव महात्मनः।
प्रभावश्चैव दैत्यस्य विस्तराद्ब्रूहि नः प्रभो ॥५२॥
सूत उवाच। कश्यपस्याश्वमेधोऽभूत् पुण्यो वै पुष्करे पुरा।
ऋषिभिर्द्देवताभिश्च गन्धर्व्वैरुपशोभितः ॥५३॥
उत्कृष्टेनैव विधिना आख्यानादौ यथाविधिः।
आसनान्युपक्लृप्तानि काञ्चनानि तु पञ्च वै ॥५४॥
कुशपूतानि त्रीण्यत्र कूर्चफलकमेव च[१]।
मुख्यर्त्विजश्च चत्वारस्तेषान्तान्युपकल्पयेत् ॥५५॥
शुभं तत्रासनं यत्तु होतुरर्थे प्रकल्पितं।
हिरण्मयं तथा दिव्यं दिव्यास्तरणसंस्तृतं ॥५६॥
अन्तर्वत्नी दितिश्चैव पत्नीत्वं समुपागता।
दश वर्षसहस्राणि गर्भस्तस्या अवर्त्तत ॥५७॥
स तु गर्भाद्विनिःसृत्य मातुर्वै उदरात्तदा।
उपक्लृप्तासनं यत्तु होतुरर्थे हिरण्मयं।

---

१ पाठोऽयं न समीचीनः।

निषसाद सगर्भोऽत्र तत्रासीनः शशंस च ॥५८॥
आख्यानपञ्चमान् वेदान्[१] महर्षिः काश्यपो यथा ।
तं दृष्ट्वा मुनयस्तस्य नामाकुर्वंस्तु तद्विधं ॥५९॥
हिरण्यकशिपुस्तस्मात् कर्म्मणा तेन विश्रुतः ।
हिरण्याक्षोऽनुजस्तस्य सिंहिका तस्य चानुजा ।
राहोः सा जननी देवी विप्रचित्तेः परिग्रहात् ॥६०॥
हिरण्यकशिपुर्द्दैत्यश्चचार परमं तपः ।
शतं वर्षसहस्राणां निराहारो ह्यधःशिराः ॥६१॥
तं ब्रह्मा छन्दयामास दैत्यं तुष्टो वरेण तु ।
सर्व्वामरत्वं विप्रेभ्यः सर्व्वभूतेभ्य एव च ।
योगाद्देवान्विनिर्जित्य सर्व्वदेवत्वमास्थितः ॥६२॥
दानवाश्चासुराश्चैव देवाः समा भवन्तु वै ।
मारुतेर्यन्महैश्वर्य्यमेष मे दीयतां वरः ॥६३॥
एवमुक्तोऽथ ब्रह्मा तु तस्मै दत्त्वा यथेप्सितं ।
दत्त्वा तस्मै वरान् दिव्यान् तत्रैवान्तरधीयत ।
हिरण्यकशिपुर्दैत्यः श्लोकैर्गीतः पुरातनैः ॥६४॥
राजा हिरण्यकशिपुर्यां यामाशां निषेवते ।
तस्यास्तस्या दिशो देवा नमश्चक्रुर्महर्षिभिः ॥६५॥
एवं प्रभावो दैत्येन्द्रः[२] हिरण्यकशिपुर्द्विजाः ।

---

१ आख्यानं पञ्चमान् वेदानिति ख०, ग० च ।
२ दैत्यस्त्विति ङ० ।

तस्यासीन्नरसिंहः स विष्णुर्मृत्युः पुरा किल ।
नखैस्तु तेन निर्भिन्नस्ततः शुद्धा नखाः स्मृताः ॥६६॥
हिरण्याक्षसुताः पञ्च विक्रान्ताः सुमहाबलाः ।
उत्कुरः शकुनिश्चैव कालनाभस्तथैव च ॥६७॥
महानाभश्च विक्रान्तो भूतसन्तापनस्तथा ।
हिरण्याक्षसुता ह्येते देवैरपि दुरासदाः ॥६८॥
तेषां पुत्राश्च पौत्राश्च बाडेयः(१) सगणः स्मृतः ।
शतन्तानि सहस्राणि निहतास्तारकामये ॥६९॥
हिरण्यकशिपोः पुत्राश्चत्वारस्तु महाबलाः ।
प्रह्लादः पूर्व्वजस्तेषामनुह्लादस्तथैव च ।
संह्रादश्च ह्रदश्चैव ह्रदपुत्रान्निबोधत ॥७०॥
ह्रादो निसुन्दश्च तथा ह्रदपुत्रौ बभूवतुः ।
सुन्दोपसुन्दौ विक्रान्तौ निसुन्दतनयावुभौ ॥७१॥
ब्रह्मघ्नस्तु महावीर्य्यो मूकस्तु ह्रददायिनः(२) ।
मारीचः सुन्दपुत्रस्तु ताडकामुपपद्यते ॥७२॥
ताड़का निहता साऽथ राघवेण बलीयसा ।
मूको विनिहतश्चापि किराते सव्यसाचिना ॥७३॥
उत्पन्ना महता चैव तपसा भाविताः स्वयं ।
तिस्रः कोट्यस्तु तेषां वै मणिवर्त्तनिवासिनां ।

---

१ बालेय इति ख० ।
२ मूकखड्गस्त्वाततायिन इति ग० ।

अवध्या देवतानां वै निहताः सव्यसाचिना ॥७४॥
अनुह्लादसुतो वायुः शिनीवाली तथैव च ।
तेषान्तु शतसाहस्रो गणो हालाहलः स्मृतः ॥७५॥
वैरोचनस्तु प्राह्लादिः पञ्च तस्यात्मजाः स्मृताः ।
गवेष्ठी कालनेमिश्च जम्भो वाष्कल एव च[१] ।
शम्भुस्तु अनुजस्तेषां स्मृताः प्राह्लादिसूनवः ॥७६॥
यथाप्रधानं वक्ष्यामि तेषां पुत्रान् दुरासदान् ।
शुम्भश्चैव निशुम्भश्च विष्वक्सेनो महौजसः ॥७७॥
गवेष्ठिनः सुता ह्येते जम्भस्य शतदुन्दुभिः ।
तथा दक्षश्च खण्डश्च[२] त्रयस्तु जम्भसूनवः ॥७८॥
विरोधश्च मनुश्चैव वृक्षायुः[३] कुशलीमुखः ।
वाष्कलस्य सुता ह्येते कालनेमिसुतान् शृणु ॥७९॥
ब्रह्मजित् क्षत्रजिच्चैव देवान्तकनरान्तकौ ।
कालनेमिसुता ह्येते शम्भोस्तु शृणुत प्रजाः ॥८०॥
धनुको ह्यसिलोमा च नाबलश्च सगोमुखः ।
गवाक्षश्चैव गोमांश्च शम्भोः पुत्राः प्रकीर्त्तिताः ॥८१॥
विरोचनस्य पुत्रस्तु बलिरेकः प्रतापवान् ।
बलेः पुत्रशतं जज्ञे राजानः सर्व्वे एव ते ॥८२॥

---

१ जम्भः पुष्कल एव चेति ग० ।
२ सुखण्डश्चेति ङ० ।
३ वृकायुरिति ङ० ।

तेषां प्रधानाश्चत्वारो विक्रान्ताः सुमहाबलाः ।
सहस्रबाहुर्ज्येष्ठस्तु बाणो द्रविणसम्मतः ।
कुम्भनाभो गर्द्दभाक्षः कुशिरित्येवमादयः ॥८३॥
शकुनी पूतना चैव कन्ये द्वे तु बलेः सुते ।
बलेः पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः ॥८४॥
बलियौ नामविख्यातो गणो विक्रान्तपौरुषः ।
बाणस्य चन्द्रमनसो लौहित्यमुपपद्यते ॥८५॥
दितिर्विनष्टपुत्रा वै तोषयामास कश्यपं ।
स कश्यपः प्रसन्नात्मा सम्यगाराधितस्तया ।
वरेण छन्दयामास सा च वव्रे वरन्ततः ॥८६॥
स तु तस्यै वरं प्रादात् प्रार्थितं भगवान् प्रभुः ।
किमिच्छसि मयि शुभ्रे मारीचस्तामभाषत ॥८७॥
मारीचं कश्यपं तुष्टं भर्त्तारं प्राञ्जलिस्तथा ।
हतपुत्रास्मि भगवन् आदित्यैस्तव सूनुभिः ॥८८॥
शक्रहन्तारमिच्छेयं पुत्रं दीर्घतपोऽन्वितं ।
अहं तपश्चरिष्यामि गर्भमाधातुमर्हसि ॥८९॥
तस्यास्तद्वचनं श्रुत्वा मारीचः कश्यपस्तथा ।
प्रत्युवाच महातेजा दितिं परमदुःखितां ॥९०॥
एवं भवतु भद्रन्ते शुचिर्भव तपोधने(१) ।
जनयिष्यति सत्पुत्रं शक्रहन्तारमाहवे ॥९१॥

---

१ तपोनिधे इति ख० ।

पूर्णे वर्षशतं तावत् शुचिर्यदि भविष्यसि ।
पुत्रं त्रिलोकप्रचरमथ त्वं जनयिष्यसि ॥९२॥
एवमुक्त्वा महातेजास्तया समवसत् प्रभुः ।
तामालिङ्ग्य त्रिभुवनं जगाम भगवानृषिः ॥९३॥
गते भर्त्तरि सा देवी दितिः परमहर्षिता ।
कुशलं वनमासाद्य तपस्तेपे सुदारुणं ॥९४॥
तपस्तस्यान्तु कुर्वन्त्यां परिचर्याञ्चकार ह ।
सहस्राक्षः सुरश्रेष्ठः परया गुणसम्पदा ॥९५॥
अग्निं समित्कुशं काष्ठं फलं मूलं तथैव च ।
न्यवेदयत् सहस्राक्षो यच्चान्यदपि किञ्चन ॥९६॥
गात्रसंवाहनैश्चैव श्रमापनयनैस्तथा ।
शक्रः सर्व्वेषु लोकेषु दितिं परिचचार ह ।
एवमाराधिता शक्रमुवाचाथ दितिस्तथा ॥९७॥
दितिरुवाच ॥ प्रीता तेऽहं सुरश्रेष्ठ दशवर्षाणि पुत्रक ।
अवशिष्टानि भद्रन्ते भ्रातरं द्रक्ष्यसे ततः ॥९८॥
जयलिप्सां समाधास्ये लब्ध्वाहं तादृशं सुतं ।
त्रैलोक्यविजयं पुत्र प्राप्स्यामि सह तेन वै ॥९९॥
एवमुक्त्वा दितिः शक्रमध्यं प्राप्ते दिवाकरे ।
निद्रयापहृता देवी जान्वोः कृत्वा शिरस्तदा ॥१००॥
दृष्ट्वा तामशुचिं शक्रः पादयोर्गतमूर्द्धजां ।
तस्यास्तदन्तरं लब्ध्वा जहास च मुमोद च ॥१०१॥
तस्याः शरीरं विवृतं विवेशाथ पुरन्दरः ।

प्रविश्य चामितं दृष्ट्वा गर्भमिन्द्रो महौजसं ।
अभिनत्स प्रधानन्तु कुलिशेन महायशाः ॥१०२॥
भिद्यमानस्तदा गर्भो वज्रेण शतपर्वणा ।
रुरोद सस्वरं भीमं वेपमानः पुनः पुनः ।
मारोदीरिति तं गर्भं शक्रः पुनरभाषत ॥१०३॥
तं गर्भं सप्तधाभूतं ह्येकैकं सप्तधा पुनः ।
कुलिशेन विभेदेन्द्रस्ततो दितिरबुध्यत ॥१०४॥
न हन्तव्यो न हन्तव्य इत्येवं दितिरब्रवीत् ।
निष्पपातोदराद्वज्री मातुर्वचनगौरवात् ।
प्राञ्जलिर्वज्रसहितो दितिं शक्रोऽभ्यभाषत ॥१०५॥
अशुचिर्देवि सुप्तासि पादयोर्गतमूर्द्धजा ।
तदन्तरमहं लब्ध्वा शक्रहन्तारमाहवे ।
भिन्नवान् गर्भमेतन्ते[१] बहुधा क्षन्तुमर्हसि ॥१०६॥
तस्मिंस्तु विफले गर्भे दितिः परमदुःखिता ।
सहस्राक्षं ततो वाक्यं मातुर्नयनमब्रवीत् ॥१०७॥
ममापराधाद्गर्भोऽयं यदि ते विफलीकृतः ।
नापराधोऽस्ति देवेश ऋषिपुत्र महाबल ॥१०८॥
शत्रोर्बधे न दोषोऽस्ति तेन त्वां न शपामि भो ।
प्रियन्तु कर्त्तुमिच्छामि श्रेयो गर्भस्य मे कुरु ॥१०९॥
भवन्तु मम पुत्राणां सप्त स्थानानि वै दिवि ।

१ भिन्नवानस्मि भीतस्ते इति ख०, ङ० च ।

वातस्कन्धानिमान् सप्त चरन्तु मम पुत्रकाः ।
मरुतश्चेति विख्याता गणास्ते सप्त सप्तकाः ॥११०॥
पृथिव्यां प्रथमस्कन्धो द्वितीयश्चैव भास्करे ।
सोमे तृतीयो विज्ञेयश्चतुर्थो ज्योतिषां गणे ॥१११॥
ग्रहेषु पञ्चमश्चैव षष्ठः सप्तर्षिमण्डले ।
ध्रुवे तु सप्तमश्चैव वातस्कन्धः परस्तु सः ॥११२॥
तान्येते विचरन्त्वद्य काले काले ममात्मजाः ।
वातस्कन्धानिमान् भूत्वा चरन्तु मम पुत्रकाः ॥११३॥
पृथिव्यां प्रथमस्कन्धो अमेघेभ्यो य आवहः ।
चरन्तु मम पुत्रास्ते प्रथमश्चरताङ्गणः ॥११४॥
द्वितीयश्चापि मेघेभ्य आसूर्य्यात् प्रवहस्तु यः ।
वातस्कन्धं द्वितीयन्तु द्वितीयश्चरताङ्गणः ॥११५॥
सूर्य्योर्द्धन्तु ततः सोमादुद्वहो यस्तु वै स्मृतः ।
वातस्कन्धन्तु तं प्राज्ञस्तृतीयश्चरताङ्गणः ॥११६॥
सोमादूर्द्धं तथर्क्षेभ्यश्चतुर्थः सुवहस्तु यः ।
चतुर्थो मम पुत्राणां गणस्तु चरतां विभो ॥११७॥
ऋक्षेभ्यश्च तथैवोर्द्धमाग्रहाद्विवहस्तु यः ।
पञ्चमं पञ्चमः सौम्यः स्कन्धस्तु चरताङ्गणः ॥११८॥
ऊर्द्धं ग्रहादृषिभ्यस्तु षष्ठो यो वै परावहः ।
चरन्तु मम पुत्रास्तु तत्र षष्ठे गणे तु ये ॥११९॥
सप्तर्षयस्तथैवोर्द्धमाध्रुवात् सप्तमस्तु यः ।
वातस्कन्धः परिवहस्तत्र तिष्ठन्तु मे सुताः ॥१२०॥

एतत् सर्व्वं चरन्त्वेते काले काले ममात्मजाः ।
तत्र तेन च नाम्ना वै भवन्तु मरुतस्त्विमे ॥१२१॥
ततस्तेषान्तु नामानि मातापुत्रौ प्रचक्रतुः ।
तत्कृते कर्मभिश्चैव मरुतो वै पृथक् पृथक् ॥१२२॥
सत्त्वज्योतिस्तथादित्यः सत्यज्योतिस्तथाऽपरः ।
तिर्यग्ज्योतिश्च सज्योतिर्ज्योतिष्मानपरस्तथा ॥१२३॥
प्रथमस्तु गणः प्रोक्तो द्वितीयं मे निबोधत ।
ऋतजित्सत्यजिच्चैव सुषेणः सेनजित्तथा ॥१२४॥
सत्यमित्रोभिमित्रश्च हरिमित्रस्तथाऽपरः ।
गण एष द्वितीयस्तु तृतीयं मे निबोधत ॥१२५॥
ऋतः सत्यो × × × ×(१) ध्रुवो धर्त्ता विधारयः ।
ध्वान्तश्चैव धुनिश्चैव ह्युग्रो भीमस्तथैव च ।
अभियुः साक्षिपश्चैवमाह्वयश्च गणः स्मृतः ॥१२६॥
ईदृक् चैव तथान्यादृक् यादृक् च प्रतिकृत्तथा-।
कृत्तथा समितिश्चैव संरम्भश्च तथा गणः ॥१२७॥
ईदृक् च पुरुषश्चैव अन्यादृक्षाच्च चेतसः ।
समितासमितदृक्षाच्च प्रतिदृक्षाच्च वै गुणाः ॥१२८॥
एते ह्येकोनपञ्चाशन्मरुतो(२) नामतः स्मृताः ।

---

१ अत्राक्षरचतुष्टयमादर्शपुस्तकेषु पतितं ।

२ "एते ह्येकोनपञ्चाशत्" इत्यादिलिखनस्वरसेन एतत्पूर्व्वमेकोनपञ्चाशन्नामप्राप्तिरावश्यकी परन्तु आदर्शपुस्तके तत्समुदायस्याप्राप्तत्वात् पूर्व्वं कतिपयश्लोकाः पतिताः प्रतिभान्ति ।

प्रसंख्यातास्तथा ताभ्यां दित्या चेन्द्रेण चैव हि ॥१२९॥
श्रुत्वा तेषान्तु नामानि दितिरिन्द्रमुवाच ह ।
वातस्कन्धं चरन्त्वेते मम पुत्राश्च पुत्रक ।
विचरन्तु च भद्रन्ते देवैः सह ममात्मजाः ॥१३०॥
तस्यास्तद्वचनं श्रुत्वा सहस्राक्षः पुरन्दरः ।
उवाच प्राञ्जलिर्भूत्वा मातुर्भवतु तत्तथा ॥१३१॥
सर्व्वमेतद्यथोक्तन्ते भविष्यति न संशयः ।
देवभूता महात्मानः कुमारा देवसम्मताः ।
देवैः सह भविष्यन्ति यज्ञभाजस्तथात्मजाः ॥१३२॥
तस्मात्ते मरुतो देवाः सर्व्वे चेन्द्रानुजामराः ।
विज्ञेयाश्चामराः सर्व्वे दितिपुत्रास्तपस्विनः ॥१३३॥
एवन्तौ निश्चयं ज्ञात्वा मातापुत्रौ तपोधनौ ।
जग्मतुस्त्रिदिवं हृष्टौ शक्रोपि त्रिदिवं गतः ॥१३४॥
मरुतां हि शुभं जन्म शृणुयाद्यः पठेत वा ।
नावृष्टिभयमाप्नोति बह्वायुश्च भवेत्ततः ॥१३५॥

इति श्रीमहापुराणे वायुप्रोक्ते कश्यपीयप्रजासर्गो नाम

षष्ठोऽध्यायः ॥

अथ सप्तमोऽध्यायः।

कश्यपीयप्रजासर्गः।

सूत उवाच। अत ऊर्द्धं प्रवक्ष्यामि दनुपुत्रान्निबोधत।
अभवन् दनुपुत्रास्तु वंशे ख्याता महासुराः ॥१॥
विप्रचित्तिप्रधानास्ते शतं तीव्रपराक्रमाः।
सर्वे लब्धवराश्चैव सुतप्ततपसस्तथा ॥२॥
सत्यसन्धाः पराक्रान्ताः क्रूरा मायाविनश्च ते।
महाबला अयज्वानो ह्यब्रह्मण्याश्च दानवाः।
कीर्त्त्यमानान्मया सर्वान् प्राधान्येन निबोधत ॥३॥
द्विमूर्द्धा[१] शङ्कुवर्णश्च तथा शङ्कुनिरामयः॥
शङ्कुकर्णो महाविश्वः[२] गवेष्ठिर्दुन्दुभिस्तथा ॥४॥
अजामुखोऽथ भगवान् शिलो वामनसस्तथा।
मरीचिरन्धकश्चैव[३] महागार्ग्योऽङ्गिरावृतः[४] ॥५॥
विद्योभ्यश्च[५] सुकेतुश्च सुवीर्य्यः सुहृदस्तथा।

---

१ त्रिमूर्द्धेति ख०, ग० च।
२ महाविघ्न इति ख०।
३ मरीचिवन्धकश्चैवेति ख०।
४ महात्मा अङ्गिरावृत इति ख०।
५ ऋक्षकेतुरिति ख०।

इन्द्रजिद्विश्वजिच्चैव तथा सुरविमर्द्दनः ॥६॥
एकचक्रः सुबाहुश्च तारकश्च महाबलः ।
वैश्वानरः पुलोमा च प्रवीणोऽथ महाशिराः ॥७॥
स्वर्भानुर्वृषपर्वा च मुण्डकश्च महासुरः ।
धृतराष्ट्रश्च सूर्य्यश्च चन्द्र इन्द्रश्च तापिनः ॥८॥
सूक्ष्मश्चैव निचन्द्रश्च ऊर्णनाभो महागिरिः ।
असिलोमा सुकेशश्च सदश्च बलको दश ॥९॥
तथा गगनमूर्द्धा च कुम्भनाभः[१] महोदरः ।
प्रमोदाहश्च कुपथो हयग्रीवश्च वीर्य्यवान् ॥१०॥
असुरश्च विरूपाक्षः सुपथोऽथ महासुरः ।
अजो हिरण्मयश्चैव शतमायुश्च शम्बरः[२] ॥११॥
शरभः शलभश्चैव सूर्य्याचन्द्रमसावुभौ ।
असुराणां सुरावेतौ सुराणां साम्प्रताविमौ ॥१२॥
इति पुत्रा दनोर्वंशाः प्रधानाः परिकीर्त्तिताः ।
तेषामपरिसङ्ख्येयं पुत्रपौत्राद्यनन्तकं ॥१३॥
इत्येते ह्यसुराः प्रोक्ता दैतेया दानवाश्च ये ।
स्वर्भानुस्तु स्मृतो दैत्यो ह्यनुभानुर्दनोः सुतः ।
इमे तु वंशानुगता दनोः पुत्रास्तु ये स्मृताः ॥१४॥
एकाक्ष ऋषभोऽरिष्टः प्रबन्धनरकावपि ।
इन्द्रबाधनकेशी च मेरुः शम्बोऽथ धेनुकः ॥१५॥

---

१ कुम्भनाद इति ख० ।
२ सुखन इति ख० ।

गवेष्ठिश्च गवाक्षश्च तालकेतुश्च वीर्य्यवान् ।
एते मनुष्यधर्म्मास्तु दनोः पुत्रा मया स्मृताः ॥१६॥
दैत्यदानवसंहर्षे जाता भीमपराक्रमाः ।
सिंहिकायामथोत्पन्ना विप्रचित्तिसुतास्त्विमे ॥१७॥
सैंहिकेया इति ख्यातास्त्रतुर्द्दश महासुराः ।
शतगालश्च[१] बलवान्व्यासः शाम्बस्तथैव च ॥१८॥
अनुलोमः शुचिश्चैव वातापिश्च सितांशुकः ।
हरः कल्पः कालनाभो भौमश्च नरकस्तथा ॥१९॥
राहुर्ज्यैष्ठस्तु तेषां वै चन्द्रसूर्य्यप्रमर्दनः ।
इत्येते सिंहिकापुत्रा देवैरपि दुरासदाः ॥२०॥
दारुणाभिजनाः क्रूराः सर्वे ब्रह्मद्विषश्च ते ।
दशान्यानि सहस्राणि सैंहिकेयो गणः स्मृतः ॥२१॥
निहतो यामदग्न्येन भार्गवेण बलीयसा ।
स्वर्भानोस्तु प्रभा कन्या पुलोम्नोऽथ शची तथा ॥२२॥
उपदानवीयमस्यापि शर्मिष्ठा वार्षपर्वणी ।
पुलोमा कालिका चैव[२] वैश्वानरसुते उभे ॥२३॥
प्रभाया नहुषः पुत्रो जयन्तश्च शचीसुतः ।
पुरुं जज्ञेऽथ शर्मिष्ठा दुष्मन्तमुपदानवी ॥२४॥
वैश्वानरसुते ह्येते पुलोमा कालिका उभे ।
उभे ह्यपि तु ते कन्ये मारीचस्य परिग्रहे ॥२५॥

१ शतशाल्यश्चेति ङ० ।
२ कलिका चैवेति ग० ।

ताभ्यां पुत्रसहस्राणि षष्टिर्दानवपुङ्गवाः।
चतुर्द्दश तथान्यानि हिरण्यपुरवासिनां ॥२६॥
पौलोमाः कालकेयाश्च दानवाः सुमहाबलाः।
अबध्या दानवानां ते निहताः सव्यसाचिना ॥२७॥
मयस्य जाता ये पुत्राः सर्व्वे वीरपराक्रमाः।
मयावी दुन्दुभिश्चैव वृषश्च महिषस्तथा ॥२८॥
बालिको वज्रकर्णश्च कन्या मन्दोदरी तथा।
दैत्यानां दानवानाञ्च सर्ग एष प्रकीर्त्तितः ॥२९॥
दनायुषायाः[1] पुत्रास्तु स्मृताः पञ्च महाबलाः।
अरूरुर्बलिजम्भौ च विरत्तश्च विषस्तथा ॥३०॥
अरूरोस्तनयः क्रूरो धुन्धुर्नाम महासुरः।
निहतः कुबलाश्वेन उतङ्कवचनात् किल ॥३१॥
बलेः पुत्रौ महावीर्य्यौ तेजसाऽप्रतिमावुभौ।
कुम्भिलश्चक्रवर्म्मा[2] च स कर्णः पूर्वजन्मनि ॥३२॥
विरत्तस्यापि पुत्रौ द्वौ कालकश्च वरश्च तौ।
विषस्य त्वभवन् पुत्राश्चत्वारः क्रूरकर्म्मणः।
श्राद्धहा यज्ञहा चैव ब्रह्महा पशुहा तथा ॥३३॥
क्रान्ता दनायुषापुत्राः वृत्रस्यापि निबोधत।
जज्ञिरे श्वसनाद्घोराद्वृत्रस्येन्द्रेण युध्यतः ॥३४॥

---

१ अलम्बुषाया इति ख०, ग० च।
२ कुटिलश्चक्रधर्म्मा चेति ग०।

भर्त्तारो मनसा ख्याताः राक्षसाः सुमहाबलाः ।
शतन्तानि सहस्राणि महेन्द्रानुचराः स्मृताः ॥३५॥
सर्वे ब्रह्मविदः सौम्या धार्म्मिकाः सूक्ष्ममूर्त्तयः(१) ।
प्रजास्त्वन्तर्गताः सर्व्वे निवसन्ति सुधार्म्मिकाः ॥३६॥
दैत्यानां दानवाश्च सर्ग एष प्रकीर्त्तितः ।
प्रवाह्यजनयत् पुत्रान् यक्षे वै गायनोत्तमान् ॥३७॥
सत्वनः सत्त्वात्मकश्चैव कलापश्चैव वीर्य्यवान् ।
कृतवीर्य्यो ब्रह्मचारी सुपाण्डुश्चैव सप्तमः ॥३८॥
पनश्चैव तरण्यश्च(२) सुचन्द्रो दशमस्तथा ।
इत्येते देवगन्धर्व्वा विज्ञेयाः परिकीर्त्तिताः ॥३९॥

इति श्रीमहापुराणे वायुप्रोक्ते कश्यपीयप्रजासर्गो नाम सप्तमोऽध्यायः ।

---

१ सूर्य्यमूर्त्तय इति ख०, ग० च ।
२ पुलमश्चैव वन्यश्चेति ग० ।

अथाष्टमोऽध्यायः।

कश्यपीयप्रजासर्गः।

सूत उवाच। गन्धर्वाप्सरसः पुण्या मौनेयाः[१] परिकीर्त्तिताः।
चित्रसेनोग्रसेनश्च ऊर्णायुरनघस्तथा[२] ॥१॥
धृतराष्ट्रः पुलोमा च सूर्य्यवर्चास्तथैव च।
युगपत्तृणपत्कार्ष्णिर्दितिश्चित्ररथस्तथा ॥२॥
त्रयोदशो भ्रमिशिराः पर्जन्यश्च चतुर्दशः।
कलिः पञ्चदशश्चैव नारदश्चैव षोड़शः।
इत्येते देवगन्धर्वा मौनेयाः परिकीर्त्तिताः ॥३॥
चतुस्त्रिंशद्यवीयस्यस्तेषामप्सरसः शुभाः।
अन्तरा दारवत्या च प्रियमुख्या सुरोत्तमा ॥४॥
मिश्रकेशी[३] तथा शाची पर्णिनी वाप्यलम्बुषा।
मारीची पुत्रिका चैव विद्युद्वर्णा तिलोत्तमा ॥५॥
अद्रिका लक्षणा चैव देवी रम्भा मनोरमा।
सुवरा च सुवाहुश्च पूर्णिता सुप्रतिष्ठिता ॥६॥
पुण्डरीका सुगन्धा च सुदन्ता सुरसा तथा।

---

१ शैलेया इति ख॰, ग॰ च।
२ ऊर्णनाभो धनञ्जय इति ग॰।
३ मित्रकेशीति ख॰।

हेमसारा सुती चैव सुवृत्ता कमला च या ॥७॥
सुभुजा हंसपादा च लौकिक्योऽप्सरसस्तथा ।
गन्धर्वाप्सरसो ह्येता मौनेयाः परिकीर्त्तिताः ॥८॥
गन्धर्व्वाणां दुहितरो मया याः परिकीर्त्तिताः ।
तासां नामानि सर्वासां कीर्त्त्यमानानि मे शृणु ॥९॥
सुयशा प्रथमा तासां गान्धर्वी तदनन्तरं ।
विद्यावती चारुमुखी(१) सुमुखी च वरानना ॥१०॥
तत्रेमे सुयशापुत्रा महाबलपराक्रमाः ।
प्रचेतसः सुता यक्षास्तेषां नामानि मे शृणु ॥११॥
कम्बलो हरिकेशश्च कपिलः काञ्चनस्तथा ।
मेघमाली तु यक्षाणां गण एष उदाहृतः ॥१२॥
सुयशाया दुहितरश्चतस्रोऽप्सरसः स्मृताः ।
तासां नामानि वै सम्यक् ब्रुवतो मे निबोधत ॥१३॥
लोहेयी त्वभवज्ज्येष्ठा भरता तदनन्तरं ।
कृशाङ्गी च विशाला च रूपेणाप्रतिमा तथा ॥१४॥
ताभ्योऽपरे यक्षगणाश्चत्वारः परिकीर्त्तिताः ।
उत्पादिता विशालेन विक्रान्तेन महात्मना ॥१५॥
लोहेयो भरतेयश्च कृशाङ्गेयश्च विश्रुतः ।
विशालेयश्च यक्षाणां पुराणे प्रथिता गणाः ॥१६॥
इत्येतैरसुरैर्घोरैर्महाबलपराक्रमैः ।
लोकैर्यक्षगणैर्व्याप्ता लोका लोकविदां वराः ॥१७॥

---

१ अश्वमुखीति ख० ।

गन्धर्वाश्चाथ वालेया विक्रान्तेन महात्मना ।
उत्पादिता महावीर्य्या महागन्धर्वनायकाः ॥१८॥
विक्रमौदार्य्यसम्पन्ना महाबलपराक्रमाः ।
तेषां नामानि वक्ष्यामि यथावदनुपूर्व्वशः ॥१९॥
चित्राङ्गदो महावीर्य्यश्चित्रवर्म्मा[1] तथैव च ।
चित्रकेतुर्म्महाभागः सोमदत्तोऽथ वीर्य्यवान् ।
तिस्रो दुहितरश्चैव तासां नामानि वक्ष्यते ॥२०॥
प्रथमा त्वग्निका नाम कम्बला तदनन्तरं ।
तथा वसुमती नाम रूपेणाप्रतिमौजसः ॥२१॥
ताभ्यः परे कुमारेण गणा उत्पादितास्त्रिमे ।
त्रयो गन्धर्वमुख्यानां विक्रान्ता युद्धदुर्मदाः ॥२२॥
आग्नेयाः काम्बलेयाश्च तथा वसुमतीसुताः ।
तैर्गणैर्व्विविधैर्व्याप्तमिदं लोकचराचरं ॥२३॥
विद्यावन्तश्च तेनैव विक्रान्तेन महात्मना ।
उत्पादिता महाभागा रूपविद्याधनेश्वराः ॥२४॥
तेषामुदीर्णवीर्य्याणां गन्धर्वाणां महात्मनां ।
नामानि कीर्त्त्यमानानि शृणुध्वं मे विवक्षतः ॥२५॥
हिरण्यरोमा कपिलः सुलोमा मागधस्तथा ।
चन्द्रकेतुश्च वै गाङ्गो गोदश्चैव महाबलः ॥२६॥
महाविद्यावदातानां विक्रान्तानान्तपस्विनां ।

---

१ चित्रकर्म्मेति ख० ।

इत्येवमादिर्हि गणो द्वे चान्ये च सुलोचने ॥२७॥
शिवा च सुमनाश्चैव ताभ्यामपि महात्मना ।
उत्पादिता विश्रवसा विद्याचरणगोचराः ॥२८॥
ग्रैवेयाश्चैव विक्रान्तास्तथा सौमनसो गणाः ।
एतैर्व्याप्तमिदं लोकं विद्याधरगणैस्त्रिभिः ॥२९॥
एभ्योऽनेकानि जातानि अम्बरान्तरचारिणां ।
लोके गणशतान्येव विद्याधरविचेष्टितात् ॥३०॥
अश्वमुखाश्च तेनैव विक्रान्तेन महात्मना ।
उत्पादिता ह्यश्वमुखाः किन्नरांस्तान्निबोधत ॥३१॥
समुद्रः सेनः कालिन्दो महानेत्रो महाबलः ।
सुवर्णघोषः सुग्रीवो महाघोषश्च वीर्य्यवान् ॥३२॥
इत्येवमादिर्हि गणः किन्नराणां महात्मनां ।
हयाननानां विद्वद्भिर्विस्तीर्णः परिकीर्त्त्यते ॥३३॥
तथासमुत्थितेनैव विक्रान्तेन महात्मना ।
उत्पादिता नरमुखाः किन्नराः शांशपायनाः ॥३४॥
हरिषेणः सुषेणश्च वारिषेणश्च वीर्यवान् ।
रुद्रदत्तेन्द्रदत्तौ च चन्द्रद्रुममहाद्रुमौ ॥३५॥
विन्दुश्च विन्दुसारश्च चन्द्रवंशाश्च किन्नराः ।
इत्येते किन्नराः श्रेष्ठा लोके ख्याताः सुशोभनाः ॥३६॥
नृत्यगीतप्रगल्भानामेतेषां द्विजसत्तमाः ।
लोके गणशतान्येव किन्नराणां महात्मनां ॥३७॥
यक्षा यक्षोपशान्तस्य लोहेया रूपशालिनी ।

दुहिता सुरविन्देति प्रकाशा सिद्धसम्मता ॥३८॥
उपायाकेतनस्याहि[१] स्वयमुत्पादितो गणः ।
करालकेन भूतानां तेषां नामानि मे शृणु ॥३९॥
भूता भूतगणैर्ज्ञेया आवेशकनिवेशकाः ।
इत्येवमादिर्हि गणो भूमिगोचरकः स्मृतः ॥४०॥
विज्ञेय इह लोकेऽस्मिन् भूतानां भूतनायकः ।
ये उत्कृष्टा भवन्त्येषामम्बरान्तरचारिणां ।
वृत्ताग्रमात्रमाकाशं ते चरन्ति न संशयः ॥४१॥
तत्रेमे देवगन्धर्व्वाः प्रायेण कथिता मया ।
देवोपस्थाननिरता विज्ञेयास्ते यशस्विनः ॥४२॥
नारायणं सुरगुरुं विरजं पुष्करेक्षणं ।
हिरण्यगर्भञ्च तथा चतुर्वक्त्रं स्वयम्भुवं ॥४३॥
शङ्करञ्च महादेवमीशानञ्च जगत्प्रभुं ।
इन्द्रपूर्वांस्तथादित्यान् रुद्रांश्च वसुभिः सह ॥४४॥
उपतस्थुः सगन्धर्वा नृत्यगीतविशारदाः ।
त्रिदशाः सर्वलोकस्था निपुणा गीतवादिनः ॥४५॥
हंसो ज्येष्ठः कनिष्ठोऽन्यो मध्यमौ च हहा हूहूः ।
चतुर्थो धिषणश्चैव ततो वासिरुचिस्तथा ॥४६॥
षष्ठस्तु तुम्बुरुस्तेषां ततो विश्वावसुः स्मृतः ।
इमाश्चाप्सरसो दिव्या विहिताः पुण्यलक्षणाः ॥४७॥
सुषुवेऽष्टौ महाभागा वरिष्ठा देवपूजिताः ।

---

१ पाठोऽयमादर्शसम्मतो मुद्रितः । परन्त्वयं न समीचीनः ।

अनवद्यामनवशामन्वतां मदनप्रियां ।
अरूपां सुभगां भासीमरिष्टाऽष्टौव्यजायत ॥४८॥
मनोवती सुकेशा च तुम्बुरोस्तु सुते उभे ।
पञ्चचूडास्त्विमा दिव्या दैविक्योऽप्सरसो दश ॥४९॥
मेनका सहजन्या च पर्णिनी पुञ्जिकस्थला ।
घृतस्थला घृताची च विश्वाची पूर्वचीत्यपि ।
प्रम्लोचेत्यभिविख्यातानुम्लोचन्ती तथैव च ॥५०॥
अनादिनिधनस्याथ जज्ञे नारायणस्य या ।
उरोः सर्वानवद्याङ्गी उर्वश्येकादशी स्मृता ॥५१॥
मेनस्य मेनका कन्या ब्रह्मणो हृष्टचेतसः ।
सर्व्वास्व ब्रह्मवादिन्यो महायोगास्व ताः स्मृताः ॥५२॥
गणा अप्सरसाञ्ज्ञाताः पुण्यास्ते वै चतुर्द्दश ।
आहृताः शोभयन्तश्च गणा ह्येते चतुर्दश ॥५३॥
ब्रह्मणो मानसाः कन्याः शोभयन्त्यो मनोः सुताः ।
वेगवन्त्यस्त्वरिष्टाया ऊर्ज्जायाश्चाग्निसम्भवाः ॥५४॥
आयुष्मन्त्यश्च सूर्यस्य रश्मिजाताः सुभास्वराः ।
वारिजा ह्यमृतोत्पन्ना अमृता नामतः स्मृताः ॥५५॥
वायूत्पन्ना मुदा नाम भूमिजाता भवास्तु वै ।
विद्युतश्च रुचो नाम मृत्योः कन्याश्च भैरवाः ॥५६॥
शोभयन्त्यः कामगुणा गणाः प्रोक्ता चतुर्द्दश ।
सेन्द्रोपेन्द्रैः सुरगणैः रूपातिशयनिर्मिताः ॥५७॥
शुभरूपा महाभागा दिव्या नारी तिलोत्तमा ।

ब्रह्मणश्चाग्निकुण्डाच्च देवनारी प्रभावती ।
रूपयौवनसम्पन्ना उत्पन्ना लोकविश्रुता ॥५८॥
वेदीतलसमुत्पन्ना चतुर्वक्त्रस्य धीमतः ।
नाम्ना वेदव्रती नाम सुरनारी महाप्रभा ॥५९॥
तथा यमस्य दुहिता रूपयौवनशालिनी ।
वरहेमविभा हेमा देवनारी सुलोचना ॥६०॥
इत्येते बहुसाहस्रं भास्वरा ह्यप्सरोगणाः ।
देवतानामृषीणाञ्च पत्न्यस्ता मातरश्च ह ॥६१॥
सुगन्धाश्चम्पवर्णाश्च सर्वाश्चाप्सरसः समाः ।
सम्प्रयोगे तु कान्तेन मद्यन्ति मदिरां विना ।
तासामाप्यायते स्पर्शादानन्दश्च विवर्द्धते ॥६२॥
विनतायास्तु पुत्रौ द्वावरुणो गरुड़श्च ह ।
षट्त्रिंशत्तु स्वसारश्च यवीयस्यस्तु ताः स्मृताः ॥६३॥
गायत्र्यादीनि छन्दांसि सौपर्णेयाश्च पक्षिणः ।
इत्येवाहानि सर्वाणि दिक्षु सन्निहितानि च ॥६४॥
कद्रूर्नागसहस्रं वै चराचरमजीजनत् ।
अनेकशिरसां तेषां खेचराणां महात्मनां ।
बहुधा नामधेयानां प्रायशस्तु निबोधत ॥६५॥
तेषां प्रधाननागाश्च शेषवासुकितक्षकाः ।
सकर्णीरश्च जम्भश्च(१) अञ्जनो वामनस्तथा(२) ॥६६॥

---

१ कर्णारश्चैव जम्भश्चेति ख॰ ।
२ मुञ्जनो वामनस्तथेति ख॰ । मुञ्जानो वामनस्तथेति ग॰।

ऐरावतमहापद्मौ कम्बलाश्वतरावुभौ ।
ऐलपत्रश्च शङ्खश्च[१] कर्कोटकधनञ्जयौ ॥६७॥
महाकर्णो महानीलो धृतराष्ट्रबलाहकौ ।
कुमारः पुष्पदन्तश्च सुमुखो दुर्मुखस्तथा ॥६८॥
शिलीमुखः[२] दधिमुखः कालीयः शालिपिण्डकः ।
विन्दुपादः[३] पुण्डरीको नागश्चापूरणस्तथा ॥६९॥
कपिलश्चाम्बरीषश्च धृतपादश्च कच्छपः ।
प्रह्लादः पद्मचित्रश्च गन्धर्व्वोऽथ नमस्विकः[४] ॥७०॥
नहुषः खररोमा च मणिरित्येवमादयः ।
काद्रवेया मया ख्याताः खाशायांस्तु निबोधत ॥७१॥
खशा विजज्ञे पुत्रौ द्वौ विश्रुतौ पुरुषादकौ ।
ज्येष्ठं पश्चिमसन्ध्यायां पूर्वस्यां मनुजास्तथा ॥७२॥
विलोहितं विकर्णञ्च पूर्व्वं साऽजनयत् सुतं ।
चतुर्भुजं चतुष्पादं द्विमूर्द्धानं द्विधागतिं ॥७३॥
सर्वाङ्गकेशं स्थूलाङ्गं तुङ्गनासं महोदरं ।
स्थूलशीर्षं महाकर्णं मुञ्जाकेशं मनोरथं ॥७४॥
हस्त्योष्ठं दीर्घजङ्घञ्च अश्वदंष्ट्रं महाहनुं ।
रक्तजिह्वं जटावन्तञ्च स्थूलास्यं दीर्घनासिकं ॥७५॥

---

१ एलापत्रश्च शेषश्चेति ख०, ङ० च ।
२ शुनीमुख इति ख० ।
३ विल्वपाद इति ङ० ।
४ मनस्विन इति ख०, ग० च ।

गुह्यकं शितिकण्ठञ्च महानन्दं महामुखं ।
एवम्बिधं खशा पुत्रं विजज्ञे साऽतिभीषणं ॥७६॥
तस्यानुजं द्वितीयन्तु खशा चैव व्यजायत ।
त्रिशीर्षञ्च त्रिपादञ्च त्रिहस्तं कृष्णलोचनं ॥७७॥
ऊर्द्धकेशं हरित्श्मश्रुं शिलासंहननं दृढं ।
ह्रस्वकायं सुबाहुञ्च महाकायं महाबलं ॥७८॥
आकर्णदारितास्यञ्च लम्बभ्रूं स्थूलनासिकं ।
स्थूलोष्ठमष्टदंष्ट्रञ्च द्विजिह्वं शङ्कुकर्णकं ॥७९॥
पिङ्गलोद्वृत्तनयनं जटिलं पिङ्गलं तथा(१) ।
महाकर्णं महोरस्कं कटिहीनं कृशोदरं ।
नखिनं लोहितग्रीवं सा कनिष्ठं प्रसूयते ॥८०॥
सद्यः प्रसूतमात्रौ तु विवृद्धौ च प्रमाणतः ।
उपभोगसमर्थाभ्यां शरीराभ्यामुपस्थितौ ।
सद्योजातविवृद्धाङ्गौ मातरं पर्य्यभूष्यतां ॥८१॥
ज्यायांस्तयोस्तु यः क्रूरो मातरं सोऽभ्यकर्षत ।
अब्रवीन्मातरायाहि भक्षार्थी क्षुधयार्द्दितः ॥८२॥
न्यषेधयत् पुनर्हीनं ज्यायांसन्तु कनिष्ठकः ।
अब्रवीत् सोऽसकृत्तं वै रक्षेमां मातरं खशां ।
बाहुभ्यां परिगृह्यैनं मातरन्तां व्यमोचयत् ॥८३॥
एतस्मिन्नेव काले तु प्रादुर्भूतस्तयोः पिता ।
तौ दृष्ट्वा विकृतावारौ वसतां हीत्यभाषत ॥८४॥

---

१ जटिलोलञ्च पिङ्गलमिति ख० ।

तौ तु तं पितरं दृष्ट्वा बलवन्तौ त्वरान्वितौ ।
मातुरेव पुनस्त्वाङ्के प्रलपेतां स्वमायया ॥८५॥
अथोऽब्रवीदृषिर्भार्यामावाभ्यामुक्तवत्यसि ।
पूर्वमाचक्ष्व तत्त्वेन तथैवाभ्यां व्यतिक्रमं ॥८६॥
मातुलं भजते पुत्रः पितॄन् भजति कन्यका ।
यथाशीला भवेन्माता तथाशीलो भवेत्सुतः ॥८७॥
यद्वर्णा तु भवेद्भूमिस्तद्वर्णं सलिलं ध्रुवं ।
मातॄणां शीलदोषेण तथा शीलगुणैः पुनः ।
विभिन्नास्तु प्रजाः सर्व्वास्तथा ख्यातिवशेन च ॥८८॥
बलशीलादिभिस्तासामदितिर्धर्म्मतत्परा ।
धर्म्मशीलादिभिश्चैव प्रबोधबलशालिनी ॥८९॥
गीतशीला तथाऽरिष्टा मायाशीला दनुः स्मृता ।
विनता तु पुनर्द्देवी वैहायसगतिप्रिया ॥९०॥
तपोमयेन शीलेन सुरभिः समलङ्कृता ।
क्रोधशीला तथा कद्रुः क्रोधेनासुखशीलका ॥९१॥
दनायुषायाः शीलं वै वैरानुग्रहलक्षणं ।
त्वञ्च देवि महाभागे क्रोधशीला मतासि मे ॥९२॥
इत्येतानि सशीलानि स्वभावालोकनान्नृणां ।
कर्म्मतो यत्नतो बुद्ध्या रूपतो बलतस्तथा ।
क्षमातश्चैव भिन्नानि भावितार्थबलेन च ॥९३॥
रजःसत्त्वतमोवृत्तेर्विश्वरूपाः स्वभावतः ।
मातुलन्त्वनुयातास्ते पुत्रका गुणवृत्तिभिः ॥९४॥

इत्येवमुक्त्वा भगवान् खशामप्रतिमां तदा ।
पुत्रावाह्वय साम्ना वै चक्रे सोममभीतयः(१) ॥९५॥
ताभ्याञ्च यत् कृतं तस्यास्तदाचष्ट तदा खशा ।
मात्रा यथा समाख्यातं कर्म्म ताभ्यां पृथक् पृथक् ।
तेन धात्वर्थयोगेन तत्त्वदर्शी चकार ह ॥९६॥
यत्त इत्येष धातुर्वै खादने क्षपणे च सः ।
यत्त्वयत्युक्तवान् यस्मात् तस्माद्यक्षो भवत्ययं ॥९७॥
रक्ष इत्येष धातुर्यः पालने स विभाव्यते ।
उक्तवांश्चैव यस्मात् तु रक्ष मे मातरं खशां ।
नाम्नाऽयं राक्षसस्तस्मात् भविष्यति तवात्मजः ॥९८॥
स तदा तद्विधान् दृष्ट्वा विस्मितः परिम्टग्य च(२) ।
तयोः प्रादिशदाहारं प्रजापतिरसृग्वसे ॥९९॥
पिता तौ क्षुधितौ दृष्ट्वा वरञ्चेमं तयोर्ददौ ।
युवयोर्हस्तसंस्पर्शो नक्तमेव तु सर्वशः ॥१००॥
नक्ताहारविहारौ च दिवा स्वप्नोपभोगिनौ(३) ।
नक्तञ्चैव बलीयांसौ दिवा सुप्तावुभौ युवां ॥१०१॥
मातरं रक्षतञ्चैव धर्म्मश्चैवानुशिष्यतां ।
इत्युक्त्वा कश्यपः पुत्रौ तत्रैवान्तरधीयत ॥१०२॥
गते पितरि तौ वीरौ निसर्गादेव दारुणौ ।

---

१ पाठोऽयं न समीचीनः ।
२ परिमृज्य चेति ख० ।
३ सुप्तोपभोगिनाविति ख० ।

विपर्ययेण वर्त्तन्तौ किम्भक्षौ प्राणिहिंसकौ ॥१०३॥
महाबलौ महासत्त्वौ महाकायौ दुरासदौ ।
मायाविनौ च दृश्यौ तावन्तर्द्धानगतावुभौ ॥१०४॥
तौ कामरूपिणौ घोरौ विकृताङ्गौ स्वभावतः ।
रूपानुरूपैराहारैः प्रभवेतामुभावपि ॥१०५॥
देवासुरानृषींश्चैव गन्धर्वान् किन्नरानपि ।
पिशाचांश्च मनुष्यांश्च पन्नगान् पक्षिणः पशून् ॥१०६॥
भक्षार्थमपि लिप्सन्तौ सर्वतस्तौ निशाचरौ ।
इन्द्रेण तु वरौ चैव धृतौ दत्वा सुबध्यतां ॥१०७॥
यक्षस्तु न कदाचिद्वै निशीथे ह्येककश्चिरं ।
आहारं स परीप्सन् वै शब्देनानुचचार ह ॥१०८॥
आससाद पिशाचौ द्वौ जन्तुचण्डौ च तावुभौ ।
पिङ्गाक्षावूर्द्ध्वरोमाणौ वृत्ताक्षौ तु सुदारुणौ ॥१०९॥
असृङ्मांसवसाहारौ पुरुषादौ महाबलौ ।
कन्याभ्यां सहितौ तौ तु ताभ्यां प्रियचिकीर्षया[१] ॥११०॥
द्वे कन्ये कामरूपिण्यौ तदाचारे च ते शुभे ।
आहारार्थमटन्तौ तौ कन्याभ्यां सहितावुभौ ॥१११॥
तेऽपश्यन् राक्षसं तत्र कामरूपं महाबलं ।
सहसा सन्निपाते तु दृष्ट्वा चैव परस्परं ॥११२॥
रक्षमाणौ ततोऽन्योन्यं परस्परजिघृक्षवः ।

---

१ भर्तृचिकीर्षयेति क०, ङ० च ।

पितरावूचतुः कन्ये युवामानयत द्रुतं ॥११३॥
जीवग्राहं विगृह्यैनं विस्फुरन्तं पदे पदे ।
ततः समभिसृत्यैनं कन्ये जगृहतुस्तदा ।
गृहीत्वा हस्तयोस्ताभ्यामानीते पितृसंसदि ॥११४॥
ताभ्यां करे गृहीतं तं पिशाचमथ राक्षसं ।
पृच्छतां कोऽसि कस्य त्वं स च सर्वमभाषत ॥११५॥
तस्य कर्म्माभिविज्ञातं ज्ञात्वा तौ राक्षसर्षभौ[1] ।
अजञ्च खण्डं तस्यैते प्रत्यपादयतां सुते ।
तौ तुष्टौ कर्म्मणा तस्य कन्ये द्वे ददतुः सुते ॥११६॥
पैशाचेन विवाहेन सुदत्या बुद्धवाहनः[2] ।
अजः खण्डस्य ताभ्यां तौ तदाश्रावयतां धनं ॥११७॥
इयं ब्रह्मधना नाम मम कन्या ह्यलोमिका ।
ब्रह्मसत्त्वधनाहारा इति खण्डोऽभ्यभाषत ॥११८॥
इयं जन्तुधना नाम कन्या सर्वाङ्गसुन्दरी[3] ।
जन्तवोऽस्या धनाहारा स्तावश्रावयतां धनं ॥११९॥
सर्वाङ्गकेशी नाम्ना च कन्या जन्तुधना तथा ।
अकर्णान्ताप्यरोमा च कन्या ब्रह्मधना तु या ॥१२०॥
ब्रह्मधनं[4] प्रसूता सा धनानाच्चैव कन्यका ।

---

१ राक्षसावुभाविति ख० ग० च ।
२ सुदुरासदाविति ख० ।
३ सर्व्वाङ्गजर्त्तिला इति ङ० ।
४ ब्रह्मध्यानमिति ङ० ।

एवं पिशाचकन्ये ते मिथुने द्वे प्रसूयतां ।
तयोः प्रजाविसर्गञ्च ब्रुवतो मे निबोधत ॥१२१॥
हेत-प्रहेतरुग्रश्च पौरुषेयो बधस्तथा ।
विस्फूर्जिश्चैव[1] वातश्च आपो व्याघ्रस्तथैव च ॥१२२॥
सर्पश्च राक्षसा ह्येते यातुधानात्मजा दश ।
सूर्य्यस्यानुचरा ह्येते सह तेन भ्रमन्ति च ॥१२३॥
हेतपुत्रस्तथा लङ्कुर्लङ्कोर्द्वावेव चात्मजौ ।
माल्यवांश्च सुमाली च प्रहेततनयान् शृणु ।
प्रहेततनयः श्रीमान् पुलोमा नामविश्रुतः ॥१२४॥
बधपुत्रो निकुम्भश्च क्रूरो वै ब्रह्मराक्षसः ।
वातपुत्रो विरागस्तु आपपुत्रस्तु जम्बुकः ॥१२५॥
व्याघ्रपुत्रो निरानन्दो जन्तूनां[2] विघ्नकारकः ।
इत्येते वै परिक्रान्ताः क्रूराः सर्व्वे तु राक्षसाः ॥१२६॥
कीर्त्तिता यातुधानास्तु ब्रह्मधानान् निबोधत[3] ।
यज्ञः पिता धुनिः क्षेमो ब्रह्मा पापोऽथ यज्ञहा ॥१२७॥
स्वाकोटकः कलिः सर्पो ब्रह्मधानात्मजा दश ।
स्वसारो ब्रह्मराक्षस्यस्तेषाञ्चेमाः सुदारुणाः ॥१२८॥
रक्तकर्णा महाजिह्वाऽक्षया चैवोपहारिणी ।
एतासामन्वये जाताः पृथिव्यां ब्रह्मराक्षसाः ॥१२९॥

---

१ विस्फूर्जश्चैवेति ग० ।
२ मारो वै इति ख० । सर्पो वै इति ङ० ।
३ ब्रह्मनाम्नि निबोधत इति ख०, ग० च ।

श्लेष्मातकतरुष्वेते प्रायशस्तु कृतालयाः ।
इत्येते राक्षसाः क्रान्ताः[१] यक्षस्यापि निबोधत ॥१३०॥
चकमेऽप्सरसं यक्षः पञ्चस्थूलां क्रतुस्थलीं ।
तां लिप्सुश्चिन्तमानश्च नन्दनं स चचार ह ॥१३१॥
वैभ्राजं सुरभिञ्चैव तथा चैत्ररथञ्च यत् ।
दृष्टवान् नन्दने तस्मिन्नप्सरोभिः सहासतीं ॥१३२॥
नोपायं विन्दते तत्र तस्या लाभाय चिन्तयन् ।
दूषितः स्वेन रूपेण कर्म्मणा तेन दूषितः ॥१३३॥
ममोद्विजन्ते भूतानि भयाद्वृत्तस्य सर्वशः ।
तत्कथं नाम चार्व्वङ्गीं प्राप्नुयामहमङ्गनां ॥१३४॥
दृष्ट्वोपायं ततः सोऽथ शीघ्रकारी व्यवर्त्तत ।
कृत्वा रूपं बहुमतं[२] गन्धर्व्वस्य तु गुह्यकः ।
ततः सोऽप्सरसां मध्ये तां जग्राह क्रतुस्थलीं ॥१३५॥
बुद्ध्वा च सुरुचिन्तं सा भावेनैवाभ्यवर्त्तत ।
संवृतः स तया सार्द्धं दृश्यमानोऽप्सरोगणैः ॥१३६॥
तत्र स सिद्धकरणः सद्यो जातः सुतोऽस्य वै ।
परिणाहोच्छ्रयैर्युक्तः सद्यो वृत्तो ज्वलन् श्रिया ॥१३७॥
राजाहमिति नाभिर्हि[३]पितरं सोऽभ्यभाषत ।
तवात्र जाते न भीतिः पिता तं प्रत्युवाच ह ॥१३८॥

---

१ प्रोक्ता इति ख० ।
२ बहुरूचे इति ङ० ।
३ नारीणामिति ख० ।

मात्रानुरूपो रूपेण पितुर्वीर्य्येण जायते।
जाते स तस्मिन् हर्षेण स्वरूपं प्रत्यपद्यत ॥१३९॥
स्वभावं प्रतिपद्यन्ते हृहन्तो यक्षराक्षसाः।
म्रियमाणाः प्रसुप्ताश्च क्रुद्धा भीताः प्रहर्षिताः ॥१४०॥
ततोऽब्रवीदप्सरस स्मयमानः स गुह्यकः।
गृहं मे गच्छ सुश्रोणि सपुत्रा वरवर्णिनी ॥१४१॥
इत्युक्ता सहसा तच्च दृष्ट्वा स्वं रूपमास्थितं।
विभ्रान्ताः प्राद्रवन् भीताः क्रोधमानाऽप्सरोगणाः ॥१४२॥
गच्छन्तीरन्वगच्छद्या पुत्रस्तां सान्त्वयन् गिरा।
गन्धर्वाप्सरसां मध्ये तां नीत्वा स न्यवर्त्तत ॥१४३॥
ताञ्च दृष्ट्वा समुत्पत्तिं यक्षस्याप्सरसां गणाः।
यक्षाणां त्वं जनित्रीति प्रोचुस्तां वै क्रतुस्थलीं ॥१४४॥
जगाम सह पुत्रेण ततो यक्षः स्वमालयं।
न्यग्रोधरोहिणं नाम गुह्यका यत्र शेरते।
तस्मान्निवासो यक्षाणां न्यग्रोधः सर्वतः प्रियः ॥१४५॥
यक्षो रजतनाभस्तु गुह्यकानां पितामहः।
अनुह्रादस्य दैत्यस्य भद्रामतिवरां सुतां।
उपयेमे स भद्रायां यस्यां मणिवरो वशी ॥१४६॥
जज्ञे सा मणिभद्रञ्च शक्रतुल्यपराक्रमं।
तयोः पत्न्यौ भगिन्यौ तु[१] क्रतुस्थल्यात्मजे[२] शुभे ॥१४७॥

---

१ पाठोऽयं न पूर्व्वापरसङ्गतः।
२ क्रतुस्थल्याः सुते इति ग०।

नाम्ना पुण्यजनी चैव तथा देवजनी च या ।
विजज्ञे मणिभद्रात्तु पुत्रान् पुण्यजनी शुभान् ॥१४८॥
सिद्धार्थं सूर्यतेजञ्च सुमन्तं नन्दनं तथा ।
कन्यकं(१) यविकञ्चैव(२) मणिदत्तं वसुं तथा ॥१४९॥
सर्वानुभूतं(३) शङ्खञ्च पिङ्गाक्षं भीरुमेव च ।
तथा मन्दरशोभिञ्च पद्मं चन्द्रप्रभं तथा ॥१५०॥
मेघपूर्णं सुभद्रञ्च प्रद्योतञ्च महौजसं(४) ।
द्युतिमत्केतुमन्तौ च मित्रं मौलिसुदर्शनौ ॥१५१॥
चत्वारो विंशतिश्चैव पुत्राः पुण्यजनाः शुभाः ।
जज्ञिरे मणिभद्रस्य ते सर्वे पुण्यलक्षणाः ।
तेषां पुत्राश्च पौत्राश्च यक्षाः पुण्यजनाः शुभाः ॥१५२॥
विजज्ञे देवजननी पुत्रान् मणिवरात्मजात् ।
पूर्णभद्रं हेमरथं(५) मणिमन्नन्दिवर्द्धनौ ॥१५३॥
कुस्तुम्बुरुं पिशङ्गाभं स्थूलकर्णं महाजयं ।
श्वेतञ्च विपुलञ्चैव पुष्पवन्तं भयावहं ॥१५४॥
पद्मवर्णं सुनेत्रञ्च यक्षं बालं वकं तथा ।
कुमुदं क्षेमकञ्चैव वर्द्धमानं तथा दमं ॥१५५॥
पद्मनाभं वराङ्गञ्च सुवीरं विजयं कृतिं ।

---

१ कल्पकमिति ख० ।
२ पार्थिकञ्चैवेति ख० । पत्रिकञ्चैवेति ङ० ।
३ सर्व्वार्थभूतमिति ख०, ग० च ।
४ महोरसमिति ख० ।
५ हेमवन्तमिति ङ० ।

पूर्णमासं हिरण्याक्षं सुरूपञ्चैवमादयः ॥१५६॥
पुत्रा मणिवरस्यैते यक्षा वै गुह्यकाः स्मृताः ।
सुरूपाश्च विरूपाश्च स्रग्विनः प्रियदर्शनाः ।
तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः ॥१५७॥
खशायास्त्वपरे पुत्रा राक्षसाः कामरूपिणः ।
तेषां यथा प्रधानान् वै वर्ण्यमानान्निबोधत ॥१५८॥
लालाविः[1] कुथनो भीमः[2] सुमाली मधुरेव च ।
विस्फूर्जितो विद्युज्जिह्वो मातङ्गो धूम्रितस्तथा ॥१५९॥
चन्द्रार्कः सुकरो बुध्नः कपिलोमः प्रहासकः[3] ।
क्रीडः परशुनाभश्च चक्राक्षश्च[4] निशाचरः ॥१६०॥
त्रिशिराः शतदंष्ट्रश्च तुण्डकेशश्च राक्षसः ।
यक्षश्चाकम्पनश्चैव दुर्मुखश्च शिलीमुखः ॥१६१॥
इत्येते राक्षसवरा विक्रान्ता गणरूपिणः ।
सर्वलोकचरास्ते तु त्रिदशानां समक्रमाः ॥१६२॥
सप्त चान्या दुहितरस्ताः शृणुध्वं यथाक्रमं ।
तासाञ्च यः प्रजासर्गो येन चोत्पादिता गणाः ॥१६३॥
आलम्बा उत्कचा कृष्णा निर्ऋता कपिला शिवा ।
केशिनी च[5] महाभागा भगिन्यः सप्त याः स्मृताः ॥१६४॥

---

१ लालविरिति ख० ।
२ कुबलो भीम इति ख० ।
३ प्रभाकर इति ख० ।
४ वक्राक्षश्चेति क० ।
५ वेशिनी चेति ख०, ग० च ।

ताभ्यो लोकामिषादश्च हन्तारो युद्धदुर्मदाः ।
उदीर्णा राक्षसगणा इमे उत्पादिताः शुभाः ॥१६५॥
आलम्बेयो गणः क्रूर उन्कचेयो गणस्तथा ।
तथा कार्ष्णेयशैवेया राक्षसा ह्युत्तमा गणाः ॥१६६॥
तथैव नैर्ऋतो नाम त्र्यम्बकानुचरेण ह ।
उत्पादितः प्रजासर्गो गणेश्वरचरेण तु ॥१६७॥
उत्पादिता बलवता उदीर्णा यक्षराक्षसाः ।
विक्रान्ताः शौर्य्यसम्पन्ना नैर्ऋता देवराक्षसाः ।
येषामधिपतिर्युक्तो नाम्ना ख्यातो विरूपकः ॥१६८॥
तेषां गणशतानेका उद्धृतानां महात्मनां ।
प्रायेणानुचरन्त्येते शङ्करं जगतः प्रभुं ॥१६९॥
दैत्यराजेन कुम्भेन महाकाया महात्मना ।
उत्पादिता महावीर्य्या महाबलपराक्रमाः ॥१७०॥
कपिलेया महावीर्य्या उदीर्णा दैत्यराक्षसाः ।
कम्पनेन च यक्षेण केशिन्यास्ते परे जनाः ॥१७१॥
उत्पादिता महावाता उदीर्णा यक्षराक्षसाः ।
केशिनीदुहितुश्चैव नीलायाः क्षुद्रमानसाः ॥१७२॥
आलम्बेयेन जनिता नैकाः सुरभिकेन हि ।
नैला इति समाख्याता दुर्जया घोरविक्रमाः ॥१७३॥
चरन्ति पृथिवीं कृत्स्नां तत्र ते देवलौकिकाः ।
बहुत्वाच्चैव सर्गस्य तेषां वक्तुं न शक्यते ॥१७४॥
तस्यास्त्वपि च नीलाया विकचा नाम राक्षसी ।

दुहिता स्वभावविकचा मन्दसत्त्वपराक्रमा॥१७५॥
तस्या अपि विरूपेण नैर्ऋतेनेह च प्रजाः।
उत्पादिताः सुरा घोराः शृणु तास्त्वनुपूर्वशः॥१७६॥
दंष्ट्राकरालविकृता महाकर्णा महोदराः।
हारका भीषकाश्चैव तथैव क्रामकाः परे॥१७७॥
वैनकाश्च पिशाचाश्च वाहकाः प्राशकाः परे।
भूमिराक्षसका ह्येते मन्दाः पुरुषविक्रमाः॥१७८॥
चरन्त्यदृष्टपूर्वाश्च नानाकारा ह्यनेकशः।
उत्कृष्टबलसत्त्वा ये ते च वै खेचराः स्मृताः॥१७९॥
लक्षमात्रेण चाकाशं स्वल्पाः स्वल्पं चरन्ति वै।
एतैर्व्याप्तमिमं लोकं शतशोऽथ सहस्रशः॥१८०॥
भूमिराक्षसकैः सर्व्वैरनेकैः क्षुद्रराक्षसैः।
नानाप्रकारैराक्रान्ता नानादेशाः समन्ततः॥१८१॥
समासाभिहताश्चैव ह्यष्टौ राक्षसमातरः।
अष्टौ विभागा ह्येषां हि विख्याता अनुपूर्वशः॥१८२॥
भद्रका निकराः केचिद्यज्ञनिष्पत्तिहेतुकाः।
सहस्रशतसङ्ख्याता मर्त्त्यलोकविचारिणः॥१८३॥
पूतना मातृसामान्यास्तथा भूतभयङ्कराः।
बालानां मानुषे लोके ग्रहा वैमानहेतुकाः॥१८४॥
स्कन्दग्रहादयश्चैव आपकास्त्रासकादयः।
कौमारास्ते तु विज्ञेया बालानां ग्रहवृत्तयः॥१८५॥

स्कन्दग्रहविशेषाणां[१] मायिकानां तथैव च ।
पूतनानामभूतानां ये च लोकविनायकाः ॥१८६॥
सहस्रशतसङ्ख्यानां मर्त्यलोकविचारिणां ।
एवं गणशतान्येव चरन्ति पृथिवीमिमां ॥१८७॥
यक्षाः पुण्यतमा नाम तथा ये केऽपि गुह्यकाः ।
यक्षा देवजनाश्चैव तथा पुण्यजनाश्च ये ॥१८८॥
गुह्यकानाञ्च सर्व्वेषामगस्त्या ये च राक्षसाः ।
पौलस्त्या राक्षसा ये च विश्वमित्राश्च ये स्मृताः ॥१८९॥
यक्षाणां राक्षसानाञ्च पौलस्त्यागस्त्ययश्च ये ।
तेषां राजा महाराजः कुवेरो ह्यलकाधिपः ॥१९०॥
यक्षा दृष्ट्वा पिवन्तीह नृणां मांसमसृग्वसां ।
रक्षांस्यनुप्रवेशेन पिशाचाः परिपीडनैः ॥१९१॥
सर्वलक्षणसम्पन्नाः समक्षेत्राश्च दैवतैः ।
भास्वरा बलवन्तश्च ईश्वराः कामरूपिणः ॥१९२॥
अनाभिभक्षा विक्रान्ताः सर्व्वलोकनमस्कृताः ।
सूक्ष्माश्चौजस्विनो मेध्या वरदा यज्ञियाश्च ये ॥१९३॥
देवानां तुल्यधर्माणां ह्यसुराः सर्वशः स्मृताः ।
त्रिभिः पादैस्तु गन्धर्वा देवैर्हीनाः प्रभावतः ॥१९४॥
गन्धर्वेभ्यस्त्रिभिः पादैर्हीना वै सर्वगुह्यकाः ।
प्रभावतुल्या यक्षाणां विज्ञेयाः सर्व्वराक्षसाः ।
ऐश्वर्य्यहीना यक्षेभ्यः पिशाचास्त्रिगुणं पुनः ॥१९५॥

---

१ स्कन्देन च विशाखान मिति ग० ।

एवं धनेन रूपेण आयुषा च बलेन च ।
धर्म्मैश्वर्य्येण बुद्ध्या च तपःश्रुतपराक्रमैः ॥१९६॥
देवासुरेभ्यो हीयन्ते त्रीन् पादान् वै परस्परं ।
गन्धर्वाद्याः पिशाचान्तास्ततस्ता देवयोनयः ॥१९७॥
सूत उवाच । अतः शृणुत भद्रं वः प्रजाः क्रोधवशात्मकाः ।
क्रोधायां कन्यका जज्ञे द्वादश ह्यात्मसम्भवाः ।
ता भार्य्याः पुलहस्यासन्नामतस्ता निबोधत ॥१९८॥
मृगी च मृगमन्दा च हरिभद्रा इरावती ।
भूता च कपिशा दंष्ट्रा निशा तिर्य्या तथैव च ।
श्वेता चैव खरा चैव सुरसा चेति विश्रुताः ॥१९९॥
मृग्यास्तु हरिणाः पुत्रा मृगास्त्वान्याः शशास्तथा ।
न्यङ्कवः शरभा ये च रुरवः पृषताश्च ये ॥२००॥
मृगराजा मृगमन्दाया गवयाश्चापरे तथा ।
महिषोष्ट्रवराहाश्च खड्गगौरमुखास्तथा[1] ॥२०१॥
हरेस्तु हरयः पुत्रा गोलाङ्गूलतरक्षवः ।
वानराः किन्नराश्चैव व्याघ्राः किम्पुरुषास्तथा ।
इत्येवमादयोऽन्येऽपि इरावत्या निबोधत ॥२०२॥
सूर्यस्याण्डकपाले द्वे समानीय तु भौवनः ।
हस्ताभ्यां परिगृह्याथ रथन्तरमगायत ॥२०३॥
साम्ना प्रसूयमानेन सद्य एव गजोऽभवत् ।

---

१ खड्गगौरमृगास्तथेति ङ० ।

स प्रायच्छदिरावत्यै पुत्रार्थे[१] स तु भौवनः ॥२०४॥
इरावत्याः सुतो यस्मात् तस्मादैरावतः स्मृतः ।
देवराजोपवाह्यत्वात् प्रथमः स मतङ्गराट् ॥
शुभ्राभ्राभश्चतुर्दंष्ट्रः श्रीमानैरावतो गजः ॥२०५॥
अप्सुजस्यैकमूलस्य सुवर्णाभस्य हस्तिनः ।
षड्दन्तस्य हि भद्रस्य औपवाह्यस्य वै बलः ॥२०६॥
तस्य पुत्रोऽञ्जनश्चैव सुप्रतीकोऽथ वामनः ।
पद्मश्चैव चतुर्थोऽभूद्धस्तिनी चाभ्रमुस्तथा ॥२०७॥
दिग्गजांस्तांश्च चत्वारः श्वेताऽजनयताशुगान् ।
भद्रं मृगञ्च मन्दञ्च सङ्कीर्णं चतुरः सुतान् ॥२०८॥
सङ्कीर्णोऽप्यञ्जनो यस्तु उपवाह्यो यमस्य तु ।
भद्रो यः सुप्रतीकस्तु हरितः स ह्यपाम्पतेः ॥२०९॥
पद्मो मन्दस्तु यो गौरो द्विपो ह्यैलविलस्य[२] सः ।
मृगः श्यामस्तु यो हस्ती उपवाह्यः स पावकेः ॥२१०॥
पद्मोत्तरस्तु यः पद्मः[३] गजो वै वरुणो गणः ।
उपलेपनमेषश्च तस्याष्टौ जज्ञिरे सुताः ॥२११॥
उदग्रभावेनोपेता जायन्ते तस्य चान्वये ।
श्वेतबालनखाः पिङ्गा वर्ष्मवन्तो मतङ्गजाः ।
मतङ्गजान् प्रवक्ष्यामि नागानन्यानपि क्रमात् ॥२१२॥

---

१ पुत्रायेति ख०, ग० च ।
१ ह्यैड़विड़स्येति ङ० ।
१ पद्मोत्तरः पद्मवांस्त्वेति ङ० ।

कपिलः पुण्डरीकश्च सुमनाभो रथान्तरः ।
जातौ नाम्ना सुतौ ताभ्यां सुप्रतिष्ठप्रमर्द्दनौ ॥२१३॥
शूलाः स्थूलाः शिरोदान्ताः शुद्धबालनखास्तथा ।
बलिनः शक्तिनश्चैव स्मृतास्त्वाकुलिका गजाः ॥२१४॥
पुष्पदन्तो बृहत्सामा षड्दन्तो दन्तपुष्पवान् ।
ताम्रवर्णौ च तत्पुत्रः सहचारिविषाणितः[१] ॥२१५॥
अन्वये चास्य जायन्ते लम्बोष्ठाश्चारुदर्शिनः ।
श्यामाः सुदर्शनाश्चण्डा नानापीड़ायताननाः ॥२१६॥
वामदेवोऽञ्जनश्यामः साम्नो जज्ञेऽथ वामनः ।
भार्य्या चैवाङ्गदा तस्य नीलवल्लक्षणौ सुतौ ॥२१७॥
चण्डाश्चारुशिरोग्रीवा व्यूढोरस्कास्तरस्विनः ।
नरैर्बद्धाः कुले तेषां जायन्ते विकृता गजाः ॥२१८॥
सुप्रतीकस्तु रूपेण नास्त्यस्य सदृशो गजः ।
तस्य प्रहारी सम्पाती पृथुश्चिन्तिसुतास्त्रयः ॥२१९॥
पशवो दीर्घताल्वोष्ठा सुविभक्तशिरोदराः ।
जायन्ते मृदुसम्भूता वंशे तस्य मतङ्गजाः ॥२२०॥
अञ्जनादञ्जना साम्नो विजज्ञे चाञ्जनावती ।
एवं माता तयोश्चापि प्रथितायुरजः सुतौ ॥२२१॥
महाविभक्तशिरसः स्निग्धजीमूतसन्निभाः ।

१ सहचारिविषादक इति ग० । सहचारिविषाणिन इति ख०, ङ० च ।

सुदर्शनाः सुवर्णाभाः पद्माभाः परिमण्डलाः।
शूनाः पीतायतमुखा गजास्तस्यान्वयेऽभवन् ॥२२२॥
जज्ञे चन्द्रमसः साम्नः पिङ्गला कुमुदद्युतिः।
पिङ्गलायाः सुतौ तस्या महापद्मोर्मिमालिनौ ॥२२३॥
समायवरदांश्चण्डान् प्रवृद्धबलिनोदरान्।
हस्तियुद्धे प्रियान्नागान् विद्धि तस्य कुलोद्भवान् ॥२२४॥
एतान् देवासुरे युद्धे जयार्थे जगृहुः सुराः।
कृतार्थैश्च विसृष्टास्तैः पूर्वोक्ताः प्रययुर्दिशः ॥२२५॥
एतेषामन्वये जातान् विनीतांस्त्रिदशा ददुः।
अङ्गाय लोमपादाय सूत्रकाराय वै द्विपान् ॥२२६॥
द्विरदो द्विरदाभ्याञ्च हस्ताद्धस्ती करात् करी।
वरणाद्वारणो दन्ती दन्ताभ्यां गर्जनाद्गजः ॥२२७॥
कुञ्जरः कुञ्जचारित्वान्नागो नगविरोधतः।
मतङ्गादिति मातङ्गो द्विपो द्वाभ्यामपि स्मृतः।
सामजः सामजातत्वादिति निर्वचनक्रमः ॥२२८॥
एषां जिह्वापरावृत्तिरिवार्कं(१) ह्यग्निशापजं।
बलस्यानवतो या तु(२) या चैषाङ्गूढमुष्कता।
उभयं दन्तिनामेतत् स्वयम्भूसुरशापजं ॥२२९॥
देवदानवगन्धर्वाः पिशाचोरगराक्षसाः।
कन्यासु जाता दिङ्नागैर्नानासत्त्वास्ततो गजाः ॥२३०॥

---

१ पाठोऽयं आदर्शसम्मतो मुद्रितः। परन्त्वयं न समीचीनः।
२ अयमप्यादर्शदोषेणासमीचीन एव मुद्रितः।

सम्भूतिश्च प्रभूतिश्च नामनिर्वचनन्तथा ।
एतद्गजानां विज्ञेयं येषां राजा विभावसुः ॥२३१॥
कौशिकाद्याः समुद्रात्तु गङ्गायास्तदनन्तरं ।
अञ्जनस्यैकमूलस्य प्राच्यान्नागवनन्तु तत् ॥२३२॥
उत्तरा तस्य विन्ध्यस्य गङ्गाया दक्षिणञ्च यत् ।
गङ्गोद्भेदात्करूषेभ्यः सुप्रतीकस्य तद्वनं ॥२३३॥
अपरेणोत्कलाच्चैव ह्यावेदिभ्यश्च पञ्चमं ।
एकभूतात्मतस्यैतद्वामनस्य वनं स्मृतं ॥२३४॥
अपरेण तु लौहित्यमासिन्धोः पश्चिमेन तु ।
यमस्यैतद्वनं प्रोक्तमनुपर्वतमेव तत् ॥२३५॥
भूतिर्विजज्ञे भूतांश्च रुद्रस्यानुचरान् प्रभो ।
स्थूलान् कृशांश्च दीर्घांश्च वामनान् ह्रस्वकान् समान् ॥२३६॥
लम्बकर्णान् प्रलम्बोष्ठान् लम्बजिह्वास्तनोदरान् ।
एकरूपान् द्विरूपांश्च लम्बस्फिक्स्थूलपिण्डिकान् ॥२३७॥
सरोवरसमुद्रादिनदीपुलिनवासिनः ।
कृष्णान् गौरांश्च नीलांश्च श्वेतांश्च लोहितारुणान् ॥२३८॥
वभ्रून् वै शवलान् धूम्रान् कद्रून् रासभदारुणान् ।
मुञ्जकेशान् हृषीकेशान् सर्पयज्ञोपवीतिनः ॥२३९॥
विरूपाक्षान् विरूपाक्षान् कृशाक्षानेकलोचनान् ।
वहुशीर्षान् विशीर्षांश्च एकशीर्षांश्च शीर्षकान् ॥२४०॥
चण्डांश्च विकटांश्चैव विरोमान् रोमशांस्तथा ।
अन्धांश्च जटिलांश्चैव कुब्जान् ह्रेषकवामनान् ॥२४१॥

सरोवरसमुद्रादिनदीपुलिनसेविनः ।
एककर्णान् महाकर्णान् शङ्कुकर्णानऽकर्णिकान् ॥२४२॥
दंष्ट्रिणो नखिनश्चैव निर्द्दन्तांश्च द्विजिह्वकान् ।
एकहस्तान् द्विहस्तांश्च त्रिहस्तांश्चाप्यहस्तकान् ॥२४३॥
एकपादान् द्विपादांश्च त्रिपादान् बहुपादकान् ।
महायोगान् महासत्त्वान् सुतपस्कान् महाबलान् ॥२४४॥
सर्व्वत्रगानऽप्रतिघान्(१) ब्रह्मज्ञान् कामरूपिणः ।
घोरान् क्रूरांश्च मेध्यांश्च शिवान् पुण्यान् सवादिनः(२)॥२४५॥
कुशहस्तान् महाजिह्वान् महाकर्णान्महाननान् ।
हस्तादांश्च मुखादांश्च शिरोऽदांश्च कपालिनः ॥२४६॥
धन्विनो मुद्गरधरानऽसिशूलधरांस्तथा ।
दीप्तास्यान् दीप्तनेत्रांश्च चित्रमाल्यानुलेपनान् ॥२४७॥
अन्नादान् पिशितादांश्च बहुरूपान् सुरूपकान् ।
रात्रिसन्ध्याचरान् घोरान् क्वचित्सौम्यान् दिवाचरान् ।
नक्तञ्चरान् सुदुःप्रेक्ष्यान् घोरांस्तान् वै निशाचरान् ॥२४८॥
परत्वे च भयं दैवं सर्वं ते गतमानसाः ।
नैषां भार्याऽस्ति पुत्रो वा सर्व्वे ते ह्यूर्द्ध्वरेतसः ॥२४९॥
शतन्तानि सहस्राणि भूतानामात्मयोगिनां ।
एते सर्वे महात्मानो भूत्याः पुत्राः प्रकीर्त्तिताः ॥२५०॥
कपिशा चैव कुष्माण्डी कुष्माण्डान् जज्ञिरे पुनः ।

१ सर्व्वत्रगानप्रतिमानिति ख० ।
२ पुण्यदान् सत्यवादिन इति ख० ।

मिथुनानि पिशाचानां वर्णेन कपिशेन च।
कपिशत्वात् पिशाचास्ते सर्वे च पिशिताशनाः[१] ॥२५१॥
युग्मानि षोड़शान्यानि वर्त्तमानास्तदन्वयाः।
नामतस्तान् प्रवक्ष्यामि पुरुषादांस्तदन्वयान्[२] ॥२५२॥
छगलः छगली चैव[३] वक्रो वक्रमुखी तथा।
षोडशानां गणा चैव सूची सूचीमुखस्तथा ॥२५३॥
कुम्भपात्रश्च कुम्भी च वज्रदंष्ट्रश्च दुन्दुभिः।
उपचारोपचारश्च उलूखल उलूखली ॥२५४॥
अनर्कश्च अनर्का च कुखण्डश्च कुखण्डिका।
पाणिपात्रः पाणिपात्री पांशुः पांशुमती तथा॥२५५॥
नितुण्डश्च नितुण्डी च निपुणा निपुणस्तथा।
छलादोच्छेषणा चैव[४] प्रस्कन्दः स्कन्दिका तथा।
षोडशानां पिशाचानां गणाः प्रोक्तास्तु षोडश॥२५६॥
अजामुखा वक्रमुखाः पूरिणः स्कन्दिनस्तथा।
विपादाङ्गारिकाश्चैव कुम्भपात्राः प्रकुन्दकाः ॥२५७॥
उपचारोलूखलिका ह्यनर्काश्च कुखण्डिकाः।
पाणिपात्राश्च नैतुण्डाः ऊर्णाशा निपुणास्तथा॥२५८॥
सूचीमुखोच्छेषणादाः कुलान्येतानि षोडश।

---

१ पिशिताश्छङ्मदाशना इति ख०।
२ पृष्टाग्ध्वं धर्षासुरा इति ग०।
३ गच्छलो गच्छली चैवेति ङ०।
४ पाठोऽयं न समीचीनः।

इत्येता ह्यभिजातास्तु कुष्माण्डानां प्रकीर्त्तिताः ॥२५९॥
पिशाचास्ते तु विज्ञेयाः सुकल्या इति जज्ञिरे ।
वीभत्सं विकृताचारं पुत्रपौत्रमनन्तकं ।
अतस्तेषां पिशाचानां लक्षणञ्च निबोधत ॥२६०॥
सर्वाङ्गकेशा वृत्ताक्ष्या दंष्ट्रिणो नखिनस्तथा ।
तिर्यङ्गाः पुरुषादाश्च पिशाचास्ते ह्यधोमुखाः ॥२६१॥
अकेशका ह्यरोमाणस्त्वग्वसाश्चर्मवाससः ।
कुष्माण्डिकाः पिशाचास्ते तिलभक्षाः सदामिषाः ॥२६२॥
वक्राङ्गहस्तपादाश्च वक्रशीलागतास्तथा ।
ज्ञेया वक्रपिशाचास्ते वक्रगाः कामरूपिणः ॥२६३॥
लम्बोदरास्तुण्डनाशा ह्रस्वकायशिरोभुजाः ।
नितुन्दकाः पिशाचास्ते तिलतक्षाः प्रियश्रवाः ॥२६४॥
वामनाकृतयश्चैव वाचालाः स्रुतगामिनः ।
पिशाचानर्कमर्कास्ते वृक्षवासादनप्रियाः ॥२६५॥
ऊर्द्धबाह्वर्द्धरोमाण ऊर्द्धवृत्तास्तथालयाः ।
मुञ्चन्ति पांशूनङ्गेभ्यः पिशाचाः पांशवश्च ते ॥२६६॥
धमनीमतकाः(१) शुष्काः श्मश्रुलाश्चीरवाससः ।
उपवीराः पिशाचाश्च श्मशानायतनास्तथा ॥२६७॥
विष्टब्धाक्षा महाजिह्वा लेलिहाना ह्युदूखलाः(२) ।
ह्रस्युष्कस्थूलशिरसो विरता बद्धपिण्डकाः ॥२६८॥

---

१ धमनीमन्तका इति क० ।
२ ह्युलूखला इति ङ० ।

पिशाचाः कुम्भपात्रास्ते अदृष्टान्नानि भुञ्जते ।
सूक्ष्मास्तु रोमशाः पिङ्गा दृष्टादृष्टाश्चरन्ति वै ॥२६९॥
अयुक्ताश्च विशन्तीह निपुणास्ते पिशाचकाः ।
आकर्णदारितास्याश्च लम्बभ्रूस्थूलनासिकाः ॥२७०॥
हस्तपादाक्रान्तगणा ह्रस्वकाः क्षितिदृष्टयः ।
बालादास्ते पिशाचा वै सूतिकागृहसेविनः ॥२७१॥
पृष्ठतः पाणिपादाश्च ह्रस्वका वातरंहसः ।
पिशितादाः पिशाचास्ते संग्रामे रुधिराशिनः ॥२७२॥
नग्नका ह्यनिकेताश्च लम्बकेशाश्च पिण्डकाः ।
पिशाचाः स्कन्दिनस्ते वै अन्या उच्छूसनाशिनः ।
षोडश जातयस्तेषां पिशाचानां प्रकीर्त्तिताः ॥२७३॥
एवं विधान् पिशाचांस्तु दीनान् दृष्ट्वानुकम्पया ।
तेभ्यो ब्रह्मा वरं प्रादात्कारुण्यादल्पचेतसः ।
अन्तर्द्धानं प्रजास्तेषां कामरूपत्वमेव च ॥२७४॥
उभयोः सन्ध्ययोश्चारं स्थानान्याजीवमेव च ।
गृहाणि यानि भग्नानि शून्यान्यल्पजनानि च ॥२७५॥
विध्वस्तानि च यानि स्युरनाचारोषितानि च ।
असंस्पृष्टोपलिप्तानि[१] संस्कारैर्वर्जितानि च ॥२७६॥
राजमार्गोपरथ्याश्च निष्कुण्टाश्चत्वराणि च ।
द्वाराण्यट्टालकाश्चैव निर्गमान् संक्रमांस्तथा ॥२७७॥

---

१ असंस्पर्शोपलेपानीति ख० ।

पथो नद्योऽथ तीर्थानि चैत्यवृक्षान् महापथान् ।
पिशाचा विनिविष्टा वै स्थानेष्वेतेषु सर्वशः ॥२७८॥
अधार्मिका जनास्ते वै आजीवा विहिताः सुरैः ।
वर्णाश्रमाः सङ्करिकाः कारुशिल्पिजनास्तथा ॥२७९॥
अनृतोपमसत्त्वानां चौरविश्वासघातिनां ।
एतैरन्यैश्च बहुभिरन्यायोपार्ज्जितैर्धनैः ।
आरभन्ते क्रिया यास्तु पिशाचास्तत्र देवताः ॥२८०॥
मधुमांसौदनैर्दध्ना तिलचूर्णसुरासवैः ।
धूपैर्हारिद्रकृशरैस्तैलभद्रगुडौदनैः ॥२८१॥
कृष्णानि चैव वासांसि धूपाः सुमनसस्तथा ।
एवं युक्ताः सुबलयस्तेषां वै पर्वसन्धिषु ।
पिशाचानामनुज्ञाय ब्रह्मा सोऽधिपतिर्ददौ ॥२८२॥
सर्वभूतपिशाचानां गिरिशं शूलपाणिनं ।
दृष्ट्वा त्वजनयत् पुत्रान् व्याघ्रान् सिंहांश्च भामिनी(१)॥२८३॥
द्विपिनश्च सुतास्तस्या व्यालेयाश्चामिषाशिनः ।
ऋषयश्चापि कार्त्स्न्येन प्रजासर्गं निबोधत ।
तस्या दुहितरः पञ्च तासान्नामानि मे शृणु ॥२८४॥
मीना माता तथा वृत्ता परिवृत्ता तथैव च ।
अनुवृत्ता तु विज्ञेया तासां वै शृणुत प्रजाः ॥२८५॥
सहस्रदन्ता मकराः पाठीनास्ताम्ररोहिताः ।

---

१ भाविनीति ख० ।

इत्येवमादिर्हि गणो मैनो विस्तीर्ण उच्यते ॥२८६॥
ग्राहास्तु चतुर्विधा ज्ञेया तथानुज्येष्ठका अपि।
निष्कांश्च शिशुमारांश्च माता व्यजनयत् प्रजाः ॥२८७
वृत्ता कूर्मविकाराणि नैकानि जलचारिणां।
तथा शङ्खविकाराणि जनयामास नैकशः ॥२८८॥
मण्डूकानां विकाराणि अनुवृत्ता व्यजायत।
ऐणेयानां विकाराणि शम्बूकानां तथैव च ॥२८९॥
तथा शुक्तिविकाराणि वराटककृतानि च।
तथा शङ्खविकाराणि[१] परिवृत्ता व्यजायत ॥२९०॥
कालकूटविकाराणि जलौकविहितानि च।
इत्येष हि ऋषेर्वंशः पञ्चशाखाः प्रकीर्त्तिताः ॥२९१॥
तिर्य्यक् हेतुकमाद्याऊर्वङ्खलं वंशविस्तरं।
संस्वेदजविकाराणि यथा येभ्यो भवन्ति ह ॥२९२॥
स्वस्तिपिकशरीरेभ्यो जायन्त्युत्पादका द्विजाः।
मनुष्याः स्वेदमलजाः[२] उशना नाम जन्तवः।
नानापिपीलिकगणाः कीटका बहुपादकाः ॥२९३॥
शङ्खोपलविकाराणि कीलकाचारकाणि च।
इत्येवमादिबहुलाः स्वेदजाः पार्थिवा गणाः ॥२९४॥
तथा घर्मादितप्ताभ्यस्त्वद्भ्यो वृष्टिभ्य एव च।

---

१ "तथा शङ्खविकाराणि" इत्ययं पाठः स्थानद्वये स्थितत्वादेकत्रा-सङ्गतः।
२ स्वेदजलजा इति ङ०।

नैका मृगशरीरेभ्यो जायन्ते जन्तवस्त्विमे ॥२९५॥
मीनकाः पिप्पला दंशास्तथा तित्तिरपुत्त्रिकाः ।
नीलचित्राश्च जायन्ते ह्युलका बहुविस्तराः ॥२९६॥
जलजाः स्वेदजाश्चैव जायन्ते जन्तवस्त्विमे ।
काशतो यञ्जकाः कीटनलदा बहुपादकाः ॥२९७॥
सिंहला रोमलाश्चैव पिच्छलाः परिकीर्त्तिताः ।
इत्येवमादिर्हि गणो जलजः स्वेदजः स्मृतः ॥२९८॥
सर्पिर्भ्यो माषमुद्गानां जायन्ते क्रमशस्तथा ।
जम्बुबिल्वाम्रपूगेभ्यः फलेभ्यश्चैव जन्तवः ॥२९९॥
मुद्गेभ्यः पनसेभ्यश्च तण्डुलेभ्यस्तथैव च ।
तथा कोटरशुष्केभ्यो निहितेभ्यो भवन्ति हि ॥३००॥
अन्येभ्योऽपि च जायन्ते न हि तेभ्यस्त्विरं सदा ।
जन्तवस्तुरगादिभ्यो विषादिभ्यस्तथैव च ॥३०१॥
वह्न्यहानि निक्षिप्ते सम्भवन्ति च गोमये ।
जायन्ते क्रमयो विप्रा काष्ठेभ्यश्च घुणादयः ॥३०२॥
क्रमा द्रुमाणां जायन्ते विविधा नीलमक्षिकाः ।
तथा शुष्कविकारेभ्यः पुत्त्रिकाः प्रभवन्ति च ॥३०३॥
कालिका शतिकेभ्यश्च[१] सर्पा जायन्ति सर्वशः ।
संस्वेदजाश्च जायन्ते वृश्चिकाः शुष्कगोमयात् ॥३०४॥
गोभ्यो हि महिषेभ्यश्च जायन्ते जन्तवः प्रभो ।

---

१ पाठोऽयं न समीचीनः ।

मत्स्यादयश्च विविधा अण्डकुक्षौ विशेषतः ॥२०५॥
चैवीरिकाश्च जायन्ते तथा गोजाकुलानि च ।
तथान्यानि च सूक्ष्माणि जलौकादीनि जातयः ॥२०६॥
मक्षिकाणां विकाराणि जायन्ते जातयोऽपरे ।
प्रायेण तु वसन्त्यस्मिन् उच्छिष्टोदककर्द्दमे ॥२०७॥
मशकानां विकाराणि भ्रमराणां तथैव च ।
तृणेभ्यश्चैव जायन्ते पुत्रिकापुत्र × × (१) सकाः ॥२०८॥
मणिच्छेदास्तथा व्यालाः पोतजाः परिकीर्त्तिताः ।
शतवेरिविकाराणि किरीषेभ्यो भवन्ति ह ॥२०९॥
एवमादिरसंख्यातो गणः संस्वेदजो मया ।
समासाभिहितो ह्येष प्राक्कर्म्मवशजः स्मृतः ॥२१०॥
तथाऽन्ये नैर्ऋताः सत्त्वास्ते स्मृता उपसर्गजाः ।
पूतास्तु योनिजाः केचित्केचिदौत्पत्तिकाः स्मृताः ॥२११॥
प्रायेण देवाः सर्वे वै विज्ञेया ह्युपपत्तिजाः ।
केचित्तु योनिजा देवाः केचिद्देवानिमित्ततः ॥२१२॥
तूलालाघश्च कोलश्च शिवा कन्या तथैव च ।
अपत्यं सरमायास्तु गणा वै सरमादयः ॥२१३॥
श्यामश्च शवलश्चैव अर्जुनो हरितस्तथा ।
कृष्णो धूम्रारुणश्चैव तूलालाघश्च कद्रुकाः ॥२१४॥
सुरसाऽथ विजज्ञे तु शतमेकं शिरो मतं ।

---

१ अत्राक्षरद्वयं सर्व्वेष्वादर्शपुस्तकेषु पतितं ।

सर्पाणान्तक्षको राजा नागानाञ्चापि वासुकिः ।
तमोवङ्कल इत्येष गणः क्रोधवशात्मकः ॥२१५॥
पुलहस्यात्मजात्सर्गस्ताम्रायास्तन्निबोधत ।
वङ्कन्यास्त्वभिविख्याताम्ताम्रायाश्च विजज्ञिरे ॥२१६॥
श्येनी भासी तथा क्रौञ्ची धृतराष्ट्री शुकी तथा ।
अरुणस्य भार्या श्येनी तु वीर्यवन्तौ महाबलौ ।
सम्पातिश्च जटायुश्च प्रसूता पक्षिसत्तमौ ॥२१७॥
सम्पातिरजनत् पुत्रं कन्यामेकान्तथैव च ।
जटायुषश्च ये पुत्राः काकग्टध्राश्वकर्णिनः ॥२१८॥
भार्य्या गरुत्मतश्चापि भासी क्रौञ्ची तथा शुकी ।
धृतराष्ट्री च भद्रा च तास्वपत्यानि वच्म्यते ॥२१९॥
शुकी गरुत्मतः पुत्रान् सुषुवे षट् परिश्रुतान् ।
त्रिशिरं सुमुखञ्चैव बलं पृष्ठं महाबलं ॥२२०॥
त्रिशङ्कुनेत्रं सुमुखं सुरूपं सुरसं बलं ।
एषां पुत्राश्च पौत्राश्च गरुडानां महात्मनां ॥२२१॥
चतुर्दश सहस्राणि क्रूराणां पन्नगाशिनां ।
पुत्रपौत्रविसर्गाच्च तेषां वै वंशविस्तरः ॥२२२॥
व्याप्तानि यानि देशानि तानि वच्म्ये यथाक्रमं ।
शाल्मलिद्वीपमखिलं देवकूटञ्च पर्वतं ॥२२३॥
मणिमन्तञ्च(१) शैलेन्द्रं सहस्रशिखरं तथा ।

---

१ मणियन्तञ्चेति ङ० ।

पर्णमालं सुकेशञ्च शतशृङ्गं तथाऽचलं ॥२२४॥
कौरजं पञ्चशिखरं हेमकूटञ्च पर्व्वतं ।
प्रचण्डवायुप्रभवैर्दीपितैः पद्मरागिभिः ॥२२५॥
शैलजालानि व्याप्तानि गारुडैस्तैर्महात्मभिः ।
भासीपुत्राः स्मृता भासा उलूकाः काककुक्कुटाः[१]॥२२६॥
मयूराः कलविङ्काश्च कपोता लावतित्तिराः ।
क्रौञ्ची वार्द्धीणसान् श्येनी कुररान् सारसान् वकान्॥२२७॥
इत्येवमादयोन्येऽपि क्रव्यादा ये च पक्षिणः ।
धृतराष्ट्री च हंसांश्च कलहंसांश्च भामिनी ॥२२८॥
चक्रवाकांश्च विहगान् सर्वांश्चैवादकान् द्विजान् ।
एतानेव विजज्ञेऽथ पुत्रपौत्रमनन्तकं ॥२२९॥
गरुडस्यात्मजाः प्रोक्ता इरायाः शृणुत प्रजाः ।
इरा प्रजज्ञे कन्या वै तिस्रः कमललोचनाः ॥२३०॥
वनस्पतीनां वृक्षाणां वीरुधाञ्चैव मातरः ।
लता चैवाथ वल्ली च वीरुधा चेति तास्तु वै ॥२३१॥
लता वनस्पतीन् जज्ञे ह्यपुष्पान् पुलिनस्थितान् ।
युक्तान् पुष्पफलैर्वृक्षान् लता वै सम्प्रसूयते ॥२३२॥
अथ वल्ली तु गुल्मांश्च त्वक्सारास्तृणजातयः ।
वीरुधा तदपत्यानि वंशश्चात्र समाप्यते ॥२३३॥
एते कश्यपदायादा व्याख्याताः स्थाणुजङ्गमाः ।

१ उलूकाश्चैव कुक्कुटा इति ख० ।

तेषां पुत्राश्च पौत्राश्च यैरिदं पूरितं जगत् ॥२३४॥
इति सर्गैकदेशस्य कीर्त्तितोऽवयवो मया ।
मारीचोऽयं प्रजासर्गः समासेन प्रकीर्त्तितः ।
न शक्यं व्यासतो वक्तुमपि वर्षशतैर्द्विजाः ॥२३५॥
अदितिर्धर्म्मशीला तु बलशीला दितिः स्मृता ।
तपःशीला तु सुरभिर्मायाशीला दनुः स्मृता ॥२३६॥
क्रूरशीला तथा कद्रुः क्रौञ्च्यथ श्रुतिशालिनी ।
इरा ग्रहणशीला तु दनायुर्भक्षणे रता ॥२३७॥
वाहशीला तु विनता ताम्रा वै पाशशालिनी ।
स्वभावा लोकमातॄणां शीलान्येतानि सर्वशः ॥२३८॥
धर्म्मतः शीलतो बुद्ध्या क्षमया बलरूपतः ।
रजःसत्त्वतमोवृत्ता धार्मिकाधार्मिकास्तु वै ॥२३९॥
मातृतुल्याश्चाभिजाताः कश्यपस्यात्मजाः प्रजाः ।
देवतासुरगन्धर्वा यक्षराक्षसपन्नगाः ।
पिशाचाः पशवश्चैव मृगाः पतङ्गवीरुधः ॥२४०॥
यस्माद्दाक्षायणीष्वेते जज्ञिरे मानुषीष्विह(१) ।
मन्वन्तरेषु सर्वेषु तस्माच्छ्रेष्ठास्तु मानुषाः ॥२४१॥
धर्मार्थकाममोक्षाणां मानुषाः साधकास्तु वै ।
ततोऽधःस्रोतसस्ते वै उत्पद्यन्ते सुरासुराः ॥२४२॥
जायन्ते कार्यसिद्ध्यर्थं मानुषेषु पुनः पुनः ।

---

१ मद्दिषीष्विहेति ख० ।

इत्येव वंशप्रभवः प्रसङ्ख्यातस्तपस्विनां ॥२४३॥
सुराणामसुराणाञ्च गन्धर्व्वाप्सरसां तथा ।
यक्षरक्षःपिशाचानां सुपर्णोरगपक्षिणां ॥२४४॥
व्यालानां शिखिनाञ्चैव[१] ओषधीनाञ्च सर्वशः ।
कृमिकीटपतङ्गानां क्षुद्राणां जलजाश्च ये ।
पशूनां ब्राह्मणानाञ्च श्रीमतां पुण्यलक्षणं ॥२४५॥
आयुष्यश्चैव धन्यश्च श्रीमान् हितसुखावहः ।
श्रोतव्यश्चैव सततं ग्राह्यश्चैवानुसूयता ॥२४६॥

इमन्तु वंशं नियमेन यः पठेत्
महात्मनां ब्राह्मणवैद्यसंसदि ।
अपत्यलाभं हि लभेत् सुपुष्कलं
श्रियं धनं प्रेत्य च शोभनां गतिं ॥२४७॥

इति श्रीमहापुराणे वायुप्रोक्ते कश्यपीयप्रजासर्गो नामाष्टमोऽध्यायः ।

---

१ व्यालानाञ्चैव सर्व्वेषामिति ख० ।

अथ नवमोऽध्यायः ।

ऋषिवंशानुकीर्त्तनं ।

सूत उवाच । एवं प्रजासु सृष्टासु कश्यपेन महात्मना ।
प्रतिष्ठितासु सर्वासु स्थावरासु चरासु च ॥१॥
अभिषिच्याधिपत्येषु तेषां मुख्यः प्रजापतिः ।
ततः क्रमेण राज्यानि व्यादेष्टुमुपचक्रमे ॥२॥
द्विजातीनां वीरुधाञ्च नक्षत्राणां ग्रहैः सह ।
यज्ञानां तपसाञ्चैव सोमं राज्येऽभ्यसेचयत् ॥३॥
बृहस्पतिन्तु विश्वेषां ददावङ्गिरसां पतिं ।
भृगूणामधिपञ्चैव काव्यं राज्येऽभ्यसेचयत् ॥४॥
आदित्यानां पुनर्विष्णुं वसूनामथ पावकं ।
प्रजापतीनां दक्षञ्च मरुतामथ वासवं ॥५॥
दैत्यानामथ राजानं प्रह्लादं दितिनन्दनं ।
नारायणन्तु साध्यानां रुद्राणां वृषभध्वजं ॥६॥
विप्रचित्तिञ्च राजानं दानवानामथादिशत् ।
अपान्तु वरुणं राज्ये राज्ञां वैश्रवणं पतिं ।
यक्षाणां राक्षसानाञ्च पार्थिवानां धनस्य च ॥७॥
वैवस्वतं पितॄणाञ्च यमं राज्येऽभ्यसेचयत् ।
सर्वभूतपिशाचानां गिरिशं शूलपाणिनं ॥८॥

शैलानां हिमवन्तञ्च नदीनामथ सागरं ।
गन्धर्वाणामधिपतिं चक्रे चित्ररथं तदा ॥९॥
उच्चैःश्रवसमश्वानां राजानञ्चाभ्यसेचयत् ।
मृगाणामथ शार्दूलं गोवृषञ्च चतुष्पदां ॥१०॥
पक्षिणामथ सर्वेषां गरुड़ं पततां वरं ।
गन्धानां मारुतञ्चैव भूतानामशरीरिणां ॥११॥
शब्दाकाशबलानाञ्च वायुं बलवतां वरं ।
सर्वेषां दंष्ट्रिणां शेषं नागानामथ वासुकिं ॥१२॥
सरीसृपाणां सर्पाणां नागानाञ्चैव तक्षकं ।
सागराणां नदीनाञ्च मेघानां वर्षितस्य च(१) ।
आदित्यानामन्यतमं पर्जन्यमभिषिक्तवान् ॥१३॥
सर्वाप्सरोगणानाञ्च कामदेवं तथैव च(२) ।
ऋतूनामथ मासानामार्त्तवानां तथैव च ॥१४॥
पक्षाणाञ्च विपक्षाणां मुहूर्त्तानाञ्च पर्वणां ।
कलाकाष्ठाप्रमाणानां गतेरयनयोस्तथा ।
गणितस्याथ योगस्य चक्रे संवत्सरं प्रभुं ॥१५॥
प्रजापतिर्वै रजसः पूर्वस्यान्दिशि विश्रुतं ।
पुत्रं नाम्ना सुधामानं राजानं सोऽभ्यसेचयत् ॥१६॥
पश्चिमस्यान्दिशि तथा रजसः पुत्रमच्युतं ।
केतुमन्तं महात्मानं राजानं सोऽभ्यसेचयत् ॥१७॥

---

१ पाठोऽयं न समीचीनः ।
२ तथा प्रभुमिति ख० ।

मनुष्याणामधिपतिं चक्रे चैव सुतं मनुं ।
तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशमद्यापि धर्मेण परिपाल्यते ॥१८॥
स्वायम्भुवेऽन्तरे पूर्वं ब्रह्मणा तेऽभिषेचिताः ।
नृपा ह्येतेऽभिषिच्यन्ते मनवो ये भवन्ति वै ॥१९॥
मन्वन्तरेष्वतीतेषु गता ह्येतेषु पार्थिवाः ।
एवमन्येऽभिषिच्यन्ते प्राप्ते मन्वन्तरे पुनः ।
अतीतानागताः सर्वे स्मृता मन्वन्तरेश्वराः ॥२०॥
राजसूयेऽभिषिक्तस्य पृथुरेभिर्नरोत्तमैः ।
वेददृष्टेन विधिना कृतो राजा प्रतापवान् ॥२१॥
एतानुत्पाद्य पुत्रांस्तु प्रजासन्तानकारणात् ।
पुनरेव महाभागः प्रजानां पतिरीश्वरः ॥२२॥
कश्यपो गोत्रकामस्तु चचार परमन्तपः ।
पुत्रौ गोत्रकरौ मह्यं भवेतामित्यऽचिन्तयत् ॥२३॥
तस्य प्रध्यायमानस्य कश्यपस्य महात्मनः ।
ब्रह्मणोंऽशौ सुतौ पश्चात् प्रादुर्भूतौ महौजसौ ॥२४॥
वत्सारश्चासितश्चैव तावुभौ ब्रह्मवादिनौ ।
वत्सारान्निध्रुवो जज्ञे रैभ्यश्च स महायशाः ॥२५॥
रैभ्यस्य रैभ्या विज्ञेया निध्रुवस्य निबोधत ।
च्यवनस्य सुकन्यायां सुमेधाः समपद्यत ॥२६॥
निध्रुवस्य तु या पत्नी माता वै कुण्डपायिनां ।
असितस्यैकपर्णायां ब्रह्मिष्ठः समपद्यत ॥२७॥

शाण्डिल्यानां वचः श्रुत्वा देवलः सुमहायशाः ।
निध्रुवाः शाण्डिल्या रैभ्यास्त्रयः पश्चात्तु कश्यपाः ॥२८॥
वरप्रभृतयो देवा देवलस्य प्रजास्त्विमाः ।
चतुर्युगे त्वतिक्रान्ते मनोर्ह्येकादशे प्रजाः ।
अथावशिष्टे तस्मिंस्तु द्वापरे सम्प्रवर्त्तते ॥२९॥
मानसस्य चरिष्यन्तस्तस्य पुत्रो दमः किलः ।
मानसस्तस्य दायादस्तृणविन्दुरिति श्रुतः(१) ॥३०॥
त्रेतायुगमुखे राजा तृतीये सम्बभूव ह ।
तस्य कन्या त्विड़िविला रूपेणाप्रतिमा भवेत् ।
पुलस्त्याय स राजर्षिस्तां कन्यां प्रत्यपादयत् ॥३१॥
ऋषिरिड़िविलायान्तु विश्रवाः समपद्यत ।
तस्य पत्न्यश्चतस्रस्तु पौलस्त्यकुलवर्द्धनाः ॥३२॥
बृहस्पतेर्बृहत्कीर्त्तिर्देवाचार्यस्य कीर्त्तितः ।
कन्यान्तस्योपयमे स नाम्ना वै देववर्णिनी ॥३३॥
पुष्पोत्कटाञ्च वाकाञ्च सुते माल्यवतः स्थितौ ।
केकसीं(२) मालिनः कन्यां तासान्तु शृणुत प्रजाः(३) ॥३४॥
ज्येष्ठं वैश्रवणन्तस्य सुषुवे देववर्णिनी ।
दिव्येन विधिना युक्तमार्षेणैव श्रुतेन च ।

---

१ स्मृत इति ख०, ग० च ।
२ केकसिमिति ङ० । केकयीमिति क० ।
३ कन्यान्तस्योपयेमे स इत्यादिः शृणुत प्रजा इत्यन्तः पाठः न पूर्व्वापर-सङ्गतः ।

राक्षसेन च रूपेण आसुरेण बलेन च ॥३५॥
त्रिपादं सुमहाकायं स्थूलशीर्षं महातनुं ।
अष्टदंष्ट्रं हरित्श्मश्रुं शङ्कुकर्णं विलोहितं ॥३६॥
ह्रस्वबाहुं प्रबाहुञ्च पिङ्गलं सुविभीषणं ।
वैरं ज्ञानसम्पन्नं सम्बुद्धं ज्ञानसम्पदा ॥३७॥
एवंविधं सुतं दृष्ट्वा विश्वरूपधरं तथा ।
पिता दृष्ट्वाब्रवीत् तत्र कुवेरोऽयमिति स्वयं ॥ ३८॥
कुत्सायां क्वितिशब्दोऽयं शरीरं वेरमुच्यते ।
कुवेरः कुशरीरत्वान्नाम्ना तेन च सोऽङ्कितः ॥३९॥
यस्माद्विश्रवसोऽपत्यं सादृश्याद्विश्रवा इव ।
तस्माद्वैश्रवणो नाम नाम्ना लोके भविष्यति ॥४०॥
ऋद्ध्यां कुवेरोऽजनयद्विश्रुतं नलकूवरं ।
रावणं कुम्भकर्णञ्च कन्यां शूर्पनखान्तथा ।
विभीषणं चतुर्थांस्तान् कैकस्यजनयत् सुतान् ॥४१॥
शङ्कुकर्णो दशग्रीवः पिङ्गलो रक्तमूर्द्धजः ।
चतुष्पाद्विंशतिभुजो महाकायो महाबलः ॥४२॥
जात्याञ्जननिभो दंष्ट्री लोहितग्रीव एव च ।
राजसेनो जययुक्तः[१] रूपेण च बलेन च ॥४३॥
सत्यबुद्धिर्दृढतनूराक्षसैरेव[२] रावणः ।
निसर्गाद्दारुणः क्रूरो रावणाद्रावणस्तु सः ॥४४॥

---

१ राजसेनोऽञ्जसायुक्त इति ङ० ।
२ सत्यबुद्धिः श्रुतैर्यज्ञैराक्षसैरेवेति ङ० ।

हिरण्यकशिपुस्त्वासीत् स राजा पूर्वजन्मनि[1] ।
चतुर्युगानि राजा च[2] त्रयोदश स राक्षसः ॥४५॥
ताः पञ्चकोट्यो वर्षाणामाख्याताः सङ्ख्यया द्विजैः ।
नियुतान्येकषष्टिश्च सङ्ख्याविद्भिरुदाहृता ॥४६॥
षष्टिशतसहस्राणि वर्षाणान्तु स रावणः ।
देवतानां ऋषीणाञ्च घोरं कृत्वा प्रजागरं ॥४७॥
त्रेतायुगे चतुर्विंशे रावणस्तपसः क्षयात् ।
रामं दाशरथिं प्राप्य सगणः क्षयमीयिवान् ॥४८॥
महोदयः[3] प्रहस्तश्च महापांशुखरस्तथा[4] ।
पुष्पोत्कटायाः पुत्रास्ते कन्या कुम्भीनसी तथा ॥४९॥
त्रिशिरा दूषणश्चैव विद्युज्जिह्वश्च राक्षसः ।
कन्या ह्यसलिका चैव[5] वाकायाः प्रसवाः स्मृताः ॥५०॥
इत्येते क्रूरकर्म्माणः पौलस्त्या राक्षसा दश ।
दारुणाभिजनाः सर्वे देवैरपि दुरासदाः ॥५१॥
सर्वे लब्धवराश्चैव पुत्रपौत्रसमन्विताः ।
यक्षाणाञ्चैव सर्वेषां पौलस्त्या ये च राक्षसाः ॥५२॥
आगस्त्यवैश्वामित्राणां क्रूराणां ब्रह्मरक्षसां ।

---

१ पूर्व्वकर्म्मणीति ख० ।
२ राजेन्द्रेति ख० ।
३ महोदर इति ङ० ।
४ महाबलिवरः प्राज्ञो महाप्रांशुपुरस्तथेति ख० ।
५ कन्या ह्यशालिका चैवेति ख० ।

वेदाध्ययनशीलानां तपोव्रतनिषेविणां ॥५३॥
तेषामैडविलो राजा पौलस्त्यः सव्यपिङ्गलः ।
इतरे वै यज्ञमुखास्तेन रक्षोगणास्त्रयः ॥५४॥
यातुधाना ब्रह्मधाना वार्त्ताश्चैव दिवाचराः ।
निशाचरगणास्तेषां चत्वारः कविभिः स्मृताः ॥५५॥
पौलस्त्या नैर्ऋताश्चैव आगस्त्याः कौशिकास्तथा ।
इत्येताः सप्त तेषां वै जातयो राक्षसाः स्मृताः ॥५६॥
तेषां रूपं प्रवक्ष्यामि स्वभावेन व्यवस्थितं ।
वृत्ताक्षाः पिङ्गलाश्चैव महाकाया महोदराः ॥५७॥
अष्टदंष्ट्राः शङ्कुकर्णाः ऊर्द्धरोमाण एव च ।
आकर्णदारितास्याश्च मुञ्जधूमोर्द्धमूर्द्धजाः ॥५८॥
स्थूलशीर्षाः सिताभाश्च(१) ह्रस्वकाश्च प्रवाहुकाः(२) ।
ताम्रास्या लम्बजिह्वोष्ठा लम्बभ्रूस्थूलनासिकाः ॥५९॥
नीलाङ्गा लोहितग्रीवा गम्भीराक्षा विभीषणाः ।
महाघोरस्वराश्चैव विकटा बद्धपिण्डिकाः ॥६०॥
स्थूलाश्च तुङ्गनासाश्च शिलासंहनना दृढाः ।
दारुणाभिजनाः क्रूराः प्रायशः क्लिष्टकर्म्मिणः ॥६१॥
सकुण्डलाङ्गदापीडा मुकुटोष्णीषधारिणः ।
विचित्रवस्त्राभरणाश्चित्रस्रगनुलेपनाः(३) ॥६२॥

---

१ स्थूलकण्ठा इति ख० ।
२ ह्रस्वशक्ताः प्रवाहव इति ङ० ।
३ चित्रगन्धानुलेपना इति ख० ।

अन्नादाः पिशितादाश्च पुरुषादाश्च ते स्मृताः ।
इत्येतद्रूपसाधर्म्यं[१] राक्षसानां बुधैः स्मृतं ।
न समस्तबलं बुद्धं यतो मायाकृतं हि तत् ॥६३॥
पुलहस्य मृगाः पुत्राः सर्वे व्यालाश्च दंष्ट्रिणः ।
भूताः पिशाचाः सर्पाश्च भ्रमरा हस्तिनस्तथा ॥६४॥
वानराः किन्नराश्चैव यक्षकिम्पुरुषास्तथा[२] ।
येऽन्ये चैव परिक्रान्ता मायाक्रोधवशानुगाः ॥६५॥
अनपत्यः क्रतुस्तस्मिन् स्मृतो वैवस्वतेऽन्तरे ।
न तस्य पुत्रः पौत्रो वा तेजः सङ्क्षिप्य वा स्थितः ॥६६॥
अत्रेर्वंशं प्रवक्ष्यामि तृतीयस्य प्रजापतेः ।
तस्य पत्न्यश्च सुन्दर्य्यो दशैवासन्पतिव्रताः ॥६७॥
भद्राश्वस्य घृताच्यां वै दशाप्सरसि सूनवः ।
भद्रा शूद्रा च मद्रा च शलदा मलदा तथा ॥६८॥
वेला खला च सप्तैता या च गोचपला स्मृता ।
तथा मानरसा चैव रत्नकूटा च ता दश ॥६९॥
आत्रेयवंशकृत्तासां भर्त्ता नाम्ना प्रभाकरः ।
भद्रायां जनयामास सोमं पुत्रं यशस्विनं ॥७०॥
स्वर्भानुना हते सूर्य्ये पतमानो दिवो महीं ।
तमोऽभिभूते लोकेऽस्मिन् प्रभा येन प्रवर्त्तिता ॥७१॥
स्वस्ति तेऽस्त्विति चोक्तः स पतन्निह दिवाकरः ।

---

१ इत्येतद्रूपसारूप्यमिति ख० ।
२ मया किम्पुरुषास्तथेति क० । मयूराः किम्पुरुषास्तथेति ङ० ।

ब्रह्मर्षेर्वचनात्तस्य न पपात दिवो महीं ॥७२॥
अत्रिश्रेष्ठानि गोत्राणि यश्चकार महातपाः ।
यज्ञेष्वत्रिधनञ्चैव सुरैर्यस्य प्रवर्त्तितः ॥७३॥
स तास्वजनयत् पुत्रानात्मतुल्याननामकान् ।
दश तास्वेव महता तपसा भावितप्रभाः ॥७४॥
स्वस्त्यात्रेया इति ख्याता ऋषयो वेदपारगाः ।
तेषां द्विख्यातयशसौ ब्रह्मिष्ठौ सुमहौजसौ ॥७५॥
दत्तात्रेयस्तस्य ज्येष्ठो दुर्वासास्तस्य चानुजः ।
यवीयसी सुता तस्यामबला ब्रह्मवादिनी ।
अत्राप्युदाहरन्तीमं श्लोकं पौराणिकाः पुरा ॥७६॥
अत्रेः पुत्रं महात्मानं शान्तात्मानमकल्मषं ।
दत्तात्रेयं तनुं विष्णोः पुराणज्ञाः प्रचक्षते ॥७७॥
तस्य गोत्रान्वये जातास्चत्वारः प्रथिता भुवि ।
श्यामाश्च मुद्गलाश्चैव बलारकगविष्ठिराः ।
एते नृणान्तु चत्वारः स्मृताः पक्षा महौजसां ॥७८॥
कश्यपान्नारदश्चैव पर्वतोऽरुन्धती तथा ।
जज्ञिरे च त्वरुन्धत्यास्तान्निबोधत सत्तमाः ॥७९॥
नारदस्तु वसिष्ठायारुन्धतीं प्रत्यपादयत् ।
ऊर्द्धरेता महातेजा दक्षशापात्तु नारदः ॥८०॥
पुरा देवासुरे तस्मिन् संग्रामे तारकामये ।
अनावृष्ट्या हते लोके व्यग्रे शक्रे सुरैः सह ।
वसिष्ठस्तपसा धीमान् धारयामास वै प्रजाः ॥८१॥

अत्रैौषधं मूलफलमोषधीश्च प्रवर्त्तयन् ।
तास्तेन जीवयामास कारुण्यादोषधेन तु ॥८२॥
अरुन्धत्यां वसिष्ठस्तु शक्तिमुत्पादयद्[१] द्विजाः ।
सागरञ्जनयत्[२] शक्तेरदृश्यन्ती पराशरं ॥८३॥
काली पराशराज्जज्ञे कृष्णद्वैपायनं प्रभुं ।
द्वैपायनादरण्यां वै शुको जज्ञे गुणान्वितः ॥८४॥
उत्पद्यन्ते च पीवर्य्यां षड़िमे शुकसूनवः ।
भूरिश्रवाः प्रभुः शम्भुः कृष्णो गौरश्च पञ्चमः ॥८५॥
कन्या कीर्त्तिमती चैव योगमाता दृढव्रता ।
जननी ब्रह्मदत्तस्य पत्नी सात्त्वगुहस्य च[३] ॥८६॥
श्वेताः कृष्णाश्च गौराश्च श्यामा धूम्राः समूलिकाः[४] ।
उश्मपाः[५] दारकाश्चैव नीलाश्चैव पराशराः ।
पराशराणामष्टौ ते पक्षाः प्रोक्ता महात्मनां ॥८७॥
अत ऊर्द्धं निबोधध्वमिन्द्रप्रतिमसम्भवं ।
वसिष्ठस्य कपिञ्जल्यां घृताच्यां समपद्यत ।
कुशीतियः[६] समाख्यात इन्द्रप्रतिम उच्यते ॥८८॥
पृथोः सुतायाः सम्भूतः पुत्रस्तस्याभवद्वसुः ।

---

१ प्रयोगोऽयमार्षः ।
२ अयमप्यार्षप्रयोगः ।
३ सात्त्वगुहस्य चेति ङ० । सात्वगुहस्य चेति ख० ।
४ समौलिका इति ख०, ग० च ।
५ उष्मादा इति क०, ङ० च ।
६ कुशीतिय इति क० ।

उपमन्युः सुतस्तस्य यस्येमे उपमन्यवः ॥८९॥
मित्रावरुणयोश्चैव कुण्डिनो ये परिश्रुताः ।
एकार्षेयास्तथैवान्ये वसिष्ठा नाम विश्रुताः ।
एते पक्षा वसिष्ठानां स्मृता एकादशैव तु ॥९०॥
इत्येते ब्रह्मणः पुत्रा मानसा ह्यष्ट विश्रुताः ।
भ्रातरः सुमहाभागा येषां वंशाः प्रतिष्ठिताः ॥९१॥
त्रीन् लोकान् धारयन्तीमान् देवर्षिगुणसङ्कुलान् ।
तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः ।
यैर्व्याप्ता पृथिवी सर्वा सूर्य्यस्येव गभस्तिभिः ॥९२॥

इति श्रीमहापुराणे वायुप्रोक्ते ऋषिवंशानुकीर्त्तनं नाम
नवमोऽध्यायः ।

अथ दशमोऽध्यायः।

श्राद्धप्रक्रियारम्भः।

एतत् श्रुत्वा वचस्तस्य सूतस्य विदितात्मनः।
उत्तरं परिपप्रच्छुः सूतपुत्रं द्विजातयः ॥१॥
शांशपायन उवाच। कथं द्वितीयमुत्पन्ना भवानी प्राक्सती तु या।
आसीद्दाक्षायणी पूर्वमुमा कथमजायत ॥२॥
मेनायां पितृकन्यायां जनयामास शैलराट्।
के चैते पितरश्चैव येषां मेना तु मानसी ॥३॥
मैनाकश्चैव दौहित्रो दौहित्री च तथा ह्युमा।
एकपर्णा तथा चैव तथा या चैकपाटला ॥४॥
गङ्गा चैव सरित्श्रेष्ठा सर्वासां पूर्वजा तथा।
पूर्वमेव मयोद्दिष्टं शृणुध्वं मम सर्वशः ॥५॥
अनेके पितरश्चैव वर्त्तन्ते क्व च वा पुनः।
श्रोतुमिच्छामि भद्रन्ते श्राद्धस्य च परं विधिं ॥६॥
पुत्राश्च ते स्मृताः केषां कथञ्च पितरस्तु ते।
पितरः कथमुत्पन्नाः कस्य पुत्राः किमात्मकाः ॥७॥
स्वर्गे तु पितरोऽन्ये ये देवानामपि देवताः।
एवं वै श्रोतुमिच्छामि पितॄणां सर्गमुत्तमं।
यथावद्दत्तमस्माभिः श्राद्धं प्रीणाति वै पितॄन् ॥८॥

यदर्थं ते न दृश्यन्ते तत्र किं कारणं स्मृतं ।
स्वर्गे हि के तु वर्त्तन्ते पितरो नरके तु के ॥९॥
अभिसन्धाय पितरं पितुश्च पितरन्तथा ।
पितुः पितामहञ्चैव त्रिषु पिण्डेषु नामतः ॥१०॥
कानि श्राद्धानि देयानि कथं गच्छन्ति वै पितॄन् ।
कथञ्च शक्तास्ते दातुं नरकस्थाः फलं पुनः ॥११॥
के चेह पितरो नाम कान् यजामो वयं पुनः ।
देवा अपि पितॄन् स्वर्गे यजन्तीति हि नः श्रुतं ॥१२॥
एतदिच्छामि वै श्रोतुं विस्तरेण बहुश्रुत ।
स्पष्टाभिधानमर्थं वै तद्भवान् वक्तुमर्हति ॥१३॥
ऋषीणान्तु वचः श्रुत्वा सूतस्तत्त्वार्थदर्शिवान् ।
आचचक्षे यथाप्रश्नं ऋषीणां मानसं ततः ॥१४॥
सूत उवाच। अत्र वो वर्णयिष्यामि यथाप्रज्ञं यथाश्रुतम् ।
मन्वन्तरेषु जायन्ते पितरो देवसूनवः ॥१५॥
अतीतानागते ज्येष्ठाः कनिष्ठाः क्रमशस्तु ते ।
देवैः सार्द्धं पुरातीताः पितरो येऽन्तरेषु वै ।
वर्त्तन्ते साम्प्रतं ये तु तान्वै वक्ष्यामि निश्चयात् ॥१६॥
श्राद्धञ्चैषां मनुष्याणां श्राद्धमेव प्रवर्त्तते ।
देवानसृजत ब्रह्मा नायजन्निति वै पुनः(१) ।
तमुत्सृज्य तदात्मानमसृजंस्ते फलार्थिनः ॥१७॥
ते शप्ता ब्रह्मणा मूढा नष्टसंज्ञा भविष्यथ ।

१ दिवा चासृजत ब्रह्मा रात्रौ संहरते पुनरिति ग० ।

न स्म किञ्चिद्विजानन्ति ततो लोको ह्यमुह्यत ॥१८॥
ते भूयः प्रणताः सर्वे याचन्ति स्म पितामहं।
अनुग्रहाय लोकानां पुनस्तानब्रवीत् प्रभुः ॥१९॥
प्रायश्चित्तं चरध्वं वै व्यभिचारो हि यः कृतः।
पुत्रान् स्वान् परिपृच्छध्वं ततो ज्ञानमवाप्स्यथ ॥२०॥
ततस्ते स्वान् सुतांश्चैव प्रायश्चित्तजिघृक्षवः।
अपृच्छन् संयतात्मानो विधिवच्च मिथो मिथः ॥२१॥
तेभ्यस्ते नियतात्मानः पुत्राः शंसुरनेकधा।
प्रायश्चित्तानि धर्मज्ञा वाङ्मनःकर्म्मजानि तु ॥२२॥
ते पुत्रानब्रुवन् प्रीता लब्धसंज्ञा दिवौकसः।
यूयं वै पितरोऽस्माकं ये वयं प्रतिबोधिताः।
धर्मज्ञानञ्च कामञ्च को वरो वः प्रदीयतां ॥२३॥
पुनस्तानब्रवीद्ब्रह्मा यूयं वै सत्यवादिनः।
तस्माद्यदुक्तं युष्माभिस्तत्तथा न तदन्यथा ॥२४॥
उक्तञ्च पितरोऽस्माकमिति वै तनयाः स्वकाः।
पितरस्ते भविष्यन्ति तेभ्योऽयं दीयतां वरः ॥२५॥
तेनैव वचसा पुत्रा ब्रह्मणः परमेष्ठिनः।
पुत्राः पितृत्वमाजग्मुः पुत्रत्वं पितरः पुनः ॥२६॥
तस्मात्ते पितरः पुत्राः पितृत्वे तेषु तत् स्मृतं।
एवं स्मृत्वा पितॄन् पुत्रान् पुत्रांश्च पितरस्तथा।
व्याजहार पुनर्ब्रह्मा पितॄनात्मविशुद्धये[१] ॥२७॥

---

१ पितॄनात्मविशुद्धय इति ख०।

यो ह्यनिष्ट्वा पितॄन् श्राद्धे क्रियाङ्काञ्चित्करिष्यति ।
राक्षसा दानवाश्चैव फलं प्राप्स्यन्ति तस्य तत् ॥२८॥
श्राद्धैराप्यायिताश्चैव पितरः सोममव्ययम् ।
आप्याय्यमाना युष्माभिर्वर्द्धयिष्यन्ति नित्यशः ॥२९॥
श्राद्धैराप्यायितः सोमो लोकानाप्याययिष्यति ।
कृत्स्नं सपर्व्वतवनं जङ्गमाजङ्गमैर्वृतं ॥३०॥
श्राद्धानि पुष्टिकामाश्च ये करिष्यन्ति मानवाः ।
तेभ्यः पुष्टिं प्रजाश्चैव दास्यन्ति पितरः सदा ॥३१॥
श्राद्धे येभ्यः प्रदास्यन्ति त्रीन्पिडान्नामगोत्रतः ।
सर्वत्र वर्त्तमानास्ते पितरः प्रपितामहं ।
तेषामाप्याययिष्यन्ति श्राद्धदानेन वै प्रजाः ॥३२॥
एवमाज्ञा कृता पूर्वं ब्रह्मणा परमेष्ठिना ।
तेनैतत् सर्वथा सिद्धं दानमध्ययनन्तपः ॥३३॥
ते तु ज्ञानप्रदातारः पितरो वो न संशयः ।
इत्येते पितरो देवा देवाश्च पितरः पुनः ।
अन्योन्यं पितरो ह्येते देवाश्च पितरश्च ह ॥३४॥
एतद् ब्रह्मवचः श्रुत्वा सूतस्य विदितात्मनः ।
पप्रच्छुर्मुनयो भूयः सूतं तस्माद्यदुत्तरं ॥३५॥
ऋषय ऊचुः । कियन्तो वै पितृगणाः(१) कस्मिन्काले च ते गणाः ।
वर्त्तन्ते देवप्रवरा देवानां सोमवर्द्धनाः ॥३६॥
सूत उवाच । एतद्वोऽहं प्रवक्ष्यामि पितृसर्गमनुत्तमं ।
शंयुः पप्रच्छ यत् पूर्वं पितरं वै बृहस्पतिं ॥३७॥

१ मुनिगणा इति क० ।

बृहस्पतिमुपासीनं सर्वज्ञानार्थकोविदं ।
पुत्रः शंयुरिमं प्रश्नं पप्रच्छ विनयान्वितः ॥३८॥
क एते पितरो नाम कियन्तः के च नामतः ।
समुद्भूताः कथञ्चैते पितृत्वं समुपागताः ॥३९॥
कस्माच्च पितरं पूर्वं यज्ञे युज्यन्ति नित्यशः ।
क्रियाश्च सर्वा वर्त्तन्ते श्राद्धपूर्वा महात्मनां ॥४०॥
कस्मै श्राद्धानि देयानि किञ्च दत्तं महाफलं ।
केषु वाप्यक्षयं श्राद्धं तीर्थेषु च नदीषु च ॥४१॥
केषु वै सर्व्वमाप्नोति श्राद्धं कृत्वा द्विजोत्तमः ।
कश्च कालो भवेच्छ्राद्धे विधिः कश्चानुवर्त्तते ॥४२॥
एतदिच्छामि भगवन् विस्तरेण यथातथं ।
व्याख्यातुमानुपूर्व्व्येण यच्च चोदाहृतं मया ॥४३॥
बृहस्पतिरिदं सम्यगेवं पृष्टो महामतिः ।
व्याजहारानुपूर्व्व्येण प्रश्नं प्रश्नविदां वरः ॥४४॥
बृहस्पतिरुवाच । कथयिष्यामि ते तात यन्मां त्वं परिपृच्छसि ॥
विनयेन यथान्यायं गम्भीरं प्रश्नमुत्तमं ॥४५॥
द्यौरन्तरीक्षं पृथिवी नक्षत्राणि दिशस्तथा ।
सूर्याचन्द्रमसौ चैव तथाहोरात्रमेव च ॥४६॥
न बभूवुस्तदा तात तमोभूतमिदं जगत् ।
ब्रह्मैको दुश्चरं तत्र चचार परमं तपः ॥४७॥
शंयुस्तमब्रवीद्भूयः पितरं ब्रह्मवित्तमं ।
सर्वदेव व्रतस्नातं सर्वज्ञानविदां वरं ॥४८॥

कीदृशं सर्व्वभूतेभ्यस्तपस्तेपे प्रजापतिः ।
एवमुक्तो बृहत्तेजा बृहस्पतिरुवाच तं ॥४९॥
सर्व्वेषां तपसां युक्तिस्तपोयोगमनुत्तमं ।
ध्यायंस्तदा तद्भगवांस्तेन लोकानवासृजत् ॥५०॥
भूतभव्यानि ज्ञानानि लोकान् वेदांश्च कृत्स्नशः ।
योगमाविश्य तत्सृष्टं ब्रह्मणा योगचक्षुषा ॥५१॥
लोकाः सान्तानिका नाम यत्र तिष्ठन्ति भास्वराः ।
ते वैराजा इतिख्याता देवानां दिवि देवताः ॥५२॥
योगेन तपसा युक्तः पूर्व्वमेव तदा प्रभुः ।
देवानसृजत ब्रह्मा योगं युक्ता सनातनम् ॥५३॥
आदिदेवा इति ख्याता महासत्त्वा महौजसः ।
सर्व्वकामप्रदाः पूज्या देवदानवमानवैः ॥५४॥
तेषां सप्त समाख्याता गणास्त्रैलोक्यपूजिताः ।
अमूर्त्तयस्त्रयस्तेषां चत्वारस्तु सुमूर्त्तयः ॥५५॥
उपरिष्टात् त्रयस्तेषां वर्त्तन्ते भावमूर्त्तयः ।
तेषामधस्ताद्वर्त्तन्ते चत्वारः सूक्ष्ममूर्त्तयः ॥५६॥
ततो देवास्ततो भूमिरेषा लोकपरम्परा ।
लोके वर्त्तन्ति ते ह्यऽस्मिन्तेभ्यः पर्जन्यसम्भवः ।
वृष्टिर्भवति तैर्वृष्ट्या लोकानां सम्भवः पुनः ॥५७॥
आप्याययन्ति ते यस्मात् सोमञ्चान्नञ्च योगतः ।
ऊचुस्तान्वै पितॄन् तस्माल्लोकानां लोकसत्तमाः ॥५८॥
मनोजवाः स्वधाभक्षाः सर्व्वकामपरिच्छदाः ।

लोभमोहभयापेता निस्थिताः शोकवर्जिताः ॥५९॥
एते योगं परित्यज्य प्राप्ता लोकान् सुदर्शनान् ।
दिव्याः पुण्या महात्मानो विपाप्मानो भवन्त्युत ॥६०॥
ततो युगसहस्रान्ते जायन्ते ब्रह्मवादिनः ।
प्रतिलभ्य पुनर्योगं मोक्षं गच्छन्त्यमूर्त्तयः ॥६१॥
व्यक्ताव्यक्तं परित्यज्य महायोगबलेन वा ।
नश्यन्त्युल्केव गगने क्षीणविद्युत्प्रभेव च ॥६२॥
उत्सृज्य देहजातानि महायोगबलेन च ।
निराख्योपाख्यतां यान्ति सरितः सागरे यथा ॥६३॥
क्रियया गुरुपूजाभिर्ये च कुर्वन्ति नित्यशः ।
ताभिराप्याययन्त्येते पितरो योगवर्द्धनाः ॥६४॥
श्राद्धे प्रीताः पुनः सोमं पितरो योगमास्थिताः ।
आप्याययन्ति योगेन त्रैलोक्यं येन जीवति ॥६५॥
तस्माच्छ्राद्धानि देयानि योगिभ्यो यत्नतः सदा ।
पितॄणां हि बलं योगो योगात् सोमः प्रवर्त्तते ॥६६॥
सहस्रशस्तु विप्रान्वै भोजयेद्यावदागतान् ।
एकस्तु योगवित् प्रीतः सर्व्वानर्हति तत्कृते ॥६७॥
कल्पितानां सहस्रेण स्नातकानां शतेन च ।
योगाचार्य्येण यद्भुक्तं त्रायते महतो भयात् ॥६८॥
गृहस्थानां सहस्रेण वानप्रस्थशतेन च।
ब्रह्मचारिसहस्रेण योगी ह्येको विशिष्यते ॥६९॥
नास्तिको वा विकर्मा वा सङ्कीर्णस्तस्करोऽपि वा ।

नान्यत्र कारणं दानं योगेश्वाह प्रजापतिः ७०॥
पितरस्तस्य तुष्यन्ति सुवृष्टेनेव कर्षकाः ।
पुत्रो वाप्यथ वा पौत्रो ध्यानिनं भोजयिष्यति ॥७१॥
अलाभे ध्यानिभिक्षूणां भोजयेद् ब्रह्मचारिणा ।
तदलाभे ऽप्युदासीनं गृहस्थमपि भोजयेत् ॥७२॥
यस्तिष्ठेदेकपादेन वायुभक्षः शतं समाः ।
ध्यानयोगी परस्तस्मादिति ब्रह्मानुशासनं ॥७३॥
सिद्धा हि विप्ररूपेण चरन्ति पृथिवीमिमां ।
तस्मादतिथिमायान्तमभिगच्छेत् कृताञ्जलिः ॥७४॥
पूजयेच्चार्घ्यपात्रेण वेश्मना भोजनेन च ।
उर्व्वीं सागरपर्य्यन्तां देवा योगेश्वराः सदा ।
नानारूपैश्चरन्त्येते प्रजा धर्म्मेण पालयन् ॥७५॥
तस्माद्दद्याच्च वै दानं विप्रायातिथये नरः ।
प्रदानानि प्रवक्ष्यामि फलञ्चैषां तथैव च ॥७६॥
अश्वमेधसहस्रेण राजसूयशतेन च ।
पुण्डरीकसहस्रेण योगिष्वावसथो वरं ॥७७॥
आद्य एष गणः प्रोक्तः पितृणाममितौजसाम् ।
भावयन्सप्तकालान् वै स्थित एष गणस्तदा ॥७८॥
अत ऊर्द्धं प्रवक्ष्यामि सर्व्वान् पितृगणान् पुनः ।
सन्ततिं संस्थितिञ्चैव भावनाञ्च यथाक्रमं ॥७९॥

इति श्रीमहापुराणे वायुप्रोक्ते श्राद्धप्रक्रियारम्भो नाम दशमोऽध्यायः ।

———

अथैकादशोऽध्यायः ।

श्राद्धकल्पः ।

सूत उवाच । सप्त मेधावतां श्रेष्ठाः स्वर्गे पितृगणाः स्मृताः ।
चत्वारो मूर्त्तिमन्तश्च त्रयस्तेषाममूर्त्तयः ।
तेषां लोकविसर्गन्तु कीर्त्तयिष्ये निबोधत ॥१॥
या वै दुहितरस्तेषां दौहित्राश्चैव ये स्मृताः ।
धर्ममूर्त्तिधरास्तेषां ये त्रयः परमा गणाः ॥२॥
नामानि लोकसर्गञ्च तेषां वक्ष्ये समासतः ।
लोका विरजसो नाम्ना यत्र तिष्ठन्ति भास्वराः ॥३॥
अमूर्त्तयः पितृगणाः पुत्रास्ते वै प्रजापतेः ।
विरजस्य द्विजाः श्रेष्ठा वैराजा इति विश्रुताः ।
एष वै प्रथमः कल्पो वैराजानां प्रकीर्त्तितः ॥४॥
तेषान्तु मानसी कन्या मेना नाम महागिरेः ।
पत्नी हिमवतः शुभ्रा यस्यां मैनाक उच्यते ॥५॥
जातः सर्व्वौषधिधरः सर्वरत्नाकरात्मवान् ।
पर्वतः प्रवरः पुण्यः क्रौञ्चस्तस्यात्मजोऽभवत्[१] ॥६॥
तिस्रः कन्यास्तु मेनायां जनयामास शैलराट् ।
अपर्णामेकपर्णाञ्च तृतीयामेकपाटलां ॥७॥

---

१ तस्यानुजोऽभवदिति ङ० ।

आश्रिते द्वे ह्यपर्णा तु अनिकेता तपोऽचरत् ।
न्यग्रोधमेकपर्णी तु पाटलामेकपाटला ।
शतं वर्षसहस्राणि दुश्चरं देवदानवैः ॥८॥
आहारमेकपर्णेन एकपर्णी समाचरत् ।
पाटलेनैव चैकेन विदध्यादेकपाटला ॥९॥
पूर्णे पूर्णे सहस्रे द्वे आहारं वै प्रचक्रतुः ।
एका तत्र निराहारा तां माता प्रत्यभाषत ॥१०॥
निषेधयन्ती ह्युमेति माता स्नेहेन दुःखिता ।
सा तथोक्तया देवी मात्रा दुश्चरचारिणी ॥११॥
उमेति सा महाभागा त्रिषु लोकेषु विश्रुता ।
तथेति नाम्ना तेनासौ निरुक्ता कर्मणा शुभा ॥१२॥
एतत्तु त्रिकुमारीकं जगत् स्थास्यति शाश्वतं ।
एतासान्तपसा दृप्तं यावद्भूमिर्द्धरिष्यति ॥१३॥
तपःशरीरास्ताः सर्वास्तिस्रो योगबलान्विताः ।
देव्यस्ताः सुमहाभागाः सर्व्वाश्च स्थिरयौवनाः ॥१४॥
सर्वाश्च ब्रह्मवादिन्यः सर्वाश्चैवोर्द्धरेतसः ।
उमा तासां वरिष्ठा च श्रेष्ठा च वरवर्णिनी ॥१५॥
महायोगबलोपेता महादेवमुपस्थिता ।
दत्तकाश्चोशनास्तस्याः पुत्रो वै भृगुनन्दनः ॥१६॥
असितस्यैकपर्णी तु पत्नी साध्वी दृढव्रता ।
दत्ता हिमवता तस्मै योगाचार्य्याय धीमते ।
देवलं सुषुवे सा तु ब्रह्मिष्ठं मानसं सुतं ॥१७॥

या चैतासां कुमारीणां तृतीया त्वेकपाटला ।
पुत्रं शतशिलाकस्य जैगीषव्यमुपस्थिता ॥१८॥
तस्यापि शङ्खलिखितौ स्मृतौ पुत्रावयोनिजौ ।
इत्येता वै महाभागाः कन्या हिमवतः शुभाः ॥१९॥
रुद्राणी सा तु प्रवरा स्वगुणैरतिरिच्यते ।
अन्योन्यप्रीतिरनयोरुमाशङ्करयोर्यथा ॥२०॥
श्लेषं संशक्तयोर्ज्ञात्वा शङ्कितः किल वृत्रहा ।
ताभ्यां मैथुनसक्ताभ्यामपत्योद्भवभीरुणा ।
तयोः सकाशमिन्द्रेण प्रेषितो हव्यवाहनः ॥२१॥
अनयोः रतिविघ्नञ्च त्वमाचर हुताशन(१) ।
सर्वत्र गत एव त्वं न दोषो विद्यते तदा ॥२२॥
इत्येवमुक्ते तु तथा वह्निना च तथा कृतं ।
उमादेहं समुत्सृज्य शुक्रं भूमौ विसर्जितं ॥२३॥
ततो रुषितया देव्या शप्तोऽग्निः शांशपायन ।
इदं चोक्तवती वह्निं रोषगद्गदया गिरा ॥२४॥
यस्मान्मय्यवितृप्तायां रतिविघ्नं हुताशन ।
कृतवानस्यकर्त्तव्यं तस्मात् त्वमसि दुर्मते ॥२५॥
यदेवं(२) विभृतं गर्भं रौद्रं शुक्रं महाप्रभं ।
गर्भं त्वं धारयस्वैवमेषा ते दण्डधारणा ॥२६॥
स शापरोषाद्रुद्राण्या अन्तर्गर्भो हुताशनः ।

---

१ वर त्वन्तु हुताशनेति ङ० ।
२ यदेतमिति ख० । तदेवमिति क० ।

बहून् वर्षगणान् गर्भं धारयामास वै द्विजाः ॥२७॥
स गङ्गामुपगम्याह श्रूयतां सरिदुत्तमे ।
सुमहान् परिखेदो मे गर्भधारणकारणात् ॥२८॥
मद्धितार्थमिमं गर्भमतो धारय निम्नगे ।
मत्प्रसादाच्च खेदो वै मन्दस्तव भविष्यति ॥२९॥
तथेत्युक्त्वा तदा सा तु सम्प्रहृष्टा महानदी ।
तं गर्भं धारयामास दह्यमानेन चेतसा[१] ॥३०॥
सापि कृच्छ्रेण महता खिद्यमाना महानदी ।
कालं प्रकृष्टं सुमहद्गर्भधारणतत्परा ॥३१॥
तया परिगतं गर्भं कुक्षौ हिमवतः शुभे ।
शुभं शरवणं नाम चित्रं पुष्पितपादपं ।
तत्र तं व्यसृजद्गर्भं दीप्यमानमिवानलं ॥३२॥
रुद्राग्निगङ्गातनयस्तत्र जातोऽरुणप्रभः ।
आदित्यशतसङ्काशो महातेजाः प्रतापवान् ॥३३॥
तस्मिन् जाते महाभागे कुमारे जाह्नवीसुते ।
विमानयानैराकाशं पतत्रिभिरिवावृतं ॥३४॥
देवदुन्दुभयो नेदुराकाशे मधुरस्वराः ।
मुमुचुः पुष्पवर्षञ्च खचराः सिद्धचारणाः ॥३५॥
जगुर्गन्धर्व्वमुख्याश्च सर्व्वशस्तत्र तत्र ह ।
यक्षा विद्याधराः सिद्धाः किन्नराश्चैव सर्वशः ॥३६॥

---

१ तेजसेति ङ, छ० च ।

महानागसहस्राणि प्रवराश्च पतत्त्रिणः ।
उपतस्थुर्महाभागमाग्नेयं(१) शङ्करात्मजं ।
प्रभावेण तदा तेन(२) दैत्यदानवराक्षसाः ॥ ३७॥
सहसप्तर्षिभार्य्याभिरादावेवाग्निसम्भवः ।
अभिषेकप्रयाताभिर्दृष्टो वर्ज्य त्वरुन्धतीं ॥ ३८॥
ताभिः स बालार्कनिभो रौद्रः परिवृतः प्रभुः ।
स्निह्यमानाभिरत्यर्थं स्वकाभिरिव मातृभिः ॥ ३९॥
युगपत्सर्वदेवीर्हि दिदृक्षुर्जाह्नवीसुतः ।
षण्मुखो व्यसृजत् श्रीमांस्तासां प्रीत्या महाद्युतिः ॥ ४०॥
श्रीमान् कमलपत्राक्षस्तरुणादित्यसन्निभः ।
येन जातेन लोकानामाक्षेपस्तेजसा कृतः ॥ ४१॥
तेन जातेन महता देवानामसहिष्णवः ।
स्कन्दिता दानवगणास्तस्मात् स्कन्दः प्रतापवान् ॥ ४२॥
कृत्तिकाभिस्तु यस्मात् स वर्द्धितः स पुरातनः ।
कार्त्तिकेय इति ख्यातस्तस्मादसुरसूदनः ॥ ४३॥
जृम्भतस्तस्य दैत्यारेर्ज्वालामालाकुलात्तदा ।
मुखाद्विनिर्गता तस्य स्वशक्तिरपराजिता ॥ ४४॥
क्रीड़ार्थञ्चैव स्कन्दस्य विष्णुना प्रभविष्णुना ।
गरुड़ादिति सृष्टौ हि पक्षिणौ हि प्रभद्रकौ ॥ ४५॥

---

१ उपतस्थुर्महाभागममेयमिति क्व० ।
२ प्रभावमहता तेनेति क्व० ।

मयूरः कुक्कुटश्चैव पताका चैव वायुना ।
यस्य दत्ता सरस्वत्या महावीणा महास्वना ।
अजः स्वयम्भुवा दत्तो मेषो दत्तश्च शम्भुना ॥४६॥
मायाविहरणे(१) विप्रा गिरौ क्रौञ्चे निपातिते ।
तारके चासुरवरे समुदीर्णे निपातिते ॥४७॥
सेन्द्रोपेन्द्रैर्महाभागैर्देवैरग्निसुतः प्रभुः ।
सेनापत्येन दैत्यारिरभिषिक्तः प्रतापवान् ॥४८॥
देवसेनापतिस्त्वेवं पद्यते नरनायकः ।
देवारिस्कन्दनः स्कन्दः सर्वलोकेश्वरः प्रभुः ॥४९॥
प्रमथैर्विविधैर्देवैस्तथा भूतगणैरपि ।
मातृभिर्विविधाभिश्च विनायकगणैस्तथा ॥५०॥
सा त्वपश्यद्विमानानि पतन्ती सा दिवश्च्युता ।
त्रसरेणुप्रमाणानि तेष्वपश्यच्च्युतान् पितॄन् ॥५१॥
सुसूक्ष्मानपरित्यक्तानग्नीनग्निष्विवाहितान् ।
त्रायध्वमित्युवाचाथ पतन्ती तानवाक्शिराः ॥५२॥
तैरुक्ता सा तु माभैषीरित्युक्ताधिष्ठिताभवत् ।
ततः प्रासादयत् सा वै पितॄंस्तान् दीनया गिरा ॥५३॥
ऊचुस्ते पितरः कन्यां भ्रष्टैश्वर्य्यां व्यतिक्रमात् ।
भ्रष्टैश्वर्य्या स्वदोषेण तपसि त्वं शुचिस्मिते ॥५४॥
यैः क्रियन्ते च कर्म्माणि शरीरैरिह दैवतैः ।

---

१ महाविहरणे इति ख० ।

तैरेव तत्कर्म्मफलं प्राप्नुवन्तीह देवताः ॥५५॥
सद्यः फलन्ति कर्म्माणि देवत्वे प्रेत्य मानुषे ।
तस्मादमावसोपत्यं[१] त्वं प्रेत्य प्राप्स्यसे फलं ॥५६॥
इत्युक्तया वै पितरः पुनस्ते तु प्रसादिताः ।
ध्यात्वा प्रसादं सञ्चक्रुस्तस्यास्ते त्वनुकम्पया ॥५७॥
अवश्यम्भाविनं दृष्ट्वा ह्यर्थमूचुस्ततः सुराः ।
सोमपाः पितरः कन्यां राज्ञश्चैव ह्यमावसोः ॥५८॥
उत्पन्नस्य पृथिव्यान्तु मानुषत्वे महात्मनः ।
कन्या भूत्वा त्विमान् लोकान् पुनः प्राप्स्यसि स्वानिति ॥५९॥
अष्टाविंशे भवित्री त्वं द्वापरे मत्स्ययोनिजा ।
अस्यैव राज्ञो दुहिता अद्रिकायां ह्यमावसोः ॥६०॥
पराशरस्य दायादं ऋषेस्त्वं जनयिष्यसि ।
स वेदमेकं विप्रर्षिश्चतुर्धा वै करिष्यति ॥६१॥
महाभिषस्य[२] पुत्रौ द्वौ शन्तनोः कीर्त्तिवर्द्धनौ ।
विचित्रवीर्य्यं धर्म्मज्ञं त्वमेवोत्पादयिष्यसि ॥६२॥
चित्राङ्गदञ्च राजानं तेजोबलगुणान्वितं ।
एतानुत्पाद्य पुत्रं स्वं पुनर्लोकानवाप्स्यसि ॥६३॥
व्यतिक्रमात् पितॄणां त्वं प्राप्स्यसे जन्म कुत्सितं ।
तस्यैव राज्ञस्त्वं कन्या अद्रिकायां भविष्यसि ॥६४॥
कन्या भूत्वा ततश्च त्वमिमान्लोकानवाप्स्यसि ।

---

१ पाठोऽयमादर्शसम्मतो मुद्रितः । परन्त्वयं न समीचीनः ।
१ महानिषस्येति क० । महाषिषस्येति ङ० ।

एवमुक्ता तु दासेयी जाता सत्यवती तु सा ॥६५॥
अद्रिकायां सुता मत्स्यां सुता जाता ह्यमावसोः ।
अद्रिकामत्स्यसम्भूता गङ्गायामनुसङ्गमे ॥६६॥
तस्य राज्ञो हि सा कन्या राज्ञो वीर्य्यें सदैव हि ।
विरजा नाम ते लोका दिवि रोचन्ति ते गणाः ॥६७॥
अग्निष्वात्ताः स्मृतास्तत्र पितरो भास्वरप्रभाः ।
तान् दानवगणा यक्षा रक्षोगन्धर्व्वकिन्नराः ।
भूतसर्पपिशाचाश्च भावयन्ति फलार्थिनः ॥६८॥
एते पुत्राः समाख्याताः पुलहस्य प्रजापतेः ।
त्रय एते गणाः प्रोक्ता धर्ममूर्त्तिधराः शुभाः ॥६९॥
एतेषां मानसी कन्या पीवरी नाम विश्रुता ।
योगिनी योगपत्नी च योगमाता तथैव च ॥७०॥
भविता द्वापरं प्राप्य अष्टाविंशन्तु दैवतं ।
पराशरकुलोद्भुतः शुको नाम महातपाः ॥७१॥
श्रीमान्योगी महायोगी योगस्तस्माद्द्विजोत्तमः ।
व्यासादरण्यां सम्भूतो विधूम इव पावकः ॥७२॥
स तस्यां पितृकन्यायां योगाचार्यान् परिश्रुतान् ।
कृष्णं गौरं प्रभुं शम्भुं तथा भूरिश्रुतं बवौ ॥७३॥
कन्यां कीर्त्तिमतीञ्चैव योगिनीं योगमातरं ।
ब्रह्मदत्तस्य जननी महिषी लणुहस्य तु ॥७४॥
एतानुत्पाद्य धर्मात्मा पुत्रान् योगमवाप्य च ।
महायोगतपाश्चैव अपरावर्त्तिनीं गतिं ॥७५॥

आदित्यकिरणोपेतं त्वपुनर्भावमास्थितः ।
सर्व्वव्यापी विनिर्मुक्तो भविष्यति महामुनिः ॥७६॥
अमूर्त्तिमन्तः पितरो धर्म्ममूर्त्तिधरास्तु ये ।
त्रय एते गणास्तेषां चत्वारोऽन्ये निबोधत ॥७७॥
यान् वक्ष्यामि द्विजश्रेष्ठा मूर्त्तिमन्तो महाप्रभाः ।
उत्पन्नास्ते स्वधायास्तु कन्या ह्यग्नेः कवेः सुताः ॥७८॥
पितरो देवलोकेषु ज्योतिर्भासिषु भास्वराः ।
सर्व्वकामसमृद्धेषु द्विजास्तान् भावयन्त्युत ॥७९॥
एतेषां मानसी कन्या गौर्नाम दिवि विश्रुता ।
दत्तसेना कुमारेण शुक्रस्य महिषी प्रिया ॥८०॥
एकत्रिंशच्च विख्याता भृगूनां कीर्त्तिवर्द्धनाः ।
मरीचिगर्भास्ते लोकाः समावृत्य दिवि स्थिताः ॥८१॥
एते ह्यङ्गिरसः पुत्राः साध्यैः सह विवर्द्धिताः ।
उपहूताः स्मृतास्ते तु पितरो भास्वरा दिवि ।
तान् क्षत्रियगणान् दृष्ट्वा भावयन्ति फलार्थिनः ॥ ८२॥
एतेषां मानसी कन्या यशोदा नाम विश्रुता ।
पत्नी सा विश्वमहतः स्नुषा वै विश्वशर्म्मिणः[१] ॥८३॥
राजर्षेर्जननी देवी खट्वाङ्गस्य महात्मनः ।
यस्य यज्ञे पुरा गीता गाथा गीतैर्महर्षिभिः ॥८४॥
अग्नेर्जन्म तथा दृष्ट्वा शाण्डिल्यस्य महात्मनः ।

---

१ विश्वकर्म्मणः इति ङ० । विश्वशर्म्मिणामिति क० ।

यजमानं दिलीपं ये पश्यन्ति सुसमाहिताः ।
सत्यव्रतं महात्मानं ते स्वर्गजयिनोऽमराः ॥८५॥
आज्यपा नाम पितरः कर्दमस्य प्रजापतेः ।
समुत्पन्नस्य पुलहादुत्पन्नास्तस्य वै पुनः ॥८६॥
लोकेष्वेतेषु वर्त्तन्ते कामगेषु विहङ्गमाः ।
एतान् वैश्यगणाः श्राद्धे भावयन्ति फलार्थिनः ॥८७॥
एतेषां मानसी कन्या विरजा नाम विश्रुता ।
ययातेर्जननी साध्वी पत्नी सा नहुषस्य तु ॥८८॥
सुकाला नाम पितरो वसिष्ठस्य प्रजापतेः ।
हिरण्यगर्भस्य सुताः शूद्रास्तान् भावयन्त्युत ॥८९॥
मानसा नाम ते लोका वर्त्तन्ते यत्र ते दिवि ।
एतेषां मानसी कन्या नर्मदा सरितां वरा ॥९०॥
सा भावयति भूतानि दक्षिणापथगामिनी ।
जननी त्रसदस्योर्हि पुरुकुत्सपरिग्रहः ॥९१॥
एतेषामभ्युपगमान्मातुर्मन्वन्तरेश्वरः ।
मन्वन्तरादौ श्राद्धानि प्रवर्त्तयति सर्वशः ॥९२॥
पितॄणामानुपूर्व्वेण सर्वेषां द्विजसत्तमाः ।
तस्मादिह स्वधर्मेण श्राद्धं देयन्तु श्रद्धया ॥९३॥
सर्वेषां राजतैः पात्रैरपि वा रजतान्वितैः ।
दत्तं स्वधां पुरोधाय तथा प्रीणाति वै पितॄन् ॥९४॥
सोमस्याप्यायनं कृत्वा ह्यग्नेर्वैवस्वतस्य च ।
उदगायनश्चाग्नौ च अश्वमेधन्तदाप्नुयात् ॥९५॥

पितॄन् प्रीणाति वै भक्त्या पितरः प्रीणयन्ति तं।
पितरः पुष्टिकामस्य प्रजाकामस्य वा पुनः।
पुष्टिं प्रजाञ्च स्वर्गञ्च प्रयच्छन्ति न संशयः ॥९६॥
देवकार्य्यादपि सदा पितृकार्य्यं विशिष्यते।
देवताभ्यः पितॄणां हि पूर्व्वमाप्यायनं स्मृतम् ॥९७॥
न हि योगगतिः सूक्ष्मा पितॄणामपि दृष्टयः।
तपसा हि प्रसिद्धेन दृश्यन्ते मांसचक्षुषा ॥९८॥
इत्येते पितरश्चैव लोका दुहितरश्च वै।
दौहित्रा यजमानाश्च प्रोक्ता ये भावयन्ति तान् ॥९९॥
चत्वारो मूर्त्तिमन्तश्च त्रयस्तेषाममूर्त्तयः।
तेभ्यः श्राद्धानि सत्कृत्य देवाः कुर्व्वन्ति यत्नतः ॥१००॥
भक्ताः प्राञ्जलयः सर्वे सेन्द्रास्तद्गतमानसाः।
विश्वे च सिकताश्चैव पृश्निजाः शृङ्गिनस्तथा ॥१०१॥
कृष्णाः श्वेतास्त्वजाश्चैव विधिवत्पूजयन्त्युत।
प्रजास्ता वातरशना दिवाकीर्त्त्यास्तथैव च ॥१०२॥
लेखाश्च मरुतश्चैव ब्रह्माद्याश्च दिवौकसः।
अत्रिभृग्वङ्गिराद्याश्च ऋषयः सर्व्व एव च ॥१०३॥
यक्षा नागाः सुपर्णाश्च किन्नरा राक्षसैः सह।
पितॄंस्त्वपूजयन् सर्वे नित्यमेव फलार्थिनः ॥१०४॥
एवमेते महात्मानः श्राद्धे सत्कृत्य पूजिताः।
सर्वान् कामान् प्रयच्छन्ति शतशोऽथ सहस्रशः ॥१०५॥
हित्वा त्रैलोक्यसंसारं जरामृत्युभयं तथा।

मोक्षं योगमथैश्वर्य्यं प्रयच्छन्ति पितामहाः ॥१०६॥
मोक्षोपायमथैश्वर्य्यं सूक्ष्मदेहाश्च देवताः ।
कृत्स्नं वैराग्यमानन्त्यं प्रयच्छन्ति पितामहाः ॥१०७॥
ऐश्वर्य्यं विहितं योगमैश्वर्य्यं वित्तमुत्तमम् ।
योगैश्वर्य्यादृते मोक्षः कथञ्चिन्नोपपद्यते ॥१०८॥
अपक्षस्यैव गमनं गगने पक्षिणो यथा ।
वरिष्ठः सर्वधर्म्माणां मोक्षो धर्म्मः सनातनः ॥१०९॥
विमानानां सहस्राणि युक्तान्यप्सरसाङ्गणैः ।
सर्वकामप्रसिद्धानि प्रयच्छन्ति पितामहाः ॥११०॥
प्रज्ञा पुष्टिः स्मृतिर्मेधा राज्यमारोग्यमेव च ।
पितृणां हि प्रसादेन प्राप्यते सुमहात्मना ॥१११॥
मुक्तावैदूर्य्यवासांसि वाजिनागायुतानि च ।
कोटिशश्चापि रत्नानि प्रयच्छन्ति पितामहाः ॥११२॥
हंसबर्हिणयुक्तानि मुक्तावैदूर्य्यवन्ति च ।
किङ्किणीजालनद्धानि सदा पुष्पफलानि च ।
प्रीत्या नित्यं प्रयच्छन्ति मनुष्याणां पितामहाः ॥११३॥

इति श्रीमहापुराणे वायुप्रोक्ते श्राद्धकल्पो नामै-
कादशोऽध्यायः ।

अथ द्वादशोऽध्यायः।

श्राद्धकल्पः।

बृहस्पतिरुवाच। सौवर्णं राजतं ताम्रं पितॄणां पात्रमुच्यते।
रजतं रजताक्तं वा पितॄणां पात्रमुच्यते ॥१॥
रजतस्य कथा चापि दर्शनं दानमेव च।
अनन्तमक्षयं स्वर्ग्यं पितॄणां दानमुच्यते।
पितॄनेतेन दानेन सत्पुत्रास्तारयन्त्युत ॥२॥
राजते हि स्वधा दुग्धा पात्रेऽस्मिन् पितृभिः पुरा।
स्वधादायार्थिभिस्तात तस्मिन् दत्ते तदक्षयं ॥३॥
कृष्णाजिनस्य सान्निध्यं दर्शनं दानमेव वा[१]।
रक्षोघ्नं ब्रह्मवर्चस्यं पितॄंस्तत्तद्धितारयेत्[२] ॥४॥
काञ्चनं राजतं ताम्रं[३] दौहित्रं कुतपस्तिलाः।
वस्त्रञ्च पावनीयानि त्रिदण्डो योगमेव च ॥५॥
श्राद्धकर्मण्ययं श्रेष्ठो विधिर्ब्राह्म्यः सनातनः।
आयुः कीर्त्तिः प्रजाश्चैव प्रज्ञासन्ततिवर्द्धनः ॥६॥
दिशि दक्षिणपूर्वस्यां विदिक्स्थानं विशेषतः[४]।
सर्वतो रत्निमात्रन्तु चतुरस्रं सुसंहितं ॥७॥

---

१ दानमेव चेति क०।
२ पितॄंस्तु भुवि भावयेदिति ख०।
३ पात्रमिति क०।
४ विदिक्स्थानानि वेशयेदिति ङ०, च० च।

वक्ष्यामि विधिवत् स्थानं पितॄणामनुशासनात् ।
धन्यमारोग्यमायुष्यं बलवर्णविवर्द्धनं ॥८॥
तत्र गर्त्तास्त्रयः कार्य्यास्त्रयो दण्डाश्च खादिराः ।
रत्निमात्रास्तु ते कार्य्या रजतेन विभूषिताः ।
ते वितस्त्यायताः कार्य्याः सर्व्वतश्चतुरङ्गुलाः ॥९॥
प्रागुदक्षिणमुखान् भूमौ स्थितानसुषिरांस्तथा ।
अद्भिः पवित्रपूताभिः स्नावयेत्सततं शुचिः ॥१०॥
पयसा ह्याजगव्येन शोधनं वाग्भिरेव तु ।
तर्पणात् सततं ह्येवं तृप्तिर्भवति शाश्वती ॥११॥
इह चामूत्र च श्रीमान् सर्वकर्मसमन्वितः ।
एवं त्रिषवणस्नातो योऽर्चयेत पितॄन् सदा ।
मन्त्रेण विधिवत् सम्यगश्वमेधफलं लभेत् ॥१२॥
तत्स्थापयेदमावास्याङ्गर्त्ते भूचतुरङ्गुले ।
त्रिःसप्तसंज्ञास्ते यज्ञास्त्रैलोक्यन्धार्य्यते तु वै ॥१३॥
तस्य पुष्टिरथैश्वर्य्यमायुः सन्ततिरेव च ।
विचित्रा भजते लक्ष्मीर्मोक्षञ्च लभते क्रमात् ॥१४॥
पाप्मापहं पावनीयमश्वमेधफलं तथा ।
अश्वमेधफलं ह्येतत् द्विजैः सत्कृत्य पूजितं ।
मन्त्रं वक्ष्याम्यहं तस्मादमृतं ब्रह्मनिर्मितं ॥१५॥
देवतेभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वधायै स्वाहायै नित्यमेव भवन्त्युत ॥१६॥
आद्यावसाने श्राद्धस्य त्रिरावर्त्तं जपेत्सदा ।

पिण्डनिर्वपणे चैव जपेदेतत् समाहितः ।
पितरः क्षिप्रमायान्ति राक्षसाः प्रद्रवन्ति च ॥१७॥
पितॄंस्तत्त्रिषु लोकेषु मन्त्रोयन्तारयत्युत ।
पठ्यमानः सदा श्राद्धे नियतं ब्रह्मवादिभिः ॥१८॥
राज्यकामो जपेदेनं सदा मन्त्रमतन्द्रितः ।
वीर्य्यशौचार्थसत्त्वञ्च श्रीरायुर्बलवर्द्धनं ॥१९॥
प्रीयन्ते पितरो येन जप्येन नियमेन च ।
सप्तार्च्चिषं प्रवक्ष्यामि सर्वकामप्रदं शुभं ॥२०॥
अमूर्तानां समूर्तानां पितॄणान्दीप्ततेजसां ।
नमस्यामि सदा तेभ्यो ध्यानिभ्यो योगचक्षुषा ॥२१॥
इन्द्रादीनां जनयितारो भृगुमारीचयोस्तथा ।
सप्तर्षीणां पितॄणाञ्च तान् नमस्यामि कामदान् ॥२२॥
मन्वादीनां सुरेशानां सूर्य्याचन्द्रमसोस्तथा ।
तान् नमस्कृत्य सर्वान् वै पितॄन् कुशलदायकान् ॥२३॥
नक्षत्राणाञ्चरादीनां पितॄनथ पितामहान् ।
द्यावापृथिव्योश्च तथा नमस्यामि कृताञ्जलिः ॥२४॥
देवर्षीणाञ्जनयितॄंश्च सर्वलोकनमस्कृतान् ।
अभयस्य सदा दातॄन्नमस्येऽहं कृताञ्जलिः ॥२५॥
प्रजापतेः कश्यपाय सोमाय वरुणाय च ।
योगयोगेश्वरेभ्यश्च नमस्यामि कृताञ्जलिः ॥२६॥
पितृगणेभ्यः सप्तभ्यो नमो लोकेषु सप्तसु ।
स्वयम्भुवे नमस्चैव ब्रह्मणे योगचक्षुषे ॥२७॥

एतदुक्तं सप्तर्षिब्रह्मर्षिगणपूजितं ।
पवित्रं परमं[१] ह्येतत् श्रीमद्रक्षोविनाशनं ॥२८॥
अनेन विधिना युक्तः त्रीन् वरान् लभते नरः ।
अन्नमायुः सुतांश्चैव ददते पितरो भुवि ॥२९॥
भक्त्या परमया युक्तः श्रद्दधानो जितेन्द्रियः ।
सप्तार्चिषं जपेद्यस्तु नित्यमेव समाहितः ।
सप्तद्वीपसमुद्रायां पृथिव्यामेकराड्भवेत् ॥३०॥
यत्किञ्चित् पच्यते गेहे भक्ष्यं वा भोज्यमेव च ।
अनिवेद्य न भोक्तव्यं तस्मिन्नायतने सदा ॥३१॥
क्रमशः कीर्त्तयिष्यामि बलिपात्राण्यतःपरं ।
येषु यच्च फलं प्रोक्तं तन्मे निगदतः शृणु ॥३२॥

इति श्रीमहापुराणे वायुप्रोक्ते श्राद्धकल्पो नाम
द्वादशोऽध्यायः ।

---

१ पवित्रमपरमिति च० ।

अथ त्रयोदशोऽध्यायः।

श्राद्धकल्पः।

बृहस्पतिरुवाच। पालाशं ब्रह्मवर्चस्यमश्वत्थे राज्यभावना।
सर्वभूताधिपत्यञ्च[1] प्लक्षे नित्यमुदाहृतं ॥१॥
पुष्टिकामञ्च न्यग्रोधं बुद्धिं प्रज्ञां धृतिं स्मृतिं।
रक्षोघ्नञ्च यशस्यञ्च काश्मर्य्यं पात्रमुच्यते ॥२॥
सौभाग्यमुत्तमं लोके मधुके समुदाहृतं।
फल्गुपात्रे च कुर्वाणः सर्वान् कामानवाप्नुयात् ॥३॥
परा द्युतिरथो कर्तुः प्राकाम्यञ्च विशेषतः।
विल्वे लक्ष्मीस्तथा मेधा नित्यमायुष्यमेव च ॥४॥
क्षेत्रारामतडागेषु सर्वसस्येषु चैव हि।
वर्षेदजस्रं पर्जन्यो वेणुपात्रेषु कुर्व्वतः ॥५॥
एतेष्वेव सुपात्रेषु ये चैवाग्रयणं ददुः।
सकृदप्यत्र यज्ञानां सर्वेषां फलमुच्यते ॥६॥
पितृभ्यो यस्तु माल्यानि सुगन्धीनि च सर्वशः।
सदा दद्याच्छ्रिया युक्तः स विभाति दिवाकरः ॥७॥
गुग्गुलादींस्तथा धूपान् पितृभ्यो यः प्रयच्छति।
संयुक्तान् मधुसर्पिर्भ्यां सोऽश्वमेधफलं लभेत् ॥८॥
धूपं गन्धगुणोपेतं कान्तं पितृपरायणं।

---

१ सर्व्वभूम्याधिपत्यञ्चेति क०।

लभते स्त्रीष्वपत्यानि इह चामुत्र चोभयोः ।
दद्यादेव पितृभ्यस्तु नित्यमेव ह्यतन्द्रितः ॥९॥
दीपं पितृभ्यः प्रयतः सदा यस्तु प्रयच्छति ।
स लोके प्रतिभं चक्षुः सदा च लभते शुभं ॥१०॥
तेजसा यशसा चैव कान्त्या चैव बलेन च ।
भुवि प्रकाशो भवति भ्राजते च त्रिविष्टपे ।
अप्सरोभिः परिवृतो विमानाग्रे स मोदते ॥११॥
गन्धान् पुष्पाणि धूपांश्च दद्यादाज्याहुतीश्च वै ।
फलमूलनमस्कारैः पितॄणां प्रयतः शुचिः ।
पूर्वं कृत्वा द्विजान् पश्चात् पूजयेदन्नसम्पदा ॥१२॥
श्राद्धकाले तु सततं वायुभूताः पितामहाः ।
आविशन्ति द्विजान् दृष्ट्वा तस्मादेतद्ब्रवीमि ते ॥१३॥
वस्त्रैरन्नैः प्रदानैस्तैर्भक्ष्यपेयैस्तथैव च ।
गोभिरश्वैस्तथा ग्रामैः पूजयित्वा द्विजोत्तमान् ॥१४॥
भवन्ति पितरः प्रीता पूजितेषु द्विजातिषु ।
तस्मादन्नेन विधिवत् पूजयेद्द्विजसत्तमान् ॥१५॥
सव्योत्तराभ्यां पाणिभ्यां कुर्य्यादुल्लेखनं द्विजः ।
प्रोक्षणञ्च तथा कुर्य्यात् श्राद्धकर्मण्यतन्द्रितः ॥१६॥
दर्भान् पिण्डांस्तथा भक्ष्यान् पुष्पाणि विविधानि च ।
गन्धदानमलङ्कारमेकैकं निर्वपेद्बुधः ॥१७॥
पोषयित्वा जनं सम्यग् वैश्यः स्यादुत्तरो द्विजः ।
अभ्यङ्गदर्भपिञ्जालैस्त्रिभिः कुर्याद्यथाविधि ॥१८॥

अपसव्यं पितृभ्यश्च दद्यादन्नमनुत्तमं[१]।
तमुच्चार्याथ सर्वेषां वस्त्रार्थं सूत्रमेव च[२] ॥१९॥
खण्डनं पोषणञ्चैव[३] तथैवोल्लेखनं तथा ।
सकृदेव हि देवानां पितृणां त्रिभिरुच्यते ॥२०॥
एकं पवित्रं हस्तेन पितॄन् सर्वान् सकृत् सकृत् ।
चैलमन्त्रेण पिण्डेभ्यो दत्त्वा दर्शनजं हितं ॥२१॥
सदा सर्पिस्तिलैर्युक्तांस्त्रीन् पिण्डान्निर्वपेद्भुवि ।
जानुं कृत्वा तथा सव्यं भूमौ पितृपरायणः ॥२२॥
पितॄन् पितामहांश्चैव तथैव प्रपितामहान् ।
आहूय च पितॄन् प्राज्ञान् पितृतीर्थेन यत्नतः ।
पिण्डान् परिक्षिपेत् सम्यगपसव्यमतन्द्रितः ॥२३॥
अन्नेनाद्भिश्च पुष्पैश्च भक्ष्यैश्चैव पृथग्विधैः ।
पृथक् मातामहानान्तु केचिदिच्छन्ति मानवाः ॥२४॥
त्रीन् पिण्डानानुपूर्व्येण साङ्गुष्ठान् पुष्टिवर्द्धनान् ।
जान्वन्तराभ्यां यत्नेन पिण्डान् दद्याद् यथाक्रमं ॥२५॥
सव्योत्तराभ्यां पाणिभ्यां धर्मे मन्त्रे च पर्य्ययः ।
नमो वः पितरः सूक्ष्मैः सदा ह्येवमतन्द्रितः ॥२६॥
दक्षिणस्थान्तु पाणिभ्यां प्रथमं पिण्डमुत्सृजेत् ।
नमो वः पितरः सौम्याः पठन्नित्यमतन्द्रितः ॥२७॥

---

१ दद्यादन्नमुत्तममिति ङ० ।
२ स्लोकार्द्धं न समीचीनं ।
३ च्छेपणञ्चैवेति ख० ।

सव्योत्तराभ्यां पाणिभ्यां धर्म्मं सर्व्वमतन्द्रितः ।
उलूखलस्य लेखायामुदपात्राच्च सेवनं ॥२८॥
क्षौमसूत्रं नवं दद्यात् शोणं कार्पासिकं तथा ।
पत्तोर्णं पिट्टसूत्रञ्च कौशेयं परिवर्जयेत् ॥२९॥
वर्जयेत्तद्दशां यत्ने यद्यप्यहतवस्त्रजां ।
न प्रीणन्ति तथैतानि दातुराप्यायतो भवेत् ॥३०॥
श्रेष्ठमाञ्जस्तिककुदमञ्जनं नित्यमेव च ।
कृष्णेभ्यश्च तिलेभ्यश्च यत्तैलं परिरक्षितं ॥३१॥
चन्दनागुरुणी चोभे तमालोशीरपद्मकं ।
धूपञ्च गुग्गुलश्रेष्ठं तुरुष्कं धूपमेव च ॥३२॥
शुक्लाः सुमनसः श्रेष्ठास्तथा पद्मोत्पलानि च ।
गन्धवन्त्युपपन्नानि यानि चान्यानि कृत्स्नशः ॥३३॥
जवासुमनसो भण्डीरूपकामकुरण्डकाः ।
पुष्पाणि वर्जनीयानि श्राद्धकर्मणि नित्यशः ॥३४॥
यानि गन्धादपेतानि उपगन्धीनि यानि च ।
वर्जनीयानि पुष्पाणि भूतिमन्विच्छता तदा ॥३५॥
द्विजातयस्तथान्विष्टा नियताः स्युरुदङ्मुखाः ।
पूजयेद्यजमानस्तु विधिवद्दक्षिणामुखः ॥३६॥
तेषामभिमुखो दद्याद्दर्भान् पिण्डांश्च यत्नतः ।
अनेन विधिना साक्षादर्च्चयेत् स्वान् पितामहान् ॥३७॥
हरिता वै सपिञ्जल्याः पुष्पस्निग्धाः समाहिताः ।
रत्निमात्रप्रदानेन पितृतीर्थेन संस्थिताः ॥३८॥

उपमूले तथा नीलाः प्रस्तराद्यकुलोद्यमाः[१]।
तथा श्यामाकनीवारा दूर्व्वाराः समुदाहृताः ॥३९॥
पूर्व्वकीर्त्तितवान् श्रेष्ठो बभूवाथ प्रजापतिः।
तस्य वाला निपतिता भूमौ चाकाशमार्गतः ॥४०॥
तस्मान् मेध्याः समाकाशाः श्राद्धकर्मणि पूजिताः।
पिण्डनिर्वपणन्तेषु कर्त्तव्यं भूतिमिच्छता ॥४१॥
प्रजापुष्टिर्द्युतिः कीर्त्तिः प्रजाकान्तिसमन्विता।
भवन्ति रुचिरा नित्यं विपाप्मानोऽघवर्जिताः ॥४२॥
सकृदेवास्तरेद्दर्भान् पिडार्थं दक्षिणामुखः।
प्रागदक्षिणाग्रनियतो विधिश्चाप्यनुवक्ष्यति ॥४३॥
न दीनो वापि वा क्रुद्धो न चैवान्यमना नरः।
एकाग्रमाधाय मनः श्राद्धं कुर्य्यात् सदा बुधः ॥४४॥
निहन्मि सर्व्वं यदमेध्यवद्भवे-
द्धताश्च सर्व्वे सुरदानवा मया।
रक्षांसि यक्षाश्च पिशाचसङ्घा
हता मया यातुधानाश्च सर्व्वे ॥४५॥
एवं पित्रे दृष्टमन्नं हि यस्य
तस्यासुरा वर्जयन्तीह सर्व्वे।
यस्मिन् देशे पठ्यते एष मन्त्र-
स्तं वै देशं राक्षसा वर्जयन्ति ॥४६॥
अनेन विधिना नित्यं श्राद्धं कुर्य्याद् द्विजः सदा।

१ पाठोऽयं न समीचीनः।

मनसा काङ्क्षितं यद्यत् तत्तद्दद्युः पितामहाः ॥४७॥
पितरो दुष्टमनसो रक्षांसि विमनांसि च ।
भवन्त्येव कृते श्राद्धे नित्यमेव प्रयत्नतः ॥४८॥
शूद्राः श्राद्धे क्षीरचाश्रु[१] बल्वजास्तरवस्तथा ।
वारणाश्च लवाश्चैव लबवर्षाश्च नित्यशः ।
एवमादीन्यथान्यानि तृणानि परिवर्जयेत् ॥४९॥
अञ्जनाभ्यञ्जनागन्धामानुप्रलयनं[२] तथा ।
काशैः पुनर्भवैः कार्य्यं सर्व्वमेव फलं भवेत् ॥५०॥
काशाः पुनर्भवा ये च वर्हणा उपवर्हणाः ।
अथ ते पितरो देवा देवाश्च पितरः पुनः ॥५१॥
पुष्पगन्धादिधूपानामेष मन्त्र उदाहृतः ।
आहृत्य दक्षिणायान्तु होमार्थे विप्रयत्नतः ॥५२॥
सोमाय वै पितृमते स्वधा अङ्गिरसे नमः ।
अस्वर्ग्यं लौकिकं वापि जुहुयात् कर्म्मसिद्धये ॥५३॥
अन्तराधाय समिधं तथा होमो विधीयते ।
समाहितेन मनसा प्रयताग्निः प्रयत्नतः ॥५४॥
अग्नये कव्यवाहाय स्वधा अङ्गिरसे नमः ।
यमाय चैवाङ्गिरसे स्वधा नम इति ब्रुवन् ॥५५॥
इत्येते वै होममन्त्रा मन्त्राणामनुपूर्व्वशः ।
दक्षिणातोऽग्नये नित्यं सोमायान्तरतस्तथा ॥५६॥
एतयोरन्तरं नित्यं जुहुयाद्वै विवस्वते ।

---

१ पाठोऽयमादर्शसम्मते मुद्रितः । परन्त्वयं न समीचीनः ।
२ अयमपि पाठो न समीचीनः ।

उपचारं स्वधाकारं तथैवोल्लेखनञ्च यत् ॥५७॥
होमजप्ये नमस्कारः प्रोक्षणञ्च विशेषतः ।
अञ्जनाभ्यञ्जने चैव पिण्डसंवपनं तथा ॥५८॥
अश्वमेधफलेनैव(१) तत् स्मृतं मन्त्रपूर्व्वकं ।
क्रियाः सर्व्वा यथोद्दिष्टाः प्रयत्नेन समाचरेत् ॥५९॥
बहुहव्यत्वमेवाग्नौ सुसमिद्धे विशेषतः ।
विधूमे लेलिहाने च होतव्यं कर्मसिद्धये ॥६०॥
अप्रबुद्धे सधूमे च जुहुयाद्यो हुताशने ।
यजमानो भवेदन्धः सोऽपुत्र इति नः श्रुतं ॥६१॥
अल्पेन्धनो वा रूक्षो वा विस्फुलिङ्गश्च सर्व्वशः ।
ज्वालाधूमोपसेव्यश्च स तु वह्निर्न सिद्धये ॥६२॥
दुर्गन्धश्चैव नीलश्च कृष्णश्चैव विशेषतः ।
भूमिं विगाहते यत्र तत्र विद्यात् पराभवं ॥६३॥
अर्च्चिष्मान् पिण्डितशिखः(२) सर्पिःकाञ्चनसन्निभः ।
स्निग्धः प्रदक्षिणश्चैव वह्निः स्यात् कार्य्यसिद्धये ॥६४॥
नरनारीगणेभ्यश्च पूजां प्राप्नोति शाश्वतीं ।
अक्षयाः पूजितास्तेन भवन्ति पितरोऽव्ययाः ॥६५॥
स्थाल्युदुम्बरपात्राणि फलानि समिधस्तथा ।
श्राद्धे चातिपवित्राणि मेध्यानीति विशेषतः ॥६६॥
पवित्रं वा द्विजश्रेष्ठ शुद्धये जन्मकर्म्मसु ।

---

१ अश्वमेधफलञ्चैवेति ख० ।
२ मण्डितशिख इति क० ।

पात्रेषु फलमुद्दिष्टं यन्मया श्राद्धकर्म्मणि ॥६७॥
तदेव कृत्स्नं विज्ञेयं समित्सु च यथाक्रमं ।
कृत्वा समाहितं चित्तमग्नये वै करोम्यहं ॥६८॥
अनुज्ञातः कुरुष्वेति तथैव द्विजसत्तमैः ।
पत्नीमादाय पुत्रांश्च जुहुयाद्धव्यवाहनं ॥६९॥
समानप्लक्षन्यग्रोधप्लक्षाश्वत्थविकङ्कताः ।
उदुम्बरास्तथा विल्वचन्दना यज्ञियाश्च ते ॥७०॥
सरलो देवदारुश्च शालश्च खदिरस्तथा ।
समिदर्थं प्रशस्ताः स्युरेते वृक्षा विशेषतः ॥७१॥
ग्राम्याः कण्टकिनश्चैव यज्ञिया येन केन च ।
पूजिताः समिदर्थे तु पितॄणां वचनं तथा ॥७२॥
समिद्भिः कल्कलेयाभिर्जुहुयाद्यो हुताशनं ॥
फलं यत् कर्मणस्तस्य तन्मे निगदतः शृणु ॥७३॥
आयसं सर्व्वकामीयमश्वमेधफलं हि तत् ।
श्लेष्मातको नक्तमालः कपित्थः शाल्मलिस्तथा ॥७४॥
नीपो विभीतकश्चैव वल्लीभिश्च तथैव च ।
शकुनानां निवासश्च वर्जयेच्च महीरुहान् ।
अयज्ञीयाः स्मृता ये च वृक्षांश्चैव तु वर्जयेत् ॥७५॥
स्वधेति चैव मन्त्रान्ते पितॄणां वचनं तथा ।
स्वाहेति चैव देवानां यज्ञकर्मण्युदाहृतं ॥७६॥

इति श्रीमहापुराणे वायुप्रोक्ते श्राद्धकल्पो नाम
त्रयोदशोऽध्यायः ।

अथ चतुर्दशोऽध्यायः ।

श्राद्धकल्पः ।

सूत उवाच । देवाश्च पितरश्चैव तेभ्योऽन्ये पितरस्तथा ।
आथर्वणविधिर्ह्येष प्रत्युवाच बृहस्पतिः ॥१॥
पूजयेच्च पितॄन् पूर्व्वं देवांश्चापि विशेषतः ।
देवेभ्योऽपि पितॄन् पूर्वमर्चयन्तीह यत्नतः ॥२॥
दक्षस्य दुहिता ख्याता लोके विश्वेति नामतः ।
विधिना सा तु धर्म्मज्ञ दत्ता धर्म्माय धर्म्मतः ।
तस्याः पुत्रा महात्मानो विश्वेदेवा इति श्रुतिः ॥३॥
प्रख्यातास्त्रिषु लोकेषु सर्व्वलोकनमस्कृताः ।
समस्तास्ते महात्मानश्चेरुरुग्रं महत्तपः ॥४॥
हिमवच्छिखरे रम्ये देवगन्धर्वसेविते ।
सर्व्वाप्सरोभिश्चरितं देवगन्धर्व्वसेवितं ॥५॥
शुद्धेन मनसा प्रीताः पितरस्तानथाब्रुवन् ।
वरं वृणीध्वं प्रीताः स्म कं कामं करवामहे ॥६॥
एवमुक्ते तु पितृभिस्तदा त्रैलोक्यभावनः ।
प्रजानामधिपो ब्रह्मा विश्वानितीदमब्रवीत् ॥७॥
ब्रह्मा उवाच । महातेजा महादेवस्तपसा तैस्तु तापितः ।
तपसा तेन सुप्रीतः कं कामं विदधामि वः ॥८॥
एवमुक्तास्तदा विश्वे ब्रह्मणा लोककर्तृणा ।

ऊचुस्ते सहिताः सर्व्वे ब्रह्माणं लोकभाविनं ॥९॥
श्राद्धेऽस्माकं भवेदंशो ह्येष नः काङ्क्षितो वरः ।
प्रत्युवाच ततो ब्रह्मा तान्वै त्रिदिवपूजितान् ॥१०॥
भविष्यत्येवमेवेति काङ्क्षितो वो वरस्तु यः ।
पितृभिस्तु तथेत्युक्ता एवमेतन्न संशयः ॥११॥
सहास्माभिस्तु वो भाव्यं यत्किञ्चित् क्रियते त्विह ।
अस्माकं कल्पिते श्राद्धे युष्मानग्रासनं ह वै ॥१२॥
भविष्यति मनुष्येषु सत्यमेतद् ब्रवीमि ते ।
माल्यैर्गन्धैस्तथान्नेन युष्मानग्रेऽर्चयिष्यति ॥१३॥
प्रदाता चेति युष्माकमस्माकं दास्यते ततः ।
विसर्जनमथास्माकं पूर्व्वं पश्चात्तु देवताः ॥१४॥
रक्षणञ्चैव श्राद्धस्य आतिथ्यञ्च विधिद्वयं ।
भूतानां देवतानाञ्च पितॄणां श्राद्धकर्मणि ।
एवं विधिकृतः सम्यक् सर्व्वमेतद् भविष्यति ॥१५॥
एवं[१] दत्त्वा वरं तेषां ब्रह्मा पितृगणैः सह ।
भूतानुग्रहकृद्देवः सञ्चचार यथासुखं ॥१६॥
वेदे पञ्च महायज्ञा नराणां समुदाहृताः ।
एतान् पञ्च महायज्ञान्निर्वपेत्सततं नरः ॥१७॥
यत्र यास्यन्ति दातारः संस्थानं वै निबोधत ।
निर्भयं निरहङ्कारं निःशोकं निर्व्यथक्लमं ।
ब्रह्मस्थानमवाप्नोति सर्वकामपुरस्कृतं ॥१८॥

---

१ एनमिति ङ० ।

शूद्रेणापि प्रकर्त्तव्याः पञ्चैते मन्त्रवर्जिताः ।
अतोऽन्यथा तु यो भुङ्क्ते स ऋणं नित्यमश्नुते ॥१९॥
ऋणञ्च भुङ्क्ते पापात्मा यः पचेदात्मकारणात् ।
तस्मान्निर्वर्त्तयेत् पञ्च महायज्ञान् सदा बुधः ॥२०॥
नैवेद्यं केचिदिच्छन्ति जीवत्यपि प्रयत्नतः ।
उदकपूर्व्वं बलिं कुर्य्यादुदकुम्भं तथैव च ॥२१॥
बलिं सुविदितं कुर्य्यादुच्चादुच्चतरं क्षिपेत् ।
परश्टङ्गगवां पूर्व्वं बलिं सूक्ष्मं समुत्क्षिपेत्[१] ॥२२॥
न निवेद्यो भवेत् पिण्डः पितॄणां यस्तु जीवति ।
दृष्टेनान्नेन भक्ष्यैश्च भोजयेत यथाविधि ।
विधानं वेदविहितमेतद्वक्ष्यामि यत्नतः ॥२३॥
देवदेवा महात्मानो ह्येतेपि पितरो ह्युत ।
इच्छन्ति किञ्चिदाचार्य्याः पश्चात् पिण्डनिवेदनं ॥२४॥
पूजनञ्चैव विप्राणां सर्व्वमेव हि[२] नित्यशः ।
तद्विधर्मार्थकुशलानित्युवाच वृहस्पतिः ॥२५॥
पूर्व्वं निवेदयेत्पिण्डं पश्चाद्विप्रांश्च भोजयेत् ।
योगात्मानो महात्मानः पितरो योगसम्भवाः ।
सोममाप्याययन्त्येते पितरो योगमास्थिताः ॥२६॥
तस्माद्दद्याच्छुचिः पिण्डान् योगिभ्यस्तत्परायणः ।
पितॄणां हि भवेदेतत्साक्षादिव हुतं हविः ॥२७॥

---

१ तथा क्षिपेदिति ख० ।
२ पर्व्वमेवह्नीति क० । ऊर्द्धमेवह्नीति ख० ।

ब्राह्मणानां सहस्रेभ्यो योगी चाग्रासने यदि ।
यजमानञ्च भोक्तॄंश्च नौरिवाम्भसि तारयेत् ॥२८॥
असतां प्रग्रहो यत्र सताञ्चैव विमानना ।
दण्डो देवकृतस्तत्र सद्यः पतति दारुणः ॥२९॥
हित्वागमं सधर्माणं बालिशं यत्र भोजयेत् ।
आदिकर्म समुत्सृज्य दाता तत्र विनश्यति ॥३०॥
पिण्डमग्नौ सदा दद्याद्भोगार्थी तु प्रयत्नतः ।
प्रजार्थी पतये[१] दद्यान्मध्यमं तत्र पूर्वकं ॥३१॥
उत्तमां द्युतिमन्विच्छन्गोषु नित्यं प्रयच्छति ।
प्रज्ञां पूजां यशः कीर्त्तिं गोषु नित्यं प्रयच्छति ॥३२॥
प्रार्थयन्दीर्घमायुश्च[२] वायसेभ्यः प्रयच्छति ।
सौकुमार्यमथान्विच्छन् कुक्कुटेभ्यः प्रयच्छति ॥३३॥
एवमेतत्समुद्दिष्टं पिण्डनिर्वपणात् फलं ।
आकाशं गमयेद्वापि स्थितो सुदक्षिणामुखः ।
पितॄणां स्थानमाकाशं दक्षिणा चैव दिग्भवेत् ॥३४॥
एकं विप्राः पुनः प्राहुः पिण्डोद्धरणमग्रतः ।
अनुज्ञाते तु तैर्विप्रैर्वानमुद्धियतामिति ॥३५॥
पुष्पाणाञ्च फलानाञ्च भक्ष्याणामन्नतस्तथा ।
अग्रमुद्धृत्य सर्वेषां जुहुयाज्जातवेदसि ॥३६॥
भक्ष्यमन्नं तथा पेयमनुक्तमफलानि च ।

---

१ पत्नये इति ङ०, च० च । परन्त्वयं पाठो न समीचीनः ।
२ वीर्य्यमायुश्चेति ख० ।

हुत्वा चाग्नौ ततः पिण्डान्निर्वपेद्दक्षिणामुखः ॥३७॥
स्निग्धैर्भक्ष्यैः सुगन्धैश्च तर्पयेत रसैस्तथा।
एकाग्रः पर्युपासीत प्रयतः प्राञ्जलिस्थितः।
तत्परः श्रद्दधानश्च कामानाप्नोति मानवः ॥३८॥
अक्षुद्रत्वं कृतज्ञत्वं दाक्षिण्यं सत्कृतञ्च यत्।
ततो यज्ञञ्च दानञ्च प्रयच्छन्ति पितामहाः ॥३९॥
अतः परं विधिं सौम्यं भुक्तवत्सु द्विजातिषु।
आनुपूर्व्वेण विधिना तन्मे निगदतः शृणु ॥४०॥
प्रोक्ष्य भूमिमथोद्धृत्य पूर्व्वं पितृपरायणः।
ततोऽत्र विकिरं कुर्यात् विधिदृष्टेन कर्मणा ॥४१॥
स्वधां वाच्य ततो विप्रा विधिवद्भूरिदक्षिणान्।
अन्नशेषमनुज्ञाप्य सत्कृत्य द्विजसत्तमान्।
प्राञ्जलिः प्रयतश्चैव अनुगम्य विसर्जयेत् ॥४२॥

इति श्रीमहापुराणे वायुप्रोक्ते श्राद्धकल्पो नाम
चतुर्दशोऽध्यायः।

अथ पञ्चदशोऽध्यायः ।

श्राद्धकल्पः ।

बृहस्पतिरुवाच । सकृदभ्यर्चिताः प्रीता भवन्ति पितरोऽव्ययाः ।
योगात्मानो महात्मानो विपाप्मानो महौजसः ॥१॥
प्रेत्य च स्वर्गलाभाय[१] कामैश्वर्यं सुविस्तरं ।
येषाञ्चाप्यनुहन्ति मोक्षप्राप्तिक्रमेण तु ॥२॥
तानि वक्ष्याम्यहं सौम्याः सरांसि सरितस्तथा ।
तीर्थानि चैव पुण्यानि देशान् शैलान् तथाश्रमान् ॥३॥
पुण्यो यस्त्रिषु लोकेषु मरकण्टकपर्वतः ।
पर्व्वतः प्रवरः पुण्यः सिद्धचारणसेवितः ॥४॥
यत्र वर्षसहस्राणि प्रयुतान्यर्वुदानि च ।
तपः सुदुश्चरन्तेपे भगवानङ्गिराः पुरा ॥५॥
यत्र मृत्योर्गतिर्नास्ति तथैवासुररक्षसां ।
न भयञ्चैव वालक्ष्मीर्यावद् भूमिर्धरिष्यति ॥६॥
तेजसा यशसा चैव भ्राजते स नगोत्तमः ।
शृङ्गमाल्यवतो नित्यं वह्निः संवर्तको यथा ॥७॥
मृदवश्च सुगन्धाश्च हेमाभाः प्रियदर्शनाः ।
शान्ताः कुशा इति ख्याताः पिवन्[२] दक्षिणनर्मदां ॥८॥

---

१ स्वर्गलोकायेति ख० ।
२ पाठोऽयं न समीचीनः ।

दृष्टवान् स्वर्गसोपानं भगवानङ्गिराः पुरा ।
अग्निहोत्रे महातेजाः प्रस्तरार्थं कुशोत्तमान् ॥९॥
तेषु दर्भेषु यः पिण्डान् मरकण्टकपर्व्वते ।
दद्यात्सकृदपि प्राज्ञस्तस्य वक्ष्यामि यत् फलं ॥१०॥
तद्भवत्यक्षयं श्राद्धं पितॄणां प्रीतिवर्द्धनं ।
अन्तर्द्धानञ्च गच्छन्ति क्षेत्रमासाद्य तत् सदा ॥११॥
तत्र ज्वालारसः पुण्यो दृश्यतेऽद्यापि सर्व्वशः ।
सशल्यानाञ्च सत्त्वानां विशल्यकरणी नदी ॥१२॥
प्रागदक्षिणा तु सावर्त्ता वापी सा पर्वतोत्तमे ।
कलिङ्गदेशपार्श्वार्द्धे पितॄणां प्रीतिवर्द्धनं ॥१३॥
सिद्धक्षेत्रमृषिश्रेष्ठा यदुक्तं परमं भुवि ।
सम्मतो देवदैत्यानां श्लोकमप्युशना जगौ ॥१४॥
धन्यास्ते पुरुषा लोके ये प्राप्यामरकण्टकं ।
पितॄन्सन्तर्पयिष्यन्ति श्राद्धे पितृपरायणाः ॥१५॥
अल्पेन तपसा सिद्धिं गमिष्यन्ति न संशयः ।
सकृदेवार्चितास्तत्र स्वर्गममरकण्टके[१] ॥१६॥
महेन्द्रपर्व्वते रम्ये पुण्यं शक्रनिषेवितं ।
तत्रारुह्य भवेत् प्रीतिः श्राद्धस्यैव महत्फलं ॥१७॥
विल्वाधःशिखरे युक्ता दिव्यं चक्षुः प्रवर्त्तते ।
अदृश्यश्चैव भूतानां देववच्चरते महीं ॥१८॥
सप्तगोदावरे चैव गोकर्णे च तपोवने ।

---

१ सर्व्वत्र कण्टकस्थाने कङ्कटेति पाठः ङ० च० पुस्तकद्वये वर्त्तते ।

अश्वमेधफलं तत्र स्नात्वा च लभते नरः ॥१९॥
धूतपापस्थलं प्राप्य पूतः स्नात्वा भवेन्नरः।
रुद्रस्तत्र तपस्तेपे देवदेवो महेश्वरः ॥२०॥
गोकर्णे वर्णितं विप्रैर्नास्तिकानां निदर्शनं ।
अब्राह्मणस्य सावित्री पठतः सम्प्रणश्यति ॥२१॥
देवर्षिभवने शृङ्गे सिद्धचारणसेविते।
आरुह्य तन्तु नियमात्ततो यान्ति त्रिविष्टपं॥२२॥
दिव्यैश्चन्दनवृक्षैश्च पादपैरुपशोभितं ।
आपः स्वादनसम्पृक्ता वहन्ति सततं यतः ॥२३॥
नदी प्रवर्त्तते ताभ्यस्ताम्रपर्णीति नामतः।
योषेव समहाखेदा दक्षिणं याति सागरं ॥२४॥
नद्यास्तस्यास्तु या आपो मूर्च्छमाना महोदधौ ।
शङ्खा भवन्ति मुक्ताश्च जायन्ते शङ्खसुक्तिकाः ॥२५॥
उदकानयनं कृत्वा शङ्खमौक्तिकसंयुतं ।
आधिभिर्व्याधिभिश्चैव मुक्ता यान्त्यमरावतीं ॥२६॥
चन्दनेभ्यः प्रयुक्तानां शङ्खानां मौक्तिकस्य च।
पापकर्तृनपि पितृंस्तारयन्ति यथाश्रुति ॥२७॥
चन्द्रतीर्थे कुमार्य्यान्तु कावेर्य्यां प्रभवेऽक्षये ।
श्रीपर्व्वतस्य तीर्थेषु वेङ्कते च तथा गिरौ ॥२८॥
एकस्था यत्र दृश्यन्ते वृक्षा ह्यौशिरपर्व्वते ।
पालाशाः खादिरा विल्वा प्लक्षाश्वत्थविकङ्कताः ॥२९॥
एतद्धि मण्डलं सिद्धं यज्ञीयं द्विजसत्तमाः ।

अस्मिन् मुक्ता जनोऽङ्गानि क्षिप्रं यात्यमरावतीं ॥३०॥
कर्म्माणि स्वप्रयुक्तानि सिध्यन्ति प्रभवात्यये।
दुःप्रसक्तानि पितृषु प्रयुक्तानि भवन्त्युत ॥३१॥
पितॄणां दुहिता पुण्या नर्मदा सरितां वरा।
तत्र श्राद्धानि दत्तानि अक्षयाणि भवन्त्युत ॥३२॥
माठरस्य(१) वने पुण्ये सिद्धचारणसेविते।
अन्तर्द्धानं न गच्छन्ति सक्तास्तस्मिन् महागिरौ ॥३३॥
विन्ध्ये चैव गिरौ पुण्ये धर्माधर्मनिदर्शनं।
पापधारां न पश्यन्ति धाराम्पश्यन्ति साधवः ॥३४॥
तस्यां न दृश्यते पापं केषाञ्चित् पापकर्मणां।
स्पष्टा भवति सा धारा प्रायशः शुभकर्मणां ॥३५॥
कोशलायां मतङ्गस्य वापी पापनिसूदनी।
स्नातास्तस्यां दिवं यान्ति कामचारविहङ्गमाः ॥३६॥
कुमारकोशलातीर्थे पर्व्वते पालपञ्जरे।
पाण्डुकूले समुद्रान्ते पण्डारकवने तथा ॥३७॥
विमले च विपाये च(२) सतत्कृत्य प्रभवेऽभये।
श्रीवृक्षे गृध्रकूटे च जम्बूमार्गे च नित्यशः ॥३८॥
असितस्य गुरोः पुण्ये योगाचार्य्यस्य धीमतः।
तत्रापि श्राद्धमानन्त्यमसितायाञ्च नित्यशः ॥३९॥
पुष्करेष्वक्षयं श्राद्धं तपश्चैव महाफलं।

---

१ याचकस्येति ख०।
२ विपाके चेति ख०।

महोदधौ प्रभासे च तस्मादेवं विनिर्द्दिशेत् ॥४०॥
देविकायां वृषो नाम कूपः सिद्धनिषेवितः ।
समुत्पतन्ति तस्यापो गवां शब्देन नित्यशः ॥४१॥
योगेश्वरैः सदा जुष्टः सर्व्वपापवहिष्कृतैः ।
दद्याच्छ्राद्धन्तु यस्तस्मिंस्तस्य वक्ष्यामि यत् फलं ॥४२॥
अक्षयं सार्व्वकामीयं[१] श्राद्धं प्रीणाति वै पितॄन् ।
जातवेदः शिला तत्र साक्षादग्नेः सनातनी ॥४३॥
यस्त्वग्निं प्रविशेत् तत्र नाकपृष्ठे स मोदते ।
अग्निः शान्तः पुनर्जातस्तस्मिन् दत्तं तदक्षयं ॥४४॥
दशाश्वमेधिके तीर्थे तीर्थे पञ्चाश्वमेधिके ।
यथोद्दिष्टं फलं तेषां क्रतूनां नात्र संशयः ॥४५॥
ख्यातं हयशिरो नाम तीर्थं सद्योवरप्रदं ।
श्राद्धं तत्र तदाक्षय्यं दत्वा स्वर्गे च मोदते ॥४६॥
श्राद्धं कुम्भे विमुञ्चन्ति ज्ञेयं पापनिषूदनं ।
श्राद्धं तत्राक्षयं प्रोक्तं जप्यहोमतपांसि च[२] ॥४७॥
अजतुङ्गे शुभे[३] तीर्थे तर्पयेत्सततं पितॄन् ।
दृश्यते पर्व्वसु छाया यत्र नित्यं दिवौकसां ।
पृथिव्यामक्षयं दत्तं निरुजा यत्र पाण्डवाः ॥४८॥
योगेश्वरैः सदा जुष्टं सर्व्वपापवहिष्कृतैः ।
दद्याच्छ्राद्धन्तु यस्तस्मिन् तस्य वक्ष्यामि यत् फलं ॥४९॥

१ अयं वै सर्व्वकामं प्रीणाति ख० ।
२ जपहोमतपांसि चेति ग० ।
३ अत्र तुङ्गे शुचाविति क० ।

अर्चितास्तेन वै साक्षाद्भवन्ति पितरः सदा ।
अस्मिन् लोके वशी यः स्यात्[१] प्रेत्य स्वर्गे स मोदते ॥५०॥
प्रायशः प्रवरः पुण्यः शिवो नाम ह्रदस्तथा ।
तत्र व्याससरः पुण्यं दिव्यं ब्रह्मसरस्तथा ॥५१॥
उज्जन्तः[२] पर्व्वतः पुण्यो यस्मिन् योगेश्वरालये ।
तत्रैव चाश्रमः पुण्यो वसिष्ठस्य महात्मनः ॥५२॥
ऋग्यजुःसामशिरसः कापोतः पुष्पसाह्वयः[३] ।
आख्यातो[४] पञ्चमो वेदो दृष्ट्वा ह्येतेषु ब्रह्मणा ॥५२॥
गत्वैतान् मुच्यते पापात् द्विजो वह्निः सनातनः ।
श्राद्धस्यानन्त्यमेतेषु जप्य[५]होमतपांसि च ॥५३॥
पुण्डरीके महातीर्थे पुण्डरीकसमं फलं ।
ब्रह्मतीर्थे महातीर्थे अश्वमेधफलं लभेत् ॥५४॥
सिन्धुसागरसम्भेदे तथा पञ्चनदेऽव्ययं ।
कीरकात्मा[६] ततः पुण्यो मण्डवायाञ्च पर्व्वते ॥५५॥
देयं सप्तरदे[७] श्राद्धं मानसे च विशेषतः ।
महाकूटे च वन्दे च[८] गिरौ त्रिककुदे तथा ॥५६॥

---

१ च स्यात् इति ङ०। तस्मात् इति ख०। छ पुस्तके एतच्छ्लोको नास्ति।
२ अजन्तः इति ग० ।
३ पुष्पपाह्वय इति ग०।
४ आख्यानेति वा क्वचित्।
५ जपहोमेति ग० ।
६ कोरद्कात्माख्यतः इति छ० । कीराकात्मेति च० ।
७ सप्तपदे इति ग० ।
८ देवगिरौ इति ग० तथा ज० ।

सन्ध्यायाञ्च महावेद्यां दृश्यते महदद्भुतं ।
अश्रद्दधानान्नाभ्येति साभ्येति च धृतव्रतान् ॥५७॥
जातवेदः शिला तत्र साक्षादग्नेः सनातनी ।
श्राद्धानि चाग्निकार्य्यञ्च तत्र कुर्य्यात् सदाक्षयं ॥५८॥
संश्रयित्वैकमेकेन सायाह्नं प्रति नित्यशः ।
तस्मिन् देयं सदा श्राद्धं पितृणामक्षयार्थिना ॥५९॥
कृतात्मा वाकृतात्मा वा यत्र विज्ञायते नरः ।
स्वर्ग्यमार्गप्रदं नाम तीर्थं सद्योवरप्रदं ।
वैराण्युत्सृज्य तस्मिंस्तु दिवं सप्तर्षयो गताः ॥६०॥
अद्यापि तानि दृश्यन्ते वैराण्येव गतानि तु ।
स्नात्वा स्वर्गमवाप्नोति तस्मिन् तीर्थोत्तमे नरः ॥६१॥
ख्यातमायतनं तत्र नन्दिसिद्धनिषेवितं ।
नन्दीश्वरस्य या मूर्त्तिर्दुराचारैर्न दृश्यते ॥६२॥
दृश्यन्ते काञ्चना यूपाः सन्निध्ये भास्करोदये ।
कृत्वा प्रदक्षिणन्ते तु गच्छन्त्यन्तर्हिता दिवं[१] ॥६३॥
सर्व्वतस्च कुरुक्षेत्रं सुतीर्थञ्च विशेषतः ।
पुण्यं सनत्कुमारस्य योगेशस्य महात्मनः ।
कीर्त्त्यते च तिलान् दत्वा पितृणां वै सदाक्षयं ॥६४॥
ओजसे चाक्षयं श्राद्धं धर्म्मराजनिवेशने[२] ।
श्राद्धं दत्तममावस्यां विधिना च यथाक्रमं ॥६५॥

---

१ दृश्यन्ते काञ्चनायस्च सन्निध्ये भास्करोदये। कृत्वा प्रदक्षिणं तास्तु गच्छन्त्यन्तर्हितादिवमिति ग० ।

२ धर्म्मराजनिषेवणे इति ख० ।

पुनः सन्निहितानां वै कुरुक्षेत्रे विशेषतः।
अर्चयेद्वा पितॄंस्तत्र सत्पुत्रस्त्वनृणोभवेत् ॥६६॥
विनशने सरस्वत्यां प्लक्षप्रस्रवणे तथा।
व्यासतीर्थे सरस्वत्यां[१] ब्रह्मक्षेत्रे[२] विशेषतः ॥६७॥
देयमोङ्कारपठनैः श्राद्धमक्षयमिच्छता।
पर्व्वतस्यैव गङ्गायां मैनाके च नगोत्तमे ॥६८॥
यमुनाप्रभवे चैव सर्व्वपापैः प्रमुच्यते।
अत्युष्णाश्चातिशीतास्व आपस्तत्र निदर्शनं ॥६९॥
यमस्य भगिनी पुण्या मार्त्तण्डदुहिता तथा।
तत्राक्षयं तदा श्राद्धं पितृभिः पूर्व्वकीर्त्तितं ॥७०॥
ब्रह्मानुगह्रदे स्नात्वा सद्यो भवति ब्राह्मणः।
तस्मिन् हि श्राद्धमानन्त्यं जपहोमतपांसि च ॥७१॥
स्थाणुभूतश्चरंस्तत्र वसिष्ठो वै महातपाः।
अद्यापि यत्र दृश्यन्ते पादपा मणिचर्च्चिताः ॥७२॥
तुला तु दृश्यते यत्र धर्म्माधर्म्मप्रदर्शिनी।
यया वै तुलितं विप्रैस्तीर्थानां फलमुत्तमं ॥७३॥
पितॄणां दुहिता योगा गन्धकालीति विश्रुता।
चतुर्थो ब्रह्मणस्त्वंशः पराशरकुलोद्वहा ॥७४॥
व्यस्य लोकं चतुर्द्धा तु वेदं धीमान् महामुनिः।
महायोगं महात्मानं यो व्यासं जनयिष्यति ॥७५॥
अच्छोदकं नाम सरो यत्राच्छोदा समुच्छ्रिता।

---

१ एतत् पाठः प्रायशो वर्त्तते क्वचिदस्पष्टः परन्तु कुत्रापि न समीचीनः।
२ त्रिशत्ते च ङ०। श्राद्धपक्षे ग०।

मत्स्यदोनो पुनर्जाता नियोगाद्दारुणेन तु ॥७६॥
तस्या यत्राश्रमः पुण्यः पुण्यकृद्भिर्निषेवितः ।
षट्‌ठत्तन्तु वै श्राद्धमक्षयं समुदाहृतं ।
तस्यां योगसमाधाने दत्तं युगपदुद्भवेत् ॥७७॥
कुवेरतुङ्गे व्यामोक्षे[१] व्यासतीर्थे तथैव च ।
पुण्यः स ब्राह्मणो दद्याच्छ्राद्धमानन्त्यमक्षयं ॥७८॥
सिद्धैस्तु सेविता नित्यं दृश्यते नाकृतात्मभिः ।
अनिवर्त्तनन्तु नन्दायां वेद्यां प्रागुत्तरे दिशि ॥७९॥
सिद्धक्षेत्रं तु वै जुष्टं यत् प्राप्य न निवर्त्तते ।
महालये पदं न्यस्तं महादेवेन धीमता ॥८०॥
देव्यालये तपस्तप्त्वा एकपादेन ईश्वरः ।
नीहारस्य युगन्दिव्यमुमातुंगे स्थितं जलं ॥८१॥
उमातुङ्गे भृगोस्तुङ्गे ब्रह्मतुङ्गे महालये ।
काद्रवत्यां[२] च शाण्डिल्यां गुहायां वामनस्य च ॥८२॥
गत्वा चैतानि पूतः स्याच्छ्राद्धमक्षयमेव च ।
जपो होम स्तथा ध्यानं यत्किचित् सुकृतं भवेत् ॥८३॥
ब्रह्मचर्य्यं यजन्ते वै गुरुभक्ताः शतं समाः ।
एवमादीनि सद्य स्तां स्नात्वा प्राप्नोति सत् फलं ॥८४॥
कुमारधारा तत्रैव दृष्टा पापप्रणाशनी ।
यानासनं[३] च तत्रैव सद्यः स्याद्यत् प्रदृश्यते ॥८५॥

---

१ व्यामोघे इति ख० ।
२ कारन्नवत्यामिति पञ्चसु पुस्तकेषु पाठः ।
३ पनासनमिति ज० ।

शैलकीर्त्तिपुराभ्यासे कामानाप्नोति पुष्कलान् ।
अदृश्यः सार्व्वभूतानां देववच्चरते महीं ॥८६॥
काश्यपस्य महातीर्थं कालसर्पिरिति श्रुतं ॥
तत्र श्राद्धानि देयानि नित्यमक्षयमिच्छता ॥८७॥
अक्षयं तु भवेच्छ्राद्धं शालग्रामसमन्ततः ।
दृष्ट्वा न दृश्यते तत्र प्रत्यक्षमकृतात्मना ॥८८॥
प्रत्यादेशो ह्यशिष्टानां शिष्टाणाञ्च निवेशनं ।
तत्र चैव ह्रदे पुण्ये दिव्यो वै नागराट्ततः ॥८९॥
पिण्डं गृह्णाति हि सतां न गृह्णात्यसतां हि सः ।
अतिप्रदीप्तैर्भुजगैर्भोक्तुमन्नं न शक्यते ॥९०॥
प्रत्यक्षं दृश्यते धर्म्मस्तीर्थयोरनयोर्द्वयोः ।
देवदारुवने चापि चारयेस्तं निदर्शनं ॥९१॥
विधूतानि तु पापानि दृश्यन्ते सुकृतात्मना ।
भागीरथ्यां प्रयागे च नित्यमक्षयमुच्यते ॥९२॥
कालञ्जरे दशार्णायां नैमिषे कुरुजाङ्गले ।
वाराणस्यां नगर्य्यान्तु देयं श्राद्धन्तु यत्नतः ॥९३॥
तस्यां योगेश्वरो नित्यं तत्तस्यां दत्तमक्षयं ।
दत्वा चैतेषु पूतः स्याच्छ्राद्धमानन्त्यमेव च ॥९४॥
तपोहोमस्तथा ध्यानं यत् किञ्चित्सुकृतं भवेत् ।
लौहित्ये वैतरण्यां वै स्वर्णवेद्यां तथैव च ॥९५॥
सकृदेव समुद्रान्ते दृश्यते पुण्यकर्मभिः ।
गयायां धर्मपृष्ठे च सरसि ब्रह्मणस्तथा ॥९६॥

गयायां गृध्रकूटे च श्राद्धं दत्तं महाफलं ।
हिमञ्च पतते तत्र समन्तात् पञ्चयोजनं ॥९७॥
भरतस्याश्रमे पुण्येऽरण्यं पुण्यतमं स्मृतं ।
मतङ्गस्य पदं तत्र दृश्यते मांसचक्षुषा ॥९८॥
ख्यापितं धर्म्मसर्व्वस्वं लोकस्यास्य निदर्शनं ।
एवं पञ्चवनं(१) पुण्यं पुण्यकृद्भिर्निषेवितं ।
यस्मिन् पाण्डुविशालेति तीर्थं सद्यो निदर्शनं ॥९९॥
तुलामानैस्तथा चापैः शास्त्रैश्च विविधैस्तथा ।
उन्मज्जन्ति तथा लग्ने ये वै पापकृतो जनाः(२) ॥१००॥
तृतीयायां तथा पादे निःस्वरे पावमण्डले ।
महाह्रदे वै कौशिक्यां दत्तं श्राद्धं महाफलं ॥१०१॥
मुण्डपृष्ठे(३) पदं न्यस्तं महादेवेन धीमता ।
बहून् देवयुगांस्तप्त्वा तपस्तीव्रं सुदुश्चरं ॥१०२॥
अल्पेनाप्यत्र कालेन नरो धर्म्मपरायणः ।
पाप्मानमुत्सृजत्याशु जीर्णत्वचमिवोरगः ॥१०३॥
सिद्धानां प्रीतिजननैः पापानाञ्च भयङ्करैः ।
लेलिहानैर्महाभोगै रक्षितन्तु दिवानिशं ॥१०४॥
नाम्ना कनकनन्दीति तीर्थं त्रैलोक्यविश्रुतं ।
उदीच्यां मुण्डपृष्ठस्य देवर्षिगणसेवितं ।

---

१ पङ्कवनमिति क० ख० ङ० ।
२ पापकृतेन्द्रिया इति ग० ।
३ कुण्डपृष्ठे इति ख० ।

तत्र स्नात्वा दिवं यान्ति कामचारा विहङ्गमाः ॥१०५॥
दत्तं चापि तथा श्राद्धमक्षयं समुदाहृतं ।
ऋणैस्त्रिभिस्तदा स्नात्वा निर्म्मुच्यते नरोत्तमः ॥१०६॥
तीरे तु सरसस्तत्र देवस्यायतनं महत् ।
आरुह्य तज्जपंस्तत्र सिद्धो याति दिवं ततः ॥१०७॥
उत्तरं[१] मानसं गत्वा सिद्धिं प्राप्नोत्यनुत्तमां ।
तत्र गत्वा परश्रेष्ठं दृश्यते महदद्भुतं ॥१०८॥
तस्मिन्निर्वर्त्तयेच्छ्राद्धं यथाशक्ति यथाबलम् ।
कामान् स लभते दिव्यान् मोक्षोपायञ्च नित्यशः ॥१०९॥
मानसे सरसि श्रेष्ठे दृश्यते महदद्भुतं ।
दिवश्च्युता महाभागा ह्यन्तरिक्षे विराजते ॥११०॥
गङ्गा त्रिपथगा देवी सोमपादाच्युता भुवि[२] ।
आकाशे दृश्यते तत्र तोरणं सूर्य्यसन्निभं ॥१११॥
जाम्बूनदमयं दिव्यं स्वर्गद्वारमिवायतं ।
यतः प्रवर्त्तते भूयः पूर्व्वसागरमन्तिमं ॥११२॥
पावनी सर्व्वभूतानां धर्म्मज्ञानां विशेषतः ।
चन्द्रभागा च सिन्धुश्च उभौ मानससन्निभौ ।
सागरं पश्चिमं याति दिव्यसिन्धुर्नदीवरः ॥११३॥
पर्व्वतो हिमवान्नाम नानाधातुविभूषितः ।
योजनानां सहस्राणि आयतोऽशीतिरुच्यते ॥११४॥

---

१ उत्तममिति ज० ।
२ सोमपदा च्युताभवदिति ग० ।

सिद्धचारणसङ्कीर्णः सिद्धचारणसेवितः ।
तत्र पुष्करिणी रम्या सुषुम्ना नाम विश्रुता ॥१०९॥
दशवर्षसहस्राणि तत्र जातस्तु जीवति ।
श्राद्धं भवति चानन्त्यं तस्यां दत्तं महोदयं ।
तारयेच्च यदा श्राद्धं दशपूर्व्वान् दशापरान् ॥११०॥
सर्व्वं पुण्यं हिमवतो गङ्गा पुण्या च सर्व्वतः ।
समुद्रगाः समुद्राश्च सर्व्वे पुण्याः समन्ततः ॥१११॥
एवमादिषु सर्व्वेषु श्राद्धं निर्व्वर्त्तयेद्बुधः ।
पूतो भवति स्नात्वा नु[१] दत्त्वा दत्त्वा तथैव च[२] ॥११२॥
शैलसानुषु तुङ्गेषु कन्दरेषु गुहासु च ।
उपक्करनितम्बेषु तथा प्रस्रवणेषु च[३] ॥११३॥
पुलिनेष्वापगानाञ्च[४] तथैव प्रभवे शुभे ।
महोदधौ गवां गोष्ठे सङ्गमेषु वनेषु च ॥११४॥
असंसृष्टोपलिप्तासु हृद्यासु सुरभीषु च ।
गोमयेनोपलिप्तेषु विविक्तेषु गृहेषु च ॥११५॥
कुर्य्याच्छ्राद्धमथैतेषु नित्यमेव यथाविधि ।
प्रदक्षिणं दिशं गत्वा सर्व्वकामचिकीर्षवः ॥११६॥
एवमेतेषु सर्व्वेषु श्राद्धं कुर्य्यादतन्द्रितः ।

---

१ प्रीतो भवति दत्वा च इति ग० ।
२ दत्त्वा ऋत्वा तथैवच इति ख० ।
३ नित्यमेव यथा विधि इति ग० ।
४ पुलिने चापगानामिति क० ।

एवमेव तु मेधावी ब्राह्मीं सिद्धिमवाप्नुयात् ॥११७॥
त्रैवर्ण्ये विहिते स्थाने धर्म्मवर्णाश्रमे तथा ।
कोपस्थानस्य संत्यागात् प्राप्यते पितृपूजनं(१) ॥११८॥
तीर्थान्यनुसरन् धीरः श्रद्दधानो जितेन्द्रियः ।
कृतपापश्च शुद्ध्येत किं पुनः शुभकर्म्मकृत् ॥११९॥
तिर्य्यग्योनिं न गच्छेच्च कुदेशे न च जायते ।
स्वर्गी भवति वै विप्रो मोक्षोपायञ्च विन्दति ॥१२०॥
अश्रद्दधानाः पाप्मानो नास्तिकाः स्थितसंशयाः ।
हेतुद्रष्टा च(२) पञ्चैते न तीर्थफलमश्नुते ॥१२१॥
गुरुतीर्थे परा सिद्धिस्तीर्थानां परमं पदं ।
ध्यानं तीर्थपरं तस्माद्ब्रह्मतीर्थं सनातनं ॥१२२॥
उपवासात्परं ध्यानमिन्द्रियाणां निवर्त्तनं ।
उपवासनिबद्धा हि(३) प्राणैरिह(४) पुनः पुनः ॥१२३॥
प्राणापानौ समौ कृत्वा विषयाणीन्द्रियाणि च ।
बुद्धिं मनसि संयम्य सर्व्वेषान्तु निवर्त्तनं ॥१२४॥
प्रत्याहारं पुनर्विद्धि मोक्षोपायमसंशयं ।
इन्द्रियाणां मनोधारं बुद्ध्यादीनां प्रवर्त्तनं(५) ॥१२५॥
अनाहारात् क्षयं यान्ति विद्यादनशनं तपः ।

---

१ बहुषु पुस्तकेषु कोपस्थानाच्च संत्यागादिति पाठो दृश्यते परन्तु न युक्तः ।
२ हेतुदृष्टाश्चेति पाठः सर्व्वत्र । अयं पाठो न सङ्गतः ।
३ उपमाननिबन्धा हीति क० ज० ।
४ प्राणायामैरिति पाठोयुक्तः ।
५ निवर्त्तनमिति पाठो बहुषु पुस्तकेषु वर्त्तते । नायं सुसङ्गतः ।

निग्रहाद्बुद्धिमनसो रम्या बुद्धिस्तु जायते॥१२६॥
क्षीणेषु सर्व्वपापेषु क्षीणेष्वेवेन्द्रियेषु च ।
परिनिर्वाति शुद्धात्मा यथा वह्निर्निरिन्धनः ॥१२७॥
कारणेभ्यो गुणेभ्योऽथ व्यक्ताव्यक्तस्य कृत्स्नशः ।
वियोजयति क्षेत्रज्ञं तेभ्यो योगेन योगवित्॥१२८॥
तस्य नास्ति गतिस्थानं व्यक्ताव्यक्तं न संशयः ।
आसन्नः[१] सदसन्नैव नैव किञ्चित् स्थित इति ॥१२९॥

इति श्रीमहापुराणे वायुप्रोक्ते श्राद्धकल्पे तीर्थयात्रा नाम पञ्चदशोऽध्यायः ।

---

१ नासन्नेति लिपिः सर्व्वत्र । सा सम्यक्त्वेन न प्रतिभाति ।

अथ षोडशोऽध्यायः ।

श्राद्धकल्पः ।

बृहस्पतिरुवाच । अतः परं प्रवक्ष्यामि दानानि च फलानि च ।
श्राद्धकर्म्माणि मेध्यानि वर्जनीयानि यानि च ॥१॥
हिमप्रपतने कुर्य्यादाहरेद्वा हिमन्ततः ।
अग्निहोत्रमतः पुण्यं परमं हि ततः स्मृतं ॥२॥
नक्तन्तु वर्जयेच्छ्राद्धं राहोरन्यत्र दर्शनात् ।
सर्व्वस्वेनापि कर्त्तव्यं क्षिप्रं वै राहुदर्शने ॥३॥
उपरागे न कुर्य्याद्यः पङ्के गौरिव सीदति ।
कुर्व्वाणस्तूद्धरेत् पापात् मग्नान्नौरिव सागरे ॥४॥
विश्वदेवश्च सौम्यश्च बहुमांसपरं हविः ।
विषाणं वर्जयेत् खाड्गमसृयानाशनाय वै ॥५॥
त्वष्टा वै वार्य्यमाणस्तु[१] देवेशेन महात्मना ।
पिवन् शचीपतेः सोमं पृथिव्यामपतत्पुरा[२] ॥६॥
श्यामाकास्तु तथोत्पन्नाः पित्रर्थमपि पूजिताः ।
विप्रुषस्तस्य नासाभ्यामसक्ताभ्यां तथैव च ॥७॥
स्वेप्माणः शीतला हृद्या मधुराश्च तथेत्तवः ।

---

१ वार्य्यमाणेनेति लिखनं सर्व्वत्र तन्न युक्तं ।
२ -मभवत् पुरा इति ख० ग० ।

श्यामाकैरिक्षुभिश्चैव पितॄणां सार्व्वकामिकं ।
कुर्य्यादाग्रयणं यस्तु स शीघ्रं सिद्धिमाप्नुयात् ॥८॥
श्यामाका हस्तिनामा च पटोलं वृहतीफलं ।
अगस्त्यस्य शिखा तीव्रा कषायाः सर्व्व एव च ॥९॥
एवमादीनि चान्यानि स्वादूनि मधुराणि च ।
नागरञ्चात्र वै देयं दीर्घमूलकमेव च ॥१०॥
वंशीकरीराः सुरसाः सर्ज्जकं भूस्तृणानि च ।
वर्जनीयानि वक्ष्यामि श्राद्धकर्म्मणि नित्यशः ॥११॥
लशुनं गृञ्जनञ्चैव पलाण्डुः पिण्डमूलकं ।
करम्भाद्यानि चान्यानि हीनानि रसगन्धतः ॥१२॥
श्राद्धकर्म्मणि वर्ज्यानि कारणञ्चात्र वक्ष्यते ।
पुरा देवासुरे युद्धे निर्जितस्य बलेः सुरैः ॥१३॥
व्रणेभ्यो विस्फुरन्तो वै पतिता रक्तविन्दवः ।
तत एतानि वर्ज्यानि श्राद्धकर्म्मणि नित्यशः ॥१४॥
अथ वेदोक्तनिर्य्यासान् लवणान्यूषरणानि च ।
श्राद्धकर्म्मणि वर्ज्यानि याश्च नार्य्यो रजस्वलाः ॥१५॥
दुर्गन्धं फेनिलञ्चैव तथा वै पल्वलोदकं ।
न लभेद्यत्र गौस्तृप्तिं[१] नक्तं यच्चैव गृह्यते ॥१६॥
आविकं मार्गमौष्ट्रञ्च सर्व्वमेकशफञ्च यत् ।
माहिषञ्चामरञ्चैव पयो वर्ज्यं विजानता ॥१७॥
अतः परं प्रवक्ष्यामि वर्ज्यान् देशान् प्रयत्नतः ।

---

१ न भवेद्यत्र गोतृप्तिरिति क० ।

न द्रष्टव्यञ्च यैः श्राद्धं शौचाशौचञ्च कृत्स्नशः ॥१८॥
वन्यमूलफलाहारैः श्राद्धं कुर्य्यात्तु श्रद्धया ।
राज्ञमिष्टमवाप्नोति स्वर्गं मोक्षं यशस्करं ॥१९॥
अनिष्टशब्दसङ्कीर्णं जन्तुव्याप्तमथापि वा ।
पूतिगन्धां तथा भूमिं श्राद्धकर्म्मणि वर्जयेत् ॥२०॥
नद्यः सागरपर्य्यन्ता द्वारं दक्षिणपूर्व्वतः ।
त्रिशङ्कुं वर्जयेद्देशं सर्व्वं द्वादशयोजनं ॥२१॥
उत्तरेण महानद्या दक्षिणेन च कैकटात्[१] ।
देशस्त्रैशङ्कवो नाम वर्जितः श्राद्धकर्म्मणि ॥२२॥
कारङ्कराः[२] कलिङ्गाश्च सिन्धोरुत्तरमेव च ।
प्रनष्टाश्रमधर्म्माश्च वर्ज्या देशाः प्रयत्नतः ॥२३॥
नग्नादयो न पश्येयुः श्राद्धमेव व्यवस्थितं ।
गच्छन्ति तैस्तैर्दृष्टानि न पितॄन् न पितामहान् ॥२४॥
शंयुरुवाच । नाग्नादीन् भगवन् सम्यङ्नमाद्य परिपृच्छतः ।
कथय द्विजमुख्याद्य विस्तारेण यथातथं ॥२५॥
एवमुक्तो महातेजा बृहस्पतिरुवाच तं ।
सर्व्वेषामेव भूतानां त्रयीसंवरणं स्मृतं ॥२६॥
परित्यजति यो मोहात्ते वै नग्ना द्विजोत्तमाः[३] ।
प्रलीयते नरो यः स्यान्निरालम्बश्च योऽवृषः ॥२७॥

१ क-नामकपुस्तकव्यतिरिक्तेषु सर्व्वेष्वेवादर्शपुस्तकेषु वैकटः इति पाठोऽस्ति ।
२ कारस्करा इति क॰ ख॰ ।
३ नग्नादयो जना इति क, ज पुस्तकव्यतिरिक्त सर्व्वेषु आदर्शपुस्तकेषु पाठः ।

वृषं यस्य परित्यज्य मोक्षमन्यत्र मार्गति ।
वृषोवेदसम[1]स्तस्मिन् यो वै सम्यङ्न पश्यति ॥२८॥
ब्राह्मणा क्षत्रिया वैश्या वृषलाश्चैव सर्व्वशः ।
पुरा देवासुरे युद्धे निर्जितैरसुरैस्तदा ॥२९॥
पाषण्डवैकृतस्थाने[2]नैषा सृष्टिः स्वयंभुवा ।
द्विश्राद्धकस्य निर्ग्रन्थाः शाक्या[3] पुष्टिकसंज्ञकाः[4] ॥३०॥
ये धर्म्मं नानुवर्त्तन्ते ते वै नग्नादयोजनाः ।
वृथाजटी वृथामुद्री वृथानग्नश्च यो द्विजः ॥३१॥
वृथाव्रती वृथाजापी ते वै नग्नादयोजनाः ।
कुलन्धमा निषादाश्च तथा पुष्टिविनाशकाः[5] ॥३२॥
कृतकर्म्माच्चितास्त्वेते कुपथाः परिकीर्त्तिताः ।
एभिर्निर्वृत्तं दृष्टं वा श्राद्धं गच्छन्ति मानवाः ॥३३॥
ब्रह्मघ्नश्च कृतघ्नश्च नास्तिका गुरुतल्पगाः ।
दस्यवश्च नृशंसाश्च दर्शनेनैव वर्जिताः ॥३४॥
ये चान्ये पापकर्म्माणः सर्व्वांस्तान् परिवर्जयेत् ।
देवदेवर्षिनिन्दायां रताश्चैव विशेषतः ॥३५॥
असुरान् यातुधानांश्च दृष्टमेभिर्व्रजन्त्युत[6] ।

---

१ वेदो वृषसम इति पाठः समुचितः ।
२ पाषण्डकैः कृतस्थाने ख० ग० ।
३ यद्वि श्राद्धकनिर्ग्रन्था इति बहुष्वादर्शेषु पाठोऽस्ति ।
४ सर्व्वचैव शाक्या इति पाठोऽस्ति ।
५ जीवन्ति कर्पटाः इति ङ ।
६ मानवा इति कर्त्तृपदमूहनीयं ।

ब्राह्मं कृतयुगं प्रोक्तन्त्रेता तु क्षत्रियं स्मृतं ॥३६॥
वैश्यं द्वापरमित्याहुः शूद्रं कलियुगं स्मृतं ।
पितर ऊचुः । वेदाः कृतयुगे पूज्यास्त्रेतायान्तु सुरास्तथा ॥३७॥
युद्धानि द्वापरे नित्यं पाषण्डाश्च कलौयुगे ।
अपमानापवित्रश्च कुक्कुटो ग्रामशूकरः ॥३८॥
श्वा चैव दर्शनादेव हन्ति श्राद्धं न संशयः ।
शावसूतकसंस्पृष्टो दीर्घरोगिभिरेव च ॥३९॥
मलिनैः पतितैश्चैव न द्रष्टव्यं कथञ्चन ।
अन्नं पश्येयुरेते वै नैतत्स्याद्धव्यकव्ययोः ॥४०॥
तत्संस्पृष्टं प्रधानार्थं संस्कारश्चापदोभवेत् ।
हविषां संहतानान्तु पूर्व्वमेव विवर्जितं ।
मृत्संयुक्ताभिरद्भिश्च प्रोक्षणञ्च विधीयते ॥४१॥
सिद्धार्थकैः कृष्णतिलैः कार्य्यं वाप्यवकीरणं(१) ।
गुरुसूर्य्याग्निवस्तूनां दर्शनं वापि(२) यत्नतः ॥४२॥
आसनारूढमानेषु पादोपहतमेव च ।
अमेध्यैर्जङ्गमैर्दृष्टं शुष्कं पर्य्युषितञ्च यत् ॥४३॥
अग्नितं परिदुष्टञ्च तथैवाग्रावलेहितं ।
शर्कराकेशपाषाणैः कीटैर्यच्चाप्युपद्रुतं ॥४४॥
पिण्याकमथितञ्चैव तथा तिलयवादिषु ।
सिद्धाक्षताश्च येभक्ष्याः प्रत्यक्षलवणीकृताः ॥४५॥

---

१ अवकीर्णमितिवक्तव्ये अवकीरणमित्यार्षं ।
२ दर्शनञ्चापीति क० ।

वाससा चावधूतानि वर्ज्यानि श्राद्धकर्मणि ।
सन्ति वेदविरोधेन केचिद्विज्ञानमानिनः ॥४६॥
अजज्ञपतयो नाम ते श्राद्धस्य यथा रजः ।
दधि शाकं तथाऽभक्ष्याः शुक्तञ्चैव[१] विवर्ज्जितं ॥४७॥
वार्ताकुं वर्जयेद्द्यात् सर्वानभिषवानपि[२] ।
सैन्धवं लवणं यच्च तथा मानससम्भवं ॥४८॥
पवित्रं परमं ह्येतत् प्रत्यक्षमपि वर्त्तते ।
अग्नौ निक्षिप्य बध्नीयाद्धस्तौ[३] प्रक्षिप्य यत्नतः ॥४९॥
गमयेन्मस्तकं चैव ब्रह्मतीर्थं हि तत् स्मृतं ।
द्रव्याणां प्रोक्षणं कार्य्यं तथैवावपनं पुनः ॥५०॥
निधाय चाद्भिः सिञ्चेत तथैवाप्सु निवेशनं ।
अरिष्टतुम्बले विल्वं लिङ्गुदश्वदनान्यपि ॥५१॥
विदलानाञ्च सर्व्वेषां धर्मवच्छौचमिष्यते ।
तथा दन्तास्थिदारूणां शृङ्गानाञ्चावलेखनं ॥५२॥
सर्वेषां मृण्मयानान्तु पुनर्दाह उदाहृतः ।
मणिवज्रप्रबालानां मुक्ताशङ्खमणेस्तथा ॥५३॥
सिद्धार्थकानां कल्केन तिलकल्केन वा पुनः ।
स्याच्छौचं सर्वबालानामाविकानाञ्च सर्वशः ॥५४॥
आविकानाञ्च सर्व्वेषां मृद्भिरद्भिर्विधीयते ।

---

१ शुक्तमिति ख० ग० ।
२ अत्र सर्व्वाननामिषानपीति पाठः सुसङ्गतः ।
३ बध्नीयाद्धस्तौ इति पाठः सर्व्वत्र दृश्यते ।

आद्यन्तयोस्तु शौचानामद्भिः प्रक्षालनं पुनः ॥५५॥
तथा कार्प्पासिकानाञ्च भस्मना समुदाहृतं ।
फलपुष्पशलाकानां प्लावनञ्चाद्भिरिष्यते ॥५६॥
संमार्जनं प्रोक्षणञ्च भूमेश्चैवोपलेपनं ।
निष्क्रम्य वाह्यतोग्रामादायुपूता वसुन्धरा ॥५७॥
धनुष्मत्पक्षिणाञ्चैव मृद्भिः[१] शौचं विधीयते ।
एवमेष समुद्दिष्टः शौचानां विधिरुत्तमः ।
अतः परं प्रवक्ष्यामि तन्मे निगदतः शृणु ॥५८॥
प्रातर्गृहात् पश्चिमदक्षिणेन इषुक्षेपञ्चात्तमात्रं पदञ्च ।
कुर्य्यात् पुरीषं शिरोवगुण्ठ्य न च स्पृशेत्तत्र शिरः करेण॥४९॥
शुष्कैस्तृणैर्वा काष्ठैर्वा पत्रैर्वेणुदलेन वा ।
मृण्मयैर्भाजनैर्वापि तिरोधाय वसुन्धरां ॥६०॥
उद्धृतोदकमादाय मृत्तिकाञ्चैव वाग्यतः ।
दिवा उदङ्मुखः कुर्य्यात् रात्रौ वै दक्षिणामुखः ॥६१॥
दक्षिणेन च हस्तेन गृह्णीयाद्वै कमण्डलुं ।
शौचञ्च वामहस्तेन गुदे तिस्रस्तु मृत्तिकाः ॥६२॥
दश चापि पुनर्दद्याद्वामहस्तक्रमेण तु ।
द्वाभ्यां वापि पुनर्दद्याद्धस्तानां पञ्च मृत्तिकाः ॥६३॥
मृदा प्रक्षाल्य पादौ च आचम्य च यथाविधि ।
आपस्त्वाज्यास्त्रयश्चैव सूर्य्याग्निपवनाम्भसां ॥६४॥

---

१ मसिरिति क० ज० ।

कुर्य्यात् सन्निहितं नित्यं प्राज्ञस्तीर्थे कमण्डलुं ।
असत्कार्यं कार्यमेतैर्यथावत् पादधावनं ॥६५॥
आचमनं द्वितीयेन देवकार्यं ततः परं ।
उपवासस्त्रिरात्रन्तु दुष्टहस्ते ह्युदाहृतः ॥६६॥
विप्रकृष्टेन कृच्छ्रेण प्रायश्चित्तमुदाहृतं ।
स्पृष्ट्वाश्वानं श्वपाकं वा तप्तकृच्छ्रं समाचरेत् ॥६७॥
मानुषास्थीनि संस्पृश्य उपोष्यं शुद्धिकारणं ।
त्रिरात्रमुक्तं सस्नेहमेकरात्रमतोऽन्यथा ॥६८॥
कारस्कराः पुलिन्दाश्च तथान्ध्रशवरादयः ।
पीत्वा चापोभूतिलये गत्वा चैव युगन्धरां ॥६९॥
सिन्धोरुत्तरपर्य्यन्तं तथा दिव्यन्तरे श्रुतं ।
पापदेशाश्च ये केचित् पापैरध्युषिता जनैः ॥७०॥
शिष्टैश्च वर्जिता ये च ब्राह्मणैर्वेदपारगैः ।
गत्वा देशानपुण्यांस्तु कृत्स्नं पापं समश्नुते ॥७१॥
मनोव्यक्ति[१] रथाग्निश्च काले चैवोपलेपनं ।
विख्यापनञ्च[२] शौचानां नित्यमज्ञानमेव च ॥७२॥
अतोन्यथा तु यः कुर्यान्मोहाच्छौचस्य सङ्करं ।
पिशाचान् यातुधानांश्च फलं गच्छत्यसंशयं ॥७३॥
शौचमश्रद्दधानश्च म्लेच्छजातिषु जायते ।

---

१ मनोव्यग्निरिति ङ० च० ।
२ प्रत्याख्यानमिति पाठोयुक्तः ।

अयज्ञश्चैव पापो वा तिर्य्यग्योनिगतोऽपि वा ॥७४॥
शौचेन मोक्षं कुर्व्वाणः स्वर्गवासी भवेन्नरः ।
शुचिकामा हि देवा वै देवैरेतदुदाहृतं ॥७५॥
बीभत्समशुचिञ्चैव वर्जयन्ति सुराः सदा ।
त्रीणि शौचानि कुर्वन्ति न्यायतः शुभकर्मणः ॥७६॥
ब्रह्मण्यायातिथेयाय शौचयुक्ताय धीमते ।
पितृभक्ताय दान्ताय सानुक्रोशाय च द्विजाः ॥७७॥
तैस्तैः प्रीताः प्रयच्छन्ति पितरोयोगवर्द्धनाः ।
मनसा काङ्क्षितान् कामांस्त्रैलोक्यप्रभवानिति ॥७८॥

इति श्रीमहापुराणे वायुप्रोक्ते श्राद्धकल्पो नाम
षोड़शोऽध्यायः ।

अथ सप्तदशोऽध्यायः ।

श्राद्धकल्पः ।

ऋषय ऊचुः । अहो धीमंस्त्वया सूत श्राद्धकल्पस्तु कीर्त्तितः ।
श्रुतोनः श्राद्धकल्पोवै ऋषिभिः परिकीर्त्तितः ॥१॥
अतीवविस्तरोयस्य विशेषेण प्रकीर्तितः ।
वद शेषं महाप्राज्ञ ऋषेस्तस्य यथामतं ॥२॥
सूत उवाच । कीर्तयिष्यामि ते विप्रा ऋषेस्तस्य मतन्तु तत् ।
श्राद्धं प्रति महाभागास्तन्मे शृणुत विस्तरात् ॥३॥
उक्तं श्राद्धं मयापूर्वं विधिश्च श्राद्धकर्म्मणि ।
परिशिष्टं प्रवक्ष्यामि ब्राह्मणानां यथाक्रमं ॥४॥
न मीमांस्याः सदा विप्राः पवित्रं ह्येतदुत्तमं ।
दैवे पित्रे च सततं श्रूयते वै परीक्षणं ॥५॥
यस्मिन् दोषाः प्रदृश्येरन् सद्भिर्वा वर्जितस्तु यः ।
जानीयाद्वापि संवासाद्वर्ज्जयेत्तं प्रयत्नतः ॥६॥
अविज्ञातं द्विजं श्राद्धे परीक्षेत सदा बुधः ।
सिद्धा हि विप्ररूपेण चरन्ति पृथिवीमिमां ॥७॥
तस्मादतिथिमायान्तमभिगच्छेत् कृताञ्जलिः ।
पूजयेच्चापि पाद्येन पादाभ्यञ्जनभोजनैः ॥८॥

उर्व्वीं सागरपर्यन्तां देवा योगेश्वरास्तथा ।
नानारूपैश्चरन्त्येते प्रजा धर्म्मेण पालयन् ॥९॥
अर्च्चयित्वा ततोदद्याद्विप्रायातिथये नरः ।
व्यञ्जनानि च भक्ष्याणि फलन्तेषां तथैव च ॥१०॥
अग्निष्टोमन्तु पयसा प्राप्नुयाद्वै तथाश्रुतं ।
सर्पिषा तु शुभं चक्षुः षोडशाहफलं लभेत् ।
मधुना त्वतिरात्रस्य फलञ्च समवाप्नुयात् ॥११॥
तत् प्राप्नुयाच्छ्रद्दधानोनरोवै सर्वैः कामैर्भोजयेद्यस्तु विप्रान् ।
सर्व्वार्थदः सर्वविप्रातिथीयः फलं भुङ्क्ते सर्व्वमेधस्य नित्यं ॥१२॥
यस्तु श्राद्धेऽतिथिं प्राप्य दैवे वाप्यवमन्यते ।
तं वै देवा निरस्यंति होता यद्वत् परां वसुं ॥१३॥
देवाश्च पितरश्चैव वह्निश्चैव हि तान् द्विजान् ।
आविश्य भुञ्जते तद्वै लोकानुग्रहकारणात् ॥१४॥
अपूजिता दहन्त्येते दद्युः कामांश्च पूजिताः ।
सर्वस्वेनापि तस्माद्वै पूजयेदतिथीन् सदा ॥१५॥
वानप्रस्थोगृहस्थश्च गृहमभ्यागतोथवा ।
वालाः खिन्ना(१) यतिश्चैव जानीयादतिथीन् सदा ॥१६॥
अभ्यागतोयाचकः स्यादतिथिः स्यादयाचकः ।
अतिथेरतिथिः श्रेष्टः सोतिथियोग उच्यते ॥१७॥
न घोरो नापि संकीर्णोनाविद्योनविशेषवित् ।

---

१ वालखिल्या इति पाठः क, छ, ज, पुस्तकेषु दृश्यते ।

न च सन्तोन सम्बद्धेन सेवी नाचरेऽतिथिः ॥१८॥
पिपासिताय श्रान्ताय भ्रान्तायातिबुभुक्षते ।
तस्मै सत्कृत्य दातव्यं यज्ञस्य फलमिच्छता ॥१९॥
आरुह्य भृगुतुङ्गेषु गत्वा पुण्यां सरस्वतीं ।
आपगान्तु नदीपुण्यां गङ्गा देवी महानदी ॥२०॥
हिमवत्प्रभवा नद्यो यास्वान्या ऋषिपूजिताः ।
सरस्तीर्थाभिसम्बेद्या नदी नववहास्तथा ॥२१॥
गत्वैतान् मुच्यते पापैः स्वर्गे नित्यं महीयते ।
दशरात्रमशौचन्तु प्रोक्तं वै मृतसूतके ॥२२॥
ब्राह्मणस्य विशेषेण क्षत्रिये द्वादश स्मृतं ।
अर्द्धं मासन्तु वैश्यस्य मासाच्छूद्रस्तु शुध्यति ॥२३॥
उदक्या सर्ववर्णानां त्रिरात्रेण तु शुध्यति ।
उदक्यां सूतिकाञ्चैव स्नानमन्त्यावसायिनं ॥२४॥
नग्नादीन् मृतहारांश्च स्पृष्ट्वाऽशौचं विधीयते ।
स्नात्वा सचेलोमृद्भिस्तु द्वादशभिस्तु शुद्ध्यति ॥२५॥
एतदेव भवेच्छौचं मैथुने नवभि[१]स्तथा ।
मृदा प्रक्षाल्य हस्तौ तु कुर्याच्छौचविधिन्नरः ॥२७॥
प्रक्षाल्य चाद्भिर्हस्तौ च स्नात्वा चैव मृदा पुनः ।
मृदं गुह्ये ततोद्भिस्तु पुनरेव मृदं बुधः ॥२८॥
एवं शौचविधिर्दृष्टः सर्व्ववर्णेषु नित्यदा ।
परिदद्यान्मृदस्तिस्रोहस्तपादावसेचनं ॥२९॥

---

१ वसने इति क० ख० छ० पुस्तकेषु दृश्यते ।

आरण्यं शौचमेतत्तु ग्राम्यं वक्ष्याम्यतः परं।
मृदस्तिस्रः पादयोस्तु हस्तयोस्तिस्र एव च ॥३०॥
मृदः पञ्चदशामेध्ये हस्तादीनां विभागशः।
अनिर्णिक्ते मृदं दद्यान्मृदन्ते त्वद्भिरेव तु ॥३१॥
कण्ठं शिरोवा प्रावृत्य रथ्यापादगतस्तु वा।
अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत् ॥३२॥
प्रक्षाल्य पात्रं निक्षिप्य आचम्याभ्युक्षणं पुनः।
द्रव्यस्यान्यस्य तु तथा कुर्य्यादभ्युक्षणं पुनः ॥३३॥
पुष्पादीनां तृणानाञ्च प्रोक्षणं हविषान्तथा।
पराहृतानां द्रव्याणां निधायाभ्युक्षणं तथा ॥३४॥
प्रोक्षितन्तु हरेत् किञ्चिच्छ्राद्धे दैवे तथा पुनः।
उत्तरेणाहरेद्वेद्यां दक्षिणेन विसर्जयेत् ॥३५॥
विच्छिन्नं स्याद्विपर्य्यासे दैवे पित्र्ये तथैव च।
दक्षिणेन तु हस्तेन दक्षिणां(१) वेदमालिखेत् ॥३६॥
कराभ्यामेव देवानां पितॄणां विकरं शुभं।
क्षुभितस्वप्नयोश्चैव तथा मूत्रपुरीषयोः ॥३७॥
निष्ठीविते तथा व्यक्ते भुक्त्वा विपरिधाय च।
उच्छिष्टस्य च संस्पर्शे तथा पादावसेचने ॥३८॥
उत्सृष्टस्य सुसम्भाषे ह्यशुचिं प्रयतस्य च।
सन्देहेषु च सर्व्वेषु शिखां मुक्त्वा तथैव च ॥३९॥
विना यज्ञोपवीतेन मोहात्तु यद्युपस्पृशेत्।

१ दक्षिणाच्चेदमिति क०।

ओष्ठस्य दन्तसंस्पर्शे दर्शने चान्त्यवासिनां ॥४०॥
जिह्वयाचैव संस्पृश्य दन्दासक्तं तथैव च ।
सशब्दमङ्गुलीभिश्च प्रणतश्चावलोकयन् ॥४१॥
यश्चाधर्मे स्थितोमोहादाचान्तोऽप्यशुचिर्भवेत् ।
उपविश्य शुचौ देशे प्रणतः प्रागुदङ्मुखः ॥४२॥
पादौ प्रक्षाल्य हस्तौ तु अन्तर्जानुरुपस्पृशेत् ।
प्रसन्नास्त्रिः पिवेदापः प्रयतः सुसमाहितः ॥४३॥
द्विरेव मार्जनं कुर्य्यात् सक्षदभ्युक्षणं ततः ।
खानि मूर्द्धानमात्मानं हस्तौ पादौ तथैव च ॥४४॥
अभ्युक्षणं तथा तस्य यद्यमीमांसितं भवेत् ।
एवमाचमनं तस्य वेदा यज्ञास्तपांसि च ॥४५॥
दानानि ब्रह्मचर्य्यञ्च भवन्ति सफलास्तथा ।
क्रियां यः कुरुते मोहादनाचम्यैव नास्तिकः ॥४६॥
भवन्ति च वृथा तस्य क्रिया ह्येता न संशयः ।
वाग्भावशुद्धनिर्णिक्तमदुष्टं वाप्यनिन्दितं ॥४७॥
मेध्यान्येतानि ज्ञेयानि दुष्टमेभ्योविपर्य्ययः ।
न वक्तव्यः सदा विप्रः क्षुधितोनास्ति किञ्चन ॥४८॥
तस्मै सत्कृत्य यो दद्यादयूपो[१] यज्ञ उच्यते ।
असुष्टान्नं ऋतान्नन्तु[२] कृशवृत्ति[३]मयाचकं[४] ॥४९॥

---

(१) दपूय इति क० ख० ज० ।

(२) घृणीकान्नमिति ङ० च० छ० । वृष्णीकान्नमिति क० ज० ।

(३) कुशवृत्तिमिति ङ० । (४) मयावकमिति क० ।

एकान्तशीलं ह्रीमन्तं सदा श्राद्धेषु भोजयेत् ।
योददात्यन्तिमेभ्यश्च स ब्रह्मघ्नोदुरात्मवान् ॥५०॥
अपि जातिशतङ्गत्वा न स मुच्येत किल्बिषात् ।
विषमं भोजयेद्विप्रानेकपंक्त्याञ्च योनरः ॥५१॥
नियुक्तोवानियुक्तोवा पंक्त्या हरति दुष्कृतं ।
पापेन गृह्यते क्षिप्रमिष्टापूर्त्तं च नश्यति ॥५२॥
यतिस्तु सर्व्वविप्राणां सर्व्वेषामग्र्य उत्सवे ।
इतिहासपञ्चमान् वेदान् यः पठेत्तु द्विजोत्तमः ॥५३॥
अनन्तरं यथायोग्यं नियोक्तव्योविजानता ।
त्रिवेदोनन्तरस्तस्य द्विवेदस्तदनन्तरः ॥५४॥
एकवेदस्तथा पश्चान्न्यायाध्यायी(१) ततः परं ।
पावनायैव पंक्त्या वै तान् प्रवक्ष्ये निबोधत ॥५५॥
य एते पूर्व्वनिर्द्दिष्टाः सर्व्वे ते ह्यनुपूर्व्वशः ।
षडङ्गी विनयी योगी सर्व्वतन्त्रस्तथैव च ॥५६॥
यायावरश्च पञ्चैते विज्ञेयाः पङ्क्तिपावनाः ।
अष्टादशानां विद्यानामेकस्मिन् पारगोपि यः ॥५७॥
यथावद्वर्त्तमानश्च सर्वे ते पङ्क्तिपावनाः ।
त्रिनाचिकेतास्त्रैविद्योयश्च धर्म्मान् पठेद्द्विजः ॥५८॥
वार्हस्पत्ये तथा शास्त्रे पारं यश्च द्विजोगतः ।
सर्वे ते पावना विप्राः पङ्क्तीनां समुदाहृताः ॥५९॥
आमन्त्रितस्तु यः श्राद्धे योषितं सेवते द्विजः ।

(१) पश्चात् स्वाध्यायी चेति ख० ग० ।

पितरस्तस्य तं मासं तस्य रेतसि शेरते ॥६०॥
श्राद्धं दत्वा च भुक्त्वा च मैथुनं योनिषेवते ।
पितरस्तस्य तं मासं रेतःस्था नात्र संशयः ॥६१॥
तस्मादतिथये देयं भोजयेद्ब्रह्मचारिणं ।
ध्याननिष्ठाय दातव्यं सानुक्रोशाय धार्म्मिकं ॥६२॥
यतिं वा बालखिल्यान् वा भोजयेच्छ्राद्धकर्म्मणि ।
वानप्रस्थोपकुर्व्वाणः पूजामात्रेण तोषितः ॥६३॥
गृहस्थं भोजयेद्यस्तु विश्वेदेवास्तु पूजिताः ।
वानप्रस्थेन ऋषयोवालखिल्यैः पुरन्दरः ॥६४॥
यतीनां पूजने चापि साक्षाद्ब्रह्मा तु पूजितः ।
आश्रमाः पावनाः पञ्च उपधाभिरनाश्रमाः ॥६५॥
चत्वार आश्रमाः पूज्याः श्राद्धे दैवे तथैव च ।
चतुराश्रमवाह्येभ्यः श्राद्धं नैव प्रदापयेत् ॥६६॥
स तिष्ठेद्वा बुभुक्षुस्तु चतुराश्रमवर्ज्जितः ।
अयतिर्मोक्षवादी च उभौ तौ पङ्क्तिदूषकौ ॥६७॥
वृथामुण्डाश्च जटिलाः सर्वे कार्प्पटिकास्तथा ।
निर्घृणान् भिन्नवृत्तांश्च सर्वभक्षान् विवर्जयेत् ॥६८॥
कारुकादीननाचारान् सर्ववेदवहिष्कृतान् ।
गायनान् देववृत्तांश्च हव्यकव्येषु वर्जयेत् ॥६९॥
द्विजेष्वपि कृतं नित्यं(१) श्राद्धकर्म्मणि वर्जयेत् ।

(१) दृष्टेति ख० ।

एतेषु वर्त्तते यस्तु कृत्स्नवर्ण[१] स गच्छति ।
योऽश्नाति सह शूद्रेण सर्वे ते पङ्क्तिदूषकाः ॥७०॥

व्यापादनं[२] शक्तिनिवर्हणं कृषि-
र्वाणिज्यकार्य्यं पशुपालनञ्च ।
शुश्रूषणं वाप्यगुरोरहोवा
कार्य्यं नैतद्विद्यते ब्राह्मणस्य ॥७१॥

ये तु विप्रा स्थिता नित्यं ज्ञानिनोध्यानिनस्तथा ।
मिथ्यासङ्कल्पिनः सर्वे दुर्वृत्ता वा द्विजातयः ॥७२॥
मिथ्यातत्त्वविदोवर्ज्ज्यास्तथा दम्भविसूचकाः ।
उपपातकसंयुक्ताः पातकैश्च विशेषतः ॥७३॥
वेदे नियोगदातारोलोभमोहफलार्थिनः ।
ब्रह्मविक्रयिणश्चैव श्राद्धकर्म्मणि वर्जिताः ॥७४॥
न नियोगोस्ति वेदानां योनियुङ्क्ते स पापकृत् ।
भोक्ता वेदफलाद्भ्रश्येद्दाता दानफलात्तथा ॥७५॥
भृतोऽध्यापयते यस्तु भृतकाध्यापितस्तु यः ।
नार्हतस्तावपि श्राद्धं ब्रह्मणः क्रयविक्रयी[३] ॥७६॥
क्रयविक्रयिणौ चैव जीवितार्थं विगर्हितौ ।
वृत्तिरेषा तु वैश्यस्य ब्राह्मणस्य तु पातकं ॥७७॥
प्राङ्वेदान् वेदविदो वेदान् यश्चोपजीवति ।

---

(१) कृष्णवर्णमिति पाठः सर्व्वत्र ।
(२) व्याकर्षणमिति पाठः सर्व्वत्र दृश्यते ।
(३) ब्रह्मण्यक्रयविक्रयीति क० ।

उभौ तौ नार्हतः श्राद्धं पुत्रिकापतिरेव च ॥७८॥
वृथा दारांश्च योगच्छेद्योयजेत वृथाध्वरे।
नार्हतस्तावपि श्राद्धं द्विजोयश्चैव नास्तिकः ॥७९॥
आत्मार्थं यः पचेदन्नं न देवातिथिकारकः ।
नार्हतस्तावपि श्राद्धं पतितौ ब्रह्मराक्षसौ ॥८०॥
स्त्रियोनक्तं परा येषां परदाररताश्च ये ।
अर्थकामरताश्चैव न तान् श्राद्धेषु भोजयेत् ॥८१॥
वर्णाश्रमाणां धर्म्मेषु विरुद्धाः श्राद्धकर्म्मणि ।
स्तेनश्च सर्वयाजी च सर्वे ते पङ्क्तिदूषकाः ॥८२॥
यश्च शूकरवद्भुङ्क्ते यश्च पाणितले द्विजः ।
न तदश्नन्ति पितरोयस्य वामं[1] समश्नुते ॥८३॥
स्त्रीशूद्रायानुपेताय श्राद्धोच्छिष्टं न दापयेत् ।
योदद्याद्रागमोहात्तु न तद्गच्छेत् पितॄन् सदा ॥८४॥
तस्मान्न देयमुच्छिष्टं अन्नाद्यं श्राद्धकर्म्मणि।
अन्यत्र दधिसर्प्पिर्भ्यां शिष्ये पुत्राय नान्यथा ॥८५॥
अनुच्छिष्टन्तु दातव्यं अन्नाद्यं वै विशेषतः ।
पुष्पमूलफलैर्वापि तुष्टिं गच्छन्ति चान्नतः ॥८६॥
यावन्त्यन्नानि पूतानि[2] यावदुष्णं न मुञ्चति ।
तावदश्नन्ति पितरोयावदश्नन्ति वाग्यताः ॥८७॥
दानं प्रतिग्रहोहोमोभोजनं बलिरेव च।

---

(१) वायुमिति क० ङ० च० छ० ज० ।
(२) यावन्न पूयते चान्नमिति ख० ङ० च० ।

साङ्गुष्ठेन तथा कार्य्यं नासुरेभ्योयथा भवेत् ॥८८॥
एतान्येव च सर्व्वाणि दानादीनि विशेषतः ।
अन्तर्जान्वविशेषेण तद्वदाचमनं भवेत् ॥८९॥
मुण्डान् जटिलकाषायान् श्राद्धकालेऽपि वर्ज्जयेत् ।
शिखिभ्योवा त्रिदण्डिभ्यः श्राद्धं यत्नात् प्रदापयेत् ॥९०॥
ये तु व्रते स्थिता नित्यं ज्ञानिनोध्यानिनस्तथा ।
देवभक्ता महात्मानः पुनीयुर्दर्शनादपि ॥९१॥
सर्व्वं योगेश्वरैर्व्याप्तं त्रैलोक्यं वै निरन्तरं ।
तस्मात् पश्यन्ति ते सर्व्वं यत्किञ्चिज्जगतीगतं ॥९२॥
व्यक्ताव्यक्तं वशीकृत्य सर्व्वस्यापि(१) च यत्परं ।
सदसच्चेति यैर्दृष्टं(२) सदसच्च महात्मनां ॥९३॥
सर्व्वज्ञानानि दृष्टानि मोक्षादीनि महात्मनां ।
तस्मात्तेषु सदासक्तः प्राप्नोत्यनुत्तमं(३) शुभं ॥९४॥

ऋचोहि योवेद स वेद वेदान्
यजूंषि योवेद स वेद यज्ञं ।
सामानि योवेद स वेद ब्रह्म
योमानसं वेद स वेद सर्व्वम् ॥९५॥

इति श्रीमहापुराणे वायुप्रोक्ते श्राद्धकल्पे ब्राह्मणपरीक्षानाम
सप्तदशोऽध्यायः ।

---

(१) सर्व्वव्यापि चेति ख० ।
(२) येर्जुष्टमिति ख० ग० । यैर्दृष्टमिति क० ज० ।
(३) प्राप्नोत्वनुपममिति क० ।

अथ अष्टादशोऽध्यायः।

श्राद्धकल्पे दानफलं।

बृहस्पतिरुवाच। अतः परं प्रवक्ष्यामि दानानि च फलानि च।

तारणं सर्व्वभूतानां स्वर्गमार्गं सुखावहं ॥१॥

लोके श्रेष्ठतमं स्वर्ग्यमात्मनश्चापि यत् प्रियं।

सर्व्वं पितॄणां दातव्यं तेषामेवाक्षयार्थिना ॥२॥

जाम्बूनदमयं दिव्यं विमानं सूर्य्यसन्निभं।

दिव्याप्सरोभिः सङ्कीर्णमन्नदो लभते फलं ॥३॥

आच्छादनन्तु योदद्यादाहतं(१) श्राद्धकर्म्मणि।

आयुः प्रकाममैश्वर्य्यं रूपञ्च लभते सुतं ॥४॥

उपवीतन्तु योदद्याच्छ्राद्धकालेषु धर्म्मवित्।

पानञ्च सर्व्वविप्राणां ब्रह्मदानस्य यत् फलं ॥५॥

कृतं विप्रेषु योदद्याच्छ्राद्धकाले कमण्डलुं।

मधुक्षीरस्रवा धेनुर्दातारमुपतिष्ठति ॥६॥

चक्राविद्धन्तु योदद्याच्छ्राद्धकाले कमण्डलुं।

धेनुं स लभते दिव्यां पयोदां काम्यदोहिनीं ॥७॥

पूर्णशय्यान्तु(२) योदद्यात् पुष्पमालाविभूषितां।

प्रासादोह्युत्तमोभूत्वा गच्छन्तमनुगच्छति ॥८॥

---

(१) दद्यादक्षतमिति ख० ग०।

(२) पूर्णपर्णामिति च०।

भवनं रत्नसम्पूर्णं सशय्यासनभोजनं ।
श्राद्धे दत्त्वा यतिभ्यस्तु नाकपृष्ठे स मोदते ॥९॥
मुक्तावैदूर्य्यवासांसि रत्नानि विविधानि च ।
वाहनानि च दिव्यानि अयुतान्यर्व्वुदानि च ॥१०॥
सुमहज्ज्वलनप्रख्यं रत्नकामसमन्वितं ।
सूर्य्यचन्द्रप्रभन्दिव्यं विमानं लभतेऽक्षयं ॥११॥
अप्सरोभिः परिवृतं कामगन्तु मनोजवं ।
वसते स विमानाग्रे स्तूयमानः समन्ततः ॥१२॥
दिव्यैर्गन्धैः प्रसिञ्चन्ति पुष्पवृष्टिभिरेव च(१) ।
गन्धर्व्वाप्सरसस्तत्र गायन्ते वादयन्ति च ॥१३॥
कन्या युवतयोमुख्याः सहिताश्चाप्सरोगणैः ॥
सुस्वरैस्तं विबुध्यन्ते सततं हि मनोरमैः ॥१४॥
अश्वदानसहस्रेन रथदानशतेन च ।
दन्तिनाञ्च सहस्रेण योगिणा वसते नरः ॥१५॥
दद्यात् पितृभ्योयोगिभ्यो यस्तूज्ज्वलनमम्भसि(२) ।
अथ निष्कसहस्राणां फलं प्राप्नोति मानवः ॥१६॥
जीवितस्य प्रदानाद्धि नान्यद्दानं विशिष्यते ।
तस्मात् सर्वप्रयत्नेन देयं प्राणाभिरक्षणं ॥१७॥
अहिंसा सर्व्वदेवेभ्यः पवित्रा सर्व्वदायिनी ।
दानं हि जीवितस्याऽऽहुः प्राणिनां परमं बुधाः ॥१८॥

---

(१) दिव्यैः पुष्पैः प्रसिञ्चन्ति पूर्णवृष्टिभिरेव च इति पाठः सर्व्वत्र ।
(२) जन्तुद्धरणमम्भसीति पाठः सर्व्वष्वादर्शपुस्तकेषु दृश्यते।

लवणानि सुवर्णानि श्राद्धे पात्राणि दापयेत्।
रसास्तमुपतिष्ठन्ति भक्ष्याः सौभाग्यमेव च ॥१९॥
पात्रं वै तैजसन्दद्यान्मनोज्ञं श्राद्धभोजने ।
पात्रं भवति कामानां रूपस्य च धनस्य च ॥२०॥
राजतं काञ्चनं वापि दद्याच्छ्राद्धे तु कर्म्मणि।
दत्त्वा तु लभते दाता प्रकामं[१] धर्म्ममेव च ॥२१॥
धेनुं श्राद्धे तु योदद्याद्दृष्टिकुम्भोपदोहनां ।
गावस्तमुपतिष्ठन्ति गवां पुष्टिस्तथैव च ॥२२॥
शिशिरेषु तथात्वग्निं बहुकाष्ठं तथैव च ।
इन्धनानि तु योदद्याद्द्विजेभ्यः शिशिरागमे[२] ॥२३॥
नित्यञ्जयति संग्रामे श्रियायुक्तश्च दीप्यते।
सुरभीणि च माल्यानि गन्धवन्ति तथैव च ॥२४॥
पूजयित्वा तु पात्राणि श्राद्धे सत्कृत्य दापयेत् ।
गन्धवाहा महानद्यः सुखानि विविधानि च ॥२५॥
दातारमुपतिष्ठन्ति युवत्यश्च मनोरमाः ।
शयनासनानि रम्याणि भूमयोवाहनानि च ॥ २६ ॥
श्राद्धेऽप्येतानि योदद्यादश्वमेधफलं लभेत् ।
श्राद्धकाले निवेद्यञ्च दर्शश्राद्ध उपस्थिते ॥२७॥
विप्राणां गुणयुक्तानां स्मृतिं मेधां च विन्दति ।

---

(१) प्राकाम्यमिति क० ख० ग० छ० ज० । च चिह्नितपुस्तके एष श्लोको नास्ति।
(२) कायाग्निदीप्तिः प्राकाम्ये रूपं सौभाग्यमेव चेति ख० ग० ङ० च०।

सर्पिःपूर्णानि पात्राणि श्राद्धे सत्कृत्य दापयेत् ॥२८॥
कुम्भदोहनधेनूनां बह्वीनाञ्च फलं लभेत्।
अस्मिंस्तु मोदते लोके स्यन्दनैश्च सुवाहनैः ॥२९॥
श्राद्धे यथेप्सितं दत्वा पुण्डरीकस्य यत् फलं।
रम्यमावसथं दत्वा राजसूयफलं लभेत् ॥३०॥
वनं पुष्पफलोपेतं दत्त्वा सौरभमश्नुते।
कूपारामतड़ागानि क्षेत्रघोषगृहानि च ॥३१॥
दत्वैतान् मोदते स्वर्गे नित्यमाचन्द्रतारकं।
आस्तीर्णशयनं दत्वा श्राद्धे रत्नविभूषितं ॥३२॥
पितरस्तस्य तुष्यन्ति स्वर्गं चानन्त्यमश्नुते।
राजभिः पूज्यते चापि धनधान्यैश्च वर्द्धते ॥३३॥
ऊर्णाकौशेयवस्त्राणि तथा प्रवरकम्बलौ।
अजिनं काञ्चनं पट्टं प्रवेणी मृगलोमकं ॥३४॥
दानान्येतानि विप्रेभ्योभोजयित्वा यथाविधि।
प्राप्नोति श्रद्दधानस्तु वाजपेयशतं फलं(१) ॥३५॥
बह्वीनार्य्यः सुरूपास्तु पुत्रा भृत्याश्च किंकराः।
वशे तिष्ठन्ति भूतानि अस्मिंल्लोके त्वनामयं ॥३६॥
कौशेयं क्षौमकार्पासं दुकूलसहितं तथा।
श्राद्धेष्वेतानि योदद्यात् कामानाप्नोति पुष्कलान् ॥३७॥
लक्ष्मीं विनुदत्याशु तमः सूर्य्योदये यथा।

(१) वाजपेयफलं लभेत् इति ख० ग०। परन्त्वेष पाठोऽसंलग्नः।

भ्राजते स विमानाग्रे नक्षत्रेष्विव चन्द्रमाः ॥३८॥
वासोहि सर्वदैवत्यं सर्वदेवैरभिष्टुतं ।
वस्त्राभावे क्रिया नास्ति यज्ञा वेदास्तपांसि च ॥३९॥
तस्माद्वस्त्राणि देयानि श्राद्धकाले विशेषतः ।
तानि सर्वाण्यवाप्नोति यज्ञवेदतपांसि[(१)] च ॥४०॥
नित्यं श्राद्धेषु योदद्यात् प्रयतस्तत्परायणः ।
सर्वान् कामानवाप्नोति स्वर्गं राज्यं तथैव च ॥४१॥
सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते ।
भक्ष्यान् धानाः करम्भांश्च पिष्टकान् घृतशर्कराः ॥४२॥
कृशरान् मधुपर्कञ्च पयः पायसमेव च ।
स्निग्धांश्च पूपान् योदद्यादग्निष्टोमस्य यत् फलं ॥४३॥
दधि गव्यमसंसृष्टं भक्ष्या नानाविधास्तथा ।
तदन्नं शोचति श्राद्धे वर्षासु च मघासु च ॥४४॥
घृतेन भोजयेद्विप्रान् घृतं भूमौ समुत्सृजेत् ।
गयायां[(२)] हस्तिनश्चैव दत्वा श्राद्धे न शोचति ॥४५॥
ओदनं पायसं सर्पिर्मधुमूलफलानि च ।
भक्ष्यांश्च विविधान् दत्वा प्रेत्य चेह च मोदते ॥४६॥
शर्कराक्षीरसंयुक्तं पृथुकं नित्यमक्षयं ।
यश्च संवत्सरं प्रीत्या कृशरैर्मसुरेण च ॥४७॥
सक्तुलाजास्तथा पूपाः कुल्माषव्यञ्जनैस्तथा ।

---

(१) यज्ञवेदतपांसीत्यारभ्य कामानवाप्नोतीत्यन्तः पाठः च० पुस्तके नास्ति।
(२) छायायामिति क० ख० घ० ।

सर्पिःस्निग्धानि हृद्यानि दध्ना सक्तूंस्तु भोजयेत् ।
श्राद्धेष्वेतानि योदद्यात् पद्मानि लभते निधिं ॥४८॥
नवसस्यानि योदद्यात् श्राद्धे सत्कृत्य यत्नतः ।
सर्वभोगानवाप्नोति पूज्यते च दिवं गतः ॥४९॥
भक्ष्यभोज्यानि चोष्याणि पेयलेह्यवराणि च ।
सर्वश्रेष्ठानि योदद्यात् सर्व्वश्रेष्ठोभवेन्नरः ॥५०॥
वैश्वदेवं च सौम्यं च खाड्गमांसं परं हविः ।
विषाणं वर्ज्जयेत् खाड्गं असूयां नाशयामहे ॥५१॥
भोजनेऽग्रासनं दद्यादतिथिभ्यः कृताञ्जलिः ।
सर्वयज्ञक्रियाणां स फलं प्राप्नोत्यनुत्तमं ॥५२॥
क्षिप्रमत्युष्णमक्लिष्टं दद्याच्चान्नं बुभुक्षते ।
व्यञ्जनं च तथा स्निग्धं भक्त्या सत्कृत्य यत्नतः ॥५३
तरुणादित्यसंकाशं विमानं हंसवाहनं ।
अन्नदोलभते तिस्रः कल्पकोटीस्तथैव च(१) ॥५४॥
अन्नदानात्परं दानं विद्यते नेह किञ्चन ।
अन्नाद्भूतानि जायन्ते जीवन्ति च न संशयः ॥५५॥
जीवदानात् परं दानं न किञ्चिदिह विद्यते ।
अन्नैर्जीवति त्रैलोक्यमन्नस्यैव हि तत् फलं ॥५६॥
अन्ने लोकाः प्रतिष्ठन्ति लोकदानस्य तत्फलं ।

---

(१) कन्याकोटीस्तथैव च इति पाठः ङ० पुस्तकव्यतिरिक्तेषु सर्व्वेषु दृश्यते ।

अन्नं प्रजापतिः साक्षात्तेन सर्व्वमिदं ततं ।
तस्मादन्नसमं दानं न भूतं न भविष्यति ॥५७॥
यानि रत्नानि मेदिन्यां वाहनानि स्त्रियस्तथा ।
क्षिप्रं प्राप्नोति तत् सर्वं पितृभक्तोहि मानवः ॥५८॥
प्रतिश्रयं सदा दद्यादतिथिभ्यः कृताञ्जलिः ।
देवास्ते संप्रतीक्षंते दिव्यातिथ्यैः सहस्रशः ॥५९॥
सर्वाण्येतानि योदद्यात् पृथिव्यामेकराड्भवेत् ।
त्रिभिर्द्वाभ्यामथैकेन दानेन तु सुखी भवेत् ॥६०॥
दानानि परमोधर्म्मः सद्भिः सत्कृत्य पूजितः ।
त्रैलोक्यस्याधिपत्यं हि दानादेव व्यवस्थितं ॥६१॥
राजा तु लभते राज्यमधनश्चोत्तमं धनं ।
क्षीणायुर्लभते चायुः पितृभक्तः सदा नरः ।
यान् कामान् मनसाऽर्थैत तांस्तस्य पितरोविदुः ॥६२॥

इति श्रीमहापुराणे वायुप्रोक्ते श्राद्धकल्पे दानफलं नाम
अष्टादशोऽध्यायः ॥

———

अथ ऊनविंशोऽध्यायः ।

श्राद्धकल्पे तिथिविशेषे श्राद्धफलं ।

बृहस्पतिरुवाच । अत ऊर्द्धं प्रवच्यामि श्राद्धकर्म्मणि पूजितं ।
काम्यनैमित्तिकाजस्रं श्राद्धकर्म्मणि नित्यशः ॥१॥
पुत्रदारधनमूला अष्टकास्तिस्र एव च ।
पूर्वपक्षोवरिष्ठोहि पूर्वा चित्री उदाहृता ॥२॥
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेवकी ।
आद्या पूपैः सदा कार्या मांसैरन्या भवेत्सदा ॥३॥
शाकैरन्या तृतीया स्यादेवंद्रव्यगतोविधिः ।
अन्वष्टका पितॄणां वै नित्यमेव विधीयते ॥४॥
यद्यन्या च चतुर्थी स्यात्तास्रु कुर्य्याद्विशेषतः ।
तासु श्राद्धं बुधः कुर्य्यात् सर्व्वस्वेनापि नित्यशः ॥५॥
परत्रेह च सर्व्वेषु नित्यमेव सुखीभवेत् ।
पूजकानां सदोत्कर्षोनास्तिकानामधोगतिः ॥६॥
पितरः सर्व्वकालेषु तिथिकालेषु देवताः ।
सर्व्वे पुरुषमायान्ति निपानमिव धेनवः ॥७॥
मा स्म ते प्रतिगच्छेयुरष्टकाः सुरपूजिताः ।
मोघस्तस्य भवेल्लोकोलब्धञ्चास्य विनश्यति ॥८॥
देवांस्तु दायिनोयान्ति तिर्य्यग्गच्छन्त्यदायिनः ।
प्रजां पुष्टिं स्मृतिं मेधां पुत्रानैश्वर्य्यमेव च ॥९॥

कुर्व्वाणः पौर्णमास्याञ्च पूर्व्वं[१] पूर्णं समश्नुते ।
प्रतिपद्धनलाभाय लब्धं चास्य न नश्यति ॥१०॥
द्वितीयायान्तु यः कुर्य्याद्द्विपदाधिपतिर्भवेत् ।
वरार्थिना तृतीया तु[२] शत्रुघ्नी पापनाशिनी ॥११॥
चतुर्थ्यां कुरुते श्राद्धं शत्रोश्छिद्राणि पश्यति ।
पञ्चम्यां वै प्रकुर्वाणः प्राप्नोति महतीं श्रियं ॥१२॥
षष्ठ्यां श्राद्धानि कुर्वाणं द्विजास्तं पूजयन्त्युत ।
कुरुते यस्तु सप्तम्यां श्राद्धानि सततं नरः ॥१३॥
महासत्रमवाप्नोति गणानामधिपोभवेत् ।
सम्पूर्णामृद्धिमाप्नोति योऽष्टम्यां कुरुते नरः ॥१४॥
श्राद्धं नवम्यां कुर्वाण ऐश्वर्य्यं काङ्क्षितां स्त्रियं ।
कुर्वन् दशम्यान्तु नरोब्राह्मीं श्रियमवाप्नुयात् ॥१५॥
वेदांश्चैवाप्नुयान् सर्वान् प्रणाशमेनसस्तथा ।
एकादश्यां परं दानमैश्वर्य्यं सततं तथा ॥१६॥
द्वादश्यां राष्ट्रलाभन्तु जयमाहुर्वसूनि च ॥१७॥
प्रजां बुद्धिं पशून् मेधां स्वातन्त्र्यं पुष्टिमुत्तमां ॥१८॥
दीर्घमायुरथैश्वर्य्यं कुर्व्वाणस्तु त्रयोदशीं ॥१९॥
युवानश्च मृता यस्य गृहे तेषां प्रदापयेत् ।
शस्त्रेण तु हता ये वै तेषां दद्याच्चतुर्दशीं ॥२०॥

---

(१) सर्व्वमिति ख० ।
(२) वरां स्त्रेनां तृतीयान्तु इति ग० ।

तथा विषमजातानां यमलानां तु सर्वशः ।
अमावास्यां प्रयत्नेन श्राद्धं कुर्य्याच्छुचिः सदा ॥२१॥
सर्व्वान् कामानवाप्नोति स्वर्गमानन्त्यमश्नुते ।
ऋतं दद्यादमावास्यां सोममाप्यायनं महत् ॥२२॥
एवमाप्यायितः सोमस्त्रीन् लोकान् धारयिष्यति ।
सिद्धचारणगन्धर्व्वैस्स्तूयमानस्तु नित्यशः ॥२३॥
स्तवैः पुष्पैर्मनोज्ञैश्च सर्व्वकामपरिच्छदैः ।
नृत्यवादित्रगीतैश्च अप्सरोभिः सहस्रशः ॥२४॥
उपक्रीडैर्व्विमानैस्तु पितृभक्तं दृढव्रतं ।
स्तुवन्ति देवगन्धर्व्वाः सिद्धसङ्घाश्च तं सदा ॥२५॥
पितृभक्तस्त्वमावस्यां सर्वान् कामानवाप्नुयात् ।
प्रत्यक्षमर्च्चितास्तेन भवन्ति पितरः सदा ॥२६॥
पितृदेवा मघा यस्मात् तस्मात्तास्वक्षयं स्मृतं ।
पित्र्यं कुर्व्वन्ति तस्यान्तु विशेषेण विचक्षणः ॥२७॥
तस्मान्मघां वै वाञ्छन्ति पितरोनित्यमेव हि ।
पितृदैवतभक्ता ये तेऽपि यान्ति परां गतिं ॥२८॥

इति श्रीमहापुराणे वायुप्रोक्ते श्राद्धकल्पे तिथिविशेषे श्राद्ध-
फलवर्णनं नाम ऊनविंशोऽध्यायः समाप्तः ।

अथ विंशोऽध्यायः।

श्राद्धकल्पे नक्षत्रविशेषे श्राद्धफलं।

बृहस्पतिरुवाच। यमस्तु यानि श्राद्धानि प्रोवाच शशबिन्दवे[१]।
तानि मे शृणु कार्त्स्न्येन नक्षत्रेषु पृथक् पृथक् ॥१॥
श्राद्धं यः कृत्तिकायोगे करोति सततं नरः।
अग्नीनाधाय सापत्योजायते स गतज्वरः ॥२॥
अपत्यकामोरोहिण्यां सौम्येनौजस्विता भवेत्।
प्रायशः क्रूरकर्म्मा तु चार्द्रायां श्राद्धमाचरेत् ॥३॥
क्षेत्रभागी भवेत् पुत्री श्राद्धं कुर्व्वन् पुनर्व्वसौ।
धनधान्यसमाकीर्णः पुत्रपौत्रसमाकुलः ॥४॥
तुष्टिकामः पुनस्तिष्ये श्राद्धं कुर्वीत मानवः।
अश्लेषासु पितॄनर्च्य वीरान् पुत्रानवाप्नुयात् ॥५॥
श्रेष्ठोभवति ज्ञातीनां मघासु श्राद्धमाचरन्[२]।
फल्गुनीषु पितॄनर्च्य सौभाग्यं लभते नरः ॥६॥
प्रधानशीलः सापत्यः उत्तरासु करोति यः।
स सत्सु मुख्योभवति हस्ते यस्तर्पयेत्पितॄन् ॥७॥
चित्रायां चैव यः कुर्यात् पश्येद्रूपवतः सुतान्।
स्वातिना चैव यः कुर्याद्विद्वांल्लाभ[३] मवाप्नुयात् ॥८॥

---

(१) शशबिन्दवे इति ख० ज०, शिशिबिन्दवे इति ङ० च०।

(२) माचरेदिति च०।

(३) विद्वान् काममिति क०।

पुत्रार्थन्तु विशाखासु श्राद्धमीहेत मानवः।
अनुराधासु कुर्व्वाणोनरश्चक्रं प्रवर्त्तयेत्॥९॥
आधिपत्यं लभेच्छ्रैष्ठ्यं ज्येष्ठायां सततं तु यः।
मूलेनारोग्यमिच्छन्ति आषाढ़ासु महद्यशः॥१०॥
आषाढ़ाभिश्चोत्तराभिर्वीतशोकोभवेन्नरः।
श्रवणायां सुलोकेषु प्राप्नुयात् परमां गतिं॥११॥
राज्यभाग्वै[१] धनिष्ठासु प्राप्नुयाद्विपुलं धनं।
श्राद्धं त्वभिजिता कुर्वन् विन्दतेऽजाविकं फलं[२]॥१२॥
नक्षत्रे वारुणे कुर्व्वन् भिषक्सिद्धिमवाप्नुयात्।
पूर्व्वे प्रोष्ठपदे कुर्व्वन् विन्दतेऽजाविकं फलं[३]॥१३॥
उत्तरास्वनतिक्रम्य विन्देद्गावः सहस्रशः।
बहुरूपकृतं द्रव्यं विन्देत् कुर्व्वंस्तु रेवतीं।
अश्वांश्चैवाश्विनीयुक्तोभरण्यामायुरुत्तमं॥१४॥
इमं श्राद्धविधिं कुर्व्वन् शशविन्दुर्महीमिमां।
कृत्स्नान्तु लेभे स कृत्स्नां लब्धा च प्रशशंस तं॥१५॥

इति श्रीमहापुराणे वायुप्रोक्ते नक्षत्रविशेषे श्राद्धफलवर्णनं नाम विंशोऽध्यायः समाप्तः।

---

(१) राष्ट्रभागिति ज०।
(२) सदा सन्मानमाप्नुयादिति क०।
(३) वाञ्छितं फलमिति ज०।

अथ एकविंशोऽध्यायः।

श्राद्धकल्पे भिन्नकालिकतृप्तिसाधनद्रव्यविशेष-गयाश्राद्धादिफल-
ब्राह्मणपरीक्षादिकथनं।

शंयुरुवाच। किञ्चिद्दत्तं पितॄणां तु धिनोति वदतां वर।
किं हि स्विच्चिररात्राय किञ्चानन्त्याय कल्प्यते ॥१॥
बृहस्पतिरुवाच। हवींषि श्राद्धकाले तु यानि श्राद्धविदो विदुः।
तानि मे शृणु सर्वाणि फलं चैषां यथाबलं ॥२॥
तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन च।
दत्तेन मासं प्रीयन्ते श्राद्धेन तु पितामहाः ॥३॥
मत्स्यैः प्रीणन्ति द्वौ मासौ त्रीन्मासान् हारिणेन तु।
शाशन्तु(१) चतुरो मासान् पञ्च प्रीणाति शाकुनं ॥४॥
वाराहेण तु षण्मासान् छागलं साप्तमासिकं।
अष्टमासिकमित्युक्तं यच्च पार्षतकं भवेत् ॥५॥
रौरवेण तु प्रीयन्ते नवमासान् पितामहाः।
गवयस्य तु मांसेन तृप्तिः स्याद्दशमासिकी ॥६॥
कूर्मस्य चैव मांसेन मासानेकादशैव तु।
श्राद्धमेव विजानीयाद्गव्यं संवत्सरं भवेत् ॥७॥
तथा गव्यसमायुक्तं पायसं मधुसर्पिषा।
वध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥८॥

---

(१) मेषन्त्विति ख० ग०।

आनन्त्याय भवेद्युक्तं खाड्गमांसैः पितृक्षये ।
कृष्णच्छागस्तथा गोधा(१) आनन्त्यायैव कल्प्यते ॥९॥
अत्र गाथाः पितृगीताः कीर्त्तयन्ति पुराविदः ।
तास्तेऽहं संप्रवक्ष्यामि यथावत्संनिबोधत ॥१०॥
अपि नः स्वकुले जायाद्योऽन्नं दद्यात्त्रयोदशीं ।
पायसं मधुसर्पिर्भ्यां छायायां कुञ्जरस्य तु ॥११॥
आजेन सर्व्वलोहेन वर्षासु च मघासु च ।
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
गौरीं वाप्युद्वहेद्भार्य्यां नीलं वा वृषमुत्सृजेत् ॥१२॥
शंयुरुवाच । गयादीनां फलं तात प्रब्रूहि समपृच्छतः ।
पितॄणां चैव यत्पुण्यं निखिलेन ब्रवीहि मे ॥१३॥
बृहस्पतिरुवाच । गयायामक्षयं श्राद्धं जपहोमतपांसि च ।
पितृक्षयाहे ते(२) पुत्र तस्मात्तत्राक्षयं स्मृतं ॥१४॥
पुनीयादेकविंशन्तु गौर्य्यामुत्पादितः सुतः ।
मातामहांस्तु षड्भूय इति तस्याः फलं स्मृतं ॥१५॥
फलं वृषस्य वक्ष्यामि गदतो मे निबोधत ।
वृषोत्सृष्टा पुनात्येव दशातीतान् दशावरान् ॥१६॥
यत्किञ्चित् स्पृश्यते तोयैरुत्तीर्णेन जलान्महीं ।
वृषोत्सर्गे पितॄणां तु अक्षयं समुदाहृतं ॥१७॥

---

(१) गेह (गोह?) इति क० ज० । लोह इति ख० ग० ङ० च० ।
गोधा इति पाठः कल्पितः ।
(२) पितृक्षये हिते इति क० ङ० च० छ० ज० ।

यद्यद्धि संस्पृशेत्तोयं लांगूलादिभिरन्ततः ।
सर्व्वं तदक्षयं तस्य पितॄणां नात्र संशयः ॥१८॥
शृङ्गैः खुरैर्वा यद्भूमिमुल्लिखत्यनिशं वृषः ।
मधुकुल्याः पितॄंस्तस्य अक्षयास्ता भवन्ति वै ॥१९॥
सहस्रनल्वमात्रेण तड़ाकेन यथा श्रुतिः ।
तृप्तिस्तृप्तिः पितॄणां वै तद्वृषस्याधिकोच्यते ॥२०॥
योददाति गुड़ैर्मिश्रांस्तिलान् वै श्राद्धकर्मणि ।
मधुना मधुमिश्रान् वा[१] अक्षयं सर्व्वमेव तत् ॥२१॥
वृहस्पतिरुवाच । न ब्राह्मणान् परीक्षेत सदा देये तु मानवः ।
दैवे कर्मणि पित्र्ये च श्रूयते वै परीक्षणं ॥२२॥
सर्ववेदव्रतस्नाताः पङ्क्तीनां पावना द्विजाः ।
ये च भाष्यविदो[२] मुख्या ये च व्याकरणे रताः ॥२३॥
अधीयते पुराणं च धर्मशास्त्रं तथैव च ।
त्रिणाचिकेतपञ्चाग्निस्त्रिसुपर्णः षडङ्गवित् ॥२४॥
ब्रह्मदेयसुतश्चैव छन्दोगोज्येष्ठसामगः ।
पुण्येषु येषु तीर्थेषु अभिषेककृतव्रताः ॥२५॥
मुख्येषु येषु सत्रेषु भवन्त्यवभृथश्रुताः[३] ।
ये च सद्योव्रता नित्यं स्वकर्म्मनिरताश्च ये ॥२६॥
अक्रोधनाः शांतिपरास्तान् वै श्राद्धे निमन्त्रयेत् ।

---

(१) मधुमांससुमिश्रान् वा इति ख० ग० ।
(२) भव्यविदो इति ङ० च० ।
(३) अवभृतप्लुता इति ङ० च० छ० ज० ।

ये चापि नित्यं दम्भसु सुकृतेषु व्यवस्थिताः ॥२७॥
एतेषु दत्तमक्षय्यमेते वै पङ्क्तिपावनाः ।
श्रद्धेया ब्राह्मणा ये तु योगधर्म्ममनुव्रताः ॥२८॥
धर्माश्रमवरिष्ठास्ते हव्यकव्येषु ते वराः ।
त्रयोऽपि पूजितास्तेन ब्रह्मविष्णुमहेश्वराः ॥२९॥
पितृभिः सह लोकाश्च योह्येतान् पूजयेन्नरः ।
पवित्राणां पवित्रञ्च मङ्गलानां च मङ्गलं ॥३०॥
प्रथमः सर्वधर्माणां योगधर्मोनिगद्यते ।
अपाङ्क्तेयांस्तु वक्ष्यामि गदतोमे निबोधत ॥३१॥
कितवोमद्यपोयक्ष्मी पशुपालोनिराकृतिः ।
ग्रामप्रेष्योवार्द्धुषिकोगायनोवणिजस्तथा ॥३२॥
आगारदाही[१] गरदः कुण्डाशी सोमविक्रयी ।
समुद्रयायी दुश्चर्मा तैलिकः कूटकारकः ॥३३॥
पित्रा विवदमानश्च[२] यस्य चोपपतिर्गृहे ।
अभिशस्तस्तथास्तेनः शिल्पैर्यश्चोपजीवति ॥३४॥
सूचकः पर्वकारी च यस्तु मित्रेषु द्रुह्यति ।
गणयाचनकश्चैव नास्तिकोवेदवर्जितः ॥३५॥
उन्मत्तः षण्डकश्शठो भ्रूणहा गुरुतल्पगः ।
भिषक्जीवः प्रेषणिकः परस्त्रीं यश्च गच्छति ॥३६॥
विक्रीणाति च योब्रह्म व्रतानि च तपांसि च ।

(१) अङ्गारदाही इति क० ङ० च० ।
(२) पुत्रा विवदमानाश्चेति ङ० च० ।

नष्टं स्यान्नास्तिके दत्तं कृतघ्ने चैव शंसके ॥३७॥
यच्च वाणिजके चैव नेह नामुत्र तद्भवेत् ।
निक्षेपहारिणे चैव कितवे वेदनिन्दके ॥३८॥
तथा वाणिजके चैव कारुके धर्म्मवर्जिते ।
निन्दन् क्रीणाति पण्यानि विक्रीणंश्च प्रशंसति ॥३९॥
अनृतस्य समावासेन वणिक् श्राद्धमर्हति ।
भस्मनीव हुतं हव्यं दत्तं पौनर्भवे द्विजे ॥४०॥
षष्टिं काणः शतं षण्डः श्वित्री यावत् प्रपश्यति ।
पापरोगी सहस्रस्य दातुर्नाशयते फलं ॥४१॥
भ्रश्यते सत्फलात्तस्माद्दाता यस्य तु वालिशः ।
योवेष्टितशिरा भुङ्क्ते योभुङ्क्ते दक्षिणामुखः ॥४२॥
सोपानत्कश्च योभुङ्क्ते यच्च दद्यात्तिरस्कृतं ।
सर्वं तदसुरेन्द्राणां ब्रह्मा भागमकल्पयत् ॥४३॥
श्वानश्च यातुधानाश्च नावेक्षेरन् कथञ्चन ।
तस्मात्परिवृतिं दद्यात्तिलैश्चान्ववकीरयन् ॥४४॥
राक्षसानां तिलाः प्रोक्ताः(१) शुनां परिवृतिस्तथा ।
दर्शनाच्छूकरोहन्ति पक्षपातेन कुक्कुटः ॥४५॥
रजस्वलानुस्पर्शेन क्रुद्धोयश्च प्रयच्छति ।
यस्य मित्रप्रदेयानि श्राद्धानि च हवींषि च ।
न प्रीणाति पितॄन् देवान् स्वर्गं न च स गच्छति ॥४६॥

---

(१) कार्य्या इयि ङ० च० ।

नदीतीरेषु रम्येषु सरित्सु च सरस्सु च ।
विविक्तेषु च प्रीयन्ते दत्तेनेह पितामहाः ॥४७॥
न चास्त्रुं पातयेज्जातु न युक्तोवाचमीरयेत् ।
न च कुर्व्वीत भुञ्जानः अन्योऽन्यं मत्सरस्तदा[१] ॥४८॥
अपसव्ये कृते तेन विधिवद्दर्भपाणिना ।
पित्र्यमानिधनं कार्य्यमेवं प्रीणाति वै पितॄन् ॥४९॥
अनुमत्यादितोविप्रानग्नौ कुर्याद्यथाविधि ।
पितॄणां निर्व्वपेद्भूमौ सूर्पे वा दर्भसंस्तरे ॥५०॥
शुक्लपक्षस्य पूर्व्वाह्णे श्राद्धं कुर्याद्विचक्षणः ।
कृष्णपक्षेऽपराह्णे तु रौहिणं न विलङ्घयेत् ॥५१॥
एवमेते महात्मानोमहायोगा महौजसः ।
सदा वै पितरः पूज्या द्रष्टारोदेशकालयोः ॥५२॥
पितृभक्तिरतोनित्यं योगं प्राप्नोत्यनुत्तमं ।
ध्यानेन मोक्षं गच्छन्ति हित्वा कर्म्म शुभाशुभं ॥५३॥
यज्ञहेतोर्यदुद्धृत्य मोहयित्वा जगत्तदा ।
गुहायां निहतं योगं कश्यपेन महात्मना ॥५४॥
अमृतं गुह्यमुद्धृत्य योगं योगविदांवर[२] ।
प्रोक्तं सनत्कुमारेण महत्तद्धर्म्मशाश्वतं[३] ॥५५॥
देवानां परमं गुह्यं ऋषीणां च परायणं ।

(१) सक्तदिति ख० ।
(२) यज्ञविदाम्बर इति क० ।
(३) महाधर्म्मार्थशाश्वतमिति ख० ग० ।

पितृभक्त्या प्रयत्नेन पितृभक्तैश्च नित्यशः ॥५६॥
तच्च योगं समासेन पितृभक्तस्तु कृत्स्नशः ।
प्रयत्नात्प्राप्नुयात्तत्र सर्वमेव न संशयः ॥५७॥
यस्मै श्राद्धानि देयानि यच्च दत्तं महाफलं ।
येषु वाप्यक्षयं श्राद्धं तीर्थेषु च नदीषु च ।
येषु च स्वर्गमाप्नोति तत्ते प्रोक्तं समस्तकं ॥५८॥
बृहस्पतिरुवाच । श्रुत्वैवं श्राद्धकल्पं तु योऽसूयां कुरुते नरः ।
स मज्जेन्नरके घोरे नास्तिकस्तमसावृतः ॥५९॥
महारोगावसायस्तु स यः संयतमानसः[१] ।
वेदाश्रमान्मुक्तचित्तः कुम्भीकानधिगच्छति ।
जिह्वाच्छेदं स्तेनमेत्य प्राप्नुयुस्तेन चैव ह ॥६०॥
सीदन्ति ते सागरे लोष्टभूता
योगद्विषः स्थास्यन्ते यावदुर्व्वी ।
तस्मात् श्राद्धे धर्म उद्दिष्ट एष
नित्यं कार्यः श्रद्दधानेन पुंसा ॥६१॥
परिवादोन कर्त्तव्योयोगिनां च विशेषतः ।
परिवादात् कृमिर्भूत्वा तत्रैव परिवर्त्तते ॥६२॥
योगं परिवदेद्यस्तु ध्यानिनां मोक्षकारणं ।
स गच्छेन्नरकं घोरं श्रोता यस्य न संशयः ॥६३॥

---

(१) संयतमानसः इति पाठः आदर्शपुस्तकमात्रेषु दृश्यते परन्तु न सम्यक् । सन्दिग्धमानसः इति पाठः समुचितः ।

आवृतं तमसा सर्वं नरकं घोरदर्शनं ।
योगीश्वरपरीवादान्निरयं याति मानवः ॥६४॥
योगेश्वराणामाक्रोशं शृणुयाद्योयतात्मनां ।
स हि कालं चिरं मज्जेत् कुम्भीपाके न संशयः ॥६५॥
मनसा कर्मणा वाचा द्वेषं योगिषु वर्ज्जयेत् ।
प्रेत्यान्यं तत्फलं(१) भुङ्क्ते इह चैव न संशयः ॥६६॥

न पारगोविन्दति पारमात्मन-
स्त्रिलोकमध्ये चरति स्वकर्मभिः ।
ऋचोयजुःसामतदङ्गपारगो-
विकारमेव ह्यनवाप्य सीदति ॥६७॥
विकारपारः प्रकृतेश्च पारगः
त्रयी गुणानां(२) त्रिगुणान्तपारगा ।
तत्त्वश्चतुर्विंशतियोगपारगं
स पारगोयस्त्वयनान्तपारगः ॥६८॥
कृत्स्नं यथा तत्त्वविसर्गमात्मन-
स्तथैव भूयः प्रलयं सदात्मनः ।
प्रत्याहरेद्योगवलेन योगवित्
स सर्वपारक्रमयानगोचरः ॥६९॥

वेदस्य वेदिता योवै वेद्यं विन्दति योगवित् ।
तं वै वेदविदं प्राज्ञस्तं प्राज्ञैर्वेदपारगं ॥७०॥

(१) प्रेत्यानन्तफलमिति ख० ङ० च० ज० ।
(२) गुणानामिति पाठः सर्व्वत्रैवास्ति। जनानामिति पाठोऽत्र समुचीनः ।

वेद्यञ्च वेदितव्यञ्च विदित्वा वै यथाविधि ।
एवं वेदविदं प्राहुस्ततोऽन्ये वेदचिन्तकाः ॥७१॥
यज्ञान् वेदांस्तथा कामान् ज्ञानानि विविधानि च ।
प्राप्नोत्यायुः प्रजाश्चैव पितृभक्तोधनानि च ॥७२॥
श्राद्धे यः श्राद्धकल्पं वै पश्चिमं नियतं पठेत् ।
सर्वाण्येतान्यवाप्नोति तीर्थे दानफलानि च ॥७३॥
स पङ्क्तिपावनश्चैव द्विजानामग्रभुग्भवेत् ।
अध्याप्य वा द्विजान् सर्वान् सर्वान् कामानवाप्नुयात्॥७४॥
यश्चैव शृणुयान्नित्यं आनन्त्यं स्वर्गमश्नुते ।
अनसूयोजितक्रोधोलोभमोहविवर्जितः ॥७५॥
तीर्थानाञ्च फलं कृत्स्नं दानादीनां तथैव च ।
भोग्योपायोह्ययं श्रेष्ठः स्वर्गोपायोह्ययं परः ।
इह चापि परा तुष्टिस्तस्मान् कुर्वीत यत्नतः ॥७६॥
इमं विधिं योहि पठेदतन्द्रितः
समाहितः संसदि पर्वसन्धिषु ।
अपत्यभाग्भवति परेण तेजसा
दिवौकसां स व्रजते सलोकतां ॥७७॥
येन प्रोक्तस्त्वयं कल्पोनमस्तस्मै स्वयम्भुवे ।
महायोगेश्वरेभ्यश्च सदा च प्रणतोह्यहं ॥७८॥
इत्येते पितरस्तात देवानामपि देवताः ।
सप्तस्वेतेषु ते नित्यं स्थानेषु पितरोऽव्ययाः ॥७९॥
प्रजापतिसुता ह्येते सर्वे चैव महात्मनः ।

आद्योगणस्तु योगानां स नित्योयोगवर्द्धनः ॥८०॥
द्वितीयोदेवतानान्तु तृतीयोदेवताऽरिणां।
शेषास्तु वर्णिनां ज्ञेया इति सर्वे प्रकीर्तिताः ॥८१॥
देवास्त्वेतान् यजन्ते वै सर्वेस्त्वेतेष्ववस्थिताः।
आश्रमास्तु यजन्त्येतान् चत्वारस्तु यथाक्रमं ॥८२॥
वर्णाश्चापि यजन्त्येतांश्चत्वारस्तु यथाविधि।
तथा सङ्करजाताश्च म्लेच्छाश्चैव यजन्ति वै ॥८३॥
पितॄंश्च योयजेद्भक्त्या पितरः पूजयन्ति तं।
पितरः पुष्टिकामस्य प्रजाकामस्य वा पुनः।
पुष्टिं प्रजाश्च स्वर्गञ्च प्रयच्छन्ति पितामहाः ॥८४॥
देवकार्यादपि सूनोः पितृकार्यं विशिष्यते।
देवतानां हि पितरः पूर्वमाप्यायनं स्वयं ॥८५॥
न हि योगगतिः सूक्ष्मा पितॄणाञ्च परा गतिः।
तपसा विप्रकृष्टेन दृश्यते मांसचक्षुषा ॥८६॥
सर्वेषां राजतं पात्रमथवा रजतान्वितं।
पावनं ह्युत्तमं प्रोक्तं देवानां पितृभिः सह ॥८७॥
येषां दास्यन्ति पिण्डांस्त्रीन् बान्धवा नामगोत्रतः।
भूमौ कुशोत्तरायाञ्च अपसव्यविधानतः ॥८८॥
सर्वत्र वर्त्तमानास्ते पिण्डाः प्रीणन्ति वै पितॄन्।
यदाहारोभवेज्जन्तुराहारः सोऽस्य जायते ॥८९॥
यथा गोष्ठे प्रणष्टां वै वत्सोविन्दति मातरं।
तथा तं नयते मन्त्रोजन्तुर्यत्रावतिष्ठते ॥९०॥

नाम गोत्रञ्च मन्त्रश्च दत्तमन्नं नयन्ति तं ।
अपि योनिशतं प्राप्तांस्तृप्तिस्ताननुगच्छति ॥९१॥
एवमेषा स्थिता संस्था ब्रह्मणा परमेष्ठिना ।
पितॄणामादिसर्गस्तु लोकानामक्षयार्थिनां ॥९२॥
इत्येते पितरोदेवा देवाश्च पितरः पुनः ।
दौहित्रा यजमानाश्च प्रोक्ताश्चैव मयाऽनघाः(१) ॥९३॥
लोका दुहितरश्चैव दौहित्राश्च सुतास्तथा ।
दानानि सह शौचेन तीर्थानि च फलानि च ॥९४॥
अक्षयत्वं द्विजाश्चैव यायावरविधिस्तथा ।
प्रोक्तं सर्वं यथान्यायं यथा ब्रह्माऽब्रवीत्पुरा ॥९५॥
वृहस्पतिरुवाच । इत्येतदङ्गिराः प्राह ऋषीणां शृण्वतां तदा ।
पृष्टस्तु संशयं सर्वं पितॄणां प्राह संसदि ॥९६॥
सत्रे वै वितते पूर्वं तदा वर्षसहस्रिके(२) ।
यस्मिन् गृहपतिर्ह्यासीद्ब्रह्मा वै देवता प्रभुः ॥९७॥
संवत्सरशतान्यत्र(३) तत्रोपेता इति श्रुतिः ।
श्लोकाश्चात्र पुरा गीता ऋषिभिर्ब्रह्मवादिभिः ॥९८॥
दीक्षितस्य तदा सत्रे ब्रह्मणः परमात्मनः ।
तत्रैव जातमत्युग्रं पितॄणामक्षयार्थिना ।

---

(१) मयाऽनघ इति क० ।
(२) दशसहस्रिके इति ख० ग० ।
(३) संवत्सरशतान् पञ्च इति ङ० ।

लोकानाञ्च हितार्थाय ब्रह्मणा परमेष्ठिना ॥९९॥

सूत उवाच। एवं बृहस्पतिः पूर्वं पृष्टः पुत्रेण धीमता।

प्रोवाच पितृवंशन्तु यत्तद्वै समुदाहृतं।

अत ऊर्द्ध्वं प्रवक्ष्यामि वरुणस्य निबोधत ॥१००॥

इति श्रीमहापुराणे वायुप्रोक्ते श्राद्धकल्पे भिन्नकालिकतृप्तिसाधन-द्रव्यविशेष-गयाश्राद्धादिफल-ब्राह्मणपरीक्षादिकथनं नाम एकविंशोऽध्यायः समाप्तः॥

अथ द्वाविंशोऽध्यायः ।

श्राद्धकल्पे वरुणवंशवर्णनं ।

ऋषयश्चैवमुक्तास्तु परं हर्षमुपागताः ।
परं शुश्रूषवोभूयः पप्रच्छुस्तदनन्तरं ॥१॥
ऋषय ऊचुः । वंशानामानुपूर्व्वेण राज्ञाञ्चामिततेजसां ।
स्थितिञ्चैषां प्रभावञ्च ब्रूहि नः परिपृच्छतां ॥२॥
एवमुक्तस्ततः सूतस्तथाऽसौ लोमहर्षणः ।
शुश्रूषामुत्तराख्याने ऋषीणां वाक्यकोविदः ॥३॥
आख्यानकुशलोभूयः परं वाक्यमुवाच ह ।
ब्रुवतोमे निबोधध्व ऋषिराह यथा मम ॥४॥
वंशानामानुपूर्व्येण राज्ञाञ्चामिततेजसां ।
स्थितिञ्चैषां प्रभावञ्च ब्रुवतोमे निबोधत ॥५॥
वरुणस्य पत्नी सामुद्री शुनोदेवीत्युदाहृता ।
तस्याः पुत्रौ कलिर्वैद्यः सुता च सुरसुन्दरी ॥६॥
कलिपुत्रौ महावीर्यौ जयश्च विजयश्च ह ।
वैद्यपुत्रौ घृणिश्चैव मुनिश्चैव महाबलौ ॥७॥
प्रजानामन्तुकामानामन्योन्यस्य प्रभक्षिणौ ।
भक्षयित्वा तावन्योन्यं विनाशं समवापतुः ॥८॥
कलिः सुरायां सञ्जज्ञे तस्य पुत्रोमदः स्मृतः ।
त्वाष्ट्री हिंसा कलेर्भार्य्या ज्येष्ठा या निकृतिः स्मृता ॥९॥

असृजन्यान् कलेः पुत्रांस्तुरः पुरुषादकान् ।
नाकं विघ्नञ्च विख्यातं सद्रमं(१) विधमन्तथा ॥१०॥
अशिरस्कस्तयोर्विघ्नोनाकश्चैवाशरीरवान् ।
सद्रमश्चैकहस्तोऽभूद्विधमश्चैकपात् स्मृतः ॥११॥
सद्रमस्य तथा पत्नी तामसी पूतना स्मृता ।
रेवती विधमस्यापि तयोः पुत्राः सहस्रशः ॥१२॥
नाकस्य शकुनिः पत्नी विघ्नस्य च अयोमुखी ।
राक्षसास्तु महाशीर्षाः(२) सन्ध्याद्वयविचारिणः ॥१३॥
रेवतीपूतनापुत्रा नैर्ऋता नामतः स्मृताः ।
ग्रहास्ते राक्षसाः सर्वे बालानान्तु विशेषतः ।
स्कन्दस्तेषामधिपतिर्ब्रह्मणोनुमते प्रभुः ॥१४॥
बृहस्पतेर्या भगिनी वरस्त्री ब्रह्मचारिणी ।
योगसिद्धा जगत्कृत्स्नमसक्ता चरते सदा ॥१५॥
प्रभासस्य तु सा भार्या वसूनामष्टमस्य तु ।
विश्वकर्मा सुतस्तस्या जातः शिल्पिप्रजापतिः ॥१६॥
त्वष्टा विराजोरूपाणां धर्म्मपौत्र उदारधीः ।
कर्त्ता शिल्पसहस्राणां त्रिदशानाञ्च वास्तुकृत् ॥१७॥
यः सर्वेषां विमानानि देवतानाञ्चकार ह ।
मानुषाश्चोपजीवन्ति यस्य शिल्पं महात्मनः ॥१८॥

---

(१) समुद्रमिति क० ख० ग० भद्रममिति ङ० च० ।
(२) महावीर्य्या इति ख० ग० ङ० च० छ० ।

प्रह्लादी विश्रुता तस्य त्वष्टुः पत्नी विरोचना ।
विरोचनस्य भगिनी माता त्रिशिरसस्तु सा ।।१९।।
देवाचार्यस्य महतोविश्वकर्मस्य धीमतः ।
विश्वकर्मात्मजश्चैव विश्वकर्ममयः स्मृतः ।।२०।।
सुरेणुरिति विख्याता स्वसा तस्य यवीयसी ।
त्वाष्ट्री सा सवितुर्भार्य्या पुनः संज्ञेति विश्रुता ।।२१।।
असूत तपसा सा तु मनुं ज्येष्ठं विवस्वतः ।
यमौ पुनरसूतासौ यमञ्च यमुनाञ्च ह ।।२२।।
सा तु गत्वा कुरून् देवी वड़वारूपधारिणी ।
सवितुश्चाश्वरूपस्य नासिकाभ्यां तु तौ स्मृतौ ।।२३।।
असूत सा महाभागा त्वन्तरीक्षेऽश्विनौ किल ।
नासत्यञ्चैव दस्रञ्च मार्त्तण्डस्यात्मजावुभौ ।।२४।।
ऋषय ऊचुः । कस्मान्मार्त्तण्ड इत्येष विवस्वानुच्यते बुधैः ।
किमर्थं साऽश्वरूपा वै नासिकाभ्यामसूयत ।
एतदेदितुमिच्छामस्तत्त्वं विब्रूहि पृच्छतां ।।२५।।
सूत उवाच । चिरोत्पन्नमतिर्भिन्नमण्डं त्वष्ट्रा विदारितं ।
दृष्ट्वा गर्भवधाद्भीतः कश्यपोदुःखितोऽभवत् ।।२६।।
अण्डे द्विधाकृते त्वण्डं(१) दृष्ट्वा त्वष्टारमब्रवीत् ।
नैतदण्डं भवान्नूनं मार्त्तण्डस्त्वं भवानघ ।।२७।।
न खल्वयं मृतोऽण्डस्थ इति स्नेहात् पिताऽब्रवीत् ।

---

(१) त्वण्डमितिपाठः सर्व्वत्र । परन्तु त्वन्तरितिपाठः समीचीनः ।

तस्य तद्वचनं श्रुत्वा नामान्वर्थमुदाहरत् ॥२८॥
यन्मार्त्तण्डोभवेत्युक्तः पित्राऽण्डे वै द्विधाकृते।
तस्माद्विवस्वान्मार्त्तण्डः पुराणज्ञैर्विभाष्यते ॥२९॥
ततः प्रजाः प्रवक्ष्यामि मार्त्तण्डस्य विवस्वतः।
विजज्ञे सवितुः संज्ञाभार्यायान्तु त्रयं पुरा ॥३०॥
मनुर्यवीयान् सावर्णिः सञ्ज्ञायाञ्च तथाश्विनौ।
शनैश्चरश्च सप्तैते मार्त्तण्डस्यात्मजाः स्मृताः ॥३१॥
विवस्वान् कश्यपाज्जज्ञे दाक्षायण्यां महायशाः।
तस्य भार्याऽभवत् त्वाष्ट्री महादेवी विवस्वतः।
सुरेणुरिति विख्याता पुनः संज्ञेति विश्रुता ॥३२॥
सा तु भार्या भगवतोमार्त्तण्डस्यातितेजसः।
नातुष्यद्भर्तृरूपेण रूपयौवनशालिनी ॥३३॥
आदित्यस्य हि तद्रूपं मार्त्तण्डस्य हि तेजसा।
गात्रेषु प्रतिरुद्धं वै नातिकान्तमिवाभवत्॥३४॥
न खल्वयं मृतोह्यण्डे इति स्नेहात्तमब्रवीत्।
अज्ञानः कश्यपः स्नेहात् मार्त्तण्ड इति चोच्यते ॥३५॥
तेजस्त्वभ्यधिकं तस्य नित्यमेव विवस्वतः।
येनापि तापयामास त्रीँल्लोकान् कश्यपात्मजः॥३६॥
त्रीण्यपत्यानि संज्ञायां जनयामास वै रविः।
द्वौ सुतौ तु महावीर्यौ कन्यां कालिन्दिमेव च ॥३७॥
मनुर्विवस्वतोज्येष्ठः श्राद्धदेवः प्रजापतिः।
ततोयमोयमी चैव यमजौ संबभूवतुः ॥३८॥

शातवर्णन्तु तद्रूपं दृष्ट्वा संज्ञा विवस्वतः ।
असहन्ती स्वकां छायां सवर्णां निर्ममे पुनः ॥३९॥
महीमयी तु सा नारी तस्याश्छायासमुद्भता ।
प्राञ्जलिः प्रयता भूत्वा पुनः संज्ञामभाषत ॥४०॥
वदस्व किं मया कार्यं सा संज्ञा तामथाब्रवीत् ।
अहं यास्यामि भद्रन्ते स्वमेव भवनं पितुः ॥४१॥
त्वयेह भवने मह्यं वस्तव्यं निर्विशङ्कया ।
इमौ च बालकौ मह्यं कन्या च वरवर्णिनी ॥४२॥
भर्त्रे वै नैवमाख्येयमिदं भगवते त्वया ।
एवमुक्ताब्रवीत्संज्ञां संज्ञायाः पार्थिवी तु सा ॥४३॥
आकाशग्रहणाद्देवि आशयं नैव कर्हिचित् ।
आख्यास्यामि मतं तुभ्यं गच्छ देवि स्वमालयं ॥४४॥
समाधाय च तां संज्ञा तथेत्युक्ता तया च सा ।
त्वष्टुः समीपमगमद्व्रीडितेव तपस्विनी ॥४५॥
पिता तामागतां दृष्ट्वा क्रुद्धः संज्ञामथाब्रवीत् ।
भर्तुः समीपङ्गच्छ त्वं मा जुगुप्स दिवाकरं ॥४६॥
सैवमुक्ता तदा पित्रा नियुक्ता च पुनः पुनः ।
वर्षाणान्तु सहस्रं वै वसति स्म पितुर्गृहे ॥४७॥
भर्तुः समीपं गच्छ त्वं नियुक्ता च पुनः पुनः ।
अगमद्वडवा भूत्वाच्छाद्य रूपमनिन्दिता ।
उत्तरान् सा कुरून् गत्वा तृणान्यथ चचार सा ॥४८॥
द्वितीयायान्तु संज्ञायां संज्ञेयमिति चिन्त्यतां ।

आदित्योजनयामास पुत्रावादित्यवर्चसौ ॥४९॥
पूर्वजस्य मनोस्तुल्यौ सादृश्येन तु तौ प्रभू ।
श्रुतश्रुवन्तु धर्म्मज्ञं श्रुतकर्म्माणमेव च ॥५०॥
श्रुतश्रवा मनुः सोऽपि सावर्णिर्वै भविष्यति ।
श्रुतकर्म्मा तु विज्ञेयोग्रहोवै यः शनैश्चरः ॥५१॥
मनुरेवाभवत्स वै सावर्ण्य इति बुध्यते ।
संज्ञा तु पार्थिवी सा वै स्वस्य पुत्रस्य वै तदा ॥५२॥
चकाराभ्यधिकं स्नेहं न तथा पूर्वजेषु वै ।
मनुस्तत्राक्षमत्सर्वं यमस्तद्वै न चाक्षमत् ॥५३॥
बहुशोयस्य मानस्तु सापत्न्याददतिदुःखितः ।
तां वै रोषाच्च बाल्याच्च भाविनोऽर्थस्य वै बलात् ॥५३॥
पदा सन्तर्जयामास सज्ञाञ्चैव स्वतोयमः ।
सा शशाप ततः क्रोधात् सवर्णा जननी यमं ॥५४॥
पदा तर्जयसे यस्मात् पितृभार्यां यशस्विनीं ।
तस्मात्तवैष चरणः पतिष्यति न संशयः ॥५५॥
यमस्तु तेन शापेन भृशं पीड़ितमानसः ।
मनुना सह धर्म्मात्मा पितुः सर्व्वं न्यवेदयत् ॥५६॥
भृशं शापभयोद्विग्नः संज्ञावाक्यैर्विनिर्जितः ।
बाल्याद्वा यदि वा मोहान्मांभवांस्त्रातुमर्हति ॥५७॥
शप्तोहमस्मिँल्लोकेश जनन्या तपतांवर ।
तव प्रसादोनस्त्रातु ह्येतस्मान्महतोभयात् ॥५८॥
विवस्वानेवमुक्तस्तु यमं प्रोवाच वै प्रभुः ।

असंशयं पुत्र महद्भविष्यं तत्र कारणं ॥५९॥
येन त्वामाविशत्क्रोधोधर्म्मज्ञं सत्यवादिनं ।
न शक्यमेतन्मिथ्या तु कर्त्तुं मातुर्वचस्तव ॥६०॥
क्रिमयोमांसमादाय यास्यन्ति तु महीं तव ।
ततः पादं महाप्राज्ञ पुनः संप्राप्स्यसे सुखं ॥६१॥
कृतमेवं वचः सत्यं मातुस्तव भविष्यति ।
शापस्य परिहारेण त्वं च त्रातोभविष्यसि ॥६२॥
आदित्यस्त्वब्रवीत् संज्ञां किमर्थं तनयेषु वै ।
तुल्येष्वप्यधिकः स्नेह एकस्मिन् क्रियते त्वया ॥६३॥
सा तत्परिहरन्ती वै नाचचक्षे विवस्वतः ।
आत्मना स समाधाय योगन्तथ्यमपश्यत ॥६४॥
तां शप्तुकामोभगवान् नाशाय कुपितः प्रभुः ।
सा तत्सर्वं यथातत्त्वमाचचक्षे विवस्वतः ॥६५॥
विवस्वानथ तच्छ्रुत्वा क्रुद्धस्त्वष्टारमभ्ययात् ।
त्वष्टा तु तं यथान्यायमर्चयित्वा विभावसुं ॥६६॥
निर्द्दग्धुकामं रोषेण सान्त्वयामास वै शनैः ।
तवातितेजसा युक्तमिदं रूपं न शोभते ॥६७॥
असहन्ती तु तत् संज्ञा वने चरति शाद्वले ।
द्रक्ष्यते तां भवानद्य स्वां भार्यां शुभचारिणीं ॥६८॥
स्लाघ्यां यौवनसम्पन्नां(१) योगमास्थाय गोपते ।
अनुकूलं भवेदेवं यदि स्यात् समयोमतः ॥६९॥

---

(१) स्लाघ्ययौवनसम्पन्नामिति ख० ग० ।

रूपं निवर्त्तयेयन्ते आद्यं श्रेष्ठमरिन्दम ।
रूपं विवस्वतस्त्वासीत्तिर्यगूर्ध्वमधस्तथा ॥७०॥
तेनासौ व्रीड़ितोदेवो रूपेण तु दिवस्पतिः ।
तस्मात्त्वष्टा स चक्रन्तु बक्तु मेने महातपाः ॥७१॥
अनुज्ञातस्ततस्त्वष्टा रूपनिवर्त्तनाय तु ।
ततोऽभ्युपगमात्त्वष्टा मार्त्तण्डस्य विवस्वतः ॥७२॥
भ्रमिमारोप्य तत्तेजः शातयामास तस्य वै ।
तत्तु निर्भासितन्तेजस्तेजसापहृतेन तु ॥७३॥
कान्तात् कान्ततरं द्रष्टुमशुभं शुशुभे ततः ।
ददर्श योगमास्थाय स्वाम्भार्यां वड़वां तथा ॥७४॥
अदृश्यां सर्वभूतानां तेजसा नियमेन च ।
अश्वरूपेण मार्त्तण्डः तां मुखे समभावयत् ॥७५॥
मैथुनाय विचेष्टन्ती परपुंसोपशङ्कया ।
सा तन्निरधमच्छुक्रं नासिकाभ्यां विवस्वतः ॥७६॥
देवौ तस्मादजायेतामश्विनौ भिषजां वरौ ।
नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनाविति ॥७७॥
मार्त्तण्डस्य सुतावेतावष्टमस्य प्रजापतेः ।
तान्तु रूपेण कान्तेन दर्शयामास भास्करः ॥७८॥
सा तं दृष्ट्वा तदा भार्या तुतोष च मुमोह च ।
यमस्तु तेन शापेन भृशम्पीडितमानसः ॥७९॥
धर्म्मेण रञ्जयामास धर्म्मराजस्ततस्तु सः ।
सोऽलभत् कर्मणा तेन शुभेन परमद्युतिः ॥८०॥

पितॄणामाधिपत्यञ्च लोकपालत्वमेव च ।
मनुः प्रजापतिश्चैव सावर्णः स महायशाः ॥८१॥
भाव्यसौ नागते तस्मिन् मनुः सावर्णिकेऽन्तरे ।
मेरुपृष्ठे सुरम्ये वै अद्यापि चरते प्रभुः ॥८२॥
भ्राता शनैश्चरस्तत्र ग्रहत्वं स तु लब्धवान् ।
त्वष्टाऽनु तेनरूपेण विष्णोश्चक्रमकल्पयत् ।
महाऽप्रतिहतं युद्धे दानवप्रतिवारणे ॥८३॥
यवीयसी तयोर्या तु यमुना च यशस्विनी ।
अभवत् सा सरित्श्रेष्ठा यमुना लोकभाविनी ॥८४॥
यस्तु ज्येष्ठोमहातेजाः सर्गोयस्य तु साम्प्रतं ।
विस्तरं तस्य वक्ष्यामि मनोर्वैवस्वतस्य ह ॥८५॥
इदन्तु जन्म देवानां शृणुयाद्वा पठेत वा ।
वैवस्वतस्य पुत्राणां सप्तानान्तु महौजसां ।
आपदं प्राप्य मुच्येत प्राप्नुयाच्च महद्यशः ॥८६॥

इति श्रीमहापुराणे वायुप्रोक्ते श्राद्धकल्पे वरुणवंशवर्णनं नाम
द्वाविंशोऽध्यायः समाप्तः ।

अथ त्रयोविंशोऽध्यायः ।

श्राद्धकल्पे वैवस्वतमनुवंशवर्णनं ।

सूत उवाच । ततोमन्वन्तरेऽतीते चाक्षुषे दैवतैः सह ।
वैवस्वताय महते पृथिवीराज्यमादिशत् ॥१॥
तस्य वैवस्वतोवक्ष्ये साम्प्रतस्य महात्मनः ।
आनुपूर्व्वेण वै विप्राः कीर्त्त्यमानं निबोधत ॥२॥
मनोर्वैवस्वतस्येह सर्गमादाय साम्प्रतं ।
मनोः प्रथमजस्यासन् नवपुत्रास्तु तत्समाः ॥३॥
इक्ष्वाकुर्नहुषश्चैव(१) धृष्टः शर्यातिरेव च ।
नरिष्यन्तस्तथा प्रांशुर्नाभागोरिष्ट एव च ।
करूषश्च पृषध्रश्च नवैते मानवाः स्मृताः ॥४॥
ब्रह्मणा तु मनुः पूर्वं चोदितस्तु निबोधत ।
स्रष्टुं प्रचक्रमे कामं निष्फलं समवर्त्तत(२) ॥५॥
अथाकरोत्पुत्रकामः परामिष्टिं प्रजापतिः ।
मित्रावरुणयोरंशे मनुराहुतिमावपत् ॥६॥
तत्र दिव्याम्बरधरा दिव्याभरणभूषिता ।
दिव्यसन्नहना(३) चैव इड़ा जज्ञे इति श्रुतिः ॥७॥

---

(१) नहुलस्चैवेति च० । नहुवश्चैवेति ङ ।

(२) तत् प्रकीर्त्तितमितिपाठो यद्यपि सर्व्वत्रैव वर्त्तते तथापि लिपिकर-प्रमादजनित एव ।

(३) दिव्यसंहनना इति ङ० च० ।

तामिलेत्यथ होवाच मनुर्द्दण्डधरः स्मृतः।
अनुगच्छामि[१] भद्रन्ते तमिला प्रत्युवाच ह ॥८॥
धर्म्मयुक्तमिदं वाच्यं पुत्त्रकामं प्रजापतिं।
मित्रावरुणयोरंशे जातास्मि वदतां वर ॥९॥
तयोः सकाशं यास्यामि मानोधर्म्माद्धतोऽवधीत्[२]।
सैवमुक्का पुनर्द्देवी[३] तयोरन्तिकमागमत् ॥१०॥
गत्वान्तिकं वरारोहा प्राञ्जलिर्वाक्यमब्रवीत्।
अंशेऽस्मि युवयोर्जाता देवौ किं करवाणि च ॥११॥
मनुनैवाहमुक्तास्मि अनुगच्छस्व मामिति।
तथा तु वदतीं साध्वीमिडामाश्रित्य तावुभौ ॥१२॥
देवौ च मित्रावरुणाविदं वचनमूचतुः।
अनेन तव धर्म्मज्ञे प्रश्रयेण दमेन च ॥१३॥
सत्येन चैव सुश्रोणि प्रीतौ स्वोवरवर्णिनि।
आवयोस्त्वं महाभागे ख्यातिं कन्या प्रयास्यसि[४] ॥१४॥
सुद्युम्न इति विख्यातस्त्रिषु लोकेषु पूजितः।
जगत्प्रियोधर्म्मशीलोमनोर्वंशविवर्द्धनः ॥१५॥
मानवः स तु सुद्युम्नः स्त्रीभावमगमत्[५] प्रभुः[६]।

---

(१) परत्र अनुगच्छस्वेति पाठदर्शनादत्रापि अनुगच्छस्व इति पाठोयुक्तः।
(२) अवधीदित्यत्र अन्यथा इति पाठः प्रयोक्तुं शक्यः।
(३) महादेवीति ख० ग०।
(४) कन्येति यास्यसि इति पाठः समीचीनः।
(५) प्राप्स्यतीति पाठः समुचितः।
(६) पुनरिति ख० छ० ज०।

सा तु देवी वरं लब्ध्वा निवृत्ता पितरं प्रति ॥१६॥
बुधेनान्तरमासाद्य मैथुनायोपमन्त्रिता ।
सोमपुत्राद्बुधाच्चास्या ऐलोजज्ञे पुरूरवाः ॥१७॥
बुधात् सा जनयित्वा तु सुद्युम्नं पुनरागता ।
सुद्युम्नस्य तु दायादास्त्रयः परमधार्म्मिकाः ॥१८॥
उत्कलस्य गयस्यैव विनताश्व(१) स्तथैव च ।
उत्कलस्योत्कलं राष्ट्रं विनताश्वस्य पश्चिमं ।
दिक्षु वातस्य राजर्षेर्गयस्य तु गयापुरी ॥१९॥
प्रविसृष्टे मनौ तस्मिन् प्रजाः सृष्ट्वा दिवाकरः(२) ।
दशधा तद्दधत् चैत्रमकरोत् पृथिवीमिमां ॥२०॥
इच्छाकुरेव दायादानन्यान् दश समाप्नुयात् ।
कन्याभावात्तु सुद्युम्नोनैनं भागमवाप्नुयात् ॥२१॥
वशिष्ठवचनाच्चासीत् प्रतिष्ठा नो महाद्युतिः ।
प्रतिष्ठा धर्म्मराजस्य सुद्युम्नस्य महात्मनः ॥२२॥
तत् पुरूरवसे प्रादात् राष्ट्रं प्राप्य महायशाः ।
मानवेभ्योमहाभागा स्त्रीपुंसोर्लक्षणं प्रति ।
मानवः स तु सुद्युम्नः स्त्रीभावमगमत् पुनः ॥२३॥
एतच्छ्रुत्वा तु ऋषयः पप्रच्छुस्तदनन्तरं ।
मानवः स तु सुद्युम्नः स्त्रीभावमगमत् कथं ॥२४॥

---

(१) विततास्व इति ख० च० ।
(२) प्रविसृष्टे मनावित्यादि स्लोकस्य पूर्व्वस्लोकेन सह सङ्गतिविरहात् एतत् स्लोक पूर्व्वं कतिस्लोकाः आदर्शपुस्तकेषु पतिताः प्रतिभान्ति ।

सूत उवाच । प्रोवाच वचनं देवी प्रियहेतोः प्रियं प्रिया ।
समे ममाश्रमे देव यः पुमान् संप्रवेच्यति ।
भविष्यति ध्रुवं नारी सा तुल्याप्सरसाँ शुभा ॥२५॥
तत्र सर्वाणि भूतानि पिशाचाः पशवश्च ये ।
स्त्रीभूताः सह रुद्रेण क्रीडन्त्यप्सरसोयथा ॥२६॥
उमावनं प्रविष्टस्तु स राजा मृगयाकृतः ।
सह पिशाचैर्भूतैस्तु रुद्रैः स्त्रीभावमास्थिते ॥२७॥
तस्मात् स राजा सुद्युम्नः स्त्रीभावं लब्धवान् पुनः ।
महादेवप्रसादाच्च गाणपत्यमवाप्नुयात् ॥२८॥

इति श्रीमहापुराणे वायुप्रोक्ते वैवस्वतमनोः सृष्टिकथनं नाम
त्रयोविंशोऽध्यायः समाप्तः ॥

अथ चतुर्विंशोऽध्यायः ।

तत्र वैवस्वतमनुवंशगान्धर्व्वमूर्च्छनाकथनं ।

सूत उवाच । निसर्गं मनुपुत्राणां विस्तरेण निबोधत ।
पृषध्रोर्हिंसयित्वा तु गुरोर्गांवमभक्षयत् ॥१॥
शापाच्छूद्रत्वमापन्नश्च्यवनस्य महात्मनः ।
करूषस्य तु कारूषः क्षत्रियोयुद्धदुर्मदः ॥२॥
सहस्रक्षत्रियगणविक्रान्तः संबभूव ह ।
नाभागारिष्टपुत्रस्तु विद्वानासीद्भलन्दनः ॥३॥
भलन्दनस्य पुत्रोभूत् प्रांशुर्नाम महाबलः ।
प्रांशोरेकोभवत् पुत्रः प्रजानिरिति विश्रुतः ॥४॥
प्रजानेरभवत् पुत्रः खनित्रोनाम वीर्य्यवान् ।
तस्य पुत्रोऽभवत् श्रीमान् क्षुपोनाम महायशाः ॥५॥
क्षुपस्य विंशः पुत्रस्तु प्रतिमा न(१) बभूव ह ।
विंशपुत्रस्तु कल्याणोविविंशोनाम धार्म्मिकः ॥६॥
विविंशपुत्रोधर्म्मात्मा खनिनेत्रः प्रतापवान् ।
करन्धमस्तस्यपुत्रस्त्रेतायुगमुखेऽभवत् ॥७॥
करन्धमसुतश्चापि आविक्षिन्नाम वीर्य्यवान् ।
आविक्षितोव्यतिक्रामत् पितरं गुणवत्तया ॥८॥

---

(१) प्रतिमानमिति ङ० च० ।

मनुत्तो[१] नाम धर्म्मात्मा चक्रवर्त्तिसमोनृपः ।
संवर्त्तेन दिवन्नीतः ससुहृत् सह बान्धवैः ॥९॥
विवादोऽत्र महानासीत् संवर्त्तस्य वृहस्पतेः ।
ऋद्धिं दृष्ट्वा तु यज्ञस्य क्रुद्धस्तस्य वृहस्पतिः ॥१०॥
संवर्त्तेन हृते यज्ञे चुकोप सुभृशन्तदा ।
लोकानां स हि नाशाय दैवतैर्हि प्रसादितः ॥११॥
मनुत्तश्चक्रवर्त्ती स नरिष्यन्तमवाप्तवान् ।
नरिष्यन्तस्य दायादोराजा दण्डधरोदमः ॥१२॥
तस्य पुत्रस्तु विक्रान्तोराजासीद्राष्ट्रवर्द्धनः ।
सुधृती तस्य पुत्रस्तु नरः सुधृतिनः सुतः ॥१३॥
केवलस्तस्य पुत्रस्तु बन्धुमान् केवलात्मजः ।
अथ बन्धुमतः पुत्रोधर्म्मात्मा वेगवान् नृपः ॥१४॥
बुधोवेगवतः पुत्रस्तृणविन्दुर्बुधात्मजः ।
त्रेतायुगमुखे राजा तृतीये संबभूव ह ॥१५॥
कन्या तु तस्य द्रविडा माता विश्रवसोहि सा ।
पुत्रश्चास्य विशालोभूत् राजा परमधार्म्मिकः ॥१६॥
विशालस्य समुत्पन्ना विशाला नयनिर्म्मिता[२] ।
विशालस्य सुतोराजा हेमचन्द्रोमहाबलः ॥१७॥
सुचन्द्र इति विख्यातोहेमचन्द्रादनन्तरं ।
सुचन्द्रतनयोराजा धूम्राश्व इति विश्रुतः ॥१८॥

---

(१) मरुत्त इति ङ० च० ।
(२) येन निर्म्मिता इति ख० ।

धूम्राश्वतनयोविद्वान् सृञ्जयः समपद्यत ।
सृञ्जयस्य सुतः श्रीमान् सहदेवः प्रतापवान् ॥१९॥
कृशाश्वः सहदेवस्य पुत्रः परमधार्म्मिकः ।
कृशाश्वस्य महातेजाः सोमदत्तः प्रतापवान् ॥२०॥
सोमदत्तस्य राजर्षेः सुतोभूत् जनमेजयः ।
जनमेजयात्मजस्त्वेव प्रमति(१) र्नाम विश्रुतः ॥२१॥
तृणविन्दुप्रसादेन सर्व्वे वैशालका नृपाः ।
दीर्घायुषोमहात्मानोवीर्य्यवन्तः सुधार्म्मिकाः ॥२२॥
शर्य्यातेर्मिथुनं त्वासीत् आनार्त्तोनाम विश्रुतः ।
पुत्रः सुकन्या कन्या च भार्य्या या च्यवनस्य तु ॥२३॥
आनार्त्तस्य(२) तु दायादोरेवोनाम्ना तु वीर्य्यवान् ।
आनार्त्तोविषयोयस्य पुरी चापि कुशस्थली ॥२४॥
रेवस्य रैवतः पुत्रः ककुद्मी नाम धार्म्मिकः ।
ज्येष्ठोभ्रातृशतस्यासीत् राजा प्राप्य कुशस्थलीं ॥२५॥
कन्यया सह श्रुत्वा च गान्धर्व्वं ब्रह्मणोऽन्तिके ।
मुहूर्त्तं देवदेवस्य मार्त्यं बहुयुगं विभोः ॥२६॥
आजगाम युवा चैव स्वां पुरीं यादवैर्वृतां ।
कृतां द्वारवतीं नाम बहुद्वारां मनोरमां ॥२७॥
भोजवृष्ण्यन्धकैर्गुप्तां वसुदेवपुरोगमैः ।

---

(१) प्रमातिरिति क० ज० । प्रमितिरिति ख० ।
(२) आदर्शपुस्तकेष्वेकैकस्मिन् कुत्रचिदानार्त्तः क्वचिदानर्त्त इति पाठद्वयं दृश्यते ।

ताङ्कथां रैवतः श्रुत्वा यथातत्त्वमरिन्दमः ॥२८॥
कन्यान्तु बलदेवाय सुव्रतां नाम रेवतीं।
दत्त्वा जगाम शिखरं मेरोस्तपसि संस्थितः ॥२९॥
रेमे रामश्च धर्म्मात्मा रेवत्या सहितः किल।
तां कथां ऋषयः श्रुत्वा प्रपच्छुस्तदनन्तरं ॥३०॥
ऋषय ऊचुः। कथं बहुयुगे काले व्यतीते सूतनन्दन।
न जरां रेवती प्राप्ता पलितञ्च कुतः प्रभो ॥३१॥
मेरुं गतस्य वा तस्य शर्य्यातेः सन्ततिः कथं।
स्थिता पृथिव्यामद्यापि श्रोतुमिच्छामि तत्त्वतः॥३२॥
कियन्तोवा सुरगणा गन्धर्व्वास्तत्र कीदृशाः।
यच्छ्रुत्वा रैवतः कालान् मुहूर्त्तमिवमन्यते॥३३॥
सूत उवाच। न जरा चुत्पिपासा वा न च मृत्युभयं ततः।
न च रोगः प्रभवति ब्रह्मलोकगतस्य हि॥३४॥
गान्धर्व्वं प्रति यच्चापि पृष्टस्तु मुनिसत्तमाः।
ततोऽहं संप्रवच्यामि यथातथ्येन सुव्रताः॥३५॥
सप्तस्वरास्त्रयोग्रामा मूर्च्छनास्त्वेकविंशतिः।
तालाश्चैकोनपञ्चाशदित्येतत्स्वरमण्डलं॥३६॥
षड्जर्षभौ च गान्धारोमध्यमः पञ्चमस्तथा।
धैवतश्चापि विज्ञेयस्तथा चापि निषादवान्॥३७॥
सौविरी मध्यमग्रामोहरिणास्या तथैव च।
स्यात्कलोपवलोपेता चतुर्थी शुद्धमध्यमा॥३८॥
शार्ङ्गी च पावनी चैव दृष्टाका च यथाक्रमं।

मध्यमग्रामिकाः ख्याताः षड्जग्रामं निबोधत ॥३९॥
उत्तरमन्द्रा रजनी तथा या चोत्तरायता ।
शुद्धषड्जा तथा चैव जानीयात् सप्तमां च तां ॥४०॥
गान्धारग्रामिकांस्तान्यान् कीर्त्यमानान् निबोधत ।
आग्निष्टोमिकमाद्यन्तु द्वितीयं वाजपेयिकं ४१॥
तृतीयं पौण्ड्रकं प्रोक्तं चतुर्थं चाश्वमेधिकं ।
पञ्चमं राजसूयञ्च षष्ठञ्च क्रसुवर्णकं[१] ॥४२॥
सप्तमं गोसवं नाम महावृष्टिकमष्टमं[२] ।
ब्रह्मदानञ्च नवमं प्राजापत्यमनन्तरं ॥४३॥
नागपक्षाश्रयं[३] विद्याद्गोतरञ्च तथैव च ।
हयक्रान्तं मृगक्रान्तं विष्णुक्रान्तं मनोहरं ॥४४॥
सूर्य्यक्रान्तं वरेण्यञ्च मत्तकोकिलवादिनं ।
सावित्रमर्द्धसावित्रं सर्व्वतोभद्रमेव च ॥४५॥
सुवर्णञ्च सुतन्द्रञ्च[४] विष्णुवैष्णुवरावुभौ ।
सागरं विजयञ्चैव सर्वभूतमनोहरं ॥४६॥
हंसं ज्येष्ठं विजानीमस्तुम्बुरुप्रियमेव च ।
मनोहरमधाव्यञ्च गन्धर्वानुगतश्च यः ॥४७॥
अलम्बुषेष्टश्च तथा नारदप्रिय एव च ।

---

(१) कुसुवर्णकमिति क० ङ० ज० ।
(२) महावृत्तिकमिति ख० ।
(३) नागयक्षाश्रयमिति ख० ङ० ।
(४) सुभद्रञ्चेति ख० ङ० ।

कथितोभीमसेनेन नागराणां यथा प्रियः[१] ॥४८॥
विकलोपनीतविनता[२] श्रीराख्योभार्गवप्रियः[३] ।
विंशतिर्म्मध्यमग्रामः षड्जग्रामश्चतुर्द्दश[४] ॥४९॥
तथा पञ्चदशेच्छन्ति गान्धारग्रामसंस्थितान् ।
ससौवीरा तु गान्धारी ब्रह्मणा ह्युपगीयते[५] ॥५०॥
उत्तरादिस्वरस्यैव ब्रह्मा वै देवताऽत्र च[६] ।
हरिदेशसमुत्पन्ना हरिणास्या व्यजायत ।
मूर्च्छना हरिणास्यैव अस्या इन्द्रोऽधिदैवतं[७] ॥५१॥
करोपनीतवितता मरुद्भिः स्वरमण्डले[८] ।

---

(१) भयाप्रियः इति ख० ।
(२) करोपनीतवितता इति पाठः समीचीनः ।
(३) अत्र ख० पुस्तके, अभिरम्यस्य शुक्रस्य पुण्यः पुण्यारकः स्मृतः इति पाठोवर्त्तते ।
(४) विंशत्यादिस्थाने क० ज० पुस्तके अपाचियः गान्धारग्रामसंस्थिता इत्यादि खण्डितास्पष्टपाठोवर्त्तते ।
(५) ससौवीरा ब्रह्मणोत् क्षपगीयते इति क० ज० । स्वसावीरान्तसौवीरी ब्रह्मणामुपनीयते इति ख० । ब्राह्मणोह्युपगीयते इति छ० ।
(६) उत्तरादिसवस्यैव ब्रह्मा वै देवताय च इति ख० । देवतान्त च इति छ० ।
(७) मूर्च्छना हरिणा चैव इन्द्रस्यास्याधिदैवतं इति क० ज० । हरिणास्या-प्यजायत । मूर्च्छना हरिणा चैव इन्द्रस्यास्याधिदैवतं इति ख० । मूर्च्छना हरिणास्यैव इन्द्रस्यास्याधिदैवतं इति छ० ।
(८) विचता मनुद्भिः स्वरमण्डले इति क० ज० । विचित्रा मरुभिः स्वर-मण्डले ख० । विचता मनुद्भिः स्वरमण्डले इति छ० ।

सा कलोपनता तस्मान्मारुतश्चात्र दैवतं[१] ॥५३॥
मनुदेशसमुत्पन्ना[२] मूर्च्छना शुद्धमध्यमा।
मध्यमोऽत्र स्वरः शुद्धोगन्धर्व्वश्चात्र देवता ॥५२॥
मृगैः सह सञ्चरते[३] सिद्धानां मार्गदर्शने।
यस्मात्तस्मात् स्मृता मार्गी[४] मृगेन्द्रोस्याश्च दैवता।५४॥
सा चाश्रमसमायुक्ता[५] अनेकान् पौरवान् रवान्।
मूर्च्छना योजना ह्येषा रजसा रजनी ततः[६] ॥५५॥
तास्त[७] उत्तरमन्द्रांशः षड्जदैवतकां विदुः।
तस्मादुत्तरतालञ्च प्रथमं स्वायतं विदुः[८]।
तस्मादुत्तरमन्द्रोयं देवतास्य ध्रुवोध्रुवं[९] ॥५६॥
अपानादुत्तरत्वाच्च[१०] धैवतस्योत्तरायणः[११]।

(१) साकल्योपनता तस्मान्मातुस्याच देवता० इति क० ज०। तस्मान्मतु-तस्याच्च दैवतं इति ङ०।
(२) मरुदेशसमुत्पन्नेति ख०।
(३) मृगैः शतसाहस्रश्च इति ख०।
(४) माग्री इति क० ज०। मार्ग्री इति ङ०। मात्रा इबि क०।
(५) आश्रमसमायुक्ता इति ङ०।
(६) स्याद्रजसा रजनी ततः इति क० ङ० ज०।
(७) तानि इति क० ख० ङ० ज०।
(८) तस्मादुत्तरता च प्रथमं स्वायनं विदुरिति क० ज०। तस्मादुत्तराच्च वै प्रथमं स्वायतमं विदुरिति ख०। तस्मादुत्तरतायाश्च प्रथमं स्वायतं विदुरिति ङ०।
(९) तमोदुत्तरमन्द्रोयं देवतास्या धुवे ध्रुवा इति क० ङ० ज०। तमोदुत्तर-मन्त्रोयं देवतास्या भवेषु चेति ख०।
(१०) आयामदुत्तरत्वाच इति क० ङ०। आयामादुत्तरत्वाघ इति ज०।
(११) वैवत्स्यायतोऽपि चेति ख०।

स्यादियं मूर्च्छना ह्येवं पितरः श्राद्धदेवताः(१) ॥५७॥
शुद्धषड्जस्वरं कृत्वा यस्मादग्निं(२) महर्षयः।
उपतिष्ठन्ति तस्मात्तं जानीयात् शुद्धषड्जिकं(३) ॥५८॥
यः सतां मूर्च्छनां कृत्वा पञ्चमस्वरकोभवेत्(४)।
यक्षीणां मूर्च्छना सा तु(५) याक्षिका मूर्च्छना स्मृता ॥५९॥
नागदृष्टि(६) विषा गीता(७) नोपसर्पन्ति मूर्च्छनां।
भवन्तीव हृता ह्येते ब्रह्मणा नागदेवताः(८)।
अहीनां मूर्च्छना ह्येषा वरुणश्चात्र देवता(९) ॥६०॥
शकुन्तकानां कृत्वा च उपमां यान्ति किन्नराः।
उत्तमा मूर्च्छना तस्मात् पक्षिराजोऽत्र देवता ॥६१॥
गान्धाररागशब्देन गां धारयतेऽर्थतः।

---

(१) स्यादियं मूर्च्छतां स्वैरमिति क० ज०।
(२) शुद्धस्वर्गमयं कृत्वा यस्मादग्नी इति ख०।
(३) तस्मात्तां जानीयात् शुषद्धषज्जिकमिति क० ज०। शुद्धयाज्ञिकामिति ख०। तस्मात्तां रजनी स्यात् शुद्धषड्गिनीति ङ०।
(४) नियतां मूर्च्छनां मूर्च्छां यस्य मत्सरकोभवेदिति ख०। यः सभां मूर्च्छनां कृत्वा पञ्चम ऋटरकोभवेदिति ङ०। यः सतां पूर्व्वगां कृत्वा यस्य मक्याकोभवेदिति क० ज०।
(५) यक्षीणां मूर्च्छनां श्रुत्वा इति क० ज०। यक्षीणां मूर्च्छनां श्रुत्वा ख० ङ०।
(६) नागादृष्टिरिति क० ख० ङ० ज०।
(७) मयागीतमिति ख०।
(८) भवतीव हृताह्येते ब्रह्मणोनागदैवतामिति ख०। भवभीतकृताह्येते ब्राह्मणा नागदेवता इति क० ङ०। भयभीतकृताह्येति ब्राह्मणा नागदेवता इति ज०।
(९) अहीनामित्यादि ह्यनलदेवता इत्यन्तं केवलं ख० पुस्तके पाठोऽस्ति।

तस्माद्विशुद्धगान्धारी गन्धर्व्वश्चाधिदैवतं ॥६२॥
गान्धारानन्तरं गत्वा स्पृष्टेयं मूर्च्छना यतः ।
तस्मादुत्तरगान्धारी वसवश्चात्र देवताः ॥६३॥
सेयं खलु महाभूता पितामहमुपस्थिता ।
षड्जेयं मूर्च्छना तस्मात् स्मृता ह्यनलदेवता ॥६४॥
दिव्येयं चायता तेन[१] मन्दषष्ठा च मूर्च्छने ।
निवृत्तगुणनामानं[२] पञ्चमश्चात्र दैवतं ॥६५॥
पूर्णाः सप्तस्वरा ह्येवं[३] मूर्च्छनाः संप्रकीर्त्तिताः ।
नानासाधारणाश्चैव षड़ेवानुविदस्तथेति[४] ॥६६॥

इति श्रीमहापुराणे वायुप्रोक्ते वैवस्वतमनुवंशगान्धर्व्वमूर्च्छना-
लक्षणकथनं नाम चतुर्विंशोऽध्यायः समाप्तः ।

---

(१) दिव्यं पञ्चायतानेन इति ख० छ० ।
(२) निवृत्ते गुणनामानामिति ख० ।
(३) ह्येषु इति ख० ।
(४) नानासाधारणा रेवे वड़ेवात्रविदस्तथा इति क० । वड़ेवात्र विटस्तथा इति ज० ।

अथ पञ्चविंशोऽध्यायः ।

तत्र गीतालङ्कारनिर्द्देशः ।

पूर्व्वाचार्य्यमतं बुद्धा[१] प्रवक्ष्याम्यनुपूर्व्वशः ।
त्रिशतं[२] वै अलङ्कारास्तान्मे[३] निगदतः शृणु ॥१॥
अलङ्कारास्तु वक्तव्याः स्वैःस्वैर्व्वर्णैः प्रहेतवः[४] ।
संस्थानयोगैश्च तथा पादानां चान्ववेचया[५] ॥२॥
वाक्यार्थपदयोगार्थैरलङ्कारस्य पूरणं[६] ।
पदानि गीतकस्याङ्गः पुरस्तात् पृष्ठतोऽथवा[७] ॥३॥
स्थानानि त्रीणि जानीयादुरःकण्ठशिरस्तथा ।
एतेषु त्रिषु स्थानेषु प्रवृत्तोविधिरुत्तमः ॥४॥

---

(१) कृत्वेति छ० ।
(२) त्रिशतानीतिपाठोयुक्तः ।
(३) स्तन्मे इति क० ख० छ० ज० ।
(४) प्रहेतवाः इति क० ज० ।
(५) संस्थानयोगैश्च तथा पादानां वान्ववेश्रया इति क० ज० । चानुवेच्चया इति ख० ।
(६) रलङ्कारस्य पूरणमिति क० ख० छ० ज० ।
(७) पुरुषोऽथवा इति छ० । पृष्ठतोऽथदा इति क० ज० । पृष्ठतोपिवा इति ग० ।

चत्वारः प्रकृतौ वर्णाः प्रविचारस्तुर्विधः[१] ।
विकल्पमष्टधा चैव[२] देवाः षोडशधा विदुः[३] ॥५॥
स्थायी वर्णः प्रसंचारी तृतीयमवरोहणं[४] ।
आरोहणं चतुर्थन्तु वर्णं वर्णविदोविदुः[५] ॥६॥
तत्रैकः[६] संचरस्थायी सचरास्तचरीभवन्[७] ।
अथ रोहणवर्णानामवरोहं विनिर्दिशेत् ॥७॥
आरोहणेन चारोहवर्णं[८] वर्णविदोविदुः ।
एतेषामेव वर्णानामलङ्कारान्निबोधत ॥८॥
अलङ्कारास्तु चत्वारः स्थापनी[९] क्रमरेजिनः[१०] ।
प्रमादश्चाप्रमादश्च तेषां वक्ष्यामि लक्षणं ॥९॥
विस्वरोष्ट्रकलाश्चैव[११] स्थानादेकान्तरं गताः ।
आवर्त्तस्याक्रमोत्पत्ती द्वे कार्य्ये[१२] परिमाणतः[१३] ॥१०॥

---

(१) परिचारस्तुर्विधः इति ख० ।
(२) विकल्पमष्टा इति क० ज० ।
(३) स्मृता इति ख० ग० ।
(४) मन्त्ररोहणमिति छ० ।
(५) ब्रह्मविन्दुरिह स्मृतः इति ख० ग० ।
(६) तत्रैवः इति छ० ।
(७) सचरास्तचरीभवदिति क० छ० ज० ।
(८) चारोहावर्णामिति क० ख० । चारोहीवर्णमिति छ० ।
(९) स्थायेना इति क० ज० । स्थापया इति ख० ।
(१०) क्रमवाजिनः इति ख० ।
(११) विस्वरोष्टकलाश्चैवेति छ० ज० । विस्वराष्ट्रकलाश्चैवेति ख० ।
(१२) देवकार्य्यः इति क० ज० । आवर्त्तस्य क्रमेभाष्णौ दे कार्य्ये इति ख० ।
आवर्त्तस्याक्रमोव्यच्चोदेषार्य्य इति छ० ।
(१३) परिणामतः इति ख० ।

कुमारमपरं विद्याद्विस्तरवमनं गतं[१] ।
एष वै चाप्यपाङ्गस्तु[२] कुतारेकः कलाधिकः[३] ॥ ११ ॥
श्येनस्त्वेकान्तरे[४] जातः कलामात्रान्तरे स्थितः[५] ।
तस्मिंस्तेव स्वरे वृद्धिस्तिष्ठते तद्विलक्षणा[६] ॥ १२ ॥
श्येनस्तु अपरोहस्तु उत्तरः परिकीर्त्तितः ।
कलाकलप्रमाणाच्च सविन्दुर्नाम[७] जायते ॥ १३ ॥
विन्दुरेककला कार्य्या वर्णान्तस्थायिनी भवेत्[८] ।
विपर्य्ययस्वरोपि स्याद्यस्य दुर्घटितोऽपि न[९] ॥ १४ ॥
एकान्तरा तु वाद्यन्तु षड्जतः[१०] परमः स्वरः[११] ।
आक्षेपास्कन्दनं कार्य्यं[१२] काकस्येवोच्चपुष्कलं[१३] ॥ १५ ॥

---

(१) कुमारं सपरं विद्याद्विवस्त्वमनागतमिति ख० । विस्तरं वचनं गता इति छ० ।
(२) एष वै वास्यपाङ्गस्तु इति क० ज० ।
(३) एष चैवानपाय्यस्य कुनावेकः कलाधिपः इति ख० । एष वै चास्यपाङ्गस्तु कुनारेकः कलाधिकः उति छ० ।
(४) श्येनस्त्वेफान्तरे इति क० ज० । स्वेन स्वेकान्तरे इति ख० ।
(५) कलामभिन्तरेस्थितः इति क० छ० ज० ।
(६) तद्विलक्षणमिति क० ख० छ० ज० ।
(७) सविदुरिति क० ज० । सवितुरिति ख० ।
(८) वर्णतुस्थापिनोभवेत् इति क० छ० ज० । वर्णयिस्यामि नो भवेदिति ख० ।
(९) यस्या दुर्घटितोनम इति क० छ० ज० । यस्य दुर्जटिलोऽपि न इति ख० ।
(१०) एकान्तरा खस्तु खड्गतः इति क० ज० । एकान्तराद्यन्तु खड्गतः इति छ० ।
(११) खड्गन्तु परमेश्वरः इति ख० ।
(१२) अक्षेपमं स्कन्दनं कार्य्य इति क० छ० ज० ।
(१३) काकस्योयच्च पुष्कलमिति ख० छ० । काकस्योपच्चपुष्कलमिति ज० । काकस्योष्टमुपस्कलमिति ख० ।

सन्तारौ तौ तु सञ्चार्य्यौ[(१)] कार्य्यं वा कारणं तथा।
आक्षिप्तमवरोह्यापि[(२)] प्रोक्तमद्यन्तथैव च[(३)] ॥१६॥
द्वादशञ्च कलास्थान[(४)]मेकान्तरगतन्ततः।
प्रेङ्खोलितमलङ्कारमेवंस्वरसमन्वितं[(५)] ॥१७॥
स्वरसंक्रामकाञ्चैव[(६)] ततः प्रोक्तन्तु पुष्कलं[(७)]।
प्रक्षिप्तमेव कलया पादानीतरयोभवेत्[(८)] ॥१८॥
द्विकलं वा यथा भूतं यत्तत् ह्राषितमुच्यते[(९)]।
उच्चारादिस्वरारूढ़ा[(१०)] तथा चाष्टस्वरान्तरं[(११)] ॥१९॥
यस्तु स्यादवरोहोवा[(१२)] तारतोमन्द्रतोऽपि वा।
एकान्तरहिता ह्येते तमेव स्वरमन्ततः[(१३)] ॥२०॥

---

(१) सवार्य्यौ इति क०। स वर्य्यौ इति ज०। ससन्तधौ तु संयानौ इति ख०।
(२) आक्षिप्तवानाह्यापीति क० ज०।
(३) पोक्तमद्यस्तथैव चेति ख०।
(४) द्वादशपञ्चकलास्थानमिति ख०।
(५) प्रोच्छितव्य मनङ्कारमेवं स्वरसन्निभमिति ख०।
(६) स्वरासंक्रामकाञ्चेति ख०।
(७) अत्र क० ज० पुस्तकेषु अर्थशुन्यवाक्यानि विद्यन्ते।
(८) पादानान्तरयोभवेदिति ख० छ०।
(९) यत्तङ्काषितमुच्यते इति ख० छ०।
(१०) विस्ववारूपः इति ख०।
(११) चाष्टस्वरात् परमिति क० ज०। चाष्टस्वरात पग्रमिति छ०।
(१२) वायः स्यादेवरोहोधा इति क० ज०। वायः स्वदेवरोहोवा इति छ०।
वायव्यां वयसोहोमा इति ख०।
(१३) स्वरसन्तत इति क० छ० ज०। सर्व्वे ह्येते वसुवसन्ततः। इति ख०।

मच्छिप्रच्छेदनोनाम[१] चतुष्कलगणः स्मृतः ।
अलङ्कारा भवन्त्येते त्रिंशच्चे वै प्रकीर्त्तिताः ।
वर्णस्थानप्रयोगेण कलामात्राप्रमाणतः ॥२१॥
संस्थानञ्च प्रमाणञ्च विकारोलक्षणन्तथा ।
चतुर्विधमिदं ज्ञेय[२]मलङ्कारप्रयोजनं ॥२२॥
यथात्मनोह्यलङ्कारो[३]विपर्यस्तोऽतिगर्हितः ।
वर्णमेवाप्यलंकर्त्तुं विषमं ह्यात्मसम्भवात्[४] ॥२३॥
नानाभरणसंयोगाद्यथा नार्या विभूषणं ।
वर्णस्य चैवालङ्कारो[५]विपर्यस्तोऽतिगर्हितः ॥२४॥
न पादे कुण्डले दृष्टे न कण्ठे रसना यथा ।
एवमेव ह्यलङ्कारोविपर्यस्तोविगर्हितः ॥२५॥
क्रियमाणोऽप्यलङ्कारो[६] रागं यस्यैव दर्शयेत् ।
यथोद्दिष्टस्य मार्गस्य कर्त्तव्यस्य विधीयते ॥२६॥
लक्षणं पर्य्यवस्थापि वर्णिकाभिः प्रवर्त्तनं ।
यथातथ्येन वक्ष्यामि मासोद्भवमुखोद्भवे[७] ॥२७॥
त्रयोविंशत्यशीतिस्तु तेषामेतद्विपर्य्ययः ।

---

(१) मच्छिप्रच्छेदजोनाम इति क० ज० । सच्छिप्रच्छेदनोनाम इति ख० ।
(२) चतुर्विधञ्च संस्थानमिति ख० ।
(३) वर्णस्य चैवालङ्कारो इति ख० ।
(४) ह्यात्मसम्भव इतिपाठोयुक्तः ।
(५) अत्र विन्यस्तोऽतिमनोहर इतिपाठोवक्तुं समुचितः ।
(६) क्रियमाणेऽप्यलङ्कारे इतिपाठोऽन्विताथी दृश्यते ।
(७) मासोद्भवत्तदुद्भवे इति ख० ।

षड्जपञ्चोऽपि तत्त्वादौ मध्योहीनस्वरोभवेत् ॥२८॥
षड्जमध्यमयोश्चैव ग्रामयोः पर्य्ययस्तथा ।
मानोयोत्तरमन्दस्य[१] षड़ेवाऽत्राविकस्य[२] च ॥२९॥
स्वरात्वंप्रत्ययश्चैव[३] सर्व्वेषां प्रत्ययः स्मृतः ।
अनुगम्य वहिर्गीतं[४] विज्ञातं पञ्चदैवतं ॥३०॥
गोरूपाणां[५] पुरस्तात्तु मध्यमांशस्तु पर्य्ययः ।
तयोर्विभागोगीतानां लावण्य[६]मार्गसंस्थितः ॥३१॥
अनुषंगं मयोद्दिष्टं स्वसारश्च स्वरान्तरं ।
पर्य्ययः संप्रवर्त्तेत सप्तस्वरपदक्रमं ॥३२॥
गान्धारांशेन गीयन्ते चत्वारि मद्रकानि च[७] ।
पञ्चमोमध्यमश्चैव धैवते तु[८] निषादजेः ।
षड्जर्षभैश्च[९] जानीमोमद्रकेष्वेव नान्तरे ॥३३॥

---

(१) ह्युत्तरमन्द्रस्येतिपाठः समीचीनः ।
(२) अत्र क० ख० ङ० ज० पुस्तके अर्थशून्यपाठत्रयं वर्त्तते । यथा, षड़ेवोन्नावकस्य च, षोड़ेवोत्रविकस्य च, षड़ेवाचावकस्य च । षड़ेवोन्नावकस्य च इत्यत्र षड़ेवोन्नायकस्य चेतिपाठः कथञ्चित् सङ्गतोभवेत् ।
(३) स्वराणां प्रत्ययश्चैवेतिपाठः समीचीनः ।
(४) वहिर्गीतामिति ख० ।
(५) अत्र नगोनामिति क० ङ० । नगोनामित्यत्र नागानामितिपाठः सम्भवति ।
(६) अत्र क० ज० पुस्तके लानण्यो । ङ०पुस्तके लावण्येत्यसम्बद्धपाठो-वर्त्तते ।
(७) अत्र क० ख० ङ० ज० पुस्तके चत्वारो इतिभ्रमात्मकपाठोऽस्ति ।
(८) धैवतस्तु इतिपाठः सङ्गतः ।
(९) क० ख० ग० ङ० ज० पुस्तकेषु षड्वर्षभैश्चेति अर्थविहीनपाठोऽस्ति ।

द्वे चापरान्तिके विद्यात् द्वयमुल्लोप्यकस्य तु(१) ।
प्राकृते वैणवैश्चैव गान्धारांशे प्रयुज्यते ॥ ३४ ॥
पदस्य तु त्रयं रूपं(२) सप्तरूपन्तु कौशिकं ।
गान्धारांशेन कार्त्स्न्येन पर्य्ययस्य विधिः स्मृतः ।
एवञ्चैव क्रमोदिष्टोमध्यमांशस्य मध्यमः ॥ ३५ ॥
यानि गीतानि प्रोक्तानि रूपेण तु विशेषतः ।
तत्तु सप्तस्वरं कार्य्यं सप्तरूपञ्च कौशिकं ॥ ३६ ॥
अङ्गदर्शनमित्याहुर्म्माने द्वे समके तथा(३) ।
द्वितीयभावाचरणा(४) मात्रा नाभिप्रतिष्ठिता ॥ ३७ ॥
उत्तरे च प्रकृत्येवं मात्रा तल्लीयते तथा ।
हन्तारः(५) पिण्डकोयत्र मात्रायां नातिवर्त्तते(६) ॥ २८ ॥
पादेनैकेन मात्रायां पादानामनिवीरणा(७) ।
संख्यायाश्चोपहननं तत्र यान(८)मिति स्मृतं ॥ ३९ ॥

---

(१) अत्र क० ख० ङ० ज० एषु चतुर्षु पुस्तकेष अर्थशून्यपाठत्रयं वर्त्तते । यथा, द्वेषावरन्तिके विद्याद्वयमुल्लोप्यकस्य तु, द्वे वापरन्तिके विद्याद्वयमुल्लोप्यकस्य तु, वमसर्गाप्यकस्य तु ।

(२) पदस्वरूपं रूपस्तु इति ख० ङ० ।

(३) ममके तथेति ख० ङ० ।

(४) अत्र क० ख० ङ० ज० पुस्तकेषु त्रयोऽर्थरहितपाठाः सन्ति । यथा, द्वितीयभावायना, द्वितीयभाषा चवना, द्वितीयभावा यदि ना ।

(५) हन्तारो इति क० ङ० ज० ।

(६) न निवर्त्तते इति ख० ।

(७) पादानामभिधारणा इति ख०। पादानामनिवीरणा इतिपाठः समीचीनः।

(८) तत्र घातमिति ख० ।

द्वितीयं पादभङ्गञ्च[१] ग्रहेणाभिप्रतिष्ठितं ।
पूर्व्वमष्टतृतीये तु द्वितीयञ्चापरीतके[२] ॥४०॥
अर्द्धेन पादसाम्यस्य[३] पादभागाच्च पञ्चके[४] ।
पादभागं सपादं तु प्रकृत्यामपि संस्थितं ॥४१॥
चतुर्थमुत्तरे चैव मद्रवत्यां च मद्रके ।
मद्रके दक्षिणस्यापि यथोक्ता वर्त्तते कला ॥४२॥
पूर्व्वमेवानुयोगन्तु द्वितीया बुद्धिरिष्यते ।
पादौ चाहरणञ्चास्मत् पारं नात्र विधीयते ॥४३॥
एकत्वमुपयोगस्य[५] द्वयोर्यद्धि द्विजोत्तम ।
अनेकसमवायस्तु पताकाहरिणं स्मृतं ॥४४॥
तिसृणाञ्चैव वृत्तीनां वृत्तौ वृत्ता च दक्षिणा ।
अष्टौ तु समवायास्ते सौवीरा मूर्च्छना तथा ।
कुशत्यनुत्तरः[६] सत्यं सप्तसत्त्वस्वरं तु यः[७] ॥४५॥

इति श्रीमहापुराणे वायुप्रोक्ते गीतालङ्कारनिर्द्देशोनाम पञ्चविंशोऽध्यायः समाप्तः ॥

---

(१) पादभागञ्च इति ख० ग० ।
(२) चापराङ्गिके इति ख० चापराङ्गिकमिति ग० । चापरान्तिके इति ङ० ।
(३) पादसामस्येति क० ङ० ज० ।
(४) पादभागाय चम्पके इति ख० ।
(५) एकत्वमभ्युपयोगस्येति क० ज० । एकस्तुमुत्तयोगस्येति ख० ग० ।
(६) कृशन्यामुत्तर इति ङ० ज० ।
(७) पूर्णां सप्तसुवर्च्चसः इति ख० ग० ।

अथ षड्विंशोऽध्यायः ।

वैवस्वतमनुवंशवर्णनं ।

[१]सूत उवाच । ककुद्मिनस्तु तं लोकं रैवतस्य गतस्य ह ।
हताः पुण्यजनैः सर्व्वा राक्षसैः सा कुशस्थली ॥१॥
तद्वै भ्रातृशतं तस्य धार्म्मिकस्य महात्मनः ।
निबध्यमाना[२] रक्षोभिर्दिशः संप्राद्रवन् भयात् ॥२॥
तेषान्तु ते भयाक्रान्ताः क्षत्रियास्तत्र तत्र हि ।
अन्ववायस्तु[३] सुमहान् महांस्तत्र द्विजोत्तमाः ॥३॥
प्रयता[४] इतिविख्याता दिक्षु सर्व्वासु धार्म्मिकाः ।
धृष्टस्य धार्ष्टकं क्षत्रं रणधृष्टं[५] बभूव ह ॥४॥
त्रिसाहस्रन्तु सगणं क्षत्रियाणां महात्मनां ।
नभगस्य च दायादोनाभागोनाम वीर्य्यवान् ॥५॥
अम्बरीषस्तु नाभागिर्विरूपस्तस्य चात्मजः ।
पृषदश्वोविरूपस्य तस्य पुत्रोरथीतरः[६] ॥६॥

---

(१) सूत उवाच इत्यतः प्राक् ख० ग० पुस्तके एतच्छ्लोकार्द्धमस्ति । क्षितिशाखासुतं तस्य धार्म्मिकस्य महात्मनः । किन्तु पूर्व्वापरसङ्गतिविरहादपपाठ एव ।
(२) ते बध्यमाना इति च० ङ० छ० ।
(३) अनुवादस्तु इति ख० ग० ।
(४) आयाता इति ङ० च० ।
(५) क्षेत्रं वार्ष्णष्टमिति ख० ग० ।
(६) रथोत्तर इति क० ज० । रथीनलः इति ख० ।

एते क्षत्रप्रसूता वै पुनश्चाङ्गिरसः स्मृताः ।
रथीतराणां प्रवराः क्षात्रोपेता द्विजातयः ॥७॥
क्षुवतस्तु मनोः पूर्व्वमिक्ष्वाकुरभिनिःसृतः ।
तस्य पुत्रशतं त्वासीत् इक्ष्वाकोर्भूरिदक्षिणं ॥८॥
तेषां ज्येष्ठो(१) विकुक्षिश्च नेमिर्दण्डश्च ते त्रयः ।
शकुनिप्रमुखास्तस्य पुत्राः पञ्चाशत(२)स्तु ते(३) ॥९॥
उत्तरापथदेशस्य रक्षितारो महीक्षितः ।
चत्वारिंशत्तथाष्टौ च दक्षिणायाञ्च ते दिशि ॥१०॥
विंशतिप्रमुखास्ते तु दक्षिणापथरक्षिणः ।
इक्ष्वाकुस्तु विकुक्षिं वै अष्टकायामथादिशत् ॥११॥
राजोवाच। मांसमानय श्राद्धेयं मृगान् हत्वा महाबल ।
श्राद्धमद्य नु कर्तव्यमष्टकायां न संशयः ॥१२॥
स गतस्तु मृगव्यां वै वचनात्तस्य धीमतः ।
मृगान् सहस्रशो हत्वा परिश्रान्तश्च वीर्य्यवान् ।
भक्षयच्छशकन्तत्र विकुक्षिर्मृगयाङ्गतः ॥१३॥
आगते स विकुक्षौ तु समांसे सहसैनिके ।

---

(१) ज्येष्ठो इति ग० च० ङ० । खेद्यो इति क० । खेख्यो इति क० ।
(२) पञ्चाशतः बहुवचनमार्षं । पञ्चाशतः इत्यत्र पञ्चशतः इति पाठः ङ० च० पुस्तके वर्त्तते ।
(३) विकुक्षिस्त्वेत्यादि पञ्चाशतस्तु ते इत्यन्तपाठस्य विनिमये ख० ग० पुस्तके अयं पाठोवर्तते । यथा, विकुक्षी च तथैव च पुनः पुनः । शकुनिः प्रमुखाश्चैव पुत्रांस्तु जगतान्तु वै । इत्यसपाठएव ।

वसिष्ठश्चोदयामास मांसं प्रोक्षयतामिति[१] ॥१४॥
तथेति चोदितोराज्ञा विधिवत्समुपस्थितः ।
स दृष्ट्वोपहतं मांसं क्रुद्धोराजानमब्रवीत् ॥१५॥
चूद्रेणोपहतं मांसं पुत्रेण तव पार्थिव ।
अभक्षादभोज्यं वै तव मांसं महाद्युते ॥१६॥
शशोदुरात्मना पूर्वमरण्ये भक्षितोऽनघ ।
तेन मांसमिदं दुष्टं पितॄणां नृपसत्तम ॥१७॥
इक्ष्वाकुस्तु ततः क्रुद्धोविकुक्षिमिदमब्रवीत् ।
पितृकर्म्मणि निर्द्दिष्टोमया त्वं मृगयाङ्गतः ।
शशं भक्षयसेऽरण्ये निर्घृणः पूर्व्वमद्य नु ॥१८॥
तस्मात्परित्यजामि त्वां गच्छ त्वं स्वेन कर्म्मणा ।
एवमिक्ष्वाकुना त्यक्तोवसिष्ठवचनात् सुतः ॥१९॥
इक्ष्वाकौ संस्थिते तस्मिन् शशी स[२] पृथिवीमिमां ।
प्राप्तः परमधर्म्मात्मा स चायोध्याधिपोऽभवत् ॥२०॥
तदाकरोत्स राज्यं वै वसिष्ठपरिनोदितः[३] ।
ततस्तेनेन सा पूर्णा राज्यावस्था महीपतेः ॥२१॥
कालेन गतवांस्तत्र स च न्यूनतराङ्गतिं ।
ज्ञात्वैवमेतदाख्यानं ना विधिर्भक्षयेत्तु[४] वै ॥२२॥

---

(१) प्रोक्षीयतामिति, ख० ग० ङ० च० पुस्तकेषु पाठोवर्त्तते ।
(२) शशाद इति ख० ग० ङ० च० छ० ।
(३) वशिष्ठपरिचोदितः इति ख० ।
(४) भक्षये नु इति च० ङ० ।

मां स भक्षयितामुत्र यस्य मांसमिहाद्म्यहं ।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥२ ३॥
शशादस्य तु दायादः ककुत्स्थोनाम वीर्य्यवान् ।
इन्द्रस्य वृषभूतस्य ककुत्स्थोजायते पुरा ॥२ ४॥
पूर्व्वमाड़ीवके(१) युद्धे ककुत्स्थ(२)स्तेन स स्मृतः ।
अनेनास्तु ककुत्स्थस्य पृथुरामेन सः(३) स्मृतः ॥२ ५॥
वृषदश्वः(४) पृथोः पुत्रस्तस्मादन्ध्रस्तु वीर्यवान् ।
आंध्रस्तु यवनाश्वस्तु श्रावस्तस्तस्य चात्मजः ॥२ ६॥
जज्ञे श्रावस्तकोराजा श्रावस्ती येन निर्मिता ।
श्रावस्तस्य तु दायादोवृहदश्वोमहायशाः ॥२ ७॥
वृहदश्वसुतश्चापि कुवलाश्व इति श्रुतिः ।
यः स धुन्धुबधाद्राजा धुन्धुमारत्वमागतः ॥२ ८॥
ऋषय ऊचुः । धुन्धुबधं महाप्राज्ञ श्रोतुमिच्छामि विस्तरात् ।
यदर्थं कुवलाश्वः स धुन्धुमारत्वमागतः ॥२ ९॥
सूत उवाच । वृहदश्वस्य पुत्राणां सहस्राण्येकविंशतिः ।
सर्वे विद्यासु निष्णाता बलवन्तोदुरासदाः ॥३ ०॥

---

(१) पूर्व्वं गाण्डीवके इति क० ।
(२) ककुत्स्थ इति पाठः आदर्शपुस्तकमात्रेऽस्ति ।
(३) पृथुवानेन च इति ख० । एतच्छ्लोकार्द्धं ग० पुस्तके नास्ति । पृथुरोनेनसः इति ङ० । पृथुरोमेन स इति क्ष० । एते यावन्तः पाठा लिपिकरप्रमादजनिताः । अत्रायं पाठः सम्भाव्यते । अनेनैव ककुत्स्थेन जातः पुत्रः पृथुः स्मृतः ।
(४) वृषदश्वः इति क० क्ष० ।

बभूवुर्द्धार्मिकाः सर्वे यज्वानोभूरिदक्षिणाः ।
कुवलाश्वं महावीर्यं शूरमुत्तमधार्मिकम् ॥ ३ १॥
बृहदश्वोऽभ्यषिञ्चत्तं तस्मिन् राष्ट्रे नराधिपः ।
पुत्रसङ्क्रामितश्रीस्तु वनं राजा विवेश ह ॥ ३ २॥
बृहदश्वं महाराजं शूरमुत्तमधार्म्मिकं ।
प्रयातं तमुतङ्कस्तु ब्रह्मर्षिः प्रत्यवारयत् ॥ ३ ३॥

उत्तङ्क उवाच । भवतो[१] रक्षणं[२] कार्य्यं तत्तावत् कर्तुमर्हति ।
निरुद्विग्नस्तपः कर्तुं[३] न हि शक्नोमि पार्थिव ॥ ३ ४॥
ममाश्रमसमीपेषु समेषु मरुधन्वसु[४] ।
समुद्रोबालुकापूर्णस्तत्र तिष्ठति भूपते[५] ॥ ३ ५॥
देवतानामबध्यस्तु महाकायोमहाबलः ।
अन्तर्भूमिगतस्तत्र बालुकान्तर्हितोमहान् ॥ ३ ६॥
समनोस्तनयः क्रूरोधुन्धुर्नाम सुदारुणः ।
शेतं[६] लोकविनाशाय तप आस्थाय दारुणं ॥ ३ ७॥
संवत्सरस्य पर्य्यन्ते स निश्वासं प्रमुञ्चति[७] ।

---

(१) भवता इति क० ङ० च० छ० ज० । एतत्पाठोन समीचीनः ।
(२) इवेतावेत्तणमिति ख० ग० । इति तु भ्रान्तानां पाठः ।
(३) तपस्कर्तुमिति क० ङ० च० ज० ।
(४) परितस्तु वै इति छ० ज० ।
(५) उज्जानक इति श्रुतिः इति ङ० च० ।
(६) शेते इति ङ० च० । अयं पाठोलेखकप्रमादजनित एव ।
(७) समनोस्तनय इत्यादि स निश्वासं प्रमुञ्चति इत्यन्तपाठः क० छ० ज० पुस्तकेषु न विद्यते ।

यदा तदा मही तत्र चलति स्म सकानना[१] ॥३८॥
तस्य निश्वासवातेन रज उद्धूयते महत् ।
आदित्यपथमावृत्य सप्ताहं भूमिकंपनं ॥३९॥
सविष्फुलिङ्गं सज्वालं सधूममतिदारुणं ।
तेन राजन्न शक्नोमि तस्मिन् स्थातुं स्व आश्रमे ॥४०॥
तं वारय[२] महाबाहो लोकानां हितकाम्यया ।
तेजस्ते सुमहाविष्णुस्तेजसाप्याययिष्यति ॥४१॥
लोकाः स्वस्था भवंत्वद्य तस्मिन् विनिहतेऽसुरे ।
त्वं हि तस्य वधायाद्य समर्थः पृथिवीपते ॥४२॥
विष्णुना च वरोदत्तोमम पूर्व्वं ततोनघ ।
न हि धुन्धुर्महावीर्य्यस्तेजसाल्पेन शक्यते ॥४३॥
निर्द्दग्धुं पृथिवीपाल अपि वर्षशतैरिह ।
वीर्य्यं हि सुमहत्तस्य देवैरपि दुरासदं ॥४४॥
एवमुक्तस्तु राजर्षिरुतङ्केन महात्मना ।
कुवलाश्वं सुतं प्रादात्तस्मिन् धुन्धुनिवारणे ॥४५॥
राजा संन्यस्तशस्त्रोहमयन्तु तनयोमम ।
भविष्यति द्विजश्रेष्ठ धुन्धुमारोन संशयः ॥४६॥
स तं व्यादिश्य तनयं धुन्धुमारणमुद्यतं[३] ।

---

(१) ममाश्रमसमीपेषु इत्यादि चलति स्म सकानना इत्यन्तपाठः ख० ग० पुस्तकयोर्नास्ति ।
(२) तस्वारय इति क० ज० ।
(३) धुन्धुमारणा उद्यतं इतिपाठोऽत्र सङ्गतार्थः ।

जगाम पर्व्वतायैव तपसे शंसितव्रतः ॥४७॥
कुवलाश्वस्तु धर्म्मात्मा पितुर्वचनमास्थितः[१] ।
सहस्रैरेकविंशत्या पुत्राणां सह पार्थिवः ।
प्रायादुत्तंकसहितोधुन्धोस्तस्य निवारणे ॥४८॥
तमाविशत्ततोविष्णुर्भगवान् स्वेन तेजसा ।
उतङ्कस्य नियोगात्तु लोकानां हितकाम्यया ॥४९॥
तस्मिन् प्रयाते दुर्द्धर्षे दिवि शब्दोमहानभूत् ।
अद्यप्रभृत्येष नृपोधुन्धुमारोभविष्यति ॥५०॥
दिव्यैः पुष्पैश्च तं देवाः सममंसत अद्भुतं[२] ।
स गत्वा पुरुषव्याघ्रस्तनयैः सह वीर्य्यवान् ॥५१॥
समुद्रं खनयामास बालुकार्णवमव्ययं ।
नारायणेन राजर्षिस्तेजसाप्यायितोहि स[३] ।
बभूवातिबलोभूय उतङ्कस्य वशे स्थितः ॥५२॥
तस्य पुत्रैः खनद्भिश्च वालुकान्तर्हितस्तदा[४] ।
धुन्धुरासादितस्तत्र दिशमाश्रित्य पश्चिमां ॥५४॥
मुखजेनाग्निना क्रुद्धोलोकानुद्वर्त्तयन्निव ।

---

(१) माश्रितः इति ख० ।
(२) समं मास तदुद्भुतमिति ङ० च० । समं मासस्तु तद्भुतमिति क० छ० ज० । सगन्धर्व्वास्तदद्भुतमिति ख० ग० । एते तावन्तः पाठा लेखकप्रमादोत्पन्नाः ।
(३) हि स इत्यत्र रिह इतिभ्रमात्मकपाठोङ० च० छ० पुस्तकेषु दृश्यते ।
(४) नारायणेन राजर्षिरित्यादि बालुकान्तर्हितस्तदेति सार्द्धैकश्लोको ङ० च० छ० व्यतिरिक्तादर्शपुस्तकेषु न दृश्यते ।

वारि शुश्राव योगेन महोदधिरिवोदधे ॥५५॥
सोमस्य सोमपश्रेष्ठ धारोर्म्मिकलिलोमहान्।
तस्य पुत्रास्तु निर्द्दग्धास्त्रिभिर्न्नास्तु राक्षसाः ॥५६॥
ततः स राजातिबलोधुन्धुबन्धुनिवर्हणः।
तस्य वारिमयं वेगमपिवत् स नराधिपः ॥५७॥
योगी योगेन वह्निं वा शमयामास वारिणा[1]।
निरस्यन्तं महाकायं बलेनोदकराक्षसं ॥५८॥
उत्तङ्कं दर्शयामास कृतकर्म्मा नराधिपः।
उत्तङ्कस्तु वरं प्रादात्तस्मै राज्ञे महात्मने ॥५९॥
अदात्तस्याक्षयं वित्तं शत्रुभिश्चाप्यधृष्यतां।
धर्म्मे रतिञ्च सततं स्वर्गे वासं तथाक्षयं।
पुत्राणां चाक्षयाँल्लोकान् स्वर्गे ये[2] राक्षसाहताः॥६०॥
तस्य पुत्रास्त्रयः शिष्टा दृढ़ाश्वो[3] ज्येष्ठ उच्यते।
भद्राश्वः कपिलाश्वश्च कनीयांसौ तु तौ स्मृतौ ॥६१॥
धौंधुमारिर्दृढाश्वस्तु[4] हर्य्यश्वस्तस्य चात्मजः।
हर्य्यश्वस्य निकुम्भोऽभूत् क्षत्रधर्म्मरतः सदा ॥६२॥

---

(१) अत्र क० ख० ङ० ज० पुस्तकेषु भ्रान्तियुक्तपाठोवर्त्तते। यथा, धारणाः, धारिणा। ग० ङ० च० पुस्तकेषु योगी योगेनेतिश्लोकार्द्धस्य सद्भावोनास्ति।
(२) ते इति च० छ०। ङ० पुस्तके स्वर्ग्येते इति अर्थशून्यपाठोवर्त्तते। क० ग० ज० पुस्तकेषु पुत्राणामितिश्लोकार्द्धस्याभावोदृश्यते।
(३) दृढ़ास्यो इति क० ज०।
(४) ख० ग० पुस्तकयोः बन्धवा विदृढ़स्चैति अर्थरहितपाठोवर्त्तते।

संहताश्वोनिकुम्भस्य अुतोरणविशारदः[१] ।
कृशाश्वश्चाकयाश्वश्च[२] संहताश्वसुतावुभौ ॥६३॥
तस्य पत्नी हैमवती सतां मतिदृषद्वती[३] ।
विख्याता त्रिषु लोकेषु पुत्रस्तस्याः प्रसेनजित् ॥६४॥
युवनाश्वः सुतस्तस्य त्रिषु लोकेष्वतिद्युतिः ।
अत्यन्तधार्मिको[४] गौरी तस्य पत्नी पतिव्रता ॥६५॥
अभिशस्ता तु सा भर्त्रा नदी सा बाहुदा कृता ।
तस्यास्तु गौरिकः पुत्रश्चक्रवर्त्ती बभूव ह ॥६६॥
मान्धाता यौवनाश्वोवै त्रैलोक्यविजयी नृपः ।
अत्राप्युदाहरन्तीमौ श्लोकौ पौराणिका द्विजाः ॥६७॥
यावत् सूर्य उदयति यावच्च प्रतितिष्ठति ।
सर्वं तत् यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥६८॥
अत्राप्युदाहरन्तीमं श्लोकं वंशविदोजनाः ।
यौवनाश्वं महात्मानं यज्वानममितौजसं ।
मान्धाता तु तनुर्विष्णोः पुराणज्ञाः प्रचक्षते ॥६९॥
तस्य चैत्ररथी भार्य्या शशविन्दोः सुताभवत् ।

---

(१) क० ङ० च० छ० ज० पुस्तकेषु भ्रान्तियुक्तपाठोस्तः । यथा, श्रोतोरणविशारदः, श्रुतोरणविशारदः । कृतोरणविशारदः इति ख० ।
(२) चाक्षशाश्वश्चेति क० ङ० च० छ० ज० ।
(३) माता दृषद्वतीति क० छ० ज० । सतां माता दृढ़व्रता इति ख० । सतामतिदृषद्वतीति ङ० । माता इत्यत्र मान्या इति पाठोयुक्तः ।
(४) अत्यन्तधार्म्मिका इति ख० । अन्तिमानात्मजा इति ङ० च० ।

साध्वी विन्दुमती नाम रूपेणाप्रतिमा भुवि ॥७०॥
पतिव्रता च ज्येष्ठा[१] च भ्रातॄणामयुतस्य सा ।
तस्यामुत्पादयामास मान्धाता त्रीन् सुतान् प्रभुः ॥७१॥
पुरुकुत्समम्बरीषं मुचुकुन्दञ्च[२] विश्रुतं ।
अम्बरीषस्य दायादो युवनाश्वोऽपरः स्मृतः ॥७२॥
हरितो युवनाश्वस्य[३] हारिताः शूरयः[४] स्मृताः ।
एते ह्यङ्गिरसः पुत्राः क्षात्रोपेता[५] द्विजातयः ॥७३॥
पुरुकुत्सस्य दायादस्त्रसदस्यु[६] र्महायशाः ।
नर्मदायां समुत्पन्नः सम्भूतस्तस्य चात्मजः ॥७४॥
सम्भूतस्यात्मजः पुत्रो ह्यनरण्यः प्रतापवान् ।
रावणो निहतो[७] येन त्रिलोकीविजये[८] पुरा ॥७५॥
त्रसदश्वोऽनरण्यस्य हर्य्यश्वस्तस्य चात्मजः ।
हर्य्यश्वात्तु दृषद्वत्यां जज्ञे वसुमतो नृपः ॥७६॥
तस्य पुत्रोऽभवद्राजा त्रिधन्वा नाम धार्म्मिकः ।

---

(१) श्रेष्ठा इति छ० ।

(२) मुचकुन्दश्चेति ङ० ।

(३) हरितो युवनाश्वस्य इत्यादिसार्द्धैकश्लोकं क० छ० ज० पुस्तकेषु न विद्यते ।

(४) भूरयः इति ङ० च० । नारीताः सूरयः ख० ग० । एतावर्थशून्य-पाठावुपलभ्येते ।

(५) क्षत्रोपेता इति ख० ङ० च० । किन्तु न सम्यक् ।

(६) स एदास्युरिति ख० ।

(७) न हतो इति ङ० च० । निर्ज्जितो इति ख० ।

(८) त्रिलोकविजये क० ख० ङ० च० छ० ज० ।

आसीत् त्रैधन्वनस्यापि विद्वांस्त्रय्यां रणप्रभुः[(१)] ॥७७॥
तस्य सत्यव्रतोनाम कुमारोऽभून्महाबलः ।
तेन भार्या विदर्भस्य हृता हत्वा दिवौकसान् ॥७८॥
पाणिग्रहणमन्त्रेषु[(२)] निष्ठांसम्प्रापितेष्विह ।
विष्णुवृद्धः सुतस्तस्य विष्णुवृद्धायतः स्मृतः[(३)] ।
एते ह्याङ्गिरसः पुत्राः क्षात्रोपेताः समाश्रिताः ॥७९॥
कामाद्बलाच्च मोहाच्च सङ्कर्षणबलेन च[(४)] ।
भाविनोऽर्थस्य च बलात् तत्कृतं तेन धीमता ॥८०॥
तमधर्म्मेण संयुक्तं पिता त्रयीगुणोऽत्यजत्[(५)] ।
अपध्वंसेति बहुशोऽवदत् क्रोधसमन्वितः ॥८१॥
पितरं सोऽब्रवीदेकः क्व गच्छामीति वै मुहुः ।
पिता चैनमथोवाच स्वपाकैः सह वर्त्तय ॥८२॥
नाहं पुत्रेण पुत्रार्थी त्वयाद्य कुलपांसन ।
इत्युक्तः स निराक्रामन्नगराद्वचनाद्विभो ॥८०॥

---

(१) निरणास्त्रयः रणप्रभुरिति क० । आसीत् सात्रधनुस्यापि विस्तुर्यारुणः प्रभुरिति ख० । ग० पुस्तके एतच्छ्लोकार्द्धस्य सद्भावोनास्ति । विद्वास्त्रय्यारुणप्रभुरिति ङ० च० । विद्वांरणास्त्रयरणप्रभुरिति छ० । विरणास्त्रयः रणप्रभुरिति ज० । एते भ्रान्तानां पाठाः ।

(२) पाणिग्रहणमन्त्रेष्वितिश्लोकार्द्धस्य पूर्व्वापरसङ्गतिविरहात् अत्र श्लोकः श्लोकार्द्धं वा पतितत्वेनोपलभ्यते ।

(३) विष्णुवृद्धायतोऽभवदितिपाठः समीचीनः ।

(४) संहर्षेण बलेन च इति ख० । संहर्षणबलेन वा इति ङ० च० छ० । सङ्कहर्षणबलेन च इति ज० । आदिमौ द्वावपपाठौ अन्तिमोभ्रमसंयुक्तः ।

(५) त्रयगुणेत्यजत् इति क० । त्रय्यारुणोभवदिति ख० ङ० च० । त्रयतुणात्यजत् इति छ० ज० । एते भ्रान्तिमतां पाठाः ।

न चैनं धारयामास वसिष्ठोभगवानृषिः ।
स तु सत्यव्रतोधीमान् श्वपाकावसथान्तिकं ।
पित्रा मुक्तोऽवसद्वीरः पिता चास्य वनं ययौ ॥८४॥
तस्मिंस्तु विषये तस्य नावर्षत् पाकशासनः ।
समा द्वादश संपूर्णास्तेनाधर्म्मेण वै तदा ॥८५॥
दारांस्तु तस्य विषये विश्वामित्रोमहातपाः ।
सन्न्यस्य सागरानूपे चचार विपुलं तपः ॥८६॥
तस्य पत्नी गले बध्वा मध्यमं पुत्रमौरसं ।
शिखया(१) भरणार्थाय व्यक्रीणाद्गोशतेन(२) वै ॥८७॥
तं तु बद्धङ्गले दृष्ट्वा विक्रीतं तं(३) नरोत्तमः ।
महर्षिपुत्रं धर्म्मात्मा मोक्षयामास सुव्रतः ॥८८॥
सत्यव्रतोमहाबुद्धिर्भरणं तस्य चाकरोत् ।
विश्वामित्रस्य तुष्ट्यर्थमनुकंपार्थमेव च ॥८९॥
सोऽभवद्गालवोनाम गले बद्धोमहातपाः ।
महर्षिः कौशिकस्तातस्तेन(४) वीर्य्येण मोचितः ॥९०॥
तस्य व्रतेन भक्त्या च कृपया च प्रतिज्ञया ।

---

(१) शिष्टानामिति ख० ।

(२) विक्रीणाति प्रतेन इति ख० । अयन्त्वपपाठः ।

(३) व्यक्रीणान्तमिति क० ज० । अयन्तु न सम्यक् । विक्रीणान्तमिति ख० । अस्मिन् पक्षे गलेबद्धमिति विक्रीणान्तमिति च स्त्रीजनस्य विशेषणं । विक्रीणान्तमितिपाठे पूर्व्वश्लोके व्यक्रीणादित्यत्र विक्रेतुमितिपाठः सङ्गतार्थः ।

(४) स्तस्मात्तेन इति ख० ।

विश्वामित्रकलत्रञ्च बभार विनये स्थितः ॥९१॥
हत्वा मृगान् वराहांश्च महिषांश्च वनेचरान् ।
विश्वामित्राश्रमाभ्यासे तन्मांसमपचत्ततः ॥९२॥
उपांशुव्रतमास्थाय दीक्षां द्वादशवार्षिकीं ।
पितुर्नियोगादभजन्नृपे तु वनमाश्रिते ॥९३॥
अयोध्याञ्चैव राज्यञ्च तथैवान्तःपुरं मुनिः ।
याज्योपाध्यायसंयोगात् वशिष्ठः परिरक्षितः ॥९४॥
सत्यव्रतस्तु बाल्यात्तु भाविनोऽर्थस्य वै बलात् ।
वशिष्ठेभ्यधिकं मन्युं धारयामास मन्युना ॥९५॥
पित्रा रुदं[१] तदा राष्ट्रात् परित्यक्तं स्वमात्मजं ।
न वारयामास मुनिः वसिष्ठः कारणेन वै ॥९६॥
पाणिग्रहणमन्त्राणां निष्ठा स्यात् सप्तमे पदे ।
एवं सत्यव्रतस्तान् वै कृतवान् सप्तमे पदे ॥९७॥
जानन् धर्म्मान् वसिष्ठस्तु न च मन्त्रानिहेच्छति ।
इति सत्यव्रते रोषं वशिष्ठोमनसाकरोत् ॥९८॥
गुरुर्बुद्ध्या तु भगवान् वसिष्ठः कृतवांस्तदा ।
न तु सत्यवतोबुध्या[२] उपांशुव्रतमस्य वै ॥९९॥
तस्मिंस्तोपरते योयत्पितुरासीन्[३]महामनाः ।
तेन द्वादशवर्षाणि नावर्षत् पाकशासनः ॥१००॥

---

(१) रुदन्तमिति वक्तव्ये रुदन्नित्यार्षप्रयोगः ।

(२) न तु सत्यव्रतोबुध्या इति श्लोकार्द्धे वाक्यस्य साकाङ्क्षत्वात् समाप्ति-सूचकपदसंयुक्तश्लोकार्द्धाभावोऽत्र वर्त्तते ।

(३) सत्यव्रत आसीन्निति पाठः समीचीनः ।

तेन त्विदानीं बहुधा दीक्षां तां दुर्बलां[१] भुवि।
कुलस्य निष्कृतिः स्वस्य[२] कृतेयञ्च[३] भवेदिति ॥१०१॥
ततोवसिष्ठोभगवान् पित्रा त्यक्तं न्यवारयत्।
अभिषेक्ष्याम्यहं राज्ये पश्चादेनमिति प्रभुः ॥१०२॥
स तु द्वादशवर्षाणि दीक्षान्तामुद्वहन् बली।
अविद्यमाने मांसे तु वसिष्ठस्य महात्मनः ॥१०३॥
सर्व्वकामदुघां धेनुं संददर्श नृपात्मजः।
तां वै क्रोधाच्च मोहाच्च श्रमाच्चैव क्षुधान्वितः ॥१०४॥
दस्युधर्म्मं गतोदृष्ट्वा जघान बलिनां वरः।
स तु मांसं स्वयं चैव विश्वामित्रस्य चात्मजान् ॥१०५॥
भोजयामास तच्छ्रुत्वा वसिष्ठस्तं तदात्यजत्।
प्रोवाच चैव भगवान् वसिष्ठस्तं नृपात्मजं ॥१०६॥
पातये क्रूर हे क्रूर तव शङ्कुमयोमयं।
यदि ते त्रीणि शङ्कूनि न स्युर्हि पुरुषाधम ॥१०७॥
पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च।
अप्रोषितोपयोगाच्च[४] त्रिविधस्ते व्यतिक्रमः ॥१०८॥

---

(१) अत्र क्रियाया ऊहनीयत्वेन दीक्षा सा दुर्ब्बला इति प्रथमान्तपाठो-युक्तः। अथवा श्लोकार्द्धोनिपतितः।
(२) निष्कृतिस्तस्येतिपाठः सुसङ्गतः।
(३) आदर्शपुस्तकमात्रे कृतेपञ्च, कृतेयञ्च इत्यसम्बद्धपाठौ स्तः। अत्र कृतेऽमुष्मिन्निति पाठः सङ्गतार्थः।
(४) अत्र क० ख० ग० ङ० च० ज० पुस्तकेषु भ्रान्तियुक्तपाठा वर्त्तन्ते। यथा, प्रोच्छतौप्रयोगाच्च, प्रोषितोपयोगाच्च, प्रोषितोपायोनमाच्च,

एवं स त्रीणि शङ्कूनि दृष्ट्वा तस्य महातपाः ।
त्रिशङ्कुरिति होवाच त्रिशङ्कुस्तेन स स्मृतः ॥१०९॥
विश्वामित्रस्तु दाराणामागतोभरणे कृते ।
ततस्तस्मै वरं प्रादात्तदा प्रीतस्त्रिशङ्कवे ॥११०॥
छन्द्यमानो(१)वरेणाथ गुरुं वव्रे नृपात्मजः ।
अनावृष्टिभये तस्मिन् गते द्वादशवार्षिके(२) ॥१११॥
अभिषिच्य राज्येपित्र्ये(३) याजयामास तं(४) मुनिः ।
मिषतां दैवतानाञ्च वशिष्ठस्य च कौशिकः ।
सशरीरं तदा तं वै दिवमारोपयत् प्रभुः ॥११२॥
मिषतस्तु वशिष्ठस्य तदद्भुतमिवाभवत् ।
अत्राप्युदाहरन्तीमौ श्लोकौ पौराणिका जनाः ॥११३॥
विश्वामित्रप्रसादेन त्रिशङ्कुर्दिवि राजते ।
देवैः सार्द्धं महातेजानुग्रहात्तस्य धीमतः ॥११४॥

अप्रोच्छितोप्रयोगाच्च, अप्रोषितोप्रयोगाच्च । छ० पुस्तके एतच्छ्लोकार्द्धस्याभावोवर्त्तते ।

(१) लभ्यमानो इति क० ज० । अयन्तु न सम्यक् ।

(२) अनावृष्टिभयस्तस्मिन् गतोद्वादशवार्षिकः इतिपाठोऽत्र साधीयान् । अथवा अत्र श्लोके वव्रे इत्यनेनापेच्छितस्य सत्यव्रतप्रार्थितविषयस्याभावदर्शनात् अस्मात् श्लोकात् परं कतिपयश्लोकपतनं सम्भावनीयं ।

(३) अत्र छन्दोभङ्गात् पितृराज्ये इतिपाठोयुक्तः ।

(४) अत्र क० ख० ग० ङ० च० छ० ज० पुस्तकेषु भ्रमपूर्णपाठाः सन्ति । यथा, अभिषिच्या राज्यपित्र्ये यायानयामास, अभिषिच्ये तदा राज्ये योजनामास, अभिषिच्य तदा राज्ये मोजयामास, अभिषिच्या राज्ये पित्र्ये याचयामास, अभिषिच्य सुराज्ये पित्रे याजयामास, अभिषिच्या राज्ये पित्र्ये यायाजयामास ।

शनैर्यात्यबला रम्या हेमंते चन्द्रमण्डिता ।
अलङ्कृता त्रिभिर्भावैस्त्रिशङ्कुग्रहभूषिता ॥११५॥
तस्य सत्यरता नाम भार्य्या केकयवंशजा ।
कुमारं जनयामास हरिश्चन्द्रमकल्मषं ॥११६॥
स तु राजा हरिश्चन्द्रस्त्रैशङ्कव इति श्रुतः ।
आहर्त्ता राजसूयस्य सम्राडिति परिश्रुतः ॥११७॥
हरिश्चन्द्रस्य तु सुतोरोहितोनाम वीर्य्यवान् ।
हरितोरोहितस्याथ चञ्चुर्हारीत उच्यते ॥११८॥
विजयश्च सुदेवश्च चञ्चुपुत्रौ बभूवतुः ।
जेता सर्व्वस्य चत्रस्य विजयस्तेन स स्मृतः ॥११९॥
रुरुक(१)स्तनयस्तत्र(२) राजा धर्म्मार्थकोविदः ।
रुरुकात् धृतकः पुत्रस्तस्माद्बाहुश्च जज्ञिवान् ॥१२०॥
हैहयैस्तालजङ्घैश्च निरस्तोव्यसनी नृपः ।
शकैर्यवनकांबोजैः पारदैः पल्हवैस्तथा ॥१२१॥
नात्यर्थं धार्म्मिकोभूत् स धर्म्म्ये सत्ययुगे(३) तथा(४) ।
सगरस्तु सुतोबाहोर्जज्ञे सह गरेण वै ।
भृगोराश्रममासाद्य तुर्वेण(५) परिरक्षितः ॥१२२॥

---

(१) नुतुक इति क० ज० । तुतुक इति छ० ।
(२) स्तस्येतिपाठः साधुः ।
(३) धर्म्मे सप्तियुगे इति क० ज० । धर्म्मे सतियुगे इति ख०ङ०च०छ० ।
पाठावेतौ लिपिकरप्रमादजनितौ । एष स्लोकोग०पुस्तके नास्ति ।
(४) यत इति पाठः समीचीनः ।
(५) कुर्व्वेणेति क०छ०ज० । गन्धर्व्वेणेति ख० । अत्र ग०पुस्तके न कश्चित्
पाठोवर्त्तते । परन्त्र और्व्वेणेति पाठदर्शनादत्र और्व्वेणेति पाठोयुक्तः ।

आग्नेयमस्त्रं लब्ध्वा तु भार्गवात् सगरोनृपः ।
जघान पृथिवीं गत्वा तालजङ्घान् सहैहयान् ॥१२३॥
शकानां पल्हवानाञ्च धर्म्मान्निरसदच्युतः[१] ।
क्षत्रियाणां तथा तेषां पारदानाञ्च धर्म्मवित् ॥१२४॥
ऋषय ऊचुः। कथं स सागरोराजा गरेण सह जज्ञिवान् ।
किमर्थञ्च शकादीनं क्षत्रियाणां महौजसां ।
धर्म्मान् कुलोचितान् क्रुद्धोराजा निरसदच्युतः[२] ॥१२५॥
सूत उवाच। बाहोर्व्यसनिनस्तस्य हृतं राज्यं पुरा किल ।
हैहयैस्तालजङ्घैश्च शकैः सार्द्धं समागतैः ॥१२६॥
जवनाः पारदाराश्च काम्बोजाः पल्हवास्तथा ।
हैहयार्थं पराक्रान्ता एते पञ्चगणास्तदा ॥१२७॥
हृतं राज्यं बलीयोभिरेभिः क्षत्रियपुङ्गवैः ।
हृतराज्यस्तदा बाहुः संन्यस्य नु तदा नृपः ।
वनं प्रविश्य धर्म्मात्मा सह पत्न्या तपोचरत् ॥१२८॥
कस्यचित्त्वथ कालस्य तोयार्थं प्रस्थितोनृपः ।
वृद्धत्वाद्दुर्ब्बलत्वाच्च अन्तरा स ममार च ॥१२९॥
पत्नी तु यादवी तस्य सगर्भा पृष्ठातोऽन्वगात्[३] ।
सपत्न्या तु गरस्तस्यै दत्तोगर्भजिघांसया ॥१३०॥
सा तु भर्तुश्चितां कृत्वा वह्निं तां समरोहयत्[४] ।

(१) निरसयत्ततः इतिपाठोविशुद्धः ।
(२) निरसयत् तत इतिपाठोऽत्र प्रयोक्तुं समुचितः ।
(३) पृष्ठतोऽन्वयात् इति ख० ग० ।
(४) समरोहदित्यर्थे समरोहयदित्यार्षः ।

और्वस्तां भार्गवोदृष्ट्वा कारुण्याद्विन्यवर्त्तयत् ॥१२१॥
तस्याश्रमे तु तद्गर्भं सा गरेण तदा सह ।
व्याजायत(१) महाबाहुं सगरं नाम धार्म्मिकं ॥१२२॥
और्वस्तु जातकर्मादीन् कृत्वा तस्य महात्मनः ।
अध्याप्य वेदशास्त्राणि ततोऽस्त्रं प्रत्यपादयत् ॥१२३॥
जामदग्न्यात्तदाग्नेयममरैरपि दुःसहं ।
स तेनास्त्रबलेनैव बलेन च समन्वितः ।
जघान हैहयान् क्रुद्धोरुद्रः पशुगणानिव ॥१२४॥
ततः शकान् सयवनान् काम्बोजान् पारदांस्तथा ।
पल्हवांश्चैव निःशेषान् कर्त्तुं व्यवसितोनृपः ॥१२५॥
ते बध्यमाना वीरेण सगरेण महात्मना ।
वसिष्ठं शरणं सर्व्वे प्रपन्नाः शरणैषिणः ॥१२६॥
वसिष्ठस्तान् तथेत्युक्त्वा समयेन(२) महामुनिः ।
सगरं वारयामास तेषान्दत्त्वाऽभयन्तदा ॥१२७॥
सगरः स्वाम्प्रतिज्ञाञ्च गुरोर्वाक्यं निशम्य च ।
धर्म्मं जघान तेषां वै वेषान्यत्वं चकार ह ॥१२८॥
अर्द्धं शकानांशिरसोमुण्डयित्वा व्यसर्जयत् ।
यवनानां शिरः सर्व्वं काम्बोजानान्तथैव च ॥१२९॥
पारदा मुक्तकेशाश्च पल्हवाः श्मश्रुधारिणः ।

---

(१) जनयामासइत्यर्थे व्यजायत इत्यार्षः ।
(२) वसिष्ठश्चैवमुक्त्वा तु विनयेन महामुनिरिति क० छ० ज० । वसिष्ठ-स्तान् ततोदृष्ट्वा नियमेन तदा मुनिरिति ख० ग० ।

निःस्वाध्यायवषट्कारा: कृतास्तेन महात्मना ॥१४०॥
शका यवनकाम्बोजाः पल्हवाः पारदैः सह ।
केलिस्पर्शा माहिषिका दार्वाश्चोलाः खसास्तथा[१] ॥१४१॥
सर्व्वे ते क्षत्रियगणा धर्म्मस्तेषां निराकृतः ।
वसिष्ठवचनात्पूर्वं सगरेण महात्मना ॥१४२॥
स धर्मविजयी राजा विजित्वेमां वसुन्धरां।
अश्वं विचारयामास वाजिमेधाय दीक्षितः ॥१४३॥
तस्य चारयतः[२] सोऽश्वः समुद्रे पूर्वदक्षिणे ।
वेलासमीपेऽपहृतोभूमिञ्चैव प्रवेशितः ॥१४४॥
स तन्देशं सुतैः सर्वैः खनयामास पार्थिवः ।
आसेदुस्ते ततस्तस्मिन् तदन्तस्ते महार्णवे ॥१४५॥
तमादिपुरुषं देवं हरिं कृष्णं प्रजापतिं ।
विष्णुं कपिलरूपेण हंसं नारायणं प्रभुं ॥१४६॥
तस्य चक्षुः समासाद्य तेजस्तत् प्रतिपद्यते ।
दग्धाः पुत्रास्तदा सर्वे चत्वारस्त्ववशेषिताः ॥१४७॥
वर्हिकेतुः सकेतुश्च तथा धर्म्मरतस्त्वयः[३] ।

---

(१) कलिस्पसा माहिविषां कादार्वाला खसास्तथा इति क० । कलिस्पृशा माहिषका दार्वा श्चोनाः खसास्तथा इति ख० । कलिस्पर्षा महिषका व्योमश्वोनाखसास्तथा इति ग० । कलिस्पर्शा माहिषिका दार्वालाः खसास्तथा इति च० । कलिस्पसां माहिविषा कादार्वालाः खसास्तथा इति ज० । एषां लिपिकरप्रमादजनितत्वेऽपि संशोध्य तथ्यमवधार्य्यतां ।

(२) वारयतः इति क० ज० ।

(३) स्त्र य इति ख० ग० ङ० च० छ० ज० ।

शूरः पञ्चवनश्चैव तस्य वंशकाराः प्रभो ॥१४८॥
प्रादाच्च तस्य भगवान् हरिर्नारायणोवरान् ।
अक्षयत्वं स्ववंशस्य वाजिमेधशतं तथा ।
विभुं पुत्रं समुद्रञ्च स्वर्गे वासं तथाक्षयं ॥१४९॥
स समुद्रोऽश्वमादाय ववन्दे सरितांपतिः ।
सागरत्वं च लेभे स कर्मणा तेन तस्य वै ॥१५०॥
तं चाश्वमेधिकं सोऽश्वं समुद्रात् प्राप्य पार्थिवः ।
आजहाराश्वमेधानां शतं चैव पुनः पुनः ॥१५१॥
षष्टिपुत्रसहस्राणि दग्धान्यश्वानुसारिणां ।
तेषां नारायणं तेजः प्रविष्टानां महात्मनां ।
पुत्राणान्तु सहस्राणि षष्टिस्तु इति नः श्रुतं ॥१५२॥
ऋषय ऊचुः । सगरस्यात्मजा राज्ञः कथं जाता महाबलाः ।
विक्रान्ताः षष्टिसाहस्रा विधिना केन वा वद ॥१५३॥
सूत उवाच । द्वे पत्न्यौ सगरस्यास्तां तपसा दग्धकिल्बिषे ।
ज्येष्ठा विदर्भदुहिता केशिनी नाम नामतः ॥१५४॥
कनीयसी तु या तस्य पत्नी परमधर्मिणी ।
अरिष्टनेमिदुहिता रूपेणाप्रतिमा भुवि ॥१५५॥
और्वस्ताभ्यां वरं प्रादात् तपसाराधितः प्रभुः ।
एका जनिष्यते पुत्रं वंशकर्त्तारमीप्सितं ।
षष्टिपुत्रसहस्राणि द्वितीया जनयिष्यति ॥१५६॥
मुनेस्तु वचनं श्रुत्वा केशिनी पुत्रमेककं ।
वंशस्य कारणं श्रेष्ठा जग्राह नृपसंसदि ॥१५७॥

षष्टिपुत्रसहस्राणि सुपर्णभगिनी तथा ।
महात्मनस्तु जग्राह सुमतिः[१] स्वमतिर्यथा[२] ॥१५८॥
अथ काले गते ज्येष्ठा ज्येष्ठं पुत्रं व्यजायत ।
असमञ्ज इति ख्यातं काकुत्स्थं सगरात्मजं ॥१५९॥
सुमतिस्त्वपि जज्ञे वै गर्भन्तुम्बं यशस्विनी ।
षष्टिपुत्रसहस्राणि तुम्बमध्यात् विनिःसृताः[३] ॥१६०॥
घृतपूर्णेषु कुम्भेषु तान् गर्भान् न्यदधत्ततः ।
धात्रीस्त्वेकैकशः प्रादात् तावतीः पोषणे नृपः ॥१६१॥
ततोनवसु मासेषु समुत्तस्थुर्यथासुखं ।
कुमारास्ते महाभागाः सगरप्रीतिवर्द्धनाः ॥१६२॥
कालेन महता चैव यौवनं प्रतिपेदिरे ।
षष्टिपुत्रसहस्राणि तेषामश्वानुसारिणां ॥१६३॥
स तु ज्येष्ठोनरव्याघ्रः सगरस्यात्मसम्भवः ।
असमञ्ज इतिख्यातोवर्द्धिकेतुर्महाबलः ॥१६४॥
पौराणामहिते युक्तः पित्रा निर्वासितः पुरा ।
तस्य पुत्रोऽंशुमान्नाम असमञ्जस्य वीर्यवान् ॥१६५॥
तस्य पुत्रस्तु धर्म्मात्मा दिलीप इति विश्रुतः ।
दिलीपात्तु महातेजा वीरोजातोभगीरथः[४] ॥१६६॥

---

(१) महात्मा तु समहतोजग्राह इति ङ० च० ज० ।
(२) सुमतिस्तथाइति ङ० । सुमता तथा इति च० ज० ।
(३) सर्व्वेष्वादर्शपुस्तकेषु विनिःसृताः इतिपाठोवर्त्तते । परन्त्वत्र विनिर्ययुः इतिप्रयोगोविशुद्धः ।
(४) महारथः इति ङ० च० ।

येन गङ्गा सरिच्छ्रेष्ठा विमानैरुपशोभिता।
ईजाऽनेन[(१)] समुद्रार्द्धे दुहितृत्वेन कल्पिता।
अत्राप्युदाहरन्तीमं श्लोकं पौराणिका जनाः ॥१६७॥
भगीरथस्तु तां गङ्गामानयामास कर्म्मभिः।
तस्माद्भागीरथी गङ्गा कथ्यते वंशवित्तमैः ॥१६८॥
भगीरथसुतश्चापि श्रुतोनाम बभूव ह।
नाभागस्तस्य दायादोनित्यं धर्म्मपरायणः ॥१६९॥
अम्बरीषः सुतस्तस्य सिन्धुद्वीपस्ततोऽभवत्।
एवं वंशपुराणज्ञा गायन्तीतिपरिश्रुतं ॥१७०॥
नाभागेरम्बरीषस्य भुजाभ्यां परिपालिता।
बभूव वसुधात्यर्थं तापत्रयविवर्ज्जिता ॥१७१॥
आयुतायुः सुतस्तस्य सिन्धुद्वीपस्य वीर्य्यवान्।
आयुतायोस्तु दायाद ऋतुपर्णोमहायशाः ॥१७२॥
दिव्याक्षहृदयज्ञोऽसौ राजा नलसखोबली।
नलौ द्वाविति विख्यातौ पुराणेषु दृढ़व्रतौ ॥१७३॥
वीरसेनात्मजश्चैव यश्चेक्ष्वाकुकुलोद्वहः।
ऋतुपर्णस्य पुत्रोऽभूत् सर्व्वकामोजनेश्वरः ॥१७४॥
सुदासस्तस्य तनयोराजा हंससुखो[(२)] भवत्।

---

(१) इजाऽनेन इति ङ० च०।
(२) क०पुस्तकव्यतिरिक्तादर्शपुस्तकेषु अत्र भ्रान्तिजनितपाठावर्त्तन्ते यथा, राजा हासमुखो इति ख०, राजहोससुखो इति ग०, राजाहो सुमखो इति ङ०, राजाहो सुमुखो इति च० छ० ज०।

सुदासस्य सुतः प्रोक्तः सौदासो नाम पार्थिवः ॥१७५॥
ख्यातः कल्माषपादो वै नाम्ना मित्रसहश्च सः।
वशिष्ठस्तु महातेजाः क्षेत्रे कल्माषपादके।
अश्मकं जनयामास इक्ष्वाकुकुलवृद्धये ॥१७६॥
अश्मकस्योरकामस्तु मूलकस्तत्सुतोऽभवत्।
अत्राप्युदाहरन्तीमं मूलकं वै नृपं प्रति ॥१७७॥
स हि रामभयाद्राजा स्त्रीभिः परिवृतोऽवसत्।
विवस्त्रस्त्राणमिच्छन् वै नारीकवचमीश्वरः[१] ॥१७८॥
मूलकस्यापि धर्म्मात्मा राजा शतरथः स्मृतः।
तस्मात् शतरथाद्जज्ञे राजा चैड़िविड़ोबली ॥१७९॥
आसीत्त्वैडिविडः श्रीमान् कृतशर्म्मा प्रतापवान्।
पुत्रो विश्वमहत्तस्य[२] पुत्रीकस्यव्यजायत[३] ॥१८०॥
दिलीपस्तस्य पुत्रोऽभूत् षट्वङ्गद[४] इति श्रुतिः।
येन स्वर्गादिहागम्य मुहूर्त्तं प्राप्य जीवितं।

---

(१) माश्रित इति ख०।

(२) ख० ग० पुस्तकयोरेतच्छ्लोकार्द्धं न विद्यते। क० ङ० च० छ० ज०-पुस्तकेषु विश्वमहत्तस्येतिपाठो वर्त्तते। अत्र विश्वमहांस्तस्येतिपाठः समीचीनः।

(३) पुत्रीकस्य व्यजायत इति ङ० च० छ०। पुत्रीकस्य व्यतायता इति क० ज०। अनयोर्भ्रमजनितत्वेन वाक्यार्थप्रतिपत्तिर्न घटते। पुत्रिकायां व्यजायत इति प्रयुक्ते तु सुलभैव।

(४) खट्वाङ्गद इति ङ०। षट्वाङ्ग इति च०। अत्र षड़ङ्गदः अथवा खट्वाङ्गदः इतिपाठः सम्भवितुमर्हति।

चयोऽभिसंहिता लोका बुध्या सत्येन चैव हि ॥१८१॥
दीर्घबाहुः सुतस्तस्य रघुस्तस्मादजायत ।
अजः पुत्रोरघोश्चापि तस्माद्जज्ञे स वीर्य्यवान् ।
राजा दशरथोनाम इक्ष्वाकुकुलनन्दनः ॥१८२॥
रामोदाशरथिर्वीरोधर्म्मज्ञोलोकविश्रुतः ।
भरतोलक्ष्मणश्चैव शत्रुघ्नश्च महाबलः ॥१८३॥
माधवं लवणं हत्वा गत्वा मधुवनञ्च तत् ।
शत्रुघ्नेन पुरी तस्य मथुरा सन्निवेशिता ॥१८४॥
सुबाहुः शूरसेनश्च शत्रुघ्नसहिताबुभौ ।
पालयामासतुः सुतौ वैदेह्यौ मथुरां पुरीं ॥१८५॥
अङ्गदश्चन्द्रकेतुश्च लक्ष्मणस्यात्मजावुभौ ।
हिमवत्पर्व्वताभ्यासे स्फीतौ जनपदौ तयोः ॥१८६॥
अङ्गदस्याङ्गदीया तु देशे कारपथे पुरी ।
चन्द्रकेतोस्तु मल्लस्य चन्द्रवक्रा(१) पुरी शुभा ॥१८७॥
भरतस्यात्मजौ वीरौ तक्षः पुष्कर एव च ।
गान्धारविषये सिद्धे तयोः पुर्य्यौ महात्मनोः ॥१८८॥
तक्षस्य दिक्षु विख्याता रम्या तक्षशिला पुरी ।
पुष्करस्यापि वीरस्य विख्याता पुष्करावती ॥१८९॥
गाथां चैवात्र गायन्ति ये पुराणविदोजनाः ।
रामे निबद्धास्तत्त्वार्था माहात्म्यात्तस्य धीमतः ॥१९०॥

(१) चन्द्रचक्रा इति क० ज० । चन्द्रचन्द्रा इति ख० ।

श्यामोयुवा लोहिताक्षोदीप्तास्योमितभाषितः[१]।
आजानुबाहुः सुमुखः सिंहस्कन्धोमहाभुजः ॥१८१॥
दशवर्षसहस्राणि रामोराज्यमकारयत्।
ऋक्सामयजुषां घोषोज्याघोषश्च महास्वनः ॥१८२॥
अविच्छिन्नोऽभवद्राष्ट्रे[२] दीयतां भुज्यतामिति।
जनस्थाने वसं कार्य्यं त्रिदशानाञ्चकार सः ॥१८३॥
तमागस्कारिणं पूर्व्वं पौलस्त्यं मनुजर्षभः।
सीतायाः पदमन्विच्छन् निजघान महायशाः ॥१८४॥
सत्त्ववान् गुणसम्पन्नोदीप्यमानः स्वतेजसा।
अति सूर्य्यञ्च वह्निञ्च रामोदाशरथिर्बभौ ॥१८५॥
एवमेव महाबाहुरिक्ष्वाकुकुलनन्दनः।
रावणं सगणं हत्वा दिवमाचक्रमे विभुः ॥१८६॥
श्रीरामस्यात्मजोजज्ञे कुश इत्यभिधीयते।
लवश्चान्योमहावीर्य्य[३] स्तयोर्देशौ निबोधत ॥१८६॥
कुशस्य कोशला राज्यं पुरी वापि कुशस्थली।
रम्या निवेशिता[४] तेन विन्ध्यपर्व्वतसानुषु ॥१८७॥
उत्तराकोशले राज्यं लवस्य च महात्मनः।

---

(१) मितभाषिता इति क॰ ङ॰ च॰ छ॰ ज॰।
(२) राष्ट्रे इति ख॰ ग॰ च॰।
(३) रिक्ष्वाकुलनन्दन इत्यादि लवश्चान्योमहावीर्य्य इत्यन्तं क॰ ङ॰ च॰ छ॰ ज॰ पुस्तकेषु पतितं।
(४) निवासिता इति ख॰ ग॰।

श्रावस्ती लोकविख्याता कुशवंशं निबोधत ॥१९८॥
कुशस्य पुत्रोधर्म्मात्मा ह्यतिथिः सुप्रियातिथिः ।
अतिथेरपि विख्यातोनिषधोनाम पार्थिवः ॥१९९॥
निषधस्य नलः पुत्रोनभः पुत्रोनलस्य तु ।
नभसः पुण्डरीकस्तु क्षेमधन्वा ततः स्मृतः ॥२००॥
क्षेमधन्वसुतोराजा देवानीकः प्रतापवान् ।
आसीदहीनगुर्नाम देवानीकात्मजः प्रभुः ॥२०१॥
अहीनगोस्तु दायादः पारिपात्रो(१) महायशाः ।
दलस्तस्यात्मजस्तापि तस्माद्जज्ञे बलो(२)नृपः ॥२०२॥
औङ्कोनाम स धर्म्मात्मा बलपुत्रोबभूव ह ।
वज्रनाभः सुतस्तस्य शङ्खनस्तस्य चात्मजः ॥२०३॥
शङ्खनस्य सुतोविद्वान् व्युषिताश्व इति श्रुतः ।
व्युषिताश्वसुतस्यापि राजा विश्वसहः(३) किल ॥२०४॥
हिरण्यनाभः कौशल्योवशिष्ठस्तत्सुतोऽभवत् ।
पौत्रस्य जैमिनेः शिष्यः स्मृतः सर्व्वेषु शर्म्मसु ॥२०५॥
शतानि संहितानान्तु पञ्च योऽधीतवांस्ततः ।
तस्मादधिगतोयोगोयाज्ञवल्क्येन धीमता ॥२०६॥

---

(१) पारियात्रो इति ङ० च० छ० । एषश्लोकः ख० ग० पुस्तकयोर्निपतितः ।

(२) सलो इति क० ङ० च० । सतो इति छ० ज० । किन्तु एतेष्वेव परश्लोके बलपुत्र इति प्रयोगोऽस्ति ।

(३) विश्वमहः इति क० ज० ।

पुष्यस्तस्य सुतोविद्वान् ध्रुवसन्धिश्च तत्सुतः ।
सुदर्शनस्तस्य सुतो अग्निवर्णः सुदर्शनात् ॥२०७॥
अग्निवर्णस्य शीघ्रस्तु शीघ्रकस्य मनुः(१) स्मृतः ।
मनुस्तु योगमास्थाय कलापग्राम(२) मास्थितः ।
एकोनत्रिंशप्रयुगे चत्रप्रावर्त्तकः प्रभुः ॥२०८॥
प्रसुश्रुतोमनोः पुत्रः सुसन्धिस्तस्य चात्मजः ।
सुसन्धेश्च तथामर्षः सहस्वान्नाम नामतः ॥२०९॥
आसीत्सहस्वतः पुत्रोराजा विश्रुतवानिति ।
तस्यासीत् विश्रुतवतः पुत्रोराजा वृहद्बलः ॥२१०॥
एते इक्ष्वाकुदायादाः राजानः प्रायशः स्मृताः ।
वंशे प्रधानाः ये तेऽस्मिन् प्राधान्येन तु कीर्त्तिताः ॥२११॥
पठन् सम्यगिमां सृष्टिमादित्यस्य विवस्वतः ।
प्रजावानेति सायोज्यं मनोर्वैवस्वतस्य सः ॥२१२॥
श्राद्धदेवस्य देवस्य प्रजानां पुष्टिदस्य च ।
विपाप्मा विरजाश्चैव आयुष्मान् भवतेच्युतः ॥२१३॥

इति श्रीमहापुराणे वायुप्रोक्ते वैवस्वतमनुवंशवर्णनं नाम
षड्विंशोऽध्यायः समाप्तः ॥

---

(१) मरुरिति ङ० च० । अनयोरुत्तरत्र मनोः पुत्र इतिपाठदर्शनाद-त्रापि मनुरितिपाठोयुक्तः ।
(२) कलायग्राममिति क० च० ।

अथ सप्तविंशोऽध्यायः ।

वैवस्वतमनुवंशकीर्त्तनं ।

सूत उवाच । अनुजस्य विकुचेस्तु निमेर्वंशं निबोधत ।
योऽसौ निवेशयामास पुरन्देवपुरोपमं ॥१॥
जयन्तमितिविख्यातं गौतमस्याश्रमाभितः ।
यस्यान्ववाये यज्ञे वै जनकादृषिसत्तमात् ॥२॥
नेमिर्नाम सुधर्मात्मा सर्वसत्वनमस्कृतः ।
आसीत् पुत्रोमहाराज्ञ इक्ष्वाकोर्भूरितेजसः ॥३॥
स शापेन वसिष्ठस्य विदेहः समपद्यत ।
तस्य पुत्रोमिथिर्नाम जनितः पर्वभिस्त्रिभिः ॥४॥
अरण्यां मथ्यमानायां प्रादुर्भूतोमहायशाः ।
नाम्ना मिथिरितिख्यातोजननाज्जनकोभवत् ॥५॥
मिथिर्नाम महावीर्य्योयेनासौमिथिलाभवत् ।
राजासौ जनकोनाम जनकाच्चाप्युदावसुः ॥६॥
उदावसोः सुधर्मात्मा जानितोनन्दिवर्द्धनः ।
नन्दिवर्द्धनतः शूरः सुकेतुर्नाम धार्म्मिकः ॥७॥
सुकेतोरपि धर्म्मात्मा देवरातोमहाबलः ।
देवरातस्य धर्म्मात्मा वृहदुक्थ[१] इति श्रुतिः ॥८॥

---

(१) वृहद्युक्त इति ख०, वृहद्युक्त इति ग०, वृहदुक्थ इति ङ० । क० ज० पुस्तकयोः नन्दिवर्द्धनतः शूर इत्यादि सुधृतिस्तस्यचात्मज इत्यन्तं, ङ० पुस्तके देवरातोमहाबलः इत्यादि सुधृतेरपि धर्म्मात्मा इत्यन्तं पाठोनास्ति ।

बृहदुक्थस्य तनयोमहावीर्य्यः प्रतापवान् ।
महावीर्य्यस्य धृतिमान् सुधृतिस्तस्य चात्मजः ॥९॥
सुधृतेरपि धर्मात्मा धृष्टकेतुः परन्तपः ।
धृष्टकेतुसुतश्चापि हर्य्यश्वोनाम विश्रुतः ॥१०॥
हर्य्यश्वस्य मरुः पुत्रोमरोः पुत्रः प्रतिन्वकः(१) ।
प्रतिन्वकस्य धर्मात्मा राजा कीर्त्तिरथः सुतः ॥११॥
पुत्रः कीर्त्तिरथस्यापि देवमीढ इति श्रुतः ।
देवमीढस्य विबुधोविबुधस्य सुतोधृतिः(२) ॥१२॥
महाधृतिसुतोराजा कीर्त्तिराजः(३) प्रतापवान् ।
कीर्त्तिराजात्मजो(४) विद्वान् महारोमेति विश्रुतः ॥१३॥
महारोम्नस्तु विख्यातः स्वर्णरोमा व्यजायत ।
स्वर्णरोमात्मजश्चापि ह्रस्वरोमाभवन्नृपः ॥१४॥
ह्रस्वरोमात्मजोविद्वान् सीरध्वज इति श्रुतिः ।
उद्भिन्ना कृषता येन सीता राज्ञा यशस्विनी ।
रामस्य महिषी साध्वी सुव्रतातिपतिव्रता ॥१५॥
शांशपायन उवाच । कथं सीता समुत्पन्ना कृष्यमाणा यशस्विनी ।
किमर्थञ्चाकृषद्राजा क्षेत्रं यस्मिन् बभूव ह ॥१६॥
सूत उवाच । अग्निक्षेत्रे कृष्यमाणे अश्वमेधे महात्मनः ।

---

(१) प्रतिन्धक इति ख०, पिटन्धक इति ग०, प्रतिन्वक इति ङ० च० ।
(२) महाधृतिरिति ख० ग० ।
(३) कीर्त्तिरात इति ङ० च० छ० ।
(४) कीर्त्तिरातात्मजो इति ङ० च० छ० । कीर्त्तिराजसुत इति ख० ग० ।

विधिना सुप्रयुक्तेन तस्मात्तस्मात्तु समुत्थिता ॥१७॥
सीरध्वजात्तु जातस्तु भानुमान्नाम मैथिलः ।
भ्राता कुशध्वजस्तस्य स काश्याधिपति(१) र्नृपः ॥१८॥
तस्य भानुमतः पुत्रः प्रद्युम्नस्य प्रतापवान् ।
मुनिस्तस्य सुतश्चापि तस्मादूर्जवहः स्मृतः ॥१९॥
ऊर्जवाहात् सुतद्वाजः शकुनिस्तस्य चात्मजः ।
स्वागतः शकुनेः पुत्रः सुवर्चास्तत्सुतः स्मृतः ॥२०॥
श्रुतो यस्तस्य दायादः सुश्रुतस्तस्य चात्मजः ।
सुश्रुतस्य जयः पुत्रोजयस्य विजयः सुतः ॥२१॥
विजयस्य ऋतः(२) पुत्र ऋतस्य सुनयः स्मृतः ।
सुनयाद्वीतहव्यस्तु वीतहव्यात्मजोधृतिः ॥२२॥
धृतेस्तु बहुलाश्वोभूद्बहुलाश्वसुतः कृतिः ।
तस्मिन् सन्तिष्ठते वंशोजनकानां महात्मनां ।
इत्येते मैथिलाः प्रोक्ताः सोमस्यापि निबोधत ॥२३॥

इति श्रीमहापुराणे वायुप्रोक्ते वैवस्वतमनुवंशकीर्त्तनं नाम सप्तविंशोऽध्यायः समाप्तः ॥

---

(१) काश्याधिपतिरित्यत्र सन्धिरार्षः ।
(२) कृतः इति ङ० च० ।

अथ अष्टाविंशोऽध्यायः।

तत्र सोमजन्मविवरणं।

सूत उवाच। पिता सोमस्य वै विप्रा जज्ञेऽत्रिर्भगवानृषिः।
तत्रात्रिः सर्वलोकानां तस्थौ स्वेनमये[१] धृतः ॥१॥
कर्म्मणा मनसा वाचा शुभान्येव समाचरन्।
काष्ठकुड्यशिलाभूत ऊर्द्ध्वबाहुर्महाद्युतिः ॥२॥
सुदुश्चरं नाम तपोयेन तप्तं महत्पुरा।
त्रीणि वर्षसहस्राणि दिव्यानीति हि नः श्रुतं ॥३॥
तस्योर्द्ध्वरेतसस्तत्र स्थितस्यानिमिषस्पृहा।
सोमत्वन्तनुरापेदे महाबुद्धिः स वै द्विजः ॥४॥
ऊर्द्ध्वमाचक्रमे तस्य सोमत्वं भावितात्मनः।
सोमः सुस्राव नेत्राभ्यां दश वा द्योतयन् दिशः ॥५॥
तं गर्भं विधिनादिष्टा दश देव्योदधुस्तदा।
समेत्यधारयामासुर्वचतान्नमसक्कवान्[२] ॥६॥
स ताभ्यः सहसैवाथ दिग्भ्योगर्भः प्रभान्वितः।

---

(१) स्वेनमये धृतः इति क० ङ० छ० ज०। तेन महीभृतः इति ख०ग०। अत्र स्वे नियमे धृतः इति, स्वेन यमे धृतः इति, स्वात्ममयोद्दृत इति वा पाठोऽर्थप्रतिपत्तिकरः।

(२) एतच्छ्लोकार्द्धं मूले प्रदर्शिताकारं आदर्शपुस्तकमात्रे वर्त्तते। किन्तु लेखकप्रमादजनितत्वेन वाक्यार्थप्रतिपत्तिर्दुरूहा। तस्मादयमेव पाठः सम्भावनीयः। यथा, समं ता धारयामासुर्न च ताः समशक्नुवन्।

यथावभासयन् लोकान् शीतांशुः सर्वभावनः[१] ॥७॥
यदा न धारणे शक्तास्तस्य गर्भस्य ताः स्त्रियः।
ततः स ताभिः शीतांशुर्निपपात वसुन्धरां ॥८॥
पतन्तं सोममालोक्य ब्रह्मा लोकपितामहः।
रथमारोपयामास लोकानां हितकाम्यया ॥९॥
स हि देवमयो विप्राः धर्म्मार्थी सत्यसङ्गरः[२]।
युक्तोवाजिसहस्रेण सितेनेति हि नः श्रुतं[३] ॥१०॥
तस्मिन्निपतिते देवाः पुत्रेऽत्रेः परमात्मनि।
तुष्टुवुर्ब्रह्मणः पुत्राः मानसाः सप्त विश्रुताः ॥११॥
तत्रैवाङ्गिरसस्तस्य भृगोश्चैवात्मजस्तथा।
ऋग्भिर्यजुर्भिर्बहुभिरथर्वाङ्गिरसैरपि ॥१२॥
ततः संस्तूयमानस्य तेजः सोमस्य भास्वतः।
आप्यायमानं लोकांस्त्रीन् भावयामास सर्व्वशः ॥१३॥
समेन रथमुख्येन सागरान्तां वसुन्धरां।
त्रिः सप्तकृत्वोविपुल[४]श्चकाराभिप्रदक्षिणं ॥१४॥
तस्य यच्चापि तत्तेजः पृथिवीमन्वपद्यत।

---

(१) अत्राकाङ्क्षितया वाक्यसमापकक्रियया श्लोकार्द्धपतनं सूच्यते।

(२) धर्म्मार्थं सत्यसङ्गर इति ख०। धर्म्मार्थसत्यसङ्गर इति ङ० च०।

(३) अस्मात् श्लोकात् परं, समेन रथमुख्येनेतिश्लोकः। अनन्तरं, तस्मिन्निपतिते देवा इत्यादिश्लोकाः। इति पाठक्रमः वाक्यार्थस्य सुसङ्गतिकरः।

(४) वियप्त इति ङ० च०। वियप्त इतिपदस्यार्थशून्यत्वेन भ्रमजन्यत्वमवगम्यते। अत्र वियदीतिपाठः सम्यङ्।

ओषध्यस्ताः समुद्भूतास्तेजसा संज्वलंत्युत ॥१५॥
ताभि[१]र्धार्यत्यथं लोकान् प्रजाश्चापि चतुर्विधाः ।
पोष्टा हि भगवान् सोमोजगतोहि द्विजोत्तमाः ॥१६॥
स लब्धतेजास्तपसा संस्तवैस्तैश्च कर्म्मभिः ।
तपस्तेपे महाभागः पद्मानां दशतीर्दश ॥१७॥
हिरण्यवर्णा या देव्योधारयन्त्यात्मना जगत् ।
विभु[२]स्तासाम्भवेत् सोमः प्रख्यातः[३] स्वेन कर्म्मणा ॥१८॥
ततस्तस्मै ददौ राज्यं ब्रह्मा ब्रह्मविदांवरः ।
वीजौषधिषु विप्राणामपाञ्च द्विजसत्तमाः ॥१९॥
सोभिषिक्तोमहातेजा महाराज्येन राजराट्[४] ।
लोकानां भावयामास स्वभावात्तपतांवरः ॥२०॥
सप्तविंशतिरिन्दोस्तु दाक्षायण्योमहाव्रताः ।
ददौ प्रचेतसा दक्षोनक्षत्राणीति या विदुः ।२१॥
स तत्प्राप्य महद्राज्यं सोमः सोमवतां प्रभुः ।
समाजह्ने[५] राजसूयं सहस्रशतदक्षिणं ॥२२॥
हिरण्यगर्भश्चोद्गाता ब्रह्मा ब्रह्मत्वमेयिवान् ।

---

(१) याभिरिति क० ।
(२) विधुरिति क० छ० ज० । विभुरिति ङ० च० ।
(३) प्रख्यातः ख० ङ० च० ।
(४) एष श्लोकः ग० छ० पुस्तकयोर्नास्ति। ग० छ० पुस्तकव्यतिरिक्तादर्श-पुस्तकेषु महाराज्येन राजराट् इतिपाठोविद्यते । अत्र महाराज्येऽनु राजराट् इतिप्रायोगः साधुः ।
(५) अत्र समाजक्रे, वा, समायजत् इति पाठः समीचीनः ।

सदस्यस्तत्र भगवान् हरिर्नारायणः प्रभुः।
सनत्कुमारप्रमुखैराद्यैर्ब्रह्मर्षिभिर्वृतः[१] ॥२३॥
दक्षिणामददत्सोमस्त्रीन् लोकानिति नः श्रुतं।
तेभ्योब्रह्मर्षिमुख्येभ्यः सदस्येभ्यश्च वै द्विजाः ॥२४॥
तं सिनी च कुहूश्चैव वपुः पुष्टिः प्रभा वसुः।
कीर्त्तिर्धृतिश्च लक्ष्मीश्च नव देव्यः सिषेविरे ॥२५॥
प्राप्यावभृथमव्यग्रः सर्व्वदेवर्षिपूजितः।
अतिराजातिराजेन्द्रोदशधातापयद्दिशः ॥२६॥
तदा तत्प्राप्य दुष्प्रापमैश्वर्यमृषिसंस्तुतं।
स विभ्रममतिर्विप्रा विनये विनयोहृतः ॥२७॥
वृहस्पतेः स वै भार्यान्तारां नाम यशस्विनीं।
जहार सहसा सर्व्वानवमत्याङ्गिरःसुतान् ॥२८॥
स याच्यमानोदेवैश्च तथा देवर्षिभिश्च ह।
नैव व्यसर्जयत्तारां तस्मायाङ्गिरसे तदा ॥२९॥
उशनास्तस्य जग्राह पार्ष्णिमङ्गिरसोद्विजाः।
स हि शिष्योमहातेजाः पितुः पूर्व्वं वृहस्पतेः ॥३०॥
[२]तेन स्नेहेन भगवान् रुद्रस्तस्य वृहस्पतेः।
पार्ष्णिग्राहोभवद्देवः[३] प्रगृह्याजगवन्धनुः ॥३१॥
तेन ब्रह्मर्षिमुख्येभ्यः परमास्त्रं महात्मना।

(१) वृतमिति पाठः साधीयान्।
(२) तेन स्नेहेनेतिस्लोकस्य पूर्व्वेण सह सङ्गतिविरहात् अस्मात् प्राक् कतिपयस्लोकपतनमुपलभ्यते।
(३) तत्रेति ख० ग०।

उद्दिश्य देवानुत्सृष्टं येनैषां नाशितं यशः ॥३२॥
तत्र तद्युद्धमभवत् प्रत्यक्षन्तारकामयं ।
देवानां दानवानाञ्च लोकक्षयकरं महत् ॥३३॥
तत्र शिष्टास्तयोदेवास्तुषिताश्चैव ये स्मृताः ।
ब्रह्माणं शरणं जग्मुरादिदेवं पितामहं ॥३४॥
ततोनिवार्य्यैाशनसं रुद्रं ज्येष्ठञ्च शङ्करं ।
ददावाङ्गिरसे तारां स्वयमेव पितामहः ॥३५॥
अन्तर्वत्नींच तां दृष्ट्वा तारान्ताराधिपाननां ।
गर्भंसुत्सृजसे न त्वं विप्रः प्राह वृहस्पतिः ॥३६॥
मदीयायां तनौ योनौ गर्भाधार्य्यः कथञ्चन ।
अथो नावसृजत्तन्तु कुमारं दस्युहन्तमं ॥३७॥
ईषिकास्तम्बमासाद्य ज्वलन्तमिव पावकं ।
जातमात्रोथ भगवान् देवानामाक्षियद्वपुः ॥३८॥
ततः संशयमापन्नास्तारामकथयन् सुराः ।
सत्यं ब्रूहि सुतः कस्य सोमस्याथ वृहस्पतेः॥३९॥
ह्रीयमाना यदा देवान्नाह सा साध्वसाधु वा ।
तदा तां शप्तुमारब्धः कुमारोदस्युहन्तमः ॥४०॥
सन्निवार्य तदा ब्रह्मा तारां चन्द्रस्य संशयः ।
यदत्र तथ्यन्तद्ब्रूहि तारे कस्य सुतस्त्वयं ॥४१॥
सा प्राञ्जलिरुवाचेदं ब्रह्माणं वरदं प्रभुं ।
सोमस्येति महात्मानं कुमारन्दस्युहन्तमं(१) ॥४२॥

---

(१) महात्मैष कुमारोदस्युहन्तमः इतिप्रथमान्तपाठः समीचीनः ।

ततः स तमुपाघ्राय[१] सोमोदाता प्रजापतिः ।
बुध इत्यकरोन्नाम तस्य पुत्रस्य धीमतः ॥४ ३॥
प्रतिपूर्व्वञ्चगमने समभ्युत्तिष्ठते बुधैः[२] ।
उत्पादयामास तदा पुत्रं वै राजपुत्रिका ॥४ ४॥
तस्य पुत्रोमहातेजा बभूवैलः पुरूरवाः ।
उर्वश्यां जज्ञिरे तस्य पुत्राः षट्सुमहौजसः ॥४ ५॥
प्रसह्य धर्षितस्तत्र विवशोराजयक्ष्मणा ।
ततोयक्ष्माभिभूतस्तु सोमः प्रक्षीणमण्डलः ।
जगाम शरणायाथ पितरं सोऽत्रिमेव तु ॥४ ६॥
तस्य तत्पापशमनं चकारात्रिर्महायशाः ।
स राजयक्ष्मणा मुक्तः श्रिया जज्वाल सर्व्वशः ॥४ ७॥
एतत्सोमस्य वै जन्म कीर्त्तितं द्विजसत्तमाः ।
वंशन्तस्य द्विजश्रेष्ठाः कीर्त्यमानं निबोधत ॥४ ८॥
धन्यमारोग्यमायुष्यं पुण्यङ्कल्मषशोधनं ।
सोमस्य जन्म श्रुत्वैव सर्वपापैः प्रमुच्यते ॥४ ९॥

इति श्रीमहापुराणे वायुप्रोक्ते उपोद्घातपादे सोमोत्पत्तिर्नाम
अष्टाविंशोऽध्यायः समाप्तः ॥

---

(१) मुपादायेति ख० ग० ।
(२) बुध इति ग० ङ० च० ।

अथ ऊनत्रिंशोऽध्यायः ।

चन्द्रवंशकीर्त्तनं ।

सूत उवाच । सोमस्य तु बुधः पुत्रोबुधस्य तु पुरूरवाः ।
तेजस्वी दानशीलश्च यज्वा विपुलदक्षिणः ॥१॥
ब्रह्मवादी पराक्रान्तः शत्रुभिर्युधि दुर्जयः ।
आहर्त्ता चाग्निहोत्रस्य यज्वनाश्च ददौ महीं ॥२॥
सत्यवाक् कर्म्मबुद्धिश्च(१) कान्तः संवृतमैथुनः ।
अतीव(२) पुत्रोलोकेषु रूपेणाप्रतिमोऽभवत् ॥३॥
तं ब्रह्मवादिनं दान्तं धर्म्मज्ञं सत्यवादिनं ।
उर्वशी वरयामास हित्वा मानं यशस्विनी ॥४॥
तया सहावसद्राजा दशवर्षाणि चाष्ट च ।
सप्त(३) षट् सप्त चाष्टौ च दश चाष्टौ च वीर्यवान् ॥५॥
वने चैत्ररथे रम्ये तथा मन्दाकिनीतटे ।
अलकायां विशालायां नन्दने च वनोत्तमे ॥६॥
गन्धमादनपादेषु मेरुशृङ्गे नगोत्तमे ।
उत्तरांश्च कुरून् प्राप्य कलापग्राम(४) मेव च ॥७॥
एतेषु वनमुख्येषु सुरैराचरितेषु च ।
उर्वश्या सहितोराजा रेमे परमया मुदा ॥८॥

---

१) धर्म्मबुद्धिश्चेति ख० च० ।
(२) यतीव इति क० ज० ।
(३) पञ्च इति ङ० च० ।
(४) कलापग्राममिति ङ० च० ।

ऋषय ऊचुः। गन्धर्वी चोर्वशी देवी राजानं मानुषं कथं।
देवानुत्सृज्य सम्प्राप्ता तन्नोब्रूहि बहुश्रुत ॥९॥
सूत उवाच। ब्रह्मशापाभिभूता सा मानुषं समुपस्थिता।
ऐलं तु तं वरारोहा समयेन व्यवस्थिता ॥१०॥
आत्मनः शापमोक्षार्थं नियमं सा चकार तु(१)।
अनग्नदर्शनञ्चैव अकामात् सह मैथुनं।
द्वौ मेषौ शयनाभ्यासे स(२) तावद्भवतिष्ठते।
घृतमात्रं तथाहारः कालमेकन्तु पार्थिव ॥११॥
यद्येष समयोराजन् यावत्कालञ्च ते दृढं।
तावत्कालन्तु वत्स्यामि एष नः समयः कृतः ॥१२॥
तस्यास्तं समयं सर्वं स राजा पर्यपालयत्।
एवं सा चावसत् तस्मिन्(३) पुरूरवसि भामिनी ॥१३॥
वर्षाण्यथ चतुःषष्टिं तद्भक्त्या शापमोहिता।
उर्वशी मानुषं प्राप्ता गन्धर्व्वाश्चिन्तयान्विताः ॥१४॥
गन्धर्व्वा ऊचुः। चिन्तयध्वं महाभागा यथा सा तु वराङ्गणा।
आगच्छेत्तु पुनर्द्देवानुर्व्वशी स्वर्गभूषणा ॥१५॥
ततोविश्वावसुर्नाम तत्राह वदतांवरः।
तया(४) तु समयस्तत्र क्रियमानोमतोनघः ॥१६॥

(१) ह इति ख०।
(२) सा इतिप्रयोगः साधुः।
(३) आदर्शपुस्तकमात्रे तेनेतिपाठोऽस्ति। परन्तु नायं समीचीनः।
(४) आदर्शपुस्तकमात्रे मयेतिपाठोवर्त्तते अयन्तु न सम्यङ्।

समयव्युत्क्रमात् सा वै राजानन्त्यच्यते यथा[1] ।
तदहं वच्मि वः सर्वं यथा त्यच्यति सा नृपं ॥१७॥
सहसा[2] योगमेष्यामि युष्माकं कार्यसिद्धये[3] ।
एवमुक्त्वा गतस्तत्र प्रतिष्ठानं महायशाः ॥१८॥
स निशायामथागम्य मेषमेकं जहार वै ।
मातृवद्वर्त्तते सा तु मेषयोश्चारुहासिनी ॥१९॥
गन्धर्वागमनं ज्ञात्वा शयनस्था यशस्विनी ।
राजानमब्रवीत्सा तु पुत्रोमे ह्रीयतेति वै ॥२०॥
एवमुक्तोविनिश्चित्य नग्नस्तिष्ठति वै नृपः[4] ।
नग्नं द्रच्यति मां देवी समयोवितथोभवेत् ॥२१॥
ततोभूयस्तु गन्धर्व्वा द्वितीयं मेषमाददुः ।
द्वितीयेऽपहृते मेषे ऐलन्देवी तमब्रवीत् ॥२२॥
पुत्रौ मम हृतौ राजन्ननाथाया इव प्रभो ।
एवमुक्तस्तदोत्थाय नग्नोराजा प्रधावितः ॥२३॥
मेषाभ्यां पदवीं राजन् गन्धर्व्वैर्युत्थितामथ[5] ।
उत्पादिता तु महती माया तद्भवनं महत् ॥२४॥

---

(१) यथा इत्यत्र ध्रुवमितिप्रयोगः साधीयान् अन्यथा राजानं त्यच्यते यथेतिवाक्यस्य पुनरुक्तिदोषोऽनिवरणीयः । ऋथवा अस्मात् श्लोकार्द्धात् परं विश्वावसूक्तकतिपयवाक्यानि न सन्ति ।
(२) ससाहेति क० ङ० च० छ० ज० ।
(३) वीर्य्यसिद्धये इति क० छ० ज० अयन्त्वपपाठः ।
(४) नग्नस्तिष्ठन् स नोत्थितः इतिप्रयोगोऽत्र सङ्गतः ।
(५) अत्र, मेषयोः पदवीन्तत्र गन्धर्व्वैर्दिवमाश्रितैरितिप्रयोगोविशुद्धः ।

प्रकाशितन्तु सहसा ततोनग्नमवेच्य सा[१] ।
नग्नं दृष्ट्वा तिरोभूत्सा अप्सरा कामरूपिणी ॥२५॥
तिरोभूतान्तु तां ज्ञात्वा गन्धर्वास्तत्र तावुभौ ।
मेषौ त्यक्त्वा च ते सर्वे तत्रैवान्तर्हिताभवन्[२] ॥२६॥
उत्सृष्टावुरणौ दृष्ट्वा राजा गृह्यागतः प्रभुः[३] ।
अपश्यंस्तां तु वै राजा विललाप सुदुःखितः ॥२७॥
चचार पृथिवीं चैव मार्गमाणस्ततस्ततः ।
अथापश्यच्च तां राजा कुरुक्षेत्रे महाबलः ॥२८॥
प्लक्षतीर्थे पुष्करिण्यां विगाढेनाम्बुनाप्लुतां ।
क्रीडन्तीमप्सरोभिश्च पञ्चभिः सह शोभनं ॥२९॥
अपश्यत्सा ततः सुभ्रूराजानमविदूरतः ।
उर्वशी ताः सखीः प्राह अयं स पुरुषोत्तमः ॥३०॥
यस्मिन्नहमवासीति[४] दर्शयामास तं नृपं ।
तत आविर्बभूवुस्ताः पञ्चचूड़ाप्सरास्तुताः[५] ॥३१॥
दृष्ट्वा तु राजा तां प्रीतः प्रलापान् कुरुते बहून् ।
आयाहि तिष्ठ मनसा घोरे वचसि तिष्ठ हे ॥३२॥

(१) एतच्छ्लोकार्द्धात् परं श्लोकार्द्धं पतितं वाक्यसमाप्तेरभावात् ।
(२) अत्र सन्धिरार्षप्रयोगात् ।
(३) पुनरिति ख० ग० ङ० च० छ० ।
(४) सर्व्वेष्वेवादर्शपुस्तकेषु मवासीति इतिपाठोवर्त्तते । अत्र मवात्सं स्रेतिप्रयोगोविशुद्धः ।
(५) अत्र, पञ्चचूड़ादयोऽप्सराः इतिप्रयोगः समीचीनः । ख० ग० छ० ज० पुस्तकेषु पञ्चक्रीड़ाप्सरस्तुताः इतिपाठोऽस्ति ।

एवमादीनि सूक्तानि परस्परमभाषत ।
उर्व्वशी त्वब्रवीच्चैलं सगर्भाहं त्वया प्रभो ॥३३॥
संवत्सरात् कुमारस्ते भविता नैव संशयः ।
निशामेकान्तु वै राजा अवसत्तु तया सह ॥३४॥
सम्प्रहृष्टोजगामाथ स्वपुरन्तु महायशाः ।
गते संवत्सरे राजा उर्व्वशीं पुनरागमत् ॥३५॥
उषित्वा तु तया सार्द्धमेकरात्रं महामनाः ।
कामार्त्तस्त्वाब्रवीद्दीनोभव नित्यं ममेति वै ॥३६॥
उर्व्वश्यथाब्रवीच्चैलं गन्धर्वास्ते वरन्ददुः ।
तं वृणीष्व महाराज ब्रूहि चैतान् स्वमेव हि ॥३७॥
वृणे नित्यं हि सालोक्यं गन्धर्वाणां महात्मनां ।
तथेत्युक्ता वरं व्रवे गन्धर्वाश्च तथास्त्विति ॥३८॥
स्थालीमग्नेः पूरयित्वा गन्धर्व्वाश्च तमब्रुवन् ।
अनेन इष्ट्वा लोकन्तं प्राप्स्यसि त्वं नराधिप ॥३९॥
तमादाय कुमारन्तु नगरायोपचक्रमे ।
निक्षिप्य तमरण्याञ्च स पुत्रन्तु गृहं ययौ ॥४०॥
पुनरादाय दृष्ट्वाग्निमश्वत्थं तत्र दृष्टवान् ।
समीपतस्तु तं दृष्ट्वा ह्यश्वत्थं तत्र विस्मितः ॥४१॥
गन्धर्व्वेभ्यस्तथाख्यातुमग्निना गां गतस्तु सः ।
श्रुत्वा तमर्थमखिलमरणिं तु समादिशत् ॥४२॥
अश्वत्थादरणिं कृत्वा मथित्वाग्निं यथाविधि ।
तेनेष्ट्वा तु सलोकं नः प्राप्स्यसि त्वं नराधिप ॥४३॥

मथित्वाग्निं त्रिधा कृत्वा ह्ययजत्स नराधिपः ।
इष्ट्वा यज्ञैर्बहुविधैर्गतस्तेषां सलोकतां ॥४४॥
वासाय च स गन्धर्व्वस्त्रेतायां स महारथः ।
एकोऽग्निः पूर्वमासीद्वै ऐलस्त्रींस्तानकल्पयत् ॥४५॥
एवंप्रभावोराजासीदैलस्तु द्विजसत्तमाः ।
देशे पुण्यतमे चैव महर्षिभिरलङ्कृते ॥४६॥
राज्यं स कारयामास प्रयागे पृथिवीपतिः ।
उत्तरे यामुने तीरे प्रतिष्ठाने[१] महायशाः ॥४७॥
तस्य पुत्रा बभूवुर्हि षडिन्द्रोपमतेजसः ।
गन्धर्व्वलोके विदिता आयुर्द्धीमानमावसुः ॥४८॥
विश्वायुश्च श्रुतायुश्च गतायु[२]श्चोर्वशीसुताः ।
अमावसोस्तु वै जातोभीमोराजाथ विश्वजित् ॥४९॥
श्रीमान् भीमस्य दायादोराजासीत्काञ्चनप्रभः ।
विद्वांस्तु काञ्चनस्यापि सुहोत्रोभून्महाबलः ॥५०॥
सुहोत्रस्याभवद्जह्नुः केशिकागर्भसम्भवः ।
प्रतिगत्य ततोगङ्गा वितते यज्ञकर्म्मणि ॥५१॥
प्लावयामास तं देशं भाविनोर्थस्य दर्शनात्[३] ।
गङ्गया प्लावितं दृष्ट्वा यज्ञवाटं समन्ततः ॥५२॥
सौहोत्रिर्वरदः[४] क्रुद्धोगङ्गां संरक्तलोचनः ।

---

(१) प्रतिष्ठाने इति क० च० ज० ।
(२) श्रुतायुरिति ख० ।
(३) देशनात् इति च० ।
(४) सौहोत्रिश्च ततः इति ख० ग० । अस्मिन् श्लोकार्द्धे समापकक्रियाया

अस्य गङ्गावलेपस्य सद्यः फलमवाप्नुहि ॥५३॥
एतत्ते विफलं सर्व्वं पीतमम्भः[१] करोम्यहं।
राजर्षिणा ततः पीतां गङ्गां दृष्ट्वा सुरर्षयः ॥५४॥
उपनिन्युर्महाभागा दुहितृत्वेन जाह्नवीं।
यौवनाश्वस्य पौत्रीन्तु[२] कावेरीञ्जह्नुरावहत् ॥५५॥
युवनाश्वस्य शापेन गङ्गा येन[३] विनिर्ममे।
कावेरीं सरितां श्रेष्ठां जह्नुभार्य्यामनिन्दितां ॥५६॥
जह्नुश्च दयितं पुत्रं सुहोत्रं नाम धार्मिकं।
कावेर्य्यां जनयामास अजकस्तस्य चात्मजः॥५७॥
अजकस्य तु दायादोबलाकाश्वोमहायशाः।
बभूवुश्च गयः शीलः[४] कुशस्तस्यात्मजः स्मृतः ॥५८॥
कुशपुत्रा बभूवुश्च चत्वारोवेदवर्चसः[५]।
कुशाश्वः कुशनाभश्च अमूर्त्तारयशोवसुः ॥५९॥
कुशस्तम्बस्तपस्तेपे पुत्रार्थी राजसत्तमः।

ऊहनीयत्वेन, सौहोत्रिर्वरदः, वा, सौहोत्रिस्च ततः इत्यत्र सौहो-त्रिरब्रवीदितिपाठः समीचीनः।

(१) सर्व्वेष्वादर्शपुस्तकेषु पीतमम्भ इत्यत्र भ्रमोत्पन्नपाठावर्त्तन्ते। यथा, पिवत्रभः इति क०, पिवन्तीभिः इति ख०, अपरः कि० इति ग०, पिवन्तंवः इति ङ०, पिवन्तंभं इति च०, पिवन्ताम्नः इति छ०, पिवन्ताप्न इति ज०।

(२) पुत्रीमिति ख०।

(३) गङ्गायै न इति ङ० च० अयन्तु न सम्यक्।

(४) बभूव च दयाशीलः इति ख०।

(५) देववर्च्चसः इति ख० ग०।

पूर्णे वर्षसहस्रे वै शतक्रतुमपश्यत ॥६०॥
स उग्रं तपसं दृष्ट्वा सहस्राक्षः पुरन्दरः।
समर्थः पुत्रजनने स्वयमेवास्य शाश्वतः ॥६१॥
पुत्रत्वं कल्पयामास स्वयमेव पुरन्दरः।
गाधिर्नामाभवत्पुत्रः कौशिकः पाकशासनः ॥६२॥
पौरुकुत्साभवद्भार्या गाधिस्तस्यामजायत(१)।
पूर्वं कन्यां महाभागां नाम्ना सत्यवतीं शुभां।
तां गाधिः पुत्रः काव्याय ऋचीकाय ददौ प्रभुः ॥६३॥
तस्यां पुत्रस्तु(२) वै भर्त्ता भार्गवोभृगुनन्दनः।
पुत्रार्थे साधयामास चरुं गाधेस्तथैव च ॥६४॥
तथा चाहूय णिधृति(३) ऋचीकोभार्गवस्तदा।
उपयोज्यश्चरुरयं त्वया मात्रा च ते शुभाः(४) ॥६५॥
तस्यां जनिष्यते पुत्रोदीप्तिमान् क्षत्रियर्षभः।
अजेयः क्षत्रियैर्युद्धे क्षत्रियर्षभसूदनः ॥६६॥
तवापि पुत्रं कल्याणि धृतिमन्तं तपोधनं।
शमात्मकं द्विजश्रेष्ठं चरुरेष विधास्यति ॥६७॥

---

(१) जनयामास इत्यर्थं अजायतेत्यार्षः।
(२) पुत्राय इति पाठः साधीयान्।
(३) क० ङ० च० छ० ज० पुस्तकेषु णिधृति इति अर्थशून्यपाठोवर्त्तते। ख० पुस्तके तथा राजा बालभ्रतिरितिपाठः। ग० पुस्तके एतच्छ्लोकार्द्धं नास्ति। णिधृति इत्यत्र सुधृतिमिति प्रयोगोऽर्थप्रतिपत्तिकरः।
(४) शुभाः इति पाठः सर्व्वेषु आदर्शपुस्तकेषु विद्यते। अत्र शुभे इति सम्बोधनान्तप्रयोगः सङ्गतः।

एव मुक्त्वा तु तां भार्य्यामृचीकोभृगुनन्दनः ।
तपस्याभिरतोनित्यं अरण्यं प्रविवेश ह ॥६८॥
गाधिः सदारस्तु तदा ऋचीकाश्रममभ्यगात् ।
तीर्थयात्राप्रसङ्गेन सुतां द्रष्टुं नरेश्वरः ॥६९॥
चरुद्वयं गृहीत्वा तु ऋषेः सत्यवती सदा[१] ।
भर्त्तुर्वचनमव्यग्रा हृष्टा मात्रे न्यवेदयत् ॥७०॥
माता तु तस्यै दैवेन दुहित्रे स्वं चरुं ददौ ।
तस्याश्चरुमथाज्ञानादात्मनः सा चकार ह ॥७१॥
अथ सत्यवती गर्भं क्षत्रियान्तकरं शुभं ।
धारयामास दीप्तेन वपुषा घोरदर्शना ॥७२॥
तमृचीकस्ततोदृष्ट्वा योगेनाप्यनुसृत्य च ।
तदाब्रवीद्द्विजश्रेष्ठः स्वां भार्य्यां वरवर्णिनीं ॥७३॥
मातुः सिध्यति ते भद्रे चरुव्यत्यासहेतुना[२] ।
जनिष्यति हि पुत्रस्ते क्रूरकर्मातिदारुणः ॥७४॥
माता जनिष्यते वापि[३] तथाभूतं तपोधनं ।
विश्वं हि ब्रह्म तपसा मया तत्र समर्पितं ॥७५॥

---

(१) तदा इति पाठोयुक्तः ।
(२) अत्र आदर्शपुस्तकमात्रे भ्रान्तिजनितपाठाः सन्ति । यथा, मात्रा सिद्धन्ति ते सर्व्वे भद्रे चर्व्वयानामाहति च इति ख०, यात्रासिद्धन्ति ते सर्व्वे वर्व्वरस्य महोति च इति ग० । क० ङ० च० छ० ज० पुस्तकेषु, मात्रा सिद्धन्ति ता भद्रे इति पाठः साधारणः । इतः परं चतु व्यभ्यासहेतु स इति क०, चरुविन्यासहेतुतु इति ङ० च०, च तु व्यन्यासहेतु तु इति छ० च तु व्यभ्यास हेतु तुत इति ज०
(३) चापि इति ख० ग० ।

एवमुक्ता महाभागा भर्त्त्रा सत्यवती तदा।
प्रसादयामास पतिं सुतोमे नेदृशोभवेत्।
ब्राह्मणापसदस्त्वन्य इत्युक्तोमुनिरब्रवीत् ॥७६॥
नैषः सङ्कल्पितः कामोमया भद्रे तथा त्वया ।
उग्रकर्म्मा भवेत् पुत्रः पितुर्म्मातुश्च कारणात् ॥७७॥
पुनः सत्यवती वाक्यमेवमुक्ताब्रवीदिदं ।
इच्छन् लोकानपि मुने सृजेथाः किं पुनः सुतं ॥७८॥
शमात्मकमृजुं भर्त्तः पुत्रं मे दातुमर्हसि ।
काममेवंविधः पुत्रोमम स्यात्तु वद(१) प्रभो ॥७९॥
मय्यन्यथा(२)न शक्यं वै कर्तुमेव द्विजोत्तम ।
ततः प्रसादमकरोत् स तस्यास्तपसोबलात् ॥८०॥
पुत्रे नास्ति विशेषोमे पौत्रे वा वरवर्णिनि ।
त्वया यथोक्तं वचनं तथा भद्रे भविष्यति ॥८१॥
तस्मात् सत्यवती पुत्रं जनयामास भार्गवं ।
तपस्यभिरतन्दान्तं जमदग्निं शमात्मकं ॥८२॥
भृगोश्चरुविपर्य्यासे रौद्रवैष्णवयोः पुरा ।
यमनाद्वैष्णवस्याग्नेर्यमदग्निरजायत(३) ॥८३॥
विश्वामित्रं तु दायाद्यङ्गाधिः कुशिकनन्दनः ।

---

(१) स्यादरद इति क० ज० ।
(२) यद्यन्यथा इति क०, मह्यन्यथा इति ख०, ग० पुस्तके एतत् श्लोकार्द्धं नास्ति, दद्यन्यथा इति ङ० च०, पद्यन्यथा इति छ० ज० । एते सर्व्वे पाठाः लिपिकरप्रमादजनिताः ।
(३) जमनाद्वैष्णवस्याग्नेर्जमदग्निरजायत इति ज० ।

प्राप्य ब्रह्मर्षिसविता[१] जगाम ब्रह्मणा वृतः ॥८४॥
सा हि सत्यवती पुण्या सत्यव्रतपरायणा ।
कौशिकीति समाख्याता प्रवृत्तेयं महानदी ॥८५॥
परिश्रुता महाभागा कौशिकी सरितां वरा ।
इक्ष्वाकुवंशे त्वभवत्सुवेणुर्नाम पार्थिवः ॥८६॥
तस्य कन्या महाभागा कामली नाम रेणुका ।
रेणुकायान्तु कामल्यां तपोधृतिसमन्वितः ।
आर्चीकोजनयामास जमदग्निः सुदारुणं ॥८७॥
सर्वविद्यान्तगं श्रेष्ठं धनुर्वेदस्य पारगं ।
रामं क्षत्रियहन्तारं प्रदीप्तमिव पावकं ॥८८॥
और्वस्यैवमृचीकस्य[२] सत्यवत्यां महामनाः[३] ।
यमदग्निस्ततोवीर्य्याज्जज्ञे ब्रह्मविदां वरः ।
मध्यमश्च शुनःशेफः शुनःपृच्छः कनिष्ठकः ॥८९॥
विश्वामित्रस्तु धर्मात्मा नाम्ना विश्वरथः स्मृतः ।
जज्ञे भृगुप्रसादेन कौशिकाद्वंशवर्द्धनः[४] ॥९०॥
विश्वामित्रस्य पुत्रस्तु शुनःसेफोभवन्मुनिः ।
हरिश्चन्द्रस्य यज्ञे तु पशुत्वे नियतः स वै ।
देवैर्द्दत्तः स वै यस्माद्देवरातस्ततोभवत् ॥९१॥

---

(१) समतामिति ख० ग० ।
(२) काव्यस्य च ऋचीकस्य इति ख० ग० ।
(३) महात्मनः इति ख० ।
(४) कौशिकवंशवर्द्धनः इतिप्रयोगः साधुः ।

विश्वामित्रस्य पुत्राणां शुनःशेफोऽग्रजः स्मृतः ।
मधुच्छन्दोनयश्चैव[१] कृतदेवौ[२] ध्रुवाष्टकौ ॥९२॥
कच्छपः पूरणश्चैव विश्वामित्रसुतास्तु वै ।
तेषां गोत्राणि बहुधा कौशिकानां महात्मनां ॥९३॥
पार्थिवा देवरातास्च याज्ञवल्क्याः समर्षणाः ।
उदुम्बरा उदुम्लानास्तारका यमसुञ्चताः[३] ॥९४॥
लोहिण्योरेणवश्चैव तथा कारीषवः[४] स्मृताः ।
बभ्रवः पाणिनश्चैव ध्यानजप्यास्तथैव च ॥९५॥
शालावत्या हिरण्याक्षाः स्यङ्कृता गालवाः स्मृताः[५] ।
देवला यामदूताश्च शालङ्कायनवास्कलाः ॥९६॥
ददातिवादराश्चान्ये विश्वामित्रस्य धीमतः ।
ऋष्यन्तरविवाह्यास्ते बहवः कौशिकाः स्मृताः ॥९७॥
कौशिकासोश्रुमाश्चैव[६] तथान्ये सैधवायनाः[७] ।
पौरोरवस्य पुण्यस्य ब्रह्मर्षेः कौशिकस्य तु ॥९८॥
दृषद्वतीसुतश्चापि विश्वामित्रात्तथाष्टकः ।
अष्टकस्य सुतोयोहि प्रोक्तोजह्नुगणोमया ॥९९॥

---

(१) मधुच्छन्दो यमश्चैव इति ख०, जपश्चैवेति ङ० च० ।
(२) कृतदेवो इति ङ० च० ।
(३) स्ताड़कान्तभवास्तथा इति ख०, एषश्लोकोग० पुस्तके नास्ति, यतु-सुञ्चताः इति क० ज०, स्यतुमुञ्चताः इति छ० ।
(४) कासिषरः इति क० ज० ।
(५) शालाव आहिवण्याक्षः स्यङ्कृता गलवः स्मृत इति क० छ० ज० ।
(६) कौशिकासोश्रुताश्चैवेति ङ० छ० ।
(७) सौधवायना इति क०, ज० ।

ऋषय ऊचुः । किं लक्षणेन धर्मेण तपसेह श्रुतेन वा ।
ब्राह्मण्यं(१) समनुप्राप्तं विश्वामित्रादिभिर्नृपैः ॥१००॥
येन येनाभिधानेन ब्राह्मण्यं क्षत्रिया गताः ।
विशेषं ज्ञातुमिच्छामि तपसा दानतस्तथा ॥१०१॥
एवमुक्तस्ततोवाक्यमब्रवीदिदमर्थवत् ।
अन्यायोपगतैर्द्रव्यैराहृत्य यजते धिया(२) ।
धर्माभिकाङ्क्षी यजते न धर्मफलमश्नुते ॥१०२॥
धर्म्मं चैतं समाख्याय पापात्मा पुरुषाधमः ।
ददाति दानं विप्रेभ्योलोकानां दम्भकारणात् ॥१०३॥
जपङ्कृत्वा(३) तथा तीव्रं धनलोभान्निरङ्कुशः ।
रागमोहान्वितोह्यन्ते पावनार्थं ददाति यः ॥१०४॥
तेन दत्तानि दानानि अफलानि भवन्त्युत ।
तस्य धर्म्मप्रवृत्तस्य हिंसकस्य दुरात्मनः ॥१०५॥
एवं लब्ध्वा धनं मोहाद्ददतोयजतश्च ह ।
सङ्क्लिष्टकर्मणोदानं न तिष्ठति दुरात्मनः ॥१०६॥
न्यायागतानां द्रव्याणां तीर्थे सम्प्रतिपादनं ।
कामाननभिसन्धाय यजते च ददाति च ॥१०७॥
स दानफलमाप्नोति तच्च दानं सुखोदयं ।
दानेन भोगानाप्नोति स्वर्गं सत्येन गच्छति ॥१०८॥

---

(१) ब्रह्मण्यमिति ङ० च० ।
(२) राहूय द्विजसत्तमान् इति क० ख० ज० ।
(३) जयङ्कृत्वेति पाठः सुसङ्गतः ।

तपसा तु सुसुप्तेन लोकान् विष्टभ्य तिष्ठति ।
विष्टभ्य स तु तेजस्वी लोकेष्वानन्त्यमश्नुते ॥१०९॥
दानाच्छ्रेयस्तथा यज्ञोयज्ञाच्छ्रेयस्तथा तपः ।
सन्न्यासस्तपसः श्रेयांस्तस्माद्ज्ञानं गुरु स्मृतं ॥११०॥
श्रूयन्ते हि तपःसिद्धाः चात्रोपेता द्विजातयः ।
विश्वामित्रोनरपतिर्मान्धाता संकृतिः कपिः ॥१११॥
कपेश्च[१] पुरुकुत्सस्य सत्यस्यानृहवानृथुः[२] ।
आर्ष्टिशेनोजमीटश्च भागान्योन्यस्तथैव च ॥११२॥
कक्षीवश्चैव शिजयस्तथान्ये च महारथाः ।
रथीतरश्च रुन्दश्च विष्णुवृद्धादयोनृपाः ॥११३॥
चात्रोपेताः स्मृता ह्येते तपसा ऋषिताङ्गताः ।
एते राजर्षयः सर्व्वे सिद्धिं सुमहतीङ्गताः ।
अत ऊर्द्धं प्रवक्ष्यामि अयोर्वंशं महात्मनः ॥११४॥

इति श्रीमहापुराणे वायुप्रोक्ते चन्द्रवंशकीर्त्तनं नाम
ऊनत्रिंशोऽध्यायः समाप्तः ॥

---

(१) कपेरितिपाठोलेखकप्रमादजनितः। अथवा कपेरितिपदप्रयोगस्य-तात्पर्य्यार्थावगतिरति दुरूहा ।
(२) सत्याप्रङ्कृहवान् प्रभुरिति क० ख० ज० ।

अथ त्रिंशोऽध्यायः।

चन्द्रवंशकीर्त्तनं।

सूत उवाच। एते पुत्रा महात्मनः पञ्चैवासन् महाबलाः।
स्वर्भानुतनयाः विप्राः[१] प्रभायां जज्ञिरे नृपः॥१॥
नहुषः प्रथमस्तेषां पुत्रधर्म्मा ततः स्मृतः।
धर्म्मवृद्धात्मजश्चैव सुतहोत्रो[२] महायशाः॥२॥
सुतहोत्रस्य दायादास्त्रयः परमधार्म्मिकाः।
काशः शलश्च द्वावेतौ तथा गृत्समदः[३] प्रभुः॥३॥
पुत्रोगृत्समदस्यापि शुनकोयस्य शौनकः।
ब्राह्मणाः क्षत्रियाश्चैव वैश्याः शूद्रास्तथैव च॥४॥
एतस्य वंशे सम्भूता[४] विचित्रैः कर्म्मभिर्द्विजाः।
शलात्मजोह्यार्ष्टिषेणश्चरन्तस्तस्य चात्मजः॥५॥
शौनकाश्चार्ष्टिषेणाश्च क्षात्रोपेता द्विजातयः।
काशस्य काशयोराष्टः पुत्रोदीर्घतपास्तथा॥६॥
धर्म्मस्य दीर्घतपसोविद्वान् धन्वन्तरिस्ततः।
तपसा सुमहातेजा जातोवृद्धस्य धीमतः।

---

(१) विप्राइत्यत्र न्तेया इति अर्थशून्यपाठः आदर्शपुस्तकमात्रेऽस्ति।

(२) सुनहोत्र इति क० ङ० च०।

(३) गृत्समदः इति ङ०, गृत्समयः इति क०। एष श्लोकः ख० ग०-पुस्तकयोर्नास्ति।

(४) तस्य वंशे समुद्भूता इति ङ० च०।

अथैनमृषयः प्रोचुः सूतं वाक्यमिमं पुनः ॥७॥

ऋषय ऊचुः। कथं धन्वन्तरिर्देवो मानुषेष्विह जज्ञिवान्।

एतद्वेदितुमिच्छामस्ततो ब्रूहि प्रियं तथा ॥८॥

सूत उवाच। धन्वन्तरेः सम्भवोऽयं श्रूयतामिह वै द्विजाः।

स सम्भूतः समुद्रान्ते(१) मथ्यमानेऽमृते पुरा ॥९॥

उत्पन्नः सकलात् पूर्व्वं सर्व्वतश्च श्रिया वृतः।

सर्व्वसंसिद्धकायं तं दृष्ट्वा विष्टम्भितः स्थितः।

अजस्त्वमितिहोवाच तस्मादजस्तु सः स्मृतः ॥१०॥

अजः प्रोवाच विष्णुं तं तनयोस्मि तव प्रभो।

विधत्स्व भागं स्थानञ्च मम लोके सुरोत्तम ॥११॥

एवमुक्तः स दृष्ट्वा तु तथा प्रोवाच स(२) प्रभुः।

कृतो यज्ञविभागस्तु यज्ञियैर्हि सुरैस्तथा ॥१२॥

वेदेषु विधियुक्तश्च विधिहोत्रं महर्षिभिः।

न शक्यमिह होमो वै तुभ्यं कर्त्तुं कदाचन ॥१३॥

अर्वाक्सुतोसि हे देव नाममन्त्रोसि वै प्रभोः।

द्वितीयायान्तु सम्भूत्यां लोके ख्यातिङ्गमिष्यसि ॥१४॥

अणिमादियुता सिद्धिर्गर्भस्थस्य भविष्यति।

तेनैव च शरीरेण देवत्वं प्राप्स्यसि प्रभो।

चारुमन्त्रैर्घृतैर्गन्धैर्यक्ष्यन्ति त्वां द्विजातयः ॥१५॥

---

(१) समुद्रान्ते इत्यत्र समुद्रान्तः-इतिपाठः साधीयान्।

(२) आदर्शपुस्तकमात्रे स इति पाठोऽस्ति अत्र स इतिपदव्यत्ययेन त-मितिपाठः समीचीनः।

अथ च त्वं पुनश्चैव आयुर्वेदं विधास्यसि ।
अवश्यम्भावी ह्यर्थोयं प्राग्दिष्टस्त्वब्जयोनिना ॥१६॥
द्वितीयं द्वापरं प्राप्य भविता त्वं न संशयः ।
तस्मात्(१) तस्मै वरं दत्त्वा विष्णुरन्तर्दधे ततः ॥१७॥
द्वितीये द्वापरे प्राप्ते शौनहोत्रः प्रकाशिराट्(२) ।
पुत्रकामस्तपस्तेपे नृपोदीर्घतपास्तथा ॥१८॥
अजं देवन्तु पुत्रार्थे ह्यारिराधयिषुर्नृपः ।
वरेण छन्दयामास प्रीतोधन्वन्तरिर्नृपं ॥१९॥
नृप उवाच । भगवन् यदि तुष्टस्त्वं पुत्रोमे धृतिमान् भव ।
तथेति समनुज्ञाय तत्रैवान्तरधीयत ॥२०॥
तस्य गेहे समुत्पन्नोदेवोधन्वन्तरिस्तदा ।
काशिराजोमहाराजः सर्व्वरोगप्रनाशनः ॥२१॥
आयुर्वेदं भरद्वाजश्चकार सभिषक्क्रियं ।
तमष्टधा पुनर्व्यस्य शिष्येभ्यः प्रत्यपादयत् ॥२२॥
धन्वन्तरिसुतश्चापि केतुमानिति विश्रुतः ।
अथ केतुमतः पुत्रोविभोभीमरथोनृपः ।
दिवोदास इतिख्यातोवाराणस्यधिपोभवत् ॥२३॥
एतस्मिन्नेव काले तु पुरीं वाराणसीं पुरा ।
शून्यां निवेशयामास क्षेमकोनाम राक्षसः ॥२४॥

---

(१) तस्मादित्यत्र एवं इतिपाठः साधुः ।
(२) स काशिराट् इति ख० ग० ।

शप्ता हि सा पुरी पूर्व्वं निकुम्भेन महात्मना

शून्या वर्षसहस्रं वै भविचीति पुनः पुनः ॥२५॥

तस्यान्तु शप्तमाचायां दिवोदासः प्रजेश्वरः ।

विषयान्ते पुरीं रम्यां गोमत्यां सन्न्यवेशयत् ॥२६॥

ऋषय ऊचुः। वाराणसीं किमर्थन्तां निकुम्भः शप्तवान् पुरा ।

निकुम्भश्चापि धर्म्मात्मा सिद्धचेत्रं शशाप यः ॥२७॥

सूत उवाच। दिवोदासस्तु राजर्षिर्नगरीं प्राप्य पार्थिवः।

वसते स महातेजाः स्फीतायां वै नराधिपः ॥२८॥

एतस्मिन्नेव काले तु कृतदारोमहेश्वरः।

देव्याः स प्रियकामस्तु वसानश्च सुरान्तिके ॥२९॥

देवाज्ञया पारिषदा विश्वरूपास्तपोधनाः ।

पूर्वोक्तै रूपविशेषैस्तोषयन्ति महेश्वरीं ॥३०॥

हृष्यति तैर्महादेवीमेना नैव तु हृष्यति।

जुगुप्सते सा नित्यञ्च देवं देवीं तथैव च ॥३१॥

मम पार्श्वे त्वनाचार(१) स्तव भर्त्ता महेश्वरः ।

दरिद्रः सर्व एवेह अक्लिष्टं त्वड़तेनघे ॥३२॥

माचा तथोक्ता वचसा स्त्रीस्वभावान्नचाचमत् ।

स्मितं कृत्वा तु वरदा हरपार्श्वमथागमत् ॥३३॥

विषस्रवदना देवी महादेवमभाषत ।

नेह वत्स्याम्यहं देव नय मां स्वं निवेशनं ॥३४॥

---

(१) दुराचार इति ख० ग० ।

तथोक्तस्तु महादेवः सर्वान् लोकानवेक्ष्य ह ।
वासार्थं रोचयामास पृथिव्यां तु द्विजोत्तमाः ।
वाराणसीं महातेजाः सिद्धक्षेत्रं महेश्वरः ॥३५॥
दिवोदासेन तां ज्ञात्वा निविष्टान्नगरीं भवः ।
पार्श्वस्थं स समाहूय गणेशं क्षेमकं[(१)] ब्रवीत् ॥३६॥
गणेश्वर पुरीङ्गत्वा शून्यां वाराणसीं कुरु ।
मृदुना चाभ्युपायेन अतिवीर्यः स पार्थिवः ॥३७॥
ततोगत्वा निकुम्भस्तु पुरीं वाराणसीं पुरा ।
स्वप्ने सन्दर्शयामास मङ्कनं नाम नापितं ॥३८॥
श्रेयस्तेहं करिष्यामि स्थानं मे रोचयानघ ।
मद्रूपां[(२)] प्रतिमां कृत्वा नगर्य्यन्ते निवेशय ॥३९॥
तथा स्वप्ने यथा दृष्टं सर्वं कारितवान् द्विजाः ।
नगरीद्वार्यनुज्ञाप्य राजानन्तु यथाविधि ॥४०॥
पूजा तु महती चैव नित्यमेव प्रयुज्यते ।
गन्धैर्धूपैश्च माल्यैश्च प्रेक्षणीयैस्तथैव च ॥४१॥
अन्नप्रदानयुक्तैश्च अत्यद्भुतमिवाभवत् ।
एवं सम्पूज्यते तत्र नित्यमेव गणेश्वरः ॥४२॥
ततोवरसहस्राणि नगराणां प्रयच्छति ।

---

(१) क्षेपकोब्रवीदिति ख० ।
(२) मद्रूपामित्यत्र, आदर्शपुस्तकमात्रे अर्थरहितपाठाः सन्ति । यथा, मेद्रूयामिति क०, मखूषामिति ख० ग०, मडूपामिति ङ० च० छ० ज० ।

पुत्रान् हिरण्यमायूंषि सर्व्वकामांस्तथैव च ॥४३॥
राज्ञस्तु महिषी श्रेष्ठा सुयशा नाम विश्रुता।
पुत्रार्थमागता साध्वी राज्ञा देवी प्रचोदिता ॥४४॥
पूजान्तु विपुलां कृत्वा देवी पुत्रानयाचत।
पुनः पुनरथागम्य बहुशः पत्रकारणात् ॥४५॥
न प्रयच्छति पुत्रांस्तु निकुम्भः कारणेन तु।
राजा यदि तत् क्रुध्येत ततः किञ्चित् प्रवर्त्तते ॥४६॥
अथ दीर्घेन कालेन क्रोधोराजानमाविशत्।
भूतं त्विदं महाद्वारि नगराणां प्रयच्छति ॥४७॥
प्रीत्या वरांश्च शतशोन किञ्चित्तु प्रवर्त्तते।
मामकैः पूज्यते नित्यं नगर्यां मम चैव तु ॥४८॥
तत्राच्चितस्च बहुशोदेव्या मे तत्र कारणात्।
न ददाति च पुत्रं मे कृतघ्नोबहुभोजनः ॥४९॥
अतोनार्हति पूजान्तु मत्सकाशात् कथञ्चन।
तस्मात्तु नाशयिष्यामि तस्य स्थानं दुरात्मनः ॥५०॥
एवं तु स विनिश्चित्य दुरात्मा राजकिल्विषी।
स्थानं गणपतेस्तस्य नाशयामास दुर्मतिः ॥५१॥
भग्नमायतनं दृष्ट्वा राजानमगमत् प्रभुः।
यस्माद्दृतेऽपराधं मे त्वया स्थानं विनाशितं ॥५२॥
अकस्मात् तु परी शून्या भवित्री ते नराधिप।
ततस्तेन तु शापेन शून्या वाराणसी तथा ॥५३॥
शप्तां पुरीं निकुम्भस्तु महादेवमथानयत्।

शून्यां पुरीं महादेवोनिर्म्ममे परमात्मना ॥५४॥
तुल्यां देवविभूत्यास्तु देव्याश्चैव महात्मनः ।
रमते तत्र वै देवी रममाणोमहेश्वरः[१] ॥५५॥
न रतिं तत्र वै देवी लभते गृहविस्मयात् ।
देव्याः क्रीड़ार्थमीशानो[२]देवोवाक्यमथाब्रवीत् ॥५६॥
नाहं वेश्म विमोच्यामि अविमुक्तं हि मे गृहं ।
प्रहस्यैनामथोवाच अविमुक्तं हि मे गृहं ॥५७॥
नाहं देवि गमिष्यामि गच्छस्वेह रमाम्यहं ।
तस्मात्तदविमुक्तं हि प्रोक्तं देवेन वै स्वयं ॥५८॥
एवं वाराणसी शप्ता अविमुक्तं च कीर्त्तितं ।
यस्मिन् वसति वै देवः सर्वदेवनमस्कृतः ।
युगेषु त्रिषु धर्मात्मा सह देव्या महेश्वरः ॥५९॥
अन्तर्द्धानं कलौ याति तत्पुरन्तु महात्मनः ।
अन्तर्हिते पुरे तस्मिन् पुरी सा वसते पुनः ॥६०॥
एवं वाराणसी शप्ता निवेशं पुनरागता ।
भद्रश्रेण्यस्य[३] पुत्राणां शतमुत्तमधन्विनां ॥६१॥
हत्वा निवेशयामास दिवोदासोनराधिपः ।
भद्रश्रेण्यस्य राज्यन्तु हृतन्तेन बलीयसा ॥६२॥

---

(१) ऐश्वर्य्यात् सातु विस्मिता इति क० छ० ज० ।
(२) ख० ग० ङ० च० पुस्तकेषु पुनर्यामीति तां देवीं इतिपाठोऽस्ति । अयन्त्वपपाठः ।
(३) भद्रसेणस्येति क०, भद्रसेनस्येति ख० ग० ।

भद्रश्रेण्यस्य पुत्रस्तु दुर्दमोनाम नामतः।
दिवोदासेन बालेति घृणया स विवर्जितः॥६३॥
दिवोदासाद्दृषद्वत्यां वीरोजज्ञे प्रतर्द्दनः।
तेन पुत्रेण बालेन प्रहृतं तस्य वै पुनः॥६४॥
वैरस्यान्तं महाराज्ञा तदा तेन विधित्सता।
प्रतर्द्दनस्य पुत्रौ द्वौ वत्सोगर्गश्च विश्रुतः॥६५॥
वत्सपुत्रोह्यलर्कस्तु सन्नतिस्तस्य वात्मजः।
अलर्कं प्रति राजर्षिर्गीतश्लोकौ पुरातनौ॥६७॥
षष्टिर्वर्षसहस्राणि षष्टिर्वर्षशतानि च।
युवा रूपेण सम्पन्नोह्यलर्कः काशिसत्तमः।
लोपामुद्राप्रसादेन परमायुरवाप्तवान्॥६८॥
शापस्यान्ते महाबाहुर्हत्वा क्षेमकराक्षसं।
रम्यामावासयामास पुरीं वाराणसीं नृपः॥६९॥
सन्नतेरपि दायादः सुनीथो[१] नाम धार्मिकः।
सुनीथस्य तु दायादः सुकेतुर्नाम धार्म्मिकः॥७०॥
सुकेतुतनयश्चापि धर्मकेतु[२] रितिश्रुतिः।
धर्मकेतोस्तु दायादः सत्यकेतुर्महारथः॥७१॥
सत्यकेतुसुतश्चापि विभुर्नाम प्रजेश्वरः।
सुविभुस्तु विभोः पुत्रः सुकुमारस्ततः स्मृतः॥७२॥

---

(१) सुतीर्थ इति ख० ग०।
(२) वर्म्मकेतु रिति ख० ग०।

सुकुमारस्य पुत्रस्तु धृष्टकेतुः(१) स धार्म्मिकः(२) ।
धृष्टकेतोस्तु दायादोवेणुहोत्रः प्रजेश्वरः ॥७३॥
वेणुहोत्रसुतस्यापि गार्ग्योवै नामः विश्रुतः ।
गार्ग्यस्य गर्गभूमिस्तु(३) वात्स्योवत्सस्य धीमतः ॥७४॥
ब्राह्मणाः क्षत्रियाश्चैव तयोः पुत्राः सुधार्म्मिकाः ।
विक्रान्ता बलवन्तश्च सिंहतुल्यपराक्रमाः ॥७५॥
इत्येते काश्यपाः प्रोक्ता रजेरपि निबोधत ।
रजेः पुत्रशतान्यासन् पञ्च वीर्यवतोभुवि ।
राजेयमिति विख्यातं क्षत्रमिन्द्रभयावहं ॥७६॥
तदा देवासुरे युद्धे समुत्पन्ने सुदारुणे ।
देवाश्चैवासुराश्चैव पितामहमथाब्रुवन् ॥७७॥
आवयोर्भगवन् युद्धे विजेता कोभविष्यति ।
ब्रूहि नः सर्व्वलोकेश श्रोतुमिच्छामहे वयं ॥७८॥
ब्रह्मोवाच । येषामर्थाय संग्रामे रजिरात्तायुधः प्रभुः ।
योत्स्यते ते विजेष्यन्ति त्रीँल्लोकान्नात्र संशयः ॥७९॥
रजिर्यतस्ततोलक्ष्मीर्यतोलक्ष्मीस्ततोधृतिः ।
यतोधृतिस्ततोधर्म्मोयतोधर्मस्ततोजयः ॥८०॥
तद्देवा दानवाः सर्वे ततः श्रुत्वा रजेर्जयं ।
अभ्ययुर्जयमिच्छन्तः स्तुवन्तोराजसत्तमं ॥८१॥

---

(१) दृष्टकेतुरिति ङ० च० ।
(२) सुधार्म्मिक इति ख० ।
(३) इतः परं श्लोकार्द्धपतनमवगम्यते ।

ते हृष्टमनसः सर्वे राजानं देवदानवाः ।
ऊचुरस्मज्जयाय त्वं गृहाण वरकार्मुकं ॥८२॥
रजिरुवाच । अहञ्जेष्यामि नो युद्धे देवान् शक्रपुरोगमान् ।
इन्द्रोभवामि धर्मात्मा ततोयोत्स्यामि संयुगे ॥८३॥
दानवा ऊचुः । अस्माकमिन्द्रः प्रह्लादस्तस्यार्थे विजयामहे[१] ।
अस्मिंस्तु समये राजंस्तिष्ठेथा देव नोऽदितेः ॥८४॥
स तथेति ब्रुवन्नेव देवैरप्यभिचोदितः ।
भविष्यसीन्द्रोजित्वेति देवैरपि निमन्त्रितः ॥८५॥
जघान दानवान् सर्व्वान् समक्षं[२] वज्रपाणिनः ।
स विप्रनष्टां देवानां परमश्रीः श्रियं वशी ॥८६॥
निहत्य दानवान् सर्व्वान् व्याजहार रजिः प्रभुः[३] ।
तं तथा तु रजिं तत्र देवैस्सह शतक्रतुः ॥८७॥
रजिपुत्रोहमित्युक्त्वा पुनरेवाब्रवीद्वचः ।
इन्द्रोसि राजन् देवानां सर्वेषान्नात्र संशयः ।
यस्याहमिन्द्रपुत्रस्ते ख्यातिं यास्यामि शत्रुहन् ॥८८॥
स तु शक्रवचः श्रुत्वा वञ्चितस्तेन मायया ।
तथेत्येवाब्रवीद्राजा प्रीयमाणः शतक्रतुं ॥८९॥
तस्मिंस्तु देवसदृशे दिवं प्राप्ते महीपतौ ।

---

(१) विनयामहे इति क० ज० ।
(२) ये बध्या इति क० ङ० ।
(३) अस्मात् श्लोकात् परं कतिपयश्लोकपतनं सम्भाव्यते राज्ञा रजिनोक्त विषयस्याभावदर्शनात् ।

दायाद्यमिन्द्रादाजह्रुराचारं तनया रजेः ॥९०॥
तानि पुत्रशतान्यस्य तच्च स्थानं शचीपतेः ।
समक्रामन्त बहुधा स्वर्गलोकं[१] त्रिविष्टपं ॥९१॥
ततः काले बहुतिथे समतीते महाबलः ।
हृतराज्योऽब्रवीच्छक्रो हृतभागो[२] बृहस्पतिं ॥९२॥
बदरीफलमात्रं वै पुरोडाशं विधत्स्व मे ।
ब्रह्मर्षे येन तिष्ठेयं तेजसाप्यायितस्ततः ॥९३॥
ब्रह्मन् कृशोऽयं विमना हृतराज्यो हृताशनः ।
हतौजा दुर्बलो मूढो रजिपुत्रैः प्रसीद मे ॥९४॥
बृहस्पतिरुवाच । यद्येवं चोदितः शक्र त्वया स्यां पूर्व्वमेव हि ।
नाभविष्यत् त्वत्प्रियार्थं नाकर्त्तव्यं ममानघ ॥९५॥
प्रयतिष्यामि देवेन्द्र तद्धितार्थं महाद्युते ।
यथा भागञ्च राज्यञ्च अचिरात् प्रतिपत्स्यसे ॥९६॥
तथा शक्र गमिष्यामि[३] मा भूत्ते विक्लवं मनः ।
ततः कर्म्म चकारास्य तेजःसंवर्द्धनं महत् ॥९७॥
तेषाञ्च बुद्धिसंमोहमकरोद्बुद्धिसत्तमः ।
ते यदा ससुता मूढा रागोत्पन्ना विधर्म्मिणः ॥९८॥
ब्रह्मद्विषश्च संवृत्ता हतवीर्य्यपराक्रमाः ।
ततो लेभे सुरैश्वर्य्यमैन्द्रस्थानं तथोत्तमं ॥९९॥

---

(१) सूर्य्यलोकमिति क० ।
(२) हृतभाग्यो इति ख०, हृतभार्य्यो इति ग० ।
(३) गमिष्यामीत्यत्र करिष्यामीतिपाठः सुसङ्गतः ।

हत्वा रजिसुतान् सर्व्वान् कामक्रोधपरायणान् ।
य इदं पावनं स्थानं प्रतिष्ठानं शतक्रतोः ॥१००॥
शृणुयाद्वा रजेर्वापि न स दौरात्म्यमाप्नुयात् ।

इति श्रीमहापुराणे वायुप्रोक्ते रजियुद्धं नाम त्रिंशो-ऽध्यायः समाप्तः ॥

अथ एकत्रिंशोऽध्यायः ।

चन्द्रवंशवर्णनं ।

ऋषय ऊचुः । मरुतेन कथं कन्या राज्ञे दत्ता महात्मना ।
किंवीर्य्याश्च महात्मानोजाता मरुतकन्यकाः ॥१॥
सूत उवाच । आहवन्(१) तं(२) मरुत्सोममन्नकामः प्रजेश्वरं(३) ।
मासि मासि महातेजाः षष्टिसंवत्सरान्नृपः ॥२॥
तेन ते मरुतस्तस्य मरुत्सोमेन तोषिताः ।
अक्षय्यान्नन्ददुः प्रीताः सर्वकामपरिच्छदं ॥३॥
अन्नन्तस्य सकृत्पक्वमहोरात्रे न क्षीयते(४) ।
कोटिशोदीयमानञ्च सूर्य्यस्योदयनादपि(५) ॥४॥
मित्रज्योतिस्तु(६) कन्यायां मरुतस्य च धीमतः ।
तस्माज्जाता महासत्वा धर्म्मज्ञा मोक्षदर्शिनः ॥५॥
सन्न्यस्य गृहधर्म्माणि वैराग्यं समुपस्थिताः ।
यतिधर्म्ममवाप्येह ब्रह्मभूयाय ते गताः ॥६॥
अनपाय(७)स्ततोजातस्तदा(८) धर्म्मप्रदत्तवान् ।
क्षत्रधर्म्मस्ततोजातः प्रतिपक्षोमहातपाः ॥७॥

---

(१) आजुह्वन्नित्यर्थे आह्वन्नित्यार्षः ।
(२) आजुग्धन्नित्यर्थे आह्वन्नित्यार्षः । आहरन्तमिति क० ङ० च० छ० ज० ।
(३) महेश्वरमिति ख० ग० ।
(४) क्षयतीत्यर्थे क्षीयते इत्यार्षः ।
(५) अतः परं कतिपयश्लोकपतनमुपलभ्यते प्रक्रान्ते ऋषीणां प्रश्ने सूतोक्तोत्तरवाक्यस्याभावदर्शनात् ।
(६) मित्रद्योतेस्तु इति क० छ० ज० । एष श्लोकः ख० ग० पुस्तकयोर्नास्तः । अयन्त्वपपाठः ।
(७) अनपत्य इति ख० ग० ङ० च० ।
(८) तदा इत्यत्र तत इतिपाठः समीचीनः ।

प्रतिपत्त्सुतस्यापि सञ्जयोनाम विश्रुतः।
सञ्जयस्य जयः पुत्रोविजयस्तस्य जज्ञिवान् ॥८॥
विजयस्य जयः पुत्रस्तस्य हर्यन्द्वतः[१] सुतः।
हर्यन्दुतस्ततो[२]राजा सहदेवः प्रतापवान् ॥९॥
सहदेवस्य धर्म्मात्मा अदीन[३] इति विश्रुतः।
अदीनस्य जयत्सेनस्तस्य पुत्रोऽथ सङ्कृतिः ॥१०॥
सङ्कृतेरपि धर्म्मात्मा क्षतधर्म्मा[४] महायशाः।
इत्येते क्षत्रधर्म्माणोनहुषस्य निबोधत ॥११॥
नहुषस्य तु दायादाः षडिन्द्रोपमतेजसः।
उत्पन्नाः पितृकन्यायां विरजायां महौजसः ॥१२॥
यतिर्ययातिः संयातिरायातिः पञ्च तुद्भयः[५]।
यतिर्ज्यैष्ठस्तु तेषां वै ययातिस्तु ततोऽवरः ॥१३॥
काकुत्स्थकन्यां गां नाम लेभे पत्नीं यतिस्तदा।
संयातिर्मोक्षमास्थाय ब्रह्मभूतोभवन्मुनिः ॥१४॥
तेषां मध्येतु पञ्चानां ययातिः पृथिवीपतिः।
देवजानिमुशनसः सुतां भार्य्यामवाप ह ॥१५॥
शर्म्मिष्ठामासुरीञ्चैव तनयां वृषपर्वणः।
यदुञ्च तुर्वसुञ्चैव देवजानिर्व्यजायत ॥१६॥

(१) हर्य्यश्वकः इति ख०।
(२) हर्य्यश्वस्तु ततो इति ख० ग०।
(३) आदित्य इति ख० ग० आदीन इति ङ० च०।
(४) क्षत्रधर्म्मा इति ख० ङ० च०।
(५) उद्भवः इति ङ० उद्दव इति च०।

द्रुह्युञ्चानुञ्च पुरुञ्च शर्मिष्ठा वार्षपर्वणी ।
अजीजनन्महावीर्यान् सुतान्देवसुतोपमान् ॥१७॥
रथन्तस्मै ददौ रुद्रः प्रीतः परमभास्वरं ।
असङ्गं काञ्चनं दिव्यमक्षयौ च महेषुधी ॥१८॥
युक्तं मनोजवैरश्वैर्येन कन्यां समुद्वहत्[१] ।
स तेन रथमुख्येन जिगाय च ततोमहीं ॥१९॥
ययातिर्युधि दुर्द्धर्षोदेवदानवमानवैः ।
पौरवाणां नृपाणाञ्च सर्वेषां सोभवद्रथः ॥२०॥
योवत्सुदेशप्रभवः कौरवोजनमेजयः ।
कुरोः[२] पुत्रस्य राज्ञस्तु राज्ञः पारिक्षितस्य ह ।
जगाम स रथोनाशं शापाद्गार्ग्यस्य धीमतः ॥२१॥
गार्ग्यस्य हि सुतं बालः स राजा जनमेजयः ।
दुर्बुद्धिर्हिंसयामास लोहगन्धं नराधिपं ॥२२॥
स लोहगन्धोराजर्षिः परिधावन्नितस्ततः ।
पौरजानपदैस्त्यक्तोन लेभे शर्म कर्हिचित् ॥२३॥
ततः स दुःखसन्तप्तोनालभत्संविदं क्वचित् ।
प्रजगाम हेतुकमृषिं शरण्यं व्यथितस्तदा ॥२४॥
इन्द्रोतोनाम विख्यातोयोसौ मुनिरुदारधीः ।
योजयामास चेन्द्रोतः शौनकोजनमेजयं ।
अश्वमेधेन राजानं पावनार्थं द्विजोत्तमः ॥२५॥
स लोहगन्धोव्यनशत्तस्यावसथमेत्य ह ।

---

(१) समदुद्वहदित्यर्थे समुद्वहदित्यार्षः ।
(२) पुरोः इति ख० ।

[1]स च दिव्योरथस्तस्माद्वसोश्चेदिपतेस्तथा ॥२६॥
ततः शक्रेण तुष्टेन लेभे तस्माद्बृहद्रथः ।
ततोहत्वा जरासन्धं भीमस्तं रथमुत्तमं ।
प्रददौ वासुदेवाय प्रीत्या कौरवनन्दनः ॥२७॥
स जरां प्राप्य राजर्षिर्ययातिर्नहुषात्मजः ।
पुत्रं ज्येष्ठं वरिष्ठञ्च यदुमित्यब्रवीद्वचः ॥२८॥
जरावली च मां तात पलितानि च पर्य्यगुः ।
काव्यस्योशनसः शापान्न च तृप्तोस्मि यौवने ॥२९॥
त्वं यदो प्रतिपद्यस्व पाप्मानं जरया सह ।
जरां मे प्रतिगृह्णीष्व तं यदुः प्रत्युवाच ह ॥३०॥
अनिर्दिष्टा मया भिक्षा ब्राह्मणस्य प्रतिश्रुता ।
सा च व्यायामसाध्या वै न ग्रहीष्यामि ते जरां ॥३१॥
जराया बहवोदोषाः पानभोजनकारिणः ।
तस्माज्जरान्न ते राजन् ग्रहीतुमहमुत्सहे ॥३२॥
सितश्मश्रुधरोदीनोजरया शिथिलीकृतः ।
बलीसन्ततगात्रश्च दुर्द्दर्शोदुर्बलाकृतिः ॥३३॥
अशक्तः कार्य्यकरणे परिभूतस्तु यौवने ।
महोपभीतिभिश्चैव[2] तां जरान्नाभिकामये ॥३४॥

(१) स च दिव्योरथस्तस्मादिति, ततः शक्रेण तुष्टेनेति, ततोहत्वा जरासन्धमिति च, एभ्यः श्लोकार्द्धेभ्यः प्राक् कानिचिद्वाक्यानि न सन्ति पूर्व्वापरसङ्गतिविरहात् ।

(२) सहोपवीतिभिश्चैवेति क० ङ० च० छ० ज०; अयन्तु न सङ्गतः । महाभीश्चैव सर्व्वेषामिति ग० ।

सन्ति ते बहवः पुत्रा मत्तः प्रियतरा नृप ।
प्रतिगृह्णन्तु धर्मज्ञ पुत्रमन्यं वृणीष्व वै ॥३५॥
स एवमुक्तोयदुना तीव्रकोपसमन्वितः ।
उवाच वदतांश्रेष्ठोज्येष्ठं तं गर्हयन् सुतं ॥३६॥
आश्रमः कस्य वान्योस्ति(१) कोवा धर्मविधिस्तव ।
मामनादृत्य दुर्बुद्धे यदात्थ नवदेशिक(२) ॥३७॥
एवमुक्त्वा यदुं राजा शशापैनं स मन्युमान् ।
यस्त्वं मे हृदयाज्जातोवयः स्वं न प्रयच्छसि ॥३८॥
तस्मान्न राज्यभाग् मूढ प्रजा ते वै भविष्यति ।
तुर्वसो प्रतिपद्यस्व पाप्मानं जरया सह ॥३९॥
तुर्वसुरुवाच । न कामये जरां तात कामभोगप्रणाशिनीं ।
जराया बहवोदोषाः पानभोजनकारिणः ।
तस्माज्जरां न ते राजन् ग्रहीतुमहमुत्सहे ॥४०॥
ययातिरुवाच । यस्त्वं मे हृदयाज्जातोवयः स्वन्न प्रयच्छति ।
तस्मात् प्रजा समुच्छेदं तुर्वसो तव यास्यति ॥४१॥
असङ्कीर्णा च धर्म्मेण प्रतिलोमवरेषु च ।
पिशिताशिषु चान्येषु मूढ राजा भविष्यसि ॥४२॥
गुरुदारप्रसक्तेषु तिर्य्यग्योनिगतेषु वा ।

---

(१) आश्रमः कस्य कोन्योऽस्ति इति ग० । अयन्तु न समीचीनः ।
(२) आदर्शपुस्तकमात्रे यदाहन्नवदेशिकः इति पाठोऽस्ति । अयन्तु न सङ्गतार्थप्रयोगः ।

पशुधर्म्मेषु[१] म्लेच्छेषु भविष्यति[२] न संशयः ॥४३॥

सूत उवाच। एवन्तु तुर्वसुं शप्ता ययातिः सुतमात्मनः।

शर्मिष्ठायाः सुतं द्रुह्युमिदं वचनमब्रवीत् ॥४४॥

द्रुह्य त्वं प्रतिपद्यस्व वर्णरूपविनाशिनीं।

जरां वर्षसहस्रं वै यौवनं स्वन्ददस्व मे ॥४५॥

पूर्णे वर्षसहस्रे ते प्रतिदास्यामि यौवनं।

स्वञ्चादास्यामि[३] भूयोहं पाप्मानं जरया सह ॥४६॥

द्रुह्य उवाच। न गजन्न रथं नाश्वं जीर्णोभुङ्क्ते न च स्त्रियं।

न सङ्गश्चास्य भवति न जरान्तेन कामये ॥४७॥

ययातिरुवाच। यस्त्वं मे हृदयाज्जातोवयः स्वन्न प्रयच्छसि।

तस्माद्द्रुह्य प्रियः कामोन ते सम्पत्स्यते क्वचित् ॥४८॥

नौप्लवोत्तरसञ्चारस्तत्र नित्यं भविष्यति।

अराजभ्राजवंशस्त्वं तत्र नित्यं भविष्यसि[४] ॥४९॥

अनो त्वं प्रतिपद्यस्व पाप्मानं जरया सह।

एवं वर्षसहस्रन्तु चरेयं यौवनेन ते ॥५०॥

अनुरुवाच। जीर्णः शिशुवरं दत्ते[५] जरया ह्यशुचिः सदा।

---

(१) नष्टधर्म्मेषु इति ख० ग०।

(२) भविष्यतीत्यत्र भविष्यसीतिप्रयोगः साधुः।

(३) अवदास्यामीति ख० ग०।

(४) चाप्यसि वान्धवः इति ङ०च०। एष श्लोकः ख०ग०पुस्तकयोर्न विद्यते।

(५) क० ज० पुस्तकयोः जीर्णः शुखनत्ते इति, छ० पुस्तके जीर्णः शिशुरवदत्ते इति, लिपिकरप्रमादजनितपाठोऽस्ति। अत्र जीर्णः शिशुसुखं दत्ते इति पाठः सम्भवितुमर्हति।

न जुहोति स कालेऽग्निं तां जरान्नाभिकामये ॥५१॥
ययातिरुवाच । यस्त्वं मे हृदयाज्जातोवयः स्वन्न प्रयच्छसि ।
जरादोषस्त्वयोक्तोयं तस्मात्ते प्रतिपत्स्यते ॥५२॥
प्रजा च यौवनं प्राप्ता विनशिष्यात्यतस्तव ।
अग्निप्रस्कन्दनपरस्त्वं चाप्येव भविष्यसि ॥५३॥
पुरो त्वं प्रतिपद्यस्व पाप्मानञ्जरया सह ।
जरावली च मान्तात पलितानि च पर्यगुः ॥५४॥
काव्यस्योशनसः शापान्न च तृप्तोस्मि यौवने ।
कञ्चित्कालञ्चरेयं वै विषयान् वयसा तव ॥५५॥
पूर्णे वर्षसहस्रे ते प्रतिदास्यामि यौवनं ।
स्वञ्चैव प्रतिपत्स्यामि पाप्मानञ्जरया सह ॥५६॥
सूत उवाघ । एवमुक्तः प्रत्युवाच पुत्रः पितरमञ्जसा ।
यथानुमन्यसे तात करिष्यामि तथैव च ॥५७॥
प्रतिपत्स्यामि ते राजन् पाप्मानं जरया सह ।
गृहाण यौवनं मत्तस्त्वर कामान् यथेप्सितान् ।५८॥
जरयाहं प्रतिच्छन्नोवयोरूपधरस्तव ।
यौवनं भवते दत्त्वा चरिष्यामि यथार्थवत् ॥५९॥
ययातिरुवाच । पुरो प्रीतोस्मि भद्रन्ते प्रीतश्चेदं ददामि ते ।
सर्वकामसमृद्धा ते प्रजा राज्ये भविष्यति ॥६०॥
सूत उवाच । पुरोरनुमतोराजा ययातिः स्वां जरान्ततः ।
संक्रामयामास तदा प्रसादाद्भार्गवस्य तु ॥६१॥
यौवनेनाथ वयसा ययातिर्नहुषात्मजः ।

प्रीतियुक्तोनरश्रेष्ठश्चचार विषयान् स्वकान् ॥६२॥
यथाकामं यथोत्साहं यथाकालं यथासुखं ।
धर्म्माविरोधाद्राजेन्द्रोयथार्हति(१) स एव हि ॥६३॥
देवानतर्पयद्यज्ञैः पितॄन् श्राद्धैस्तथैव च ।
दीनांश्चानुग्रहैरिष्टैः कामैश्च द्विजसत्तमान् ॥६४॥
अतिथीनन्नपानैश्च वैश्यांश्च परिपालनैः ।
आनृशंस्येन शूद्रांश्च दस्यून् संनिग्रहेण च ॥६५॥
धर्म्मेण च प्रजाः सर्व्वा यथावदनुरञ्जयन् ।
ययातिः पालयामास साक्षादिन्द्र इवापरः ॥६६॥
स राजा सिंहविक्रान्तोयुवा विषयगोचरः ।
अविरोधेन धर्म्मस्य चचार सुखमुत्तमं ॥६७॥
स मार्गमाणः कामानामन्तदोषनिदर्शनात् ।
विश्वासहेतोरेमे वै वैभ्राजे नन्दने वने ॥६८॥
अपश्यत्स यदा तां वै वर्द्धमानां नृपस्तदा ।
गत्वा पुरोः सकाशं वै स्वाञ्जरां प्रत्यपद्यत ॥६९॥
स सम्प्राप्य तु तान् कामांस्तृप्तः खिन्नश्च पार्थिवः ।
कालं वर्षसहस्रं वै सस्मार मनुजाधिपः ॥७०॥
परिसङ्ख्याय कालञ्च कलाकाष्ठास्तथैव च ।
पूर्णं मत्वा ततः कालं पुरुं पुत्रमुवाच ह ॥७१॥
यथासुखं यथोत्साहं यथाकालमरिन्दम ।

---

(१) आदर्शपुस्तकमात्रे अत्र लेखकप्रमादकृतपाठो स्तः । यथा, यथा हन्ति इति क० ख० ङ० च० छ० ज०, यथा यन्ति इति ग० ।

सेविता विषयाः पुत्र यौवनेन मया तव ॥७२॥
पुरो प्रीतोस्मि भद्रन्ते गृहाण त्वं स्वयौवनं।
राष्ट्रञ्च[१] त्वं गृहाणेदं त्वं हि मे प्रियकृत्सुतः ॥७३॥
प्रतिपेदे जरां राजा ययातिर्नहुषात्मजः ।
यौवनं प्रतिपेदे च पुरुः स्वं पुनरात्मनः ॥७४॥
अभिषेक्तुकामञ्च नृपं पुरुं पुत्रं कनीयसं।
ब्राह्मणप्रमुखा वर्णा इदं वचनमब्रुवन् ॥७५॥
कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्रभो ।
श्रेष्ठं यदुमतिक्रम्य पुरोराज्यं प्रदास्यसि ॥७६॥
यदुर्ज्येष्ठस्तव सुतोजातस्तमनु तुर्वसुः।
शर्मिष्ठायाः सुतोद्रुह्युस्ततोनु पुरुरेव च ॥७७॥
कथं ज्येष्ठानतिक्रम्य कनीयान् राज्यमर्हति ।
अतः सम्बोधयामि त्वां धर्म्मं समनुपालय ॥७८॥
ययातिरुवाच । ब्राह्मणप्रमुखा वर्णाः सर्वे शृण्वन्तु मे वचः।
ज्येष्ठं प्रति यथा राष्ट्रं न देयं मे कथञ्चन ॥७९॥
मातापित्रोर्वचनकृद्धितपुत्रः प्रशस्यते ।
मम ज्येष्ठेन यदुना नियोगेनानुपालितः ॥८०॥
प्रतिकूलं पितुर्यश्च न स पुत्रः सतां मतः ।
स पुत्रः पुत्रवद्यश्च वर्त्तते पितृमातृषु ॥८१॥
यदुनाहमवज्ञातस्तथा तुर्वसुनापि च ।
द्रुह्येण चानुना चैवमप्यवज्ञाकृता भृशं ॥८२॥

(१) राज्यञ्चेति ख० ग० ङ० च० ।

पूरुणा तु कृतं वाक्यं मानितश्च विशेषतः ।
कनीयान् मम दायादोजरा येन धृता मम ।
सर्वकामः सर्वकृतः पूरुणा पुत्रकारिणा ॥८३॥
शुक्रेन च वरोदत्तः काव्येनोशनसा स्वयं ।
पुत्रोयस्त्वानुवर्त्तेत स राजा ते महामते ॥८४॥
भवतोनुमतोप्येवं पूरूराष्ट्रेभिषिच्यतां ।
यः पुत्रोगुणसम्पन्नोमातापित्रोर्हितः सदा ।
सर्वमर्हति कल्यानं कनीयानपि स प्रभुः ॥८५॥
अर्हः पूरुरिदं राष्ट्रं यः प्रियः प्रियकृत्तव(१)।
वरदानेन शुक्रस्य न शक्यं वक्तुमुत्तरं ॥८६॥
पौरजानपदैस्तुष्टैरित्युक्तोनाहुषस्तदा ।
अभिषिच्य ततः पूरुं स्वराष्ट्रे सुतमात्मनः ॥८७॥
दिशि दक्षिणपूर्वस्यान्तुर्वसुन्तु न्यवेशयत् ।
दक्षिणापरतोराजा यदुं श्रेष्ठं न्यवेशयत् ॥८८॥
प्रतीच्यामुत्तरस्याञ्च द्रुह्यञ्चानुञ्च तावुभौ ।
सप्तद्वीपां ययातिस्तु जित्वा पृथ्वीं ससागरां ।
व्यभजत्पञ्चधा राजा पुत्रेभ्योनाहुषस्तदा ॥८९॥
तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना ।
यथाप्रदेशं धर्म्मज्ञैर्धर्म्मेण प्रतिपाल्यते ॥९०॥
एवं विसृज्य पृथिवीं पुत्रेभ्योनाहुषस्तदा ।
पुत्रसंक्रामितश्रीस्तु प्रीतिमानभवन्नृपः ॥९१॥

(१) प्रियकृत्सतां इति क० ।

धनुर्न्यस्य पृषत्कांश्च राज्यञ्चैव सुतेषु तु ।
प्रीतिमानभवद्राजा भारमावेश्य बन्धुषु ॥९२॥
अत्र गाथा महाराज्ञा पुरा गीता ययातिना ।
योऽभिप्रेत्याहरन् कामान् कूर्म्मोऽङ्गानीव सर्वशः[१] ॥९३॥
न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥९४॥
यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
नालमेकस्य तत्सर्वमिति पश्यन्न मुह्यति ॥९५॥
यदा तु कुरुते भावं सर्व्वभूतेषु पावकं ।
कर्म्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा ॥९६॥
यदा परान्न बिभेति यदा त्वस्मान्न बिभ्यति ।
यदा नेच्छति न द्वेष्टि ब्रह्म सम्पद्यते तदा ॥९७॥
या दुस्त्यजा दुर्म्मतिभिर्या न जीर्यति जीर्य्यतः ।
दोषाप्राणान्तिकोरागस्तां तृष्णान्त्यजतः सुखं ॥९८॥
जीर्य्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
जीविताशा धनाशा च जीर्य्यतोऽपि न जीर्यति ॥९९॥
यच्चाकामसुखं लोके यच्च दिव्यं महत् सुखं ।
तृष्णास्य च सुखस्यैव[२] कलां नार्हति षोडशीं ॥१००॥

---

(१) योऽभिप्रेत्येत्यादिवाक्येनापरवाक्यस्यसाकाङ्क्षत्वात् अस्मात् श्लोकात् परं वाक्यान्तरपतनं सम्भाव्यते ।

(२) अत्र आदर्शपुस्तकमात्रे लिपिकरप्रमादजनितपाठोऽस्ति। यथा, कृष्णास्यथ सुस्वस्यैत इति क०ज०,टष्ट्वा त्वयसुखस्यैते इति ख० ग०, तृष्णा त्वयसुखस्यैतत् इति ङ०, च०, कृष्णास्य य मुखस्यैत इति छ० ।

एवमुक्त्वा स राजर्षिः सदारः प्रस्थितोवनं।
भृगुतुङ्गे तपस्तप्त्वा तत्रैव च महायशाः।
पालयित्वा व्रतशतं तत्रैव स्वर्गमाप्नुयात्॥१०१॥
तस्य वंशास्तु पञ्चैते पुण्या देवर्षिसत्कृताः।
यैर्व्याप्ता पृथिवी कृत्स्ना सूर्यस्येव गभस्तिभिः॥१०२॥
धन्यः प्रजावानायुष्मान् कीर्त्तिमांश्च भवेन्नरः।
ययातेश्चरितं सर्वं पठन् शृण्वन् द्विजोत्तमः॥१०३॥

इति श्रीमहापुराणे वायुप्रोक्ते चन्द्रवंशकीर्त्तनं नाम
कएत्रिंशोऽध्यायः समाप्तः॥

अथ द्वात्रिंशोऽध्यायः ।

कार्त्तवीर्य्यार्ज्जुनोत्पत्तिविवरणं ।

सूर्य उवाच । यदोर्वंशं प्रवक्ष्यामि श्रेष्ठस्योत्तमतेजसः ।
विस्तरेणानुपूर्व्वेण गदतोमे निबोधत ॥१॥
यदोः पुत्रा बभूवुर्हि पञ्च देवसुतोपमाः ।
सहस्रजिदथ श्रेष्ठः[१] क्रोष्टुर्नीलोजितोलघुः ॥२॥
सहस्रजित्सुतः श्रीमान् शतजिन्नाम पार्थिवः ।
शतजित्सुता विख्यातास्त्रयः परमधार्म्मिकाः ॥३॥
हैहयश्च हयश्चैव राजा वेणुहयश्च यः ।
हैहयस्य तु दायादोधर्म्मतत्व इति श्रुतिः ॥४॥
धर्म्मतन्त्रस्तु कीर्त्तिस्तु संज्ञेयस्तस्य चात्मजः ।
संज्ञेयस्य तु दयादोमहिष्मान्नाम पार्थिवः ॥५॥
आसीन्महिष्मतः पुत्रोभद्रश्रेण्यः प्रतापवान् ।
वाराणस्यधिपोराजा कथितः पूर्व एव हि ॥६॥
भद्रश्रेण्यस्य दायादोदुर्म्मदोनाम पार्थिवः ।
दुर्म्मदस्य ततोधीमान् कनकोनाम विश्रुतः ॥७॥
कनकस्य तु दायादाश्चत्वारोलोकविश्रुताः ।
कृतवीर्यः कार्त्तवीर्यः कृतवर्मा तथैव च ॥८॥
कृतोजातश्चतुर्थोभूत्कृतवीर्यात्ततोर्जुनः ।
जज्ञे बाहुसहस्रेण सप्तद्वीपेश्वरोनृपः ॥९॥

---

(१) श्रेष्ठ इत्यत्र ज्येष्ठ इति पाठः समीचीनः ।

स हि वर्षायुतन्तप्त्वा तपः परमदुश्चरं ।
दत्तमाराधयामास कार्त्तवीर्य्योऽत्रिसम्भवं ॥१०॥
तस्मै दत्तोवरान् प्रादाच्चतुरोभूरितेजसः ।
पूर्व्वं बाहुसहस्रन्तु स वव्रे प्रथमं वरं ॥११॥
अधर्म्मं दीयमानस्य सद्भिस्तस्मान्निवारणं ।
धर्म्मेण पृथिवीञ्जित्वा धर्म्मेणैवानुपालनं ॥१२॥
संग्रामांस्तु बहून् जित्वा हत्वा चारीन् सहस्रशः ।
संग्रामे युध्यमानस्य बधः स्यादधिकाद्रणे ॥ १३॥
तेनेयं पृथिवी कृत्स्ना सप्तद्वीपा सपत्तना[1] ।
सप्तोदधिपरिक्षिप्ता क्षात्रेण विधिना जनाः ॥१४॥
तस्य बाहुसहस्रन्तु युध्यतः किल धीमतः ।
यौद्धोध्वजोरथस्यैव प्रादुर्भवति मायया ॥१५॥
दशयज्ञसहस्राणि[2] तेषु द्वीपेषु सप्तसु ।
निरर्गलाः स्म निर्वृत्ताः श्रूयन्ते तस्य धीमतः ॥१६॥
सर्व्वे यज्ञा महावाहोस्तस्यासन् भूरितेजसः ।
सर्व्वे काञ्चनवेदीकाः सर्व्वे युपैश्च काञ्चनैः ॥१७॥
सर्व्वे देवैर्म्महाभागैर्विमानस्थैरलङ्कृताः ।
गन्धर्व्वैरप्सरोभिश्च नित्यमेवोपशोभिताः ॥१८॥
तस्य राज्ञोजगौ गाथां गन्धर्व्वोनारदस्तथा ।
चरितं तस्य राजर्षेर्महिमानं निरीक्ष्य च ॥१९॥

---

(१) सपर्व्वता इति ख० ग० ।
(२) देशयज्ञसहस्राणीति ङ० च० छ ।

न नूनं कार्त्तवीर्य्यस्य गतिं यास्यन्ति मानवाः ।
यज्ञैर्दानैस्तपोभिश्च विक्रमेण श्रुतेन च ॥२०॥
द्वीपेसु सप्तसु स वै खड्गी वरशरासनी[१] ।
रथी राजाप्यनुचरोन्योऽगाच्चैवानुदृश्यते ॥२१॥
अनष्टद्रव्यस्चैवासीत्[२] न शोकोन च विभ्रमः ।
प्रभावेन महाराज्ञः प्रजा धर्म्मेण रक्षतः ॥२२॥
पञ्चाशीतिसहस्राणि वर्षाणां स नराधिपः ।
सप्त सप्त वारान् संम्राट् चक्रवर्त्ती बभूव ह ॥२३॥
स एव पशुपालोभूत् क्षेत्रपालस्तथैव च ।
स एव वृष्ट्या पर्जन्योयोगित्वादर्ज्जुनोऽभवत् ॥२४॥
स वै बाहुसहस्रेण ज्याघातकठिनेन च ।
भाति रश्मिसहस्रेण शारदेनेव भास्करः ॥२५॥
स हि नागसहस्रेण महिश्मत्यां[३] नराधिपः ।
कर्क्कोटकसभाञ्जित्वा पुरीं तत्र न्यवेशयत् ॥२६॥
स वै वेगे समुद्रस्य प्रावृट्कालाम्बुजेक्षणः ।
क्रीड़न्निव सुखोद्विग्नः प्रावृट्कालञ्चकार ह ॥२७॥

---

(१) तूणी खड्गी शरासनीति छ० ।

(२) अत्र आदर्शपुस्तकमात्रे भ्रमात्मकपाठाः सन्ति । यथा, अनष्टद्रव्याम्नवासीदिति क०, अनष्टद्रव्यात्तवासीदिति ख०, अनष्टद्रव्या सुवसो इति ग०, अनष्टद्रव्यानाचासीदिति ङ०, अनष्टद्रव्या न चासीदिति च० छ०, अनष्टद्रव्यान्तवासीदिति ज० ।

(३) माहिष्मत्यां इति ख० ग० ।

लुलिता क्रीड़ता तेन हेमस्रग्दाममालिनी[१] ।
ऊर्म्मिभ्रूकुटिसन्नादा शङ्किताभ्येति नर्मदा ॥२८॥
पुरा स तामनुसरन्नवगाढोमहार्णवं ।
चकारोदृत्य वेलान्तं स कालः प्रावृषोद्वनं ॥२९॥
तस्य बाहुसहस्रेण क्षोभ्यमाने महोदधौ ।
भवन्ति लीना निश्चेष्टाः पातालस्था महासुराः ॥ ३०॥
चूर्णीकृतमहावीचिलीनमीनमहाविषाः ।
पतिता विद्धफेनौघमावर्त्तक्षिप्तदुस्सहं ॥३१॥
चकार क्षोभयन्राजा दोःसहस्रेण सागरं ।
देवासुरपरिक्षिप्तं क्षीरोदमिव सागरं ॥३२॥
मन्दरक्षोभणकृता ह्यमृतोदकशङ्किताः ।
सहसोत्पादिता भीता भीमं दृष्ट्वा[२] नृपोत्तमं ॥३३॥
नतनिश्चलमूर्द्धानो[३] बभूवुश्च महोरगाः ।
सायाह्ने कदलीषण्डा निर्वातस्तिमिता इव ॥३४॥
स वै बद्ध्वा धनुर्यान उत्सिक्तः पञ्चभिः शतैः ।
लङ्कायां मोहयित्वा तु सबलं रावणं बलात् ।
निर्जित्य बद्ध्वा चानीय माहिष्मत्यां बबन्ध तं ॥३५॥

---

(१) मालिनीत्यत्र शालिनीतिपाठः समीचीनः ।
(२) दृष्ट्वेत्यत्र आर्षप्रयोगादेककर्तृत्वनियमोनास्ति ।
(३) अत्र सर्व्वेष्वादर्शपुस्तकेषु भ्रमसङ्कुलपाठाः सन्ति । यथा, नतविश्चितमूर्द्धानो इति क० ज०, ततर्निश्चित्य मूर्द्धानो इति ख०, नतनिश्चित्य मूर्द्धानो इति ग०, नतनिश्चितमूर्द्धानो इति ङ० च० छ० ।

ततोगत्वा पुलस्त्यस्तु अर्जुनं च प्रसादयत् ।
मुमोच राजा पौलस्त्यं पुलस्त्येनानुपालितं ॥ २६॥
तस्य बाहुसहस्रस्य बभूव ज्यातलस्वनः ।
युगान्तेम्बुदवृन्दस्य(१) स्फुटितस्याशनेरिव ॥ २७॥
अहो मृधे महावीर्यं भार्गवोयस्य सोऽच्छिनत् ।
मृधे सहस्रं बाहूनां हेमतालवनं यथा ॥ २८॥
तृषितेन कदाचित्स भिक्षितश्चित्रभानुना ।
सप्त द्वीपांश्चित्रभानोः प्रादाद्भिक्षां विशाम्पतिः ॥ २९॥
पुराणि घोषान् ग्रामांश्च पत्तनानि च सर्व्वशः ।
जज्वाल तस्य बाणेषु चित्रभानुर्दिधक्षया ॥ ४०॥
स तस्य पुरुषेन्द्रस्य प्रभावेन महायशाः ।
ददाह कार्तवीर्यस्य शैलांश्चापि वनानि च ॥ ४१॥
स शून्यमाश्रमं सर्वं वरुणस्यात्मजस्य वै ।
ददाह सवनद्वीपान् चित्रभानुः सहैहयः ॥ ४२॥
संलेभे वरुणः पुत्रं पुरा भास्विन(२)मुत्तमं ।
वसिष्ठनामा स मुनिः ख्यातस्त्वापः श्रितः श्रुतः(३) ॥ ४३॥

(१) अत्र अम्बुदवृन्दस्येतिपाठः सम्भवपरः ।
(२) भाविनमिति क० ज० ।
(३) अत्र लिपिकरप्रमादवशात् आदर्शपुस्तकमात्रे बहवः पाठाः सन्ति । यथा, ख्यातया एव इत्युत इति क०, ख्यात आपइवत्युतइति ख०, ख्यात आव ऊवद्युत इति ग०, ख्यात आपव इत्युत इति ङ०, ख्यात आप इवत्फतं इति च०, ख्यात आ एव इत्यत इति छ० ज० ।

तत्रापद[१]स्तदा क्रोधादर्जुनं शप्तवान्विभुः ।
यस्मान्न वर्जितमिदं वनं ते मम हैहय ॥४४॥
तस्मात् ते दुष्करं कर्म्म कृतमन्योहनिष्यति ।
अर्जुनोनाम कौन्तेयोन च राजा भविष्यति ॥४५॥
अर्जुन त्वां महावीर्य्योरामः प्रहरतां वरः ।
छित्वा बाहुसहस्रं वै प्रमथ्य तरसा बली ॥४६॥
तपस्वी ब्राह्मणश्चैव वधिष्यति महाबलः ।
तस्य रामस्तदा ह्यासीन्मृत्युशापेन धीमतः ॥४७॥
राज्ञा तेन वरश्चैव स्वयमेव वृतः पुरा ।
तस्य पुत्रशतं ह्यासीत्[२] पञ्च तत्र महारथाः ॥४८॥
कृतास्त्रा बलिनः शूरा धर्म्मात्मानोयशस्विनः ।
शूरश्च शूरसेनश्च वृष्याद्यं वृष[३] एव च ॥४९॥
जयध्वजश्च वै पुत्रा अवन्तिषु[४] विशांपतेः ।
जयध्वजस्य पुत्रस्तु तालजङ्घः[५] प्रतापवान् ॥५०॥
तस्य पुत्रशतं ह्येव[६] तालजङ्घा इति श्रुतं ।
तेषां पञ्च गणाः ख्याताः हैहयानां महात्मनां ॥५१॥

---

(१) अत्रापद इत्यत्र दृष्टापद इति प्रयोगः साधुः।
(२) ह्यासीदित्यत्र भावीतिपाठः साधीयान् ।
(३) दृष्ट्याग्रं वृषा इति ख०, दृष्टाग्रं वृष्टि इति ग०, वृषान्ध्यं वृषा इति ङ० च०, वृष्ट्यास्टं वृष्ट इति छ० ।
(४) जयध्वजस्य वै कर्त्ता अयन्तिषु, इति भ्रमात्मकपाठः आदर्शपुस्तकमात्रेऽस्ति ।
(५) तालजङ्घ इति ख० ग० ङ० च० ।
(६) पुत्रसहस्रं हीति ख० ग० ।

वीरहोत्रा ह्यसञ्जाता भोजा[१] श्चावर्तयस्तथा ।
तुण्डिकेराश्च विक्रान्तास्तालजङ्घास्तथैव च ॥५२॥
वीरहोत्रसुतश्चापि अनन्तोनाम पार्थिवः ।
दुर्जयस्तस्य पुत्रस्तु बभूवामित्रदर्शनः ॥५३॥
अनष्टद्रव्यता चैव तस्य राज्ञोबभूव ह ।
प्रभावेन महाराजः प्रजास्ताः पर्य्यपालयत् ॥५४॥
न तस्य वित्तनाशश्च नष्टं प्रतिलभेत सः ।
कार्तवीर्यस्य योजन्म कथयेदिह धीमतः ॥५५॥
वित्तवान् भवतेचैव धर्म्मश्चास्य विवर्द्धते ।
यथा लष्टा यथा दाता तथा स्वर्गे महीयते ॥५६॥

इति श्रीमहापुराणे वायुप्रोक्ते कार्त्तवीर्य्यार्जुनोत्पत्तिविवरणं
नाम द्वात्रिंशोऽध्यायः समाप्तः ॥

(१) वीराहात्रोऽथ संप्रोतोभोज्य इति क० ज० ।

अथ त्रयस्त्रिंशोऽध्यायः।

ज्यामघवृत्तान्तकथनं।

ऋषय ऊचुः। किमर्थं भुवनं दग्धमपवस्य महात्मनां।
कार्त्तवीर्य्येण विक्रम्य तन्नः प्रब्रूहि पृच्छतां ॥१॥
रक्षिता स तु राजर्षिः प्रजानामिति नः श्रुतं।
कथं स रक्षिता भूत्वानाशयत्तत्तपोवनं ॥२॥
सूत उवाच। आदित्योविप्ररूपेण कार्त्तवीर्य्यमुपस्थितः।
तृप्तिकामः प्रयच्छान्नमादित्योऽहं न संशयः ॥३॥
राजोवाच। भगवन् केन ते तुष्टिर्भवेद्ब्रूहि दिवाकर।
कीदृशं भोजनं दद्मि श्रुत्वा च विदधाम्यहं[1] ॥४॥
सूर्य उवाच। स्थावरं देहि मे सर्व्वमाहारं ददतां वर।
तेन तृप्तोभवेयं वै न तुष्येऽन्येन पार्थिव ॥५॥
राजोवाच। न शक्यं स्थावरं सर्व्वं तेजसा मानुषेण तु।
निर्द्दग्धुं तपसां श्रेष्ठ त्वामेव प्रणमाम्यहं ॥६॥
आदित्य उवाच। तुष्टस्तेऽहं शरान् दद्मि अक्षयान् सर्वतः सुखान्।
प्रक्षिप्ताः प्रज्वलिष्यन्ति मम तेजःसमन्विताः ॥७॥
आदिष्टं तेजसा मेघसागरं शोषयिष्यति।
शुष्कं भस्म करिष्यामि तेन प्रीतोनराधिप ॥८॥

---

(१) विददाम्यहमिति क०।

ततः शरानथादित्यस्त्वर्जुनाय प्रयच्छति ।
ततः संप्राप्य सुमहत्स्थावरं सर्व्वमेव हि ॥९॥
आश्रमानथ ग्रामांश्च घोषांश्च नगराणि च ।
तपोवनानि रम्याणि वनान्युपवनानि च ॥१०॥
एवं प्राचीनमदहत्ततः सूर्य्यप्रदक्षिणं(१) ।
निर्वृक्षा निस्तृणा भूमिर्दग्धा सूर्य्येण तेजसा ॥११॥
एतस्मिन्नेव काले तु अपोनिलयमाश्रितः ।
दशवर्षसहस्राणि जलवासा(२) महानृषिः ॥१२॥
पूर्णे व्रते महातेजा उदतिष्ठत्तपोधनः ।
सोऽपश्यदाश्रमं दग्धमर्जुनेन महानृषिः ।
क्रोधाच्छशाप राजर्षिं कीर्त्तितं वोयथा मया ॥१३॥
सूत उवाच । क्रोष्टोः शृणुत राजर्षेर्वंशमुत्तमपूरुषं ।
यस्यान्ववाये संभूतोवृष्णिर्वृष्णिकुलोद्वहः ॥१४॥
क्रोष्टोरेकोऽभवत् पुत्रोवृजिनीवान् महायशाः ।
वार्जिनीवतमिच्छन्ति स्वाहिं स्वाहोवतां(३) वरं ॥१५॥
स्वाहेः पुत्रोऽभवद्राजा रशादुर्ददतां वरः ।
घृतम्प्रसूत(४) मिच्छन्ति रशादोरग्र्यमात्मजं ॥१६॥
महाक्रतुभिरीजे स विविधैराप्तदक्षिणैः ।

(१) आदर्शपुस्तकमात्रे सर्व्वाप्रदक्षिणमिति पाठोऽस्ति ।
(२) जलवासा इत्यत्र व्रतेऽतिष्ठन् इति पाठः सुसङ्गतः ।
(३) स्वाहोवतामित्यत्र स्वाहावतामितिपाठः साधीयान् ।
(४) सूतंप्रसूतमिति च० क्र० ।

चित्रैश्चित्ररथस्तस्य पुत्रकर्म्मभिरन्वितः ॥१७॥
एवं चित्ररथोवीरोयज्ञान् विपुलदक्षिणान्[१] ।
शशविन्दुः परं वृत्तोराजर्षीणामनुष्ठितः ॥१८॥
चक्रवर्त्ती महासत्त्वोमहावीर्य्योबहुप्रजः ।
तत्रानुवंशश्लोकोऽयं यस्मिन् गीतः पुराविदैः ॥१९॥
शशविन्दोऽस्तु पुत्राणां शतानामभवच्छतं ।
धीमतामनुरूपाणां भूरिद्रविणतेजसां ॥२०॥
तेषां षट् च प्रधानास्तु पृथुसाह्वा महाबलाः ।
पृथुश्रवाः पृथुयशाः पृथुधर्म्मा पृथुञ्जयः ॥२१॥
पृथुकीर्त्तिः पृथुन्दाताः राजानः शाशिविन्दवाः ।
शंसन्ति च पुराणानि पार्थश्रवसमन्तरं ।
अन्तरः स पुरा यस्तु यज्ञस्य तनयोभवत्[२] ॥२२॥
उशनाः सुतधर्म्मात्मा अवाप्य पृथिवीमिमां ।
आजहाराश्वमेधानां शतमुत्तमधार्म्मिकः ॥२३॥
मरुत्तस्तस्य तनयोराजर्षीणामनुष्ठितः ।
वीरः कम्बलवर्हिस्तु मरुत्ततनयः स्मृतः ॥२४॥

---

(१) एवं चित्ररथ इति श्लोकार्द्धस्य आकाङ्क्षानिवृत्तेरभावदर्शनात् अस्मात् परं कतिपयवाक्यपतनं सूच्यते ।

(२) अत्र सर्व्वेषु आदर्शपुस्तकेषु लिपिकरप्रमादसम्भूता बहवः पाठाः सन्ति । यथा, अन्तरस्य पुरायस्तु पुराणोऽस्तु सुतोभवत् इति क०, अन्तरस्य पुरायस्तु पुरा यस्तु सुतोऽभवत् इति ख० छ० ज०, एतच्छ्लोकार्द्धं ग०पुस्तके नास्ति, अनिरस्य पुरा यस्तु अज्ञस्य तनयोऽभवत् इति ङ०, अनिरस्य पुरा यस्तु यज्ञस्य तनयोऽभवदिति च० ।

पुत्रस्तु रुक्मकवचोविद्वान् कम्बलवर्हिषः ।
निहत्य रुक्मकवचः पुरा कवचिनोरणे ॥२५॥
धन्विनोनिशितैर्वाणैरवाप श्रियमुत्तमां ।
ब्राह्मणेभ्योददौ वित्तमश्वमेधमहायशाः ॥२६॥
राज्ञस्तु रुक्मकवचादपरावृत्य वीरहाः ।
जज्ञिरे पञ्च पुत्रास्तु महासत्त्वा महाबलाः ॥२७॥
रुक्मेषुः पृथुरुक्मश्च ज्यामघः परिघोहरिः ।
परिघञ्च हरिञ्चैव विदेहे स्थापयत्पिता ॥२८॥
ब्रह्मेषु[१]रभवद्राजा पृथुरुक्मस्तदाश्रयः[२] ।
तेभ्यः प्रव्रजितोराज्यात् ज्यामघोऽभवदाश्रमे ॥२९॥
प्रशान्तस्तु वने घोरे ब्राह्मणेनावबोधितः ।
जगाम धनुरादाय देशमध्यं रथी ध्वजी ॥३०॥
नर्म्मदानूप एकाकी मेकलावृत्तिका अपि[३] ।
ऋक्षवन्तं गिरिं गत्वा शुक्तिमन्या[४]मथाविशत्[५] ॥३१॥

(१) ब्रह्मेषुरित्यत्र रुक्मेषुरितिपाठः सम्भवपरः ।

(२) स्तटाश्रयः इति ङ० च० छ० ।

(३) अत्र लिपिकरप्रमादात् आदर्शपुस्तकेषु बहुपाठाः सन्ति । यथा, नर्म्मदोन्टप एकाकी मेकली म्टत्तिकावती इति क० ज०, नर्म्मदानुप मेकाकी मेकलाम्टत्तिकामपि इति ख०, एतच्छ्लोकार्द्धं ग०पुस्तके नास्ति, नर्म्मदान्टप एकाकी मेलकां म्टत्तिकावतीमिति ङ० च० छ० ।

(४) मुक्तिमत्यामिति क० ।

(५) नर्म्मदायाः शुक्तिप्रवेशे कोहेतुः ततः परं किं वृत्तं इत्याकाङ्क्षापरिसमाप्तेरभावात्, नर्म्मदानूप इतिश्लोकानन्तरं कतिपयश्लोका निपेतुरिति ध्येयं, अथवा ग्रन्थान्तरे विदिततदाख्यानानां श्रोतॄणामाकाङ्क्षाविरहात् सूतेन तदाख्यानं न साकल्येनोक्तं ।

ज्यामघस्याभवद्भार्या शैव्या बलवती भृशं ।
अपुत्रोऽपि स वै राजा भार्यामन्यां न विन्दति ॥३२॥
तस्यासीद्विजयोयुद्धे ततः कन्यामवाप सः ।
भार्यामुवाच राजा स स्नुषेति तु नरेश्वरः ॥३३॥
एवमुक्ताब्रवीदेवं कस्येयन्ते स्नुषेति सा ।
यस्ते जनिष्यते पुत्रस्तस्य भार्या भविष्यति ॥३४॥
तस्य सा तपसोग्रेण शैव्या वैशं(१) प्रसूयत ।
पुत्रं विदर्भं सुभगा शैव्या परिणता सती ॥३५॥
राजपुत्रौ तु विद्वांसौ स्नुषायां क्रथकौशिकौ ।
पुत्रोविदर्भोऽजनयच्छूरौ रणविशारदौ ॥३६॥
लोमपादं तृतीयन्तु पश्चाज्जज्ञे सुधार्मिकः ।
लोमपादात्मजोवभ्रुराहृतिस्तस्य चात्मजः ॥३७॥
कौशिकस्य चिदिः पुत्रस्तस्माच्चैद्या नृपाः स्मृताः ।
क्रथोर्विदर्भपुत्रस्तु कुन्तिस्तस्यात्मजोभवत् ॥३८॥
कुन्तेर्धृष्टसुतोजज्ञे पुरोऽधृष्टः प्रतापवान् ।
धृष्टस्यपुत्रोधर्मात्मा निर्वृतिः परवीरहा ॥३९॥
तस्य पुत्रोदशार्हस्तु महाबलपराक्रमः ।
दशार्हस्य सुतोव्योमा ततोजीमूत उच्यते ॥४०॥
जीमूतपुत्रोविकृतिस्तस्य भीमरथः सुतः ।
अथ भीमरथस्यासीत् पुत्रोरथवरः किल ॥४१॥

---

(१) चैयमिति क० ।

दाता धर्म्मरतो[१] नित्यं शीलसत्यपरायणः ।
तस्य पुत्रोनवरथस्ततोदशरथः स्मृतः ॥४२॥
तस्य चैकादशरथः शकुनिस्तस्य चात्मजः ।
तस्मात् करम्भकोधन्वी देवरातोऽभवत्ततः ॥४३॥
देवक्षत्रोऽभवद्राजा देवरातिर्म्महायशाः ।
देवक्षत्रसुतोजज्ञे देवनः क्षत्रनन्दनः ॥४४॥
देवनात् स मधुर्जज्ञे यस्य मेधार्थसम्भवः ।
मधोश्चापि महातेजा मनुर्मनुवशस्तथा ॥४५॥
नन्दनश्च महातेजा महापुरुवशस्तथा ।
आसीत् पुरुवशात्[२] पुत्रः पुरुद्वान् पुरुषोत्तमः ॥४६॥
जज्ञे पुरुद्वतः पुत्रोभद्रवत्यां पुरूद्वहः ।
ऐक्ष्वाकी त्वभवद्भार्या सत्त्वस्तस्यामजायत ।
सत्त्वात् सत्त्वगुणोपेतः सात्वतः कीर्त्तिवर्द्धनः ॥४७॥
इमां विसृष्टिं विज्ञाय ज्यामघस्य महात्मनः ।
प्रजावानेति सायोज्यं राज्ञः सोमस्य धीमतः ॥४८॥

इति श्रीमहापुराणे वायुप्रोक्ते ज्यामघवृत्तान्तकथनं नाम त्रयस्त्रिंशोऽध्यायः समाप्तः ।

---

(१) दानधर्म्मरतो इति क० ख० छ० ज० ।
(२) पुरुवशः इति भ्रमजनितपाठ आदर्शपुस्तकमात्रेऽस्ति ।

अथ चतुस्त्रिंशोऽध्यायः।

विष्णुवंशवर्णनं।

सूत उवाच। सात्वती रूपसम्पन्नं कौशल्या सुषुवे सुतं।
भजिनं भजमानं च दिव्यं देवावृधं नृपं ॥१॥
अन्धकञ्च महाभोजं वृष्णिञ्च यदुनन्दनं।
तेषां हि सर्गाश्चत्वारः शृणुध्वं विस्तरेण वै ॥२॥
भजमानस्य सृञ्जय्यां वाह्यस्योपरि वाह्यकः(१)।
सृञ्जयस्य सुते द्वे तु वाह्यकस्ते उदावहत् ॥३॥
तस्य भार्य्ये भगिन्यौ ते प्रासूतेति सुतान् बहून्।
निमिश्च पणवश्चैव वृष्णिः परपुरञ्जयः ॥४॥
ये वाह्यकार्य्यसृञ्जय्यां भजमानाद्विजज्ञिरे।
अयुतायुतसाहस्रशतजिदथ वामकः(२) ॥५॥

---

(१) अत्र लेखकप्रमादात् आदर्शपुस्तकमात्रे भ्रमसङ्कुलितपाठाः सन्ति ; यथा, वाह्यस्योपरिवाह्यकौ इति क० ङ० च०, भजमानस्य भ्रतको-द्यावाह्योपरिवाह्यकौ इति ख०, ग०पुस्तके एतच्छ्लोकार्द्धाभावोव-र्त्तते, भजमानस्य भ्रज्यस्यावाह्यस्योपरिवाह्यकौ इति छ० ज०।

(२) अयुतायुतसाहस्रेत्यादि भजमानाद्विजज्ञिरे इत्यन्तं श्लोकार्द्धद्वयं क० ग० ज० पुस्तकेषु न विद्यते। अन्येष्वादर्शपुस्तकेषु भ्रमात्मकपाठौ स्तः। यथा, अयुतायुतसाहस्राच्छताजिदथ वामकः इति ङ० च० छ०, अष्ट चायुतसाहस्राद्धन्ताजिदधमावकः इति ख०।

वाह्यकार्य्याभगिन्यां ये[१] भजमानाद्विजज्ञिरे ।
तेषां देवावृधोराजा चचार परमं तपः ॥६॥
पुत्रः सर्वगुणोपेतोमम भूयादिति स्म ह ।
संयोज्यात्मानमेवं स वर्णासाजलमस्पृशत् ॥७॥
सा चोपस्पर्शनात्तस्य चकार ऋषिमापगा ।
कल्याणञ्च नरपतेस्तस्य सा निम्नगोत्तमा ॥८॥
चिन्तयाभिपरीताङ्गा जगामाथ विनिश्चयं ।
नाधिगच्छामि तां नारीं यस्यामेवंविधः सुतः ॥९॥
भवेत्सर्वगुणोपेतोराज्ञोदेवावृधस्य हि ।
तस्मादस्य स्वयं चाहं भवाम्यद्य सहव्रता ।
जज्ञे तस्याः स्वयं हस्तो[२]भावस्तस्य यथेरितः ॥१०॥
अथ भूत्वा कुमारी तु साविन्नी परमं वचः ।
चिन्तयामास[३]राजानं तामियेष स पार्थिवः ॥११॥
तस्यामाधत्त गर्भं स तेजस्विनमुदारधीः ।
अथ सा नवमे मासि सुषुवे सरितांवरा ॥१२॥
पुत्रं सर्वगुणोपेतं यथा देवावृधेप्सितः[४] ।

---

(१) ख० ङ० च० छ०पुस्तकेषु वाह्यकाया भगिन्यास्ते इति पाठोऽस्ति, अयन्तु न सम्यङ् ।

(२) हस्त इत्यत्र लक्षणया हस्ताद्यवयवाः उपलभ्यन्ते ।

(३) चिन्तयामास इत्यत्र कथयामास इति प्रयोगः साधीयान् ।

(४) आदर्शपुस्तकेषु अत्र लिपिकरप्रमादजनिता बहवः पाठाः सन्ति । यथा, वस्तु यथाभुवं तद इति क०, लब्धवेधावृधा तदा इति ख० ग०, तव देवाभ्र्थं तदा इति ङ०, तदेवाभ्रथयं तदा इति च०, वस्तुं वृधा तुतं तदा इति छ०, वस्तृस्तु यथा भुभं तद इति ज० ।

तत्र वंशे पुराणज्ञा गाथां गायन्ति वै द्विजाः ॥१३॥
गुणान् देवावृधस्यापि कीर्त्तयन्तोमहात्मनः ।
यथैव शृणुते दूरात् संपश्यति तथान्तिकात् ॥१४॥
बभ्रुः श्रेष्ठोमनुष्याणां देवैर्देवावृधः समः ।
पुरुषाः[(१)] पञ्चषष्टिश्च सहस्राणि च सप्ततिः ।
येऽमृतत्वमनुप्राप्ता[(२)] बभ्रुर्देवावृधादपि ॥१५॥
यज्वा दानपतिर्वीरोब्रह्मण्यः सत्यवागबुधः ।
कीर्त्तिमांश्च महाभागः सात्त्वतानां महारथः ॥१६॥
तस्यान्ववाये सुमहाभोजयेमार्तिकावलाः[(३)] ।
गान्धारी चैव माद्रीच वृष्णेर्भार्य्ये बभूवतुः ॥१७॥
गान्धारी जनयामास सुमित्रं मित्रनन्दनं ।
माद्री युधाजितं पुत्रं सा तु वै देवमीढुषं[(४)] ॥१८॥
अनमित्रं सुतश्चैव तावुभौ पुरुषोत्तमौ ।
अनमित्रसुतोनिघ्नोनिघ्नस्य द्वौ बभूवतुः ॥१९॥
प्रसेनश्च महाभागः शक्रजिच्च[(५)] सुतावुभौ ।
तस्य शक्रजितः पूर्वः सखा प्राणसमोऽभवत् ॥२०॥
स कदाचिन्निशापाये रथेन रथिनांवरः ।

---

(१) पुरुषाणां पञ्चषष्टिरिति क०।
(२) येनामृतत्वं संप्राप्ता इति पाठोऽत्र सङ्गतार्थः ।
(३) भोजयेमार्त्तिकावृताः इति ङ० च० क० ।
(४) देवमीषकमिति ख०ग०,देवमील्ढुषमिति ङ०च०, देवमीयुषमिति क०।
(५) शत्रुजिच्चेति ख० ग० । शक्रजित् शत्रुजिदेतदुभयपाठौ लिपिकर-प्रमादजनितौ । अत्र सत्राजिदितिपाठः सम्भवपरः ।

तोयकूलादपः स्पृष्टुमुपस्थातुं ययौ रविं ॥२१॥
तस्योपतिष्ठतः सूर्योविवस्वानग्रतः स्थितः।
अस्पष्टमूर्तिर्भगवांस्तेजोमण्डलवान् विभुः ॥२२॥
अथ राजा विवस्वन्तमुवाच स्थितमग्रतः।
यथैव व्योम्नि पश्यामि त्वामहं ज्योतिषाम्पते ।२३॥
तेजोमण्डलिनञ्चैव तथैवाप्यग्रतः स्थितं।
कोविशेषोविवस्वंस्ते साचादुपगतेन वै[1] ॥२४॥
एतच्छ्रुत्वा स भगवान् मणिरत्नं स्यमन्तकं ।
स्वकण्ठादवमुच्याथ बबन्ध नृपतेस्तदा ॥२५॥
ततोविग्रहवन्तं तं ददर्श नृपतिस्तदा ।
प्रतिमा[2]मथ तां दृष्ट्वा मुहूर्त्तं कृतवांस्तथा ॥२६॥
तमतिप्रस्थितं भूयोविवस्वन्तं स शक्रजित्।
प्रोवाचाग्निसवर्णां त्वं येन लोकान् प्रयास्यति[3] ।
तदेव मणिरत्नं तन्मां भवान् दातुमर्हति[4] ॥२७॥

---

(१) अत्र आदर्शपुस्तकमात्रे भ्रमाकुलितपाठाः सन्ति। यथा, सख्योतोपगजेन वै इति क०, संख्यानोपगतेन वै इति ख० ग० ङ०, सख्यानोपगतेन वै इति च०, सख्योनोषगतेन वै इति छ०, सख्योतोषगजेन वै इति ज०।

(२) प्रकृतिमिति च०।

(३) प्रोवाचाग्निसवर्णात्वं यदा ह्येष प्रयास्यति इति पाठोवाक्यार्थप्रतिपादकः।

(४) शक्रजितः प्रार्थनां श्रुत्वा सूर्य्येण यत् कृतं यदुक्तं वा तदभावदर्शनात् प्रोवाचाग्निसवर्णात्वमिति श्लोकात् परं कानिचिद्वाक्यानि पतितत्वेनोपलभ्यन्ते।

स्यमन्तकं नाम मणिं दत्तवांस्तस्य भास्करः।
स तमाबध्य नगरं प्रविवेश महीपतिः ॥२८॥
तं जनाः पर्यधावन्त सूर्य्योऽयं गच्छतीति ह।
सभां विस्मापयित्वाथ पुरीमन्तःपुरं तथा ॥२९॥
तं प्रसेनजिते दिव्यं मणिरत्नं स्यमन्तकं।
ददौ भ्रात्रे नरपतिः प्रेम्णा शक्रजिदुत्तमं ॥३०॥
स्यमन्तकोनाम मणिर्यस्य राष्ट्रे स्थितोभवेत्।
कालवर्षी च पर्जन्योनच व्याधिभयं तदा ॥३१॥
लिप्सां चक्रे प्रसेनात्तु मणिरत्नं स्यमन्तकं।
गोविन्दोनच तं लेभे शक्तोऽपि न जहार च ॥३२॥
कदाचिन्मृगयां यातः प्रसेनस्तेन भूषितः।
स्यमन्तककृते सिंहाद्वधं प्राप्तः सुदारुणं ॥३३॥
जाम्बवानृक्षराजस्तु तं सिंहं निजघान वै।
आदाय च मणिं दिव्यं स्वं बिलं प्रविवेश ह ॥३४॥
तत्कर्म कृष्णस्य ततोवृष्ण्यन्धकमहत्तराः।
मणौगृध्नुन्तु मन्वानास्तमेव विशशङ्किरे ॥३५॥
मिथ्याभिशस्तिं तेभ्यस्तां बलवानरिसूदनः।
अमृष्यमाणोभगवान् वनं स विचचार ह ॥३६॥
स तु प्रसेनम्मृगयामचरत्तत्र चाप्यथ।
प्रसेनस्य पदं गृह्य पुरुषैराप्तकारिभिः ॥३७॥
ऋक्षवन्तं गिरिवरं विन्ध्यञ्च नगमुत्तमं।
अन्वेषणपरिश्रान्तः स ददर्श महामनाः ॥३८॥

साश्वं हतं प्रसेनं तं नाविन्दत्तत्र वै मणिं ।
अथ सिंहः प्रसेनस्य शरीरस्याविदूरतः ॥३९॥
ऋक्षेण निहतोदृष्टः पादैर्ऋक्षस्य सूचितं ।
पदैरन्वेषयामास गुहामृक्षस्य यादवः ॥४०॥
महत्यतिबिले वाणीं शुश्राव प्रमदेरितां ।
धात्र्या कुमारमादाय सुतं जाम्बवतोद्विजाः ।
प्रीतिमत्याय[१] मणिना मारोदीरित्युदीरितां ॥४१॥
धात्र्युवाच। प्रसेनमवधीत् सिंहः[२] सिंहोजाम्बवता हतः ।
सुकुमारक मा रोदीस्तव ह्येष स्यमन्तकः ॥४२॥
व्यक्तीकृतश्च शब्दं तं तूर्णं सोऽपि[३] ययौ बिलं ।
अपश्यच्च बिलाभ्याशे प्रसेनमवदारितं ॥४३॥
प्रविश्य चापि भगवांस्तदृक्षबिलमञ्जसा ।
ददर्श ऋक्षराजानं जाम्बवन्तमुदारधीः ॥४४॥
युयुधे वासुदेवस्तु बिले जाम्बवता सह।
बाहुभ्यामेव गोविन्दोदिवसानेकविंशतिं ॥४५॥
प्रविष्टे च बिलं कृष्णे वासुदेवपुरःसराः ।
पुनर्द्वारवतीमेत्य हतं कृष्णं न्यवेदयन् ॥४६॥
वासुदेवस्तु निर्जित्य जाम्बवन्तं महाबलं।

---

(१) प्रीतिमत्याय इत्यत्र प्रीतिमुत्पाद्य इति पाठः समीचीनः।
(२) सिंहः प्रसेनमबधीत् इति ख० ग०।
(३) तं तूर्णं सोऽपि इत्यत्र सम्पूर्णं वापि इति पाठः आदर्शपुस्तकमात्रे वर्त्तते।

लेभे जाम्बवतीं कन्यामृक्षराजस्य सम्मतां ॥४७॥
भगवत्तेजसा ग्रस्तोजाम्बवान् प्रसभं मणिं ।
सुतां जाम्बवतीमाशु विश्वक्सेनाय दत्तवान् ॥४८॥
मणिं स्यमन्तकं चैव जग्राहात्मविशुद्धये ।
अनुनीय ऋक्षराजं निर्ययौ च तदा विलात् ॥४९॥
एवं स मणिमादाय विशोध्यात्मानमात्मना ।
ददौ सत्राजिते[१] तं वै मणिं सात्वतसन्निधौ ॥५०॥
कन्यां पुनर्जाम्बवतीमुवाह मधुसूदनः ।
तस्मान्मिथ्याभिशापात् स व्यमुच्यत जनार्दनः ॥५१॥
इमां मिथ्याभिशस्तिं यः कृष्णस्येह व्यपोहितां ।
वेद मिथ्याभिशस्तेः स नाभिशस्यति कर्हिचित् ॥५२॥
दशस्वस्त्र्भ्योभार्य्याभ्यः शत्रुजित्तः शतं सुताः[२] ।
ख्यातिमन्तस्त्रयस्तेषां भङ्गकारस्तु पूर्व्वजः ।
वीरोव्रतपतिश्चैव ह्यपस्वान्तश्च[३] सुप्रियः ॥५३॥
अथ द्वारवती नाम भङ्गकारस्य सुप्रजा ।
सुषुवे सा कुमारीस्तु तिस्रोरूपगुणान्विताः ॥५४॥

---

(१) शक्रजिते इति ख० ग० ङ० च० छ० ।
(२) अत्र लिपिकरप्रमादात् आदर्शपुस्तकेषु वहवः पाठाः सन्ति । यथा, दशस्वसारशक्राभिर्यज्मः भ्यश सुत एत इति क०, दशात्तर शतुजजिव्वो भयेभ्यस्व युतं सुताः इति ख०, दशात्तरशत्रजिक्कोभायत्यस्व यतं यताः इति ग०, दशस्वसारशतुजित्तो आर्य्याभ्यः शतं पुरा इति ङ० च०, दशस्वसारशक्राभिर्याज्यः भ्यशसुतं सुताः इति छ० ।
(३) ह्यपस्वान्तांश्चेति आदर्शपुस्तकमात्रे पाठोवर्त्तते ।

सत्यभामोत्तमा स्त्रीणां व्रतिनीव दृढव्रता ।
तथा तपस्विनी चैव पिता कृष्णस्य तां ददौ ॥५५॥
यत्तत् सत्राजिते कृष्णोमणिरत्नं स्यमन्तकं ।
प्रादात्तदाहरद्रत्नं(१) भोजेन शतधन्वना ॥५६॥
तदा हि प्रार्थयामास सत्यभामामनिन्दितां ।
अक्रूरोरत्नमन्विच्छन् मणिञ्चैव स्यमन्तकं ॥५७॥
भद्रकारं(२) ततोहत्वा शतधन्वा महाबलः ।
रात्रौ तं मणिमादाय ततोऽक्रूराय दत्तवान् ॥५८॥
अक्रूरस्तु तदा रत्नमादाय स नरर्षभः ।
समयं कारणं चक्रे बोध्योनान्यैस्त्वयेत्युत ॥५९॥
वयमभ्युपपत्स्यामः कृष्णेन त्वं प्रधर्षितः ।
मम च द्वारकाः सर्वा वशे तिष्ठन्त्यसंशयं ॥६०॥
हते पितरि दुःखार्त्ता सत्यभामा यशस्विनी ।
प्रययौ रथमारुह्य नगरं वारणावतं ॥६१॥
सत्यभामा तु तद्वृत्तं भोजस्य शतधन्वनः ।
भर्तुर्निवेद्य दुःखार्त्ता पार्श्वस्थाश्रूण्यवर्तयत् ॥६२॥
पाण्डवानान्तु दग्धानां हरिः कृत्वोदकक्रियां ।
तुल्यार्थे चैव भ्रातॄणां नियोजयति सात्यकिं ।६३॥
ततस्त्वरितमागम्य द्वारकां मधुसूदनः ।

(१) आहरदित्यत्र अक्रूर इति क्रियापदमूहनीयं ।
(२) अत्र ङ० च० छ० ज० पुस्तकेषु भद्रकारं इति पाठोऽस्ति । केवलं ख० ग० पुस्तकयोर्भङ्गकारमिति पाठोवर्त्तते ।

पूर्व्वजं हलिनं श्रीमानिदं वचनमब्रवीत् ॥६४॥
हतः प्रसेनः सिंहेन सत्राजित् शतधन्वना ।
स्यमन्तकमहं मार्गे तस्य(१) प्रहर हे प्रभो ॥६५॥
तदारोह रथं शीघ्रं भोजं हत्वा(२) महाबलं ।
स्यमन्तकोमहावाहो तदास्माकं(३) भविष्यति ॥६६॥
ततः प्रवृत्ते युद्धे तु तुमुले भोजकृष्णयोः ।
शतधन्वा न चाक्रूरमवैक्षत् सर्वतोदिशि ॥६७॥
अनष्टाश्वावरोहन्तु कृत्वा भोजजनार्द्दनौ(४) ।
शक्तोऽपि साध्याद्धार्द्दिक्यान्नाक्रूरोऽभ्युपपद्यत ॥६८॥
अपयाने ततोबुद्धिं भूयश्चक्रे भयान्वितः ।
योजनानां शतं साग्रं यया च प्रत्यपद्यत ॥६९॥
विज्ञातहृदया नाम शतयोजनगामिनी ।
भोजस्य बडवादित्योयया कृष्णमयोधयत् ॥७०॥
प्रवृद्धवेगा बडवा त्वध्वनां शतयोजनम् ।
दृष्ट्वा रथगतिस्तस्य शतधन्वानमर्द्दयत(५) ॥७१॥

---

(१) तस्येत्यत्र तं वै इति पाठः साधीयान् ।

(२) हत्वेत्यत्र जहीति पाठः साधुः ।

(३) अत्र आदर्शपुस्तकमात्रे भ्रमसंयुक्तपाठोऽस्ति । यथा, स च वोऽस्मिन्निति क० ज०, सचरोस्म इति ख०, ग० पुस्तकेऽस्य श्लोकस्याभावो वर्त्तते, स च वोस्मदिति ङ० च० छ० ।

(४) अत्र युयुधाते इति क्रियापदमूहनीयं ।

(५) अत्र, क्षीणां जवानहृदयां अध्वानं शतयोजनम् । दृष्ट्वा रथस्य तां वृद्धिं शतधन्वानमर्द्दयत् इति पाठः ङ० च० छ० पुस्तकेषु वर्त्तते, अयन्तु न वाक्यार्थसङ्गतिकरः । एष श्लोकः अन्येष्वादर्शपुस्तकेषु न विद्यते ।

ततस्तस्य हयास्तास्तु श्रमात् खेदाच्च वै द्विजाः ।
खमुत्पेतुरथप्राणाः कृष्णोराममथाब्रवीत् ॥७२॥
तिष्ठस्वेह महावाहो दृष्टदोषा मया हयाः ।
पद्भ्यां गत्वा हरिष्यामि मणिरत्नं स्यमन्तकम् ॥७३॥
पद्भ्यामेव ततोगत्वा शतधन्वानमच्युतः ।
मिथिलाधिपतिं तं वै जघान परमास्त्रवित् ॥७४॥
स्यमन्तकं न चापश्यद्धत्वा भोजं महाबलं ।
निवृत्तं चाब्रवीत् कृष्णं रत्नं देहीति लाङ्गली ॥७५॥
नास्तीति कृष्णश्चोवाच ततोरामोरुषान्वितः ।
धिक्शब्दमसकृत् पूर्व्वं प्रत्युवाच जनार्द्दनं ॥७६॥
भ्रातृत्वान्मर्षयाम्येष स्वस्ति तेऽस्तु व्रजाम्यहं ।
कृत्यं न मे द्वारकया न त्वया न च वृष्णिभिः ॥७७॥
प्रविवेश ततोरामोमिथिलामरिमर्द्दनः ।
सर्व्वकामैरुपहृतैर्मैथिलेनैव पूजितः ॥७८॥
एतस्मिन्नेव काले तु बभ्रुर्मतिमतांवरः ।
नानारूपान् क्रतून् सर्व्वानाजहार निरर्गलान् ॥७९॥
दीक्षामयं सकवचं रक्षार्थं प्रविवेश ह ।
स्यमन्तककृते राजा गाधिपुत्रोमहायशाः ॥८०॥
अर्थान् रत्नानि चाग्र्याणि द्रव्याणि विविधानि च ।
षष्टिवर्षगते काले यज्ञेषु विन्ययोजयत् ॥८१॥
अक्रूरयज्ञ इत्येते ख्यातास्तस्य महात्मनः ।
बह्वन्नदक्षिणाः सर्व्वे सर्व्वकामप्रदायिनः ॥८२॥

अथ दुर्य्योधनोराजा गत्वाऽथ मिथिलां प्रभुः ।
गदाशिक्षां ततोदिव्यां बलभद्रादवाप्तवान् ॥८३॥
प्रसाद्य तु ततोविप्रा वृष्ण्यन्धकमहारथैः ।
आनीतोद्वारकामेव कृष्णेन च महात्मना ॥८४॥
अक्रूरमन्धकैः सार्द्धमुपायात् पुरुषर्षभः ।
युद्धे हत्वा तु शत्रुघ्नं सह बन्धुमता बली ॥८५॥
श्वफल्कतनयायान्तु नराणां नरसत्तमौ ।
भङ्गकारस्य तनयौ विश्रुतौ सुमहाबलौ ॥८६॥
जज्ञातेऽन्धकमुख्यस्य शत्रुघ्नोबन्धुमांश्च तौ ।
बधार्थं भङ्गकारस्य कृष्णेन प्रीतिमान् भवेत् ॥८७॥
ज्ञातिभेदभयाद् भीतः समुपेक्षितवांस्तथा ।
अपयाते तथाक्रूरे नावर्षत्पाकशासनः ॥८८॥
अनावृष्ट्या हतं राष्ट्रमभवत्तद्बधोद्यतं ।
ततः प्रसादयामासुरक्रूरं कुकुरान्धकाः ॥८९॥
पुनर्द्वारवतीं प्राप्ते तदा दानपतौ तथा ।
प्रववर्ष सहस्राक्षः कुक्षौ जलनिधेस्ततः ॥९०॥
कन्याञ्च वासुदेवाय स्वसारं शीलसम्मतां ।
अक्रूरः प्रददौ श्रीमान् प्रीत्यर्थं यदुपुङ्गवः ॥९१॥
अथ विज्ञाय योगेन कृष्णोबभ्रुगतं मणिं ।
सभामध्ये तदा प्राह तमक्रूरं जनार्दनः ॥९२॥
यत्तु रत्नं मणिवरं तव हस्तगतं प्रभो ।
तत् प्रयच्छस्व मानार्ह विमतिमत्र मा कृथाः ॥९३॥

षष्टिवर्षगते काले यद्रोषोभूत्तदा मम ।
सुसंरूढः सकृत् प्राप्तस्तत्कालात्रित्य स महान् ॥९४॥
ततः कृष्णस्य वचनात् सर्व्वसात्वतसंसदि ।
प्रददौ तं मणिं बभ्रुरक्लेशेन महामतिः ॥९५॥
तत आर्ज्जवसंप्राप्तबभ्रुहस्तादरिन्दमः(१) ।
ददौ प्रहृष्टमनसा तं मणिं बभ्रवे पुनः ॥९६॥
स कृष्णहस्तात् संप्राप्य मणिरत्नं स्यमन्तकं ।
आबध्य गान्दिनीपुत्रोविरराजांशुमानिव ॥९७॥
इमां मिथ्याभिशस्तिं योविशुद्धामपि चोत्तमां ॥
वेद मिथ्याभिशस्तिं स न व्रजेच्च कथञ्चन ॥९८॥
अनिमित्राच्छिनिर्जज्ञे कनिष्ठाद्वृष्णिनन्दनात् ॥९९॥
सत्यवाक् सत्यसम्पन्नः सत्यकस्तस्य चात्मजः ।
सात्यकिर्युयुधानस्य(२) तस्य भूतिः सुतोऽभवत् ॥१००॥
भूतेर्युगन्धरः पुत्र इति भौत्याः प्रकीर्त्तिताः ।
जज्ञाते तनयौ पृश्नेः स्वफल्कश्चित्रकश्च यः ॥१०१॥
स्वफल्कस्तु महाराजोधर्मात्मा यत्र वर्त्तते ।
नास्ति व्याधिभयं तत्र नचावृष्टिभयं तथा ॥१०२॥
कदाचित् काशिराजस्य विभोस्तु द्विजसत्तमाः ।
त्रीणि वर्षाणि विषये नावर्षत्पाकशासनः ॥१०३॥
स तत्र वासयामास स्वफल्कं परमार्चितं ।

---

(१) अत्र लब्ध्वेत्यहनीयं।
(२) अत्र युयुधानस्येति पाठः सङ्गतः। अद्धानस्येति ख० ।

स्वफल्कपरिवासेन प्रावर्षत्याकशासनः ॥१०४॥
स्वफल्कः काशिराजस्य सुतां भार्य्या[१]मनिन्दितां।
गान्दिनीं नाम गां सा हि ददौ विप्राय नित्यशः ॥१०५॥
सा मातुरुदरस्था वै बहुवर्षशतान् किल।
वसति स्म न वै जज्ञे गर्भस्थान्तां पिताब्रवीत् ॥१०६॥
जायस्व शीघ्रं भद्रन्ते किमर्थं चापि तिष्ठसि।
प्रोवाच चैनं गर्भस्था सा कन्या गोर्द्दिने दिने ॥१०७॥
यदि दत्ता तदा स्यां हि यदि स्वामीहतां पितः।
तथेत्युवाच तां तस्याः पिता काममपूपुरत् ॥१०८॥
दाता यज्वा च शूरश्च श्रुतवानतिथिप्रियः।
तस्याः पुत्रः स्मृतोऽक्रूरः स्वफल्कोभूरिदक्षिणः ॥१०९॥
उपमङ्गुस्तथा मङ्गुर्म्मृदुरश्चारिमेजयः।
गिरिरक्ष[२] स्तेतायक्षः शत्रुघ्नोवारिमर्द्दनः[३] ॥११०॥
धर्मभृच्च शृष्टचयोवर्गमोच[४]स्तथापरः।
आवाहप्रतिवाहौ च वसुदेवा वराङ्गना ॥१११॥
अक्रूरादुग्रसेन्यान्तु सुतौ द्वौ कुलनन्दिनौ।
देवश्चानुपदेवश्च जज्ञाते देवसंमितौ ॥११२॥
चित्रकस्याभवन् पुत्राः पृथुर्विपृथु[५]रेव च।

(१) अत्र चकारेति क्रियापदमूह्यं।
(२) गिरिपक्ष इति ख० ग० गिरिरिक्ष इति ङ० च०।
(३) प्यरिमर्द्दनः इति छ०।
(४) गन्धमोच इति ङ० च० छ०।
(५) विश्वसु इति क० छ० ज०।

अश्वग्रीवोऽश्वबाहुश्च सुपार्श्वकगवेषणौ ॥११३॥
अरिष्टनेमिरश्वश्च सुवर्मा वर्मचर्मभृत् ।
अभूमिर्वहुभूमिश्च श्रविष्टाश्रवणे स्त्रियौ ॥११४॥
सत्यकात् काशिदुहिता[१] लेभे सा चतुरः सुतान् ।
ककुदं भजमानञ्च शमीकबलवर्हिषौ ॥११५॥
ककुदस्य सुतो वृष्टि[२]र्वृष्टेस्तु तनयोऽभवत् ।
कपोतरोमा तस्याथ रेवतोऽभवदात्मजः ॥११६॥
तस्यासीत्तुम्बुरुसखा[३] विद्वान् पुत्रोऽभवत्किल ।
ख्यायते यस्य नाम्ना स चन्दनोदकदुन्दुभिः ॥११७॥
तस्माच्चाभिजितः[४] पुत्र उत्पन्नस्तु पुनर्वसुः ।
अश्वमेधन्तु पुत्रार्थे आजहार नरोत्तमः ॥११८॥
तस्य मध्येऽतिरात्रस्य सदोमध्यात्समुत्थितं ।
ततस्तु विद्वान् धर्म्मज्ञो दाता यज्वा पुनर्व्वसुः[५] ॥११९॥
तस्यापि पुत्रमिथुनं बाहुबाणाजितः किल[६] ।

---

(१) सत्यदुहिता इति ङ० च० ।　　(२) वृष्णिरिति च० ।

(३) तुम्बरसखा इति क० ङ० च०, पुरुषः पुत्र इति ख० ग०, तुम्बरुसखा इति छ० ज० ।　　(४) तस्येति च० ।

(५) ततस्तु विद्वान् धर्म्मज्ञो इतिश्लोकार्द्धं अश्वमेधन्तु पुत्रार्थे इति श्लोकार्द्धात् प्राक् पठनीयं ।

(६) अत्र आदर्शपुस्तकमात्रे भ्रमाकुलितपाठौवर्त्तते। यथा, तस्यापि पुत्रमिथुनं बाहुवानजितः बिला इति क० ज०, बाहुवानजितः विला इत्यत्र बाहुवानजितः किल इतिपाठविनिमयेन ङ० च०छ०पुस्तकस्थितपाठः, तत्र च, बाहुमानादितः किल इति पाठविनिमयेन ख० ग०पुस्तकस्थितपाठस्य क० ज०पुस्तकयोर्वर्त्तते। बाहुवानजितः विला इत्यत्र

आङ्कस्त्वाङ्की चैव ख्यातौ मतिमतांवरौ ॥११०॥
इमांश्चोदाहरन्त्यत्र श्लोकान् प्रति तमाङ्कं ।
सोपासङ्गानुकर्षाणां सध्वजानां वरूथिनां ॥१११॥
रथानां मेघघोषाणां सहस्राणि दशैव[1] तु।
नासत्यवादी त्वासीत्तु नायज्वा नासहस्रदः ॥११२॥
नाशुचिर्नाप्यधर्म्मात्मा नाविद्वान्न कृशोऽभवत्।
आङ्कस्य धृतिः पुत्र इत्येवमनुशुश्रुमः ॥११३॥
श्वेतेन परिचारेण किशोरप्रतिमान् हयान्।
अशीतिमश्वनियुतान्याङ्कप्रतिमोऽव्रजत् ॥११४॥
पूर्वस्यान्दिशि नागानां भोजस्य प्रतिरेजिरे[2]।
रूप्यकाञ्चनकक्षाणां सहस्राण्येकविंशतिः ॥११५॥
तावन्त्येव[3] सहस्राणि उत्तरस्यान्तथा दिशि।
भूमिपालस्य भोजस्य उत्तिष्ठेत् किङ्किणी किल ॥११६॥
आङ्कस्त्वाङ्कान्धाय[4] स्वसारं त्वाङ्कीन्ददौ ।
आङ्कान्धस्य दुहिता द्वौ पुत्रौ सम्बभूवतुः ॥११७॥
देवकश्चोग्रसेनश्च देवगर्भसमावुभौ।
देवकस्य सुता वीरा जज्ञिरे त्रिदशोपमाः॥११८॥

बाङ्बाणाजितः किल इति, बाङ्मानादितः किल इत्यत्र च, बाङ्मानजितः किल इति पाठः सङ्गतार्थः।

(१) आसन्नित्याध्याहार्य्यम्।

(२) अत्र आदर्शपुस्तकमात्रे प्रतिमोऽभवदिति पाठोऽस्ति।

(३) तावतान्तु इति पाठः समीचीनः।

(४) अत्र आदर्शपुस्तकमात्रे आङ्कस्याप्यतिष्ठत् इति पाठोवर्त्तते।

(१)देवानामपि देवश्च सुदेवोदेवरक्षिता ।
तेषां स्वसारः सप्तासन् वसुदेवाय संददौ ॥११९॥
वृकदेवोपदेवा च तथान्या देवरक्षिता ।
श्रीदेवा शान्तिदेवा च महादेवा तथापरा ॥१२०॥
सप्तमी देवकी तासां सुनासा चारुदर्शना ।
नवोग्रसेनस्य सुताः कंसस्तेषान्तु पूर्वजः ॥१२१॥
न्यग्रोधश्च सुनामा च कङ्कशंकुश्च भूमयः ।
सुतनूराष्ट्रपालश्च युद्धस्तुष्टः सुपुष्टिमान् ॥१२२॥
तेषां स्वसारः पञ्चैव कर्म्मधर्म्मवती तथा ।
शतांकूराष्ट्रपाला च कङ्का(२) चैव वराङ्गना ॥१२३॥
उग्रसेनोमहापत्यो विख्यातः कुकुरोद्भवः ।
कुकुराणामिमं वंशं धारयन्नमितौजसां ।
आत्मनोविपुलं वंशं प्रजावांश्च भवेन्नरः ॥१२४॥
भजमानस्य पुत्रस्तु रथिमुख्योविदूरथः ।
राज्याधिदेवः शूरश्च विदूरस्य सुतोऽभवत् ॥१२५॥
तस्य शूरस्य तु सुता जज्ञिरे बलवत्तराः ।
वातस्यैव निवातश्च शोणितः(३) श्वेतवाहनः ॥१२६॥
शमी च गदवर्मा च निदातः शक्रशक्रजित्(४) ।

---

(१) तेषां मध्ये इत्याध्याहार्य्यं ।
(२) कङ्का इति ङ०, कन्हा इति क०, कङ्गा इति ज० । अन्येष्वादर्शपुस्तकेषु एतच्छ्लोकार्द्धं नास्ति ।
(३) शोणस्येति ङ० च०, शोणिस्यैति क०, शोणोऽथ इति ख० ।
(४) शत्रुशत्रुजित् इति ख०, शक्रुशक्रुजित क० ज० ।

शमिपुत्रः प्रतिच्चित्र[1] प्रतिच्चित्रस्य चात्मजः ॥१२७॥
स्वयम्भोजः स्वयम्भोजाद्धृदिकः सम्बभूव ह ।
हृदिकस्य सुतास्त्वासन् दश भीमपराक्रमाः ॥१२८॥
कृतवर्मा कृतस्तेषां शतधन्वा तु मध्यमः ।
देवार्हश्च वनार्हश्च भिषग्द्वैतरथश्च यः ॥१२९॥
सुदान्तश्च धियान्तश्च नकवान्[2] कनकोद्भवः ।
देवार्हस्य सुतोविद्वान् जज्ञे कम्बलवर्हिषः ॥१३०॥
असमौजाः सुतस्तस्य सुसमौजाश्च विश्रुतः ।
अजावपुत्राय ततः प्रददावसमौजसे ।
सुदंष्ट्रश्च सुरूपश्च कृष्ण इत्यन्धकाः स्मृताः ॥१३१॥
अन्धकानामिमं वंशं कीर्त्तयानस्तु नित्यशः ।
आत्मानोविपुलं वंशं लभते नात्र संशयः ॥१३२॥
अश्मक्यां जनयामास शूरोवै देवमानुषिं[3] ।
माष्यान्तु जनयामास शूरोवै देवमाढूषं[4] ॥१३३॥
भाष्यान्तु जज्ञिरे शूराद्भोजायां पुरुषा दश ।
वसुदेवोमहाबाहुः पूर्वमानकदुन्दुभिः ॥१३४॥
जज्ञे तस्य प्रसूतस्य दुन्दुभिः प्राणदद्दिवि ।

---

(१) प्रतिच्छत्रः इति ङ० च० ।

(२) कनकात् इति क० ज०, कनकान् इति ख० ग० च० छ० ।

(३) देवमीयुषमिति ख०, देवमील्ढूषमिति ङ० च०, देवमीढूषमिति छ० ज० ।

(४) देवमीढुषमिति ख० ग० ।

आनकानाञ्च संह्लादः सुमहानभवद्दिवि ॥१३५॥
पपात पुष्पवर्षञ्च शूरस्य भवने महत् ।
मनुष्यलोके कृत्स्नेऽपि रूपे नास्ति समोभुवि ॥१३६॥
यस्यासीत् पुरुषाग्र्यस्य कीर्त्तिश्चन्द्रमसोयथा ।
देवभाग(१) स्ततोजज्ञे ततोदेवश्रवाः पुनः ॥१३७॥
अनाधृष्टिकडश्चैव(२) नन्दनश्चैव भृञ्जिनः ।
श्यामः शमीको(३) गण्डूषः चतस्रस्तु वराङ्गणाः ॥१३८॥
पृथा च श्रुतवेदा(४) च श्रुतकीर्त्तिः श्रुतश्रवा ।
राजाधिदेवी च तथा पञ्चैता वीरमातरः ॥२३९॥
पृथां दुहितरञ्चक्रे कुन्तिस्तां पाण्डुरावहत् ।
अनपत्याय वृद्धाय कुन्तिभोजाय तां ददौ॥१४०॥
तस्मात् कुन्तीति विख्याता कुन्तिभोजात्मजा पृथा ।
कुरुवीरः पाण्डुमुख्यस्तस्माद्भार्य्यामविन्दत॥१४१॥
पृथा जज्ञे ततः पुत्रान् त्रीनग्निसमतेजसः।
लोके प्रतिरथान् वीरान् शक्रतुल्यपराक्रमान् ॥१४२॥
धर्माद्युधिष्ठिरं पुत्रं मारुताच्च वृकोदरं ।
इन्द्राद्धनञ्जयश्चैव पृथा पुत्रानजीजनत् ॥१४३॥
माद्रवत्यान्तु जनितावाश्विनाविति विश्रुतं ।
नकुलः सहदेवश्च रूपसत्त्वगुणान्वितौ ॥१४४॥

---

(१) देवभाज इति क० ।
(२) अनाधृष्टिकड़ इति ख० ग० ज० ।
(३) शनीको इति क० छ० ज० ।
(४) आदर्शपुस्तकेषु उत्तरत्र श्रुतदेवा इति पाठोऽस्ति ।

जज्ञे च श्रुतदेवायां तनयोवृद्धशर्मणः ।
करूषाधिपतिर्वीरोदन्तवक्रो(१) महाबलः ॥१४५॥
कैकेय्यां श्रुतकीर्त्यान्तु जज्ञे सन्तर्दनः पुनः ।
चेकितानवृहत्क्षत्रौ(२) तथैवान्यौ महाबलौ ॥१४६॥
विन्दानुविन्दावावन्त्यो भ्रातरौ सुमहाबलौ ।
श्रुतश्रवायां चैद्यस्तु शिशुपालोबभूव ह ॥१४७॥
दमघोषस्य राजर्षेः पुत्रोविख्यातपौरुषः ।
यः पुरासीद्दशग्रीवः संबभूवारिमर्दनः ॥१४८॥
यदुश्रवानुज(३)स्तस्य रुजकन्योनुजस्तथा(४) ।
पत्न्यस्तु वसुदेवस्य त्रयोदश वराङ्गणाः ॥१४९॥
पौरवी रोहिणी चैव मदिरा चापरा तथा ।
तथैव भद्रा वैशाखी देवकी सप्तमी तथा ॥१५०॥
सुगन्धिर्वनराजी च द्वेचान्ये परिचारिके ।
रोहिणी पौरवी चैव वाल्मीकस्यात्मजा(५) भवत् ॥१५१॥

---

(१) दन्तचक्रो इति ङ० च० क० ।
(२) चेकितानवृहच्छत्रौ इति क० ।
(३) यदुश्रवानुज इत्यत्र सन्धिरार्षः ।
(४) अत्र लिपिकरप्रमादादादर्शपुस्तकेषु बहुपाठाः सन्ति । यथा, दाढं श्रवान्नजस्तस्यन्नजकस्यात्मजस्तथा इति ख०, श्रवान्नजस्तस्नजकन्तस्य चात्मजः इनि ग०, यदुश्रवानुजस्तस्य रुजकन्यारुजस्तथा इति ङ०, यदुश्रवा इत्यत्र यदुश्रवा इतिपाठविनिमयेन क० ज० पुस्तकस्थित-पाठः, तत्र च, पादुश्रवा इति पाठविनिमयेन च०पुस्तकस्थितपाठो-ङ० पुस्तके वर्त्तते ।
(५) वाल्मीकस्याग्रजा इति क० ज० ।

ज्येष्ठा पत्नी महाभागा दयितानकदुन्दुभेः ।
ज्येष्ठं लेभे सुतं रामं सारणं निशठं तथा ॥१५२॥
दुर्द्दमं दमनं शुभ्रं पिण्डारककुशीतकौ ।
चित्रां नाम कुमारीञ्च रौहिण्यष्टौ व्यजायत ।१५३॥
पौत्रौ[१] रामस्य जज्ञाते विज्ञातौ निशितोल्मुकौ ।
पार्श्वी च पार्श्वनन्दी च शिशुः सत्यधृतिस्तथा ॥१५४॥
मन्दवाह्योऽथ रामाणगिरिकौ गिर एव च ।
शुक्लगुल्मेति गुल्मश्च दरिद्रान्तक एव च ॥१५५॥
कुमार्य्यश्चापि पञ्चाद्या नामतस्ता निबोधत ।
अर्च्चिष्मती सुनन्दा च सुरसा सुवचास्तथा ॥१५६॥
तथा शतबला चैव सारणस्य सुतास्त्विमाः ।
भद्राश्वोभद्रगुप्तिश्च भद्रविप्रस्तथैव च ॥१५७॥
भद्रबाहुर्भद्ररथोभद्रकल्पस्तथैव च ।
सुपार्श्वकः कीर्त्तिमांश्च रोहिताश्वश्च भद्रजः ॥१५८॥
दुर्म्मदश्चाभिभूतश्च रोहिण्याः कुलजाः स्मृताः ।
नन्दोपनन्दोमित्रश्च कुचिमित्रस्तथाचलः[२] ॥१५९॥
चित्रोपचित्रे कन्ये च स्थितः पुष्टिरथापरः ।
मदिरायाः सुता ह्येते सुदेवोऽथ विजज्ञिरे ॥१६०॥
उपविम्बोऽथ विम्बश्च सत्वदन्तमहौजसौ ।
चत्वार एते विख्याता भद्रापुत्रा महाबलाः ॥१६१॥

---

(५) पुत्रा इति ख० ग० ।
(१) स्तथा भव इति क० ज०, स्तथा बल इति ख० घ० ।
(२) उदप्यो इति ख० ।

वैशाख्यां समदाच्छौरिः पुत्रं कौशिकमुत्तमं।
देवक्यां जज्ञिरे शौरिः सुषेणः कीर्त्तिमानपि ॥१६२॥
तदयोभद्रसेनस्य यजुदायस्य[1] पञ्चमः।
षष्ठोभद्रविदेकस्य कंसः सर्वान् जघान तान् ॥१६३॥
अथ तस्यामवस्थायां आयुष्मान् संबभूव ह।
लोकनाथः पुनर्विष्णु पूर्वकृष्णः प्रजापतिः ॥१६४॥
अनुजाताऽभवत् कृष्णा सुभद्रा भद्रभाषिणी।
कृष्णासुभद्रेति पुनर्व्याख्याता वृष्णिनन्दिनी ॥१६५॥
सुभद्रायां रथी पर्थादभिमन्युरजायत।
वसुदेवस्य भार्यासु महानागासु सप्तसु।
ये पुत्रा जज्ञिरे शूरा नामतस्तान्निबोधत ।१६६॥
अतोऽस्य[2] सहदेवायां शूरोजज्ञेभयासखः।
शार्ङ्गदेवा[3]जनत्तस्मु शौरी जज्ञे[4] कुलोद्वहं[5] ॥१६७॥
उपसङ्गं वसुञ्चापि तनयौ देवरक्षितौ।
एवं दश सुतास्तस्य कंसस्तानप्यघातयत् ॥१६८॥
विजयं रोचनञ्चैव वर्द्धमानं तथैव च।
एतान् सुर्व्वान् महाभागानुपदेवा व्यजायत ॥१६९॥
स्वगाह्वं महात्मानं वृकदेवी त्वजायत।

(१) यजुदाय इत्यत्र यजुर्दायः यज्ञदायोवा पाठः सम्भवपरः।
(२) अतोऽस्य इत्यत्र ऋतोऽस्य इतिपाठः सम्भवपरः।
(३) शृचीदेवा इति ख० ग०, शूद्रादेवा इति क० छ० ज०।
(४) आदर्शपुस्तकमात्रे शोरेर्जज्ञे इति पाठोवर्त्तते।
(५) कुलोद्भवमिति ख० ग० छ०।

आगाही च स्वसा चैव सुरूपा शिशिरायिणी ॥१७०॥
सप्तमं देवकी पुत्रं सुनामा सुषुवे भुवं[१] ।
गवेषणं महाभागं संग्रामे चित्रयोधिनं ॥१७१॥
आद्धदेवं[२] पुरा येन वने विरचिता द्विजाः ।
सैव्याया[३] मददच्छौरिः पुत्रं कौशिकमव्ययं ॥१७२॥
सुगन्धी वनराजी च शौरेरास्तां परिग्रहः ।
पुण्ड्रश्च कपिलश्चैव वसुदेवात्मजौ हि तौ ।
तयोराजाऽभवत् पुण्ड्रः कपिलस्तु वनं ययौ ॥१७३॥
तस्यां[४] समभवद्वीरोवसुदेवात्मजोबली ।
राजा नाम निषादोऽसौ प्रथमः स धनुर्द्धरः ॥१७४॥
विख्यातोदेवरातस्य[५] महाभागः सुतोऽभवत् ।
पण्डितानां मतं प्राहुर्देवश्रवसमुद्भवं ॥१७५॥
अश्मक्यां लभते पुत्रमनादृष्टिं[६] यशस्विनं ।
निवर्त्तः शत्रुशत्रुघ्नं श्राद्धदेवं महाबलं ॥१७६॥
अजायत श्राद्धदेवोनिषधादिर्यतः श्रुतः ।
एकलव्यो[७] महावीर्य्योनिषादैः परिवर्द्धितः ॥१७७॥
गण्डूषायानपत्याय कृष्णस्तुष्टोऽददत् सुतौ ।

---

(१) भुवि इति ख० सुतमिति ङ० छ० ।
(२) वासुदेवं इति ख० ग० ।　　(३) श्रैव्याया इति ख० ।
(४) यत्तदोर्नित्यसम्बन्धात् तस्यामितिपदेन, यस्यां पुण्ड्रः कपिलश्च सम-भवत्सा इत्युपलभ्यते ।
(५) दिवि राजस्येति ख० ग०, देवराजस्येति ङ० च० छ० ।
(६) अनावृष्टिमिति ङ० च० ।
(७) एकालयोमहाभार्य्यो इति छ० ज० ।

चारुदेष्णञ्च शाम्बञ्च कृतास्त्रौ शस्त्रलक्षणौ[१] ॥१७८॥
तन्तिजस्तन्तिमालश्च स्वपुत्रौ कनकस्य तु ।
वत्सावने[२]स्त्वपुत्राय वसुदेवः प्रतापवान् ।
सौतिर्ददौ सुतं वीरं शौरिं कौशिकमेव च ॥१७९॥
तपाश्च[३]क्रोधनुश्चैव विरजाः श्यामसृञ्जिमौ ।
अनपत्योऽभवच्छ्यामः श्यामकस्तु वनं ययौ ।
जुगुप्समानोभोजत्वं राजर्षित्वमवाप्नुयात् ॥१८०॥
य इदं जन्म कृष्णस्य पठते नियतव्रतः ।
श्रावयेद्ब्राह्मणश्चापि सुमहत्सुखमाप्नुयात् ॥१८१॥
देवदेवोमहातेजाः पूर्व्वं कृष्णः प्रजापतिः ।
विहारार्थं मनुष्येषु जज्ञे नारायणः प्रभुः ॥१८२॥
देवक्यां वसुदेवेन तपसा पुष्करेक्षणः ।
चतुर्बाहुः स विज्ञेयोदिव्यरूपः श्रियान्वितः ॥१८३॥
प्रकाशोभगवान् योगी कृष्णोमानुषमागतः ।
अव्यक्तोव्यक्तलिङ्गस्थः स एव भगवान् प्रभुः ॥१८४॥
नारायणोयतश्चक्रे प्रभवं चाव्ययोहि सः ।
देवोनारायणोभूत्वा हरिरासीत्सनातनः ॥१८५॥
योऽसृजच्चादिपुरुषं पुरा चक्रे प्रजापतिं ।
अदितेरपि पुत्रत्वमेत्य यादवनन्दनः ।

---

(१) धृतपश्चास्त्रलक्षणौ इति ङ० च० ।
(२) वस्तावनेरिति सम्प्रदानार्थे षष्ठी । वत्सावने इति ङ० च० ।
(३) उपाश्चेति ङ० च० । तपाः क्रोधनुरित्यादियोवसुदेवसुताः । अथवा, तपाश्चेति श्लोकात् प्राक् कश्चिच्छ्लोकः श्लोकार्धं वा पतितम् ।

देवोविष्णुरिति ख्यातः शक्रादवरजोऽभवत् ॥१८६॥
प्रसादजं यस्य विभोरदित्याः पुत्रकारणं ।
बधार्थं सुरशत्रूणां दैत्यदानवराक्षसां ॥१८७॥
ययातिवंशजस्याथ वसुदेवस्य धीमतः ।
कुलं पुण्यं यतः कर्म्म भेजे नारायणः प्रभुः ॥१८८॥
सागराः समकम्पन्त चेलुश्च धरणीधराः ।
जज्वलुश्चाग्निहोत्राणि जायमाने जनार्द्दने ॥१८९॥
शिवाश्च प्रववुर्वाताः प्रशान्तिमभवद्रजः ।
ज्योतींष्यभ्यधिकं रेजुर्जायमाने जनार्द्दने ॥१९०॥
अभिजिन्नाम नक्षत्रं जयन्ती नाम शर्व्वरी ।
मुहूर्त्तोविजयोनाम यत्र जातोजनार्दनः ॥१९१॥
अव्यक्तः शाश्वतः कृष्णोहरिर्नारायणः प्रभुः ।
जायते स्मैव भगवान् नयनैर्म्मोहयन् प्रजाः ॥१९२॥
आकाशात् पुष्पवृष्टींश्च ववर्ष त्रिदशेश्वरः ।
गीर्भिर्मङ्गलयुक्ताभिः स्तुवन्तोमधुसूदनं ।
महर्षयः सगन्धर्वा उपतस्थुः सहस्रशः ॥१९३॥
वसुदेवस्तु तं रात्रौ जातं पुत्रमधोक्षजं ।
श्रीवत्सलक्षणं दृष्ट्वा दिवि दिव्यैः(१) सुलक्षणैः(२) ।
उवाच वसुदेवः स्वं रूपं संहर वै प्रभो ॥१९४॥

---

(१) दृष्टैरिति ख०, दिव्यैरिति छ०, दिम्यैरिति क० ज० । एते पाठाः प्रमादसम्भूताः ।

(२) स लक्षणैरिति ङ०, स्वलक्षणैरिति च० छ० ज० ।

भीतोऽहं कंसतस्तात एतदेव ब्रवीम्यहं ।
मम पुत्रा हतास्तेन ज्येष्ठास्तेऽद्भुतदर्शनाः[१] ॥१९५॥
वसुदेववचः श्रुत्वा रूपं स हृतवान् प्रभुः ।
अनुज्ञातः पिता त्वेनं नन्दगोपगृहं गतः[२] ।
उग्रसेनमते तिष्ठन् यशोदायै तदा ददौ ॥१९६॥
तुल्यकालन्तु गर्भिण्यौ यशोदा देवकी तथा ।
यशोदा नन्दगोपस्य पत्नी सानन्दगोपतेः ॥१९७॥
यामेव रजनीं कृष्णोजज्ञे वृष्णिकुलप्रभुः ।
तामेव रजनीं कन्यां यशोदापि व्यजायत ॥१९८॥
तं जातं रक्षमाणस्तु वसुदेवोमहायशाः ।
प्रादात् पुत्रं यशोदायै कन्यान्तु जगृहे स्वयं ॥१९९॥
दत्वेनं नन्दगोपस्य रक्ष मामिति चाब्रवीत् ।
सुतस्ते सर्व्वकल्याणोयादवानां भविष्यति ।
अयं स गर्भोदेवक्या अस्मत्क्लेशान् हनिष्यति ॥२००॥
उग्रसेनात्मजायाञ्च कन्यामानकदुन्दुभेः ।
निवेदयामास तदा कन्येति शुभलक्षणा ॥२०१॥
स्वसायां[३] तनयं कंसोजातं नैवावधारयत् ।
अथ तामपि दुष्टात्मा ह्युत्ससर्ज[४] मुदान्वितः ॥२०२॥
हता वै या यदा कन्या जपत्येष वृथामतिः ।

---

(१) ध्रुवदर्शनाः इति ङ० ।
(२) नयत् इति च० छ० ज० ।
(३) स्वसरीति पाठः समीचीनः ।
(४) विससर्ज्ज इति ख० ग० ।

कन्या सा ववृधे तत्र वृष्णिसद्मनि पूजिता ॥२०३॥
पुत्रवत्परिपाल्यन्तो(१)देवा देवान् यथा(२) तदा।
तामेव विधिनोत्पन्नामाहुः कन्यां प्रजापतिं ॥२०४॥
एकादशा तु जज्ञे वै रक्षार्थं केशवस्य ह।
तां वै सर्वे सुमनसः(३) पूजयिष्यन्ति यादवाः।
देवदेवोदिव्यवपुः कृष्णः संरक्षितोऽनया ॥२०५॥
ऋषय ऊचुः। किमर्थं वसुदेवस्य भोजः कंसोनराधिपः।
जघान पुत्रान् बालान् वै तन्नोव्याख्यातुमर्हसि ॥२०६॥
सूत उवाच। शृणुध्वं वै यथा कंसः पुत्रानानकदुन्दुभेः।
जातान् जातान् शिशून् सर्व्वान् निष्पिपेष वृथामतिः॥२०७॥
भयाद्यथा महाबाहुर्जातः कृष्णोविवासितः।
तथा च गोषु गोविन्दः संवृद्धः पुरुषोत्तमः ॥२०८॥
उक्तं हि किल देवक्या वसुदेवस्य धीमतः।
सारथ्यं कृतवान् कंसोयुवराजस्तदाऽभवत्॥२०९॥
ततोऽन्तरिक्षे वागासीद्दिव्या भूतस्य कस्यचित्।
कंसोयया सदा भीतः(४) पुष्कला लोकसाक्षिणी॥२१०॥

---

(१) आदर्शपुस्तकमात्रे परिपाल्यन्तीति पाठोवर्त्तते। अयन्तु न समीचीनः।
(२) सर्व्वेष्वादर्शपुस्तकेषु यदेति पाठोऽस्ति अयन्तु न सम्यक्।
(३) हतां वै सर्व्वमनसः इति क० छ० ज०, ताश्चैव सर्व्वमनसः इति ख०,एष श्लोकोग० पुस्तके न विद्यते, तां वै सर्व्वामनसः इति ङ०, तेषां वै सर्व्वमनसः इति च०। एते सर्व्वे पाठा लिपिकरप्रमादजनिताः।
(४) कंसमप्युक्तम्भगोत्रेण इति क० ज०, कंसमत्यन्तगोत्रेण इति ख० ङ० च०, कंसमप्यभगोत्रेण इति छ०। एतत्त्रयं लिपिकरप्रमादोत्पन्नम्।

यामेतां वहसे कंस रथेन परकारणात्।
अस्या यः सप्तमोगर्भः स ते मृत्युर्भविष्यति ॥२११॥
तां श्रुत्वा व्यथितोवाणीं तदा कंसोदुष्टामतिः।
निष्क्रम्य खड्गं तां कन्यां हन्तुकामोऽभवत्तदा ॥२१२॥
तमुवाच महाबाहुर्वसुदेवः प्रतापवान्।
उग्रसेनात्मजं कंसं सौहृदात्प्रणयेन च ॥२१३॥
न स्त्रियं क्षत्रियोजातु हन्तुमर्हति कश्चन।
उपायः परिदृष्टोऽत्र मया यादवनन्दन ॥२१४॥
योऽस्याः सम्भवते गर्भः सप्तमः पृथिवीपते।
तमहन्ते प्रयच्छामि तत्र कुर्य्या यथाक्रमं ॥२१५॥
त्वं त्विदानीं यथेष्टत्वं वर्त्तेथा भूरिदक्षिण।
सर्वानस्यास्तु वै गर्भान्(१) सत्यं नेष्यामि ते वशं ॥२१६॥
एवं मिथ्या नरश्रेष्ठ वागेषा(२) न भविष्यति।
एवमुक्तोऽनुनीतः स जग्राह तनयांस्तदा ॥२१७॥
वसुदेवश्च तां भार्य्यामवाप्य मुदितोऽभवत्।
कंसस्यास्यावधीत् पुत्रान् पापकर्मा दुष्टामतिः ॥२१८॥
ऋषय ऊचुः। क एष वसुदेवस्तु देवकी च यशस्विनी।
नन्दगोपस्तु कस्त्वेष यशोदा च महायशाः।
योविष्णुं जनयामास या चैनं चाभ्यवर्द्धयत् ॥२१९॥
सूत उवाच। पुरुषाः कश्यपस्यासन्नादित्यास्तु स्त्रियस्तथा।

---

(१) आदर्शपुस्तकमात्रे, सर्व्वानस्यापि ते गर्भान् इति भ्रमात्मकपाठोऽस्ति।
(२) वाण्येषा इति क० ज०।

अथ कामान् महाबाहुर्देवक्याः समवर्द्धयत् ॥२२०॥
अचरत् स महीं देवः प्रविष्टोमानुषीं तनुं ।
मोहयन् सर्वभूतानि योगात्मा योगमायया ॥२२१॥
नष्टे धर्मे तदा जज्ञे विष्णुर्वृष्णिकुले स्वयं ।
कर्तुं धर्म्मव्यवस्थानमसुराणां प्रणाशनं ॥२२२॥
आहृता रुक्मिनी कन्या सत्या नग्नजितस्तदा[1] ।
साचाजिती सत्यभामा जाम्बवत्यपि रोहिणी ॥२२३॥
शैव्या सुदेवी माद्री च सुशीला नाम चापरा ।
कालिन्दी मित्रविन्दा च लक्ष्मणा जालवासिनी[2] ॥२२४॥
एवमादीनि देवानां सहस्राणि च षोड़श ।
चतुर्द्दश तु ये प्रोक्ता गणास्त्वाप्सरसां दिवि ।
विचिन्त्य देवैः शक्रेण विशिष्टास्त्विह प्रेषिताः ॥२२५॥
पत्न्यर्थं वासुदेवस्य उत्पन्ना राजवेश्मसु ।
एताः पत्न्योमहाभागा विष्वक्सेनस्य विश्रुताः ॥२२६॥
प्रद्युम्नश्चारुदेष्णश्च सुदेष्णः शरभ[3]स्तथा ।
चारुश्च चारुभद्रश्च भद्रचारुस्तथापरः ॥२२७॥
चारुविन्ध्यश्च[4] रुक्मिण्यां कन्या चारुमती[5] तथा ।
सानुर्भानुस्तथाचश्च रोहितोमन्त्रयस्तथा ॥२२८॥

---

(१) तथा इति ख० ग० ।
(२) चारुहासिनी इति ख० ग० ।
(३) शरण इति ख० ग० ।
(४) चारुविन्दस्वेति ख० ।
(५) चारुमतीति ख० ।

जराम्बकस्ताम्रवता भौमरिश्च जरन्धमः[१)] ।
चतस्रोजज्ञिरे तेषां स्वसारोगरुड़ध्वजात् ॥२२९॥
भानुर्भौमरिकाचैव ताम्रपर्णी जरन्धमा[२)] ।
सत्यभामासुतानेतान् जाम्बवत्याः प्रजाः शृणु ॥२३०॥
भद्रश्च भद्रगुप्तश्च भद्रविन्द्रस्तथैव च ।
सप्तबाहुश्च विख्यातः कन्या भद्रावती तथा ।
सम्बोधनी च विख्याता ज्ञेया जाम्बवतीसुताः ॥२३१॥
संग्रामजिच्च शतजित् तथैव च सहस्रजित् ।
एते पुत्राः सुदेव्याश्च विश्वक्सेनस्य कीर्त्तिताः ॥२३२॥
वृकोवृकश्चोवृकजिद्वृजिनी च सुराङ्गना ।
मित्रबाहुः सुनीथश्च नाग्नजित्याः प्रजास्त्विह ॥२३३॥
एवमादीनि पुत्राणां सहस्राणि निबोधत ।
प्रयुतन्तु समाख्यातं वासुदेवस्य ये सुताः ॥२३४॥
अयुतानि तथाष्टौ च शूरा रणविशारदाः ।
जनार्द्दनस्य वंशोवः कीर्त्तितोऽयं यथातथं ॥२३५॥
बृहती नर्तकोन्नेयी सुनये सङ्गता तथा[३)] ॥
कन्या सा बृहदुक्थस्य शैनेयस्य महात्मनः ॥२३६॥

---

(१) जरन्धर इति कृ० । (२) जरान्धमा इति क० ज० ।

(३) बृहतीनर्त्तकोनेया सुमध्यमे सङ्गतस्तथा इति क० ज० । नेया इत्यत्र, नेयी इति, सुमध्यमे इत्यत्र सुमये इति, पाठव्यत्ययेन क० ज० पुस्तकस्थितपाठो ङ० च० कृ० पुस्तकेषु विद्यते । नेया इत्यत्र नेयी इति, सुमध्यमे इत्यत्र मुनये इति, पाठव्यत्ययेन क० ज० पुस्तकस्थितपाठः ख० ग० पुस्तकयोर्वर्त्तते ।

तस्याः पुत्रास्तु विख्यातास्त्रयः समितिशोभनाः ।
अङ्गदः कुमुदः श्वेतः कन्या श्वेता तथैव च ॥२३७॥
अवगाहस्य[1] चित्रस्य शूरश्चित्ररथ[2]स्य यः ।
चित्रसेनः सुतस्तस्य कन्या चित्रवती[3] तथा ॥२३८॥
तुम्बस्य तुम्बवाणस्य जनस्तम्बस्य तावुभौ ।
उपाङ्गस्य सुतौ द्वौ तु वज्रारः क्षिप्र एव च ॥२३९॥
भूरीन्द्रसेनो भूरिश्च गवेषस्य सुतावुभौ ।
युधिष्ठिरस्य कन्या तु सुतनुर्नाम विश्रुता ॥२४०॥
तस्यामश्वसुतो[4]जज्ञे वज्रोनाम महायशाः ।
वज्रस्य प्रतिबाहुस्तु सुचारुस्तस्य चात्मजः ॥२४१॥
काश्या सुपार्श्वं तनयं जज्ञे साम्बा तरस्विनं ।
तिस्रः कोट्यस्तु पुत्राणां यादवानां महात्मनां ॥२४२॥
षष्टिशतसहस्राणि वीर्य्यवन्तोमहाबलाः ।
देवांशाः सर्व्व एवेह उत्पन्नास्ते महौजसः ॥२४३॥
दैवासुरे हता ये च असुरा वै महातपाः[5] ।
इहोत्पन्ना मनुष्येषु बाधन्ते सर्व्वमानवान् ।
तेषामुत्सादनार्थन्तु उत्पन्ना यादवे कुले ॥२४४॥
कुलानि दश चैकञ्च यादवानां महात्मनां ।

---

(१) अगावहश्चेति ङ० च० छ० ।
(२) श्चित्रवह इति च० ।
(३) चित्रध्वजीति ख० ग० ।
(४) मत्स्यसुता इति ख० ग० ङ० च० छ० । मश्वसुता इति ज० ।
(५) महातपस इत्यर्थे महातपाः इत्यार्षः ।

सर्व्वमेककुलं यद्वद्वर्त्तते वैष्णवे कुले ॥२४५॥
विष्णुस्तेषां प्रमाणे च प्रभुत्वे च व्यवस्थितः ।
निदेशस्थायिभिस्तस्य बध्यन्ते सर्व[१]मानुषाः ॥२४६॥
इति प्रकृतिर्वृष्णीनां समासव्यासयोगतः ।
कीर्त्तिता कीर्त्तनाच्चैव कीर्त्तिसिद्धिमभीप्सितां ॥२४७॥

इति श्रीमहापुराणे वायुप्रोक्ते विष्णुवंशानुकीर्त्तनं नाम
चतुस्त्रिंशोऽध्यायः समाप्तः ॥

---

(१) दुष्ट इति पाठः साधीयान् ।

अथ पञ्चत्रिंशोऽध्यायः ।

विष्णुमाहात्म्यकीर्त्तनं ।

मनुष्यप्रकृतीन् देवान् कीर्त्यमानान्निबोधत ।
सङ्कर्षणोवासुदेवः प्रद्युम्नः शाम्ब एव च ॥१॥
अनिरुद्धश्च पञ्चैते वंशवीराः प्रकीर्त्तिताः ।
सप्तर्षयः कुवेरश्च यक्षोमणिवरस्तथा[१] ॥२॥
शालकी[२]वदरश्चैव[३] विद्वान् धन्वन्तरिस्तथा ।
नन्दिनश्च महादेवः शालङ्कायन[४] उच्यते ।
आदिदेवस्तदा[५] जिष्णुरेभिश्च सह दैवतैः ॥३॥
ऋषय ऊचुः । विष्णुः किमर्थं सम्भूतः स्मृताः सम्भूतयः कति ।
भविष्याः कति वान्ये तु प्रादुर्भावा महात्मनः ॥४॥
ब्रह्मक्षत्रे युगान्तेषु किमर्थमिह जायते ।
पुनः पुनर्म्मनुष्येषु तन्नः प्रब्रूहि पृच्छतां ॥५॥
विस्तरेणैव सर्वाणि कर्म्माणि रिपुघातिनः ।

---

(१) मानवरस्तथेति ख०, मानवकस्तथेति ग०, मणिरथस्तथेति च० ।

(२) शालङ्की इति क० ज० शकलीति ग० ।

(३) वरद इति ग० ङ० ज० वदरि इति च० ।

(४) सावलाकाजन इति क० ज० । अत्र शारण्यायणं इति पाठोऽर्थ-प्रतिपत्तिकरः ।

(५) स्तथा इति पाठः साधुः ।

श्रोतुमिच्छामहे सम्यग्देहैः कृष्णस्य धीमतः ॥६॥
कर्म्मणामानुपूर्व्वञ्च प्रादुर्भावाश्च ये प्रभो ।
या चास्य प्रकृतिः सूत ताश्चास्मान् वक्तुमर्हसि ॥७॥
कथं स भगवान् विष्णुः सुरेश्वरिनिसूदनः ।
वसुदेवकुले धीमान् वासुदेवत्वमागतः ॥८॥
अमरैः सूत किं पुण्यं(१) पुण्यकृद्भिरलं कृतं ।
देवलोकं समुत्सृज्य मर्त्यलोकमिहागतः ॥९॥
देवमानुषयोर्नेता भूर्भुवःप्रसवो(२) हरिः ।
किमर्थं दिव्यमात्मानं मानुषे समवेशयत् ॥१०॥
यश्चक्रं वर्तयत्येकोमनुष्याणां मनोमयं ।
मनुष्ये स कथं बुद्धिं चक्रे चक्रभृतां वरः ॥११॥
गोपायनं यः कुरुते जगतां सार्व्वलौकिकं।
स कथं गां गतोविष्णुर्गोपमन्वकरोत्प्रभुः ॥१२॥
महाभूतानि भूतात्मा योदधार चकार ह ।
श्रीगर्भः स कथं गर्भे स्त्रिया भूचरया धृतः ॥१३॥
येन लोकान् क्रमैर्जित्वा त्रिभिस्त्रींस्त्रिदशेप्सया ।
स्थापिता जगतोमार्गास्त्रिवर्गप्रवरास्त्रयः(३) ॥१४॥

---

(१) अत्र आदर्शपुस्तकेषु भ्रमात्मकपाठा वर्त्तन्ते। तथा, अमरैरवृतं पुन्यमिति क० अमरैरावृतं पुन्यमिति ङ० च० छ०, अमरैर्व्यावृतं पुन्यमिति ख० ग० ।

(२) द्युर्भुवः प्रसवो इति क० ङ० च० छ० ज०, द्योर्भुवः प्रसवो इति ख०, द्यौर्भुवः प्रसवो इति ग० ।

(३) त्रिवर्गवपुराश्रिता इति क० ज०।

योऽन्तकाले जगत्पीत्वा कृत्वा तोयमयं वपुः ।
लोकमेकार्णवं चक्रे दृश्यादृश्येन वर्त्मना ॥१५॥
यः पुराणे[१] पुराणात्मा वाराहं वपुरास्थितः ।
ददौ जित्वा वसुमतीं सुराणां सुरसत्तमः ॥१६॥
येन सैंहं वपुं[२] कृत्वा द्विधा कृत्वा च यत्पुनः ।
पूर्व्वदैत्योमहावीर्य्योहिरण्यकशिपुर्हतः ॥१७॥
यः पुरा ह्यनलोभूत्वा और्व्वः संवर्त्तकोविभुः ।
पातालस्थोऽर्णवगतः पपौ तोयमयं हविः ॥१८॥
सहस्रचरणं देवं सहस्रांशुं सहस्रशः ।
सहस्रशिरसं देवं यमाहुर्वै युगे युगे ॥१९॥
नाभ्यारण्याः[३] समुद्भूतं यस्य पैतामहं गृहं[४] ।
एकार्णवगते लोके तत्पङ्कजमपङ्कजं ॥२०॥
येन ते निहता दैत्याः संग्रामे तारकामये ।
सर्व्वदेवमयङ्कृत्वा सर्वायुधधरं वपुः ॥२१॥
गरुड़स्थेन चोत्सिक्तः कालनेमिर्निपातितः ।
उत्तरांशे समुद्रस्य क्षीरोदस्यामृतोदधेः ।
यः शेते शाश्वतं योगमास्थाय तिमिरं महत्॥२२॥

---

(१) पुराणे इत्यत्र पुरा वै इति पाठः समीचीनः ।
(२) वपुमित्यत्र तनुमिति पाठोविशुद्धः ।
(३) नाभ्यारण्ये: इति पाठः साधीयान ।
(४) तनुमिति ख० ग० ।

पुराऽरणी गर्भमधत्त दिव्यं तपःप्रकर्षाददितिः पुरा यं ।
शक्रञ्च योदैत्यगणावरुद्धं गर्भावमानेन भृशं चकार ॥२३॥
यदानिलोलोकपदानि हृत्वा चकार दैत्यान् सलिलेशयांस्तान् ।
कृत्वादिदेवस्त्रिदिवस्य देवांश्चक्रे सुरेशं पुरुहूतमेव ॥२४॥
गार्हपत्येन विधिना अन्वाहार्य्येण कर्म्मणा ।
अग्निमाहवनीयञ्च वेदिञ्चैव कुशस्रवं ॥२५॥
प्रोक्षणीयं स्रुवञ्चैव अवभृथं तथैव च ।
अथ त्रीनिह(१) यश्चक्रे हव्यभागप्रदान्मखे ॥२६॥
हव्यादांश्च सुरांश्चक्रे कव्यादांश्च पितॄनपि ।
भोगार्थं यज्ञविधिना योयज्ञोयज्ञकर्म्मणि ॥२७॥
यूपान् समित्स्रुवं सोमं पवित्रं परिधीनपि ।
यज्ञीयानि च द्रव्याणि यज्ञीयांश्च तथानलान् ॥२८॥
सदस्यान् यजमानांश्च अश्वमेधान् क्रतूत्तमान् ।
विबभ्राज पुरा यश्च पारमेष्ठ्येन कर्म्मणा ॥२९॥
युगानुरूपं यः कृत्वा(२) त्रीन्(३) लोकान् हि यथाक्रमं ।
क्षणा निमेषाः काष्ठाश्च कलास्त्रैकालमेव च ॥३०॥
मुहूर्त्तास्तिथयोमासा दिनसंवत्सरास्तथा ॥
ऋतवः कालयोगाश्च प्रमाणं त्रिविधन्तथा ॥३१॥
आयुः क्षेत्राण्युपचयं लक्षणं रूपसौष्ठवं ।

---

(१) त्रीणि च इति आदर्शपुस्तकमात्रे पाठोऽस्ति ।
(२) यः कृत्वा इत्यत्र कृत्वा च इति पाठः समीचीनः ।
(३) सर्व्वेष्वादर्शपुस्तकेषु, त्रयोलोकाननुक्रमसिति पाठोऽस्ति, अयन्तु न सम्यङ् ।

मेधा वित्तं च शौर्य्यञ्च शास्त्रस्यैव च पारणं ॥३२॥
त्रयोवर्णास्त्रयोलोकास्त्रैविद्यं पावकास्त्रयः ।
त्रैकल्यं त्रीणि कर्म्माणि तिस्रोमायास्त्रयोगुणाः ॥३३॥
सृष्टा लोकाः सुराश्चैव येनात्यन्तेन कर्म्मणा ।
सर्व्वभूतगणाः सृष्टाः सर्व्वभूतगणात्मना ॥३४॥
नृणामिन्द्रियपूर्व्वेण(१) योगेन रमते च यः ।
गतागतानां योनेता सर्व्वत्र विविधेश्वरः ॥३५॥
योगतिर्धर्मयुक्तानामगतिः पापकर्म्मणां ।
चातुर्वर्ण्यस्य प्रभवश्चातुवर्ण्यस्य रक्षिता ॥३६॥
चातुर्विद्यस्य योवेत्ता चतुराश्रमसंश्रयः ।
दिगन्तरं नभोभूमिरापोवायुर्विभावसुः ॥३७॥
चन्द्रसूर्य्यद्वयं ज्योतिर्युगेशः क्षणदाचरः ।
यः परः श्रूयते देवोयः परं श्रूयते तपः ॥३८॥
यः परन्तपसः प्राज्ञयः परम्परमात्मवान् ।
आदित्यादिस्तु योदेवोयश्च दैत्यान्तकोविभुः ॥३९॥
युगान्तेष्वन्तकोयश्च यश्च लोकान्तकान्तकः ।
सेतुर्योलोकसेतूनां मेध्योयोमेध्यकर्म्मणां ॥४०॥
वेद्योयोवेदविदुषां प्रभुर्यः प्रभवात्मनां ।
सोमभूतस्तु भूतानामग्निभूतोऽग्निवर्च्चसां ॥४१॥
मनुष्याणां मनोभूतस्तपोभूतस्तपस्विनां ।

---

(१) स्त्रीणामिन्द्रियरूपेणेति ख० ।

विनयोनयदृप्तानां(१) तेजस्तेजस्विनामपि ॥४२॥
विग्रहोविग्रहाणां योगतिर्गतिमतामपि ।
आकाशप्रभवोवायुर्वायुप्राणा हुताशनः॥४३॥
दिवा हुताशनप्राणाः प्राणोऽग्नेर्मधुसूदनः।
रसोऽभवच्छोणितं वै शोणितान्मांसमुच्यते ॥४४॥
मांसात्तु मेदसोजन्म मेदसोऽस्थि निरूप्यते ।
अस्थ्ना मज्जा समभवन्मज्ज्ञातः शुक्रसम्भवः ॥४५॥
शुक्राद्गर्भः समभवद्रसमूलेन कर्म्मणा ।
तत्रापि प्रथमश्चाप(२)स्ताः(३) सौम्यराशिरुच्यते ॥४६॥
गर्भोष्मसम्भवो(४)ज्ञेयोद्वितीयोराशिरुच्यते ।
शुक्रं सोमात्मकं विद्यादार्त्तवं पावकात्मकं ॥४७॥
भावौ रसानुगावेतौ वीर्य्ये च शशिपावकौ ।
कफवर्गेऽभवच्छुक्रं पित्तवर्गे च शोणितं ॥४८॥
कफस्य हृदयं स्थानं नाभ्यां पित्तं प्रतिष्ठितं ।
देहस्य मध्ये हृदयं स्थानन्तु मनसः स्मृतं ॥४९॥
नाभीकोष्ठान्तरं यत्तु तत्र देवोहुताशनः ।
मनः प्राजापतिर्ज्ञेयं कफः सोमोविभाव्यते ॥५०॥
पित्तमग्निः स्मृतावेतावग्निसोमात्मकं जगत्।

---

(१) नयदृष्टानामिति क० ज०। नयदृप्तानामिति ख० ङ० च० छ०। पाठावेतौ न समीचीनौ।
(२) तत्रायां प्रथमाचापः इति ङ० च० छ० ज०, इत्यपपाठः।
(३) सा इति ङ० स इति च० छ० ज०।
(४) गर्भोष्मसम्भव इत्यत्र सन्धिरार्षः।

एवं प्रवर्त्तितोगर्भोवर्त्ततेऽम्बुदसन्निभः[१] ॥५१॥
वायुः प्रवेशनं चक्रे सङ्गतः परमात्मना ।
स पञ्चधा शरीरस्थोविद्यते वर्द्धयेत्[२] पुनः ॥५२॥
प्राणापानौ समानश्च उदानोव्यान एव च ।
प्राणोऽस्य परमात्मानं वर्द्धयन् परिवर्त्तते ॥५३॥
अपानः पश्चिमं कायमुदानोर्द्धशरीरगः[३] ।
व्यानोव्यानस्यते येन समानः सर्व्वसन्धिषु ॥५४॥
भूतावाप्तिस्ततस्तस्य जायतेन्द्रियगोचरा[४] ।
पृथिवी वायुराकाशमापोज्योतिश्च पञ्चमं ॥५५॥
सर्व्वेन्द्रिया निविष्टास्तं स्वं स्वं योगं प्रचक्रिरे ।
पार्थिवं देहमाहुस्तं प्राणात्मानं च मारुतं ॥५६॥
छिद्राण्याकाशयोनीनि जलास्रावं प्रवर्त्तते ।
तेजश्चक्षुश्चिता ज्योत्स्ना तेषां यन्नामतः स्मृतं ।
संग्रामा विषयाश्चैव यस्य वीर्य्यात्प्रवर्त्तिताः ॥५७॥
इत्येतान् पुरुषः सर्व्वान् सृजँल्लोकान् सनातनः ।
नैधनेऽस्मिन् कथं लोके नरत्वं विष्णुरागतः ॥५८॥
एष नः संशयोधीमन्नेष वै विस्मयोमहान्।
कथं गतिर्गतिमतामापन्नोमानुषीं तनुं ॥५९॥

---

(१) एवं प्रवर्त्ततोगर्भे वर्त्ततेर्वुदसन्निधे इति क० ज०, एवं प्रवर्त्तते गर्भे वर्त्ततेम्बुदसन्निभे इति ख० ग०, एवं प्रवर्त्तते गर्भे वर्त्ततेर्वुदसन्निभे इति ङ० च० छ० ।

(२) वर्द्धते इति ख० ।

(३) अत्र विसर्गलोपे सन्धिरार्षः ।

(४) जायतेन्द्रियगोचरा इत्यत्र यलोपे सन्धिरार्षः ।

श्रोतुमिच्छामहे विष्णोः कर्म्माणि च यथाक्रमं ।
आश्चर्य्याणि परं विष्णुर्वेददेवैश्च कथ्यते ॥६०॥
विष्णोरुत्पत्तिमाश्चर्य्यं कथयस्व महामते ।
एतदाश्चर्य्यमाख्यानं कथ्यतां वै सुखावहं ॥६१॥
प्रख्यातबलवीर्य्यस्य प्रादुर्भावा महात्मनः ।
कर्म्मणाश्चर्य्यभूतस्य विष्णोः सत्त्वमिहोच्यतां ॥६२॥
सूत उवाच। अहन्त्र कीर्त्तयिष्यामि प्रादुर्भावं महात्मनः ।
यथा स भगवान् जातो मानुषेषु महातपाः ॥६३॥
सप्तसप्ततपः प्रोक्ता भृगुशापेन मानुषे ।
जायते च युगान्तेषु देवकार्य्यार्थसिद्धये ॥६४॥
तस्य दिव्यतनुं विष्णोर्गदतो मे निबोधत ।
युगधर्म्मे परावृत्ते काले च शिथिले प्रभुः ॥६५॥
कर्त्तुं धर्म्मव्यवस्थानं जायते मानुषेष्विह ।
भृगोः शापनिमित्तेन देवासुरकृतेन च(१) ॥६६॥
ऋषय ऊचुः। कथं देवासुरकृते अध्याहारमवाप्नुयात् ।
एतद्वेदितुमिच्छामो वृत्तं(२) दैवासुरं कथं ॥६७॥
सूत उवाच। दैवासुरं यथा वृत्तं ब्रुवतस्तन्निबोधत ।
हिरण्यकशिपुर्दैत्यस्त्रैलोक्यं प्राक् प्रशासति(३) ॥६८॥
बलिनाधिष्ठितं राष्ट्रं(४) पुनर्लोकत्रये क्रमात् ।

---

(१) देवासुरकृते हि सः इति पाठः साधीयान्। देवासुरकुलेषु च इति ख० ग० । (२) कृत्यमिति ख० ग० ।
(३) आदर्शपुस्तकमात्रे हिरण्यकशिपुर्दैत्य इति पाठोऽस्ति, अयन्तु न समीचीनः । (४) राज्यमिति ख० ग० ङ० च० ।

सख्यमासीत्परं तेषां देवानामसुरैः सह ॥६९॥
युगं वै दशसङ्कीर्णमासीदव्याहतं जगत्[१] ।
निदेशस्थायिनस्त्वैव तयोर्देवासुराभवन् ॥७०॥
बलवान् वै विवादोऽयं संप्रवृत्तः सुदारुणः ।
दैवासुराणां च तदा घोरक्षयकरो महान् ॥७१॥
तेषां दायनिमित्तं वै संग्रामा बहवोऽभवन् ।
वराहेऽस्मिन् दश द्वौ च षण्डामार्कान्तराः स्मृताः ॥७२॥
नामतस्तु समासेन शृणुध्वं तान् विवक्षतः ।
प्रथमो नारसिंहस्तु द्वितीयश्चापि वामनः ॥७३॥
तृतीयः स तु वाराहश्चतुर्थोऽमृतमन्थनः ।
संग्रामः पञ्चमश्चैव सुघोरस्तारकामयः ॥७४॥
षष्ठो ह्याडीवक[२]स्तेषां सप्तमस्त्रैपुरः स्मृतः ।
अन्धकारोऽष्टमस्तेषां ध्वजश्च नवमः स्मृतः ॥७५॥
वार्त्तश्च दशमो ज्ञेयस्ततो हालाहलः स्मृतः ।
स्मृतो द्वादशमस्तेषां घोरकोलाहलोऽपरः ॥७६॥
हिरण्यकशिपुर्दैत्यो नरसिंहेन सूदितः ।
वामनेन बलिर्बद्धस्त्रैलोक्याक्रमणे कृते ॥७७॥
हिरण्याक्षो हतो द्वन्द्वे[३] प्रतिवादे तु दैवतैः ।

---

(१) युगाख्या दशसङ्कीर्णा आसीदव्याहतं जगदिति पाठः आदर्शपुस्तकमात्रे वर्त्तते ।
(२) ह्यानीवक इति ख०, ह्याडीवक इति ग०, ह्याढीवक इति ङ०च० ।
(३) युद्धे इति ख० ग० ।

महाबलोमहासत्वः संग्रामेष्वपराजितः ॥७८॥
दंष्ट्रायान्तु वराहेण समुद्राद्भूर्यदा कृता ॥
प्राह्लादोनिर्जितोयुद्धे इन्द्रेणामृतमन्थने ॥८९॥
विरोचनस्तु प्रह्लादिर्नित्यमिन्द्रवधोद्यतः ।
इन्द्रेणैव स विक्रम्य निहतस्तारकामये ॥८०॥
भवादवध्यतां प्राप्य विशेषास्त्रादिभिस्तु यः ।
सञ्जभो[१] निहतः षष्ठे शक्राविष्टेन विष्णुना ॥८१॥
अशक्नुवन्तोदेवेषु पुरं गोप्तुं त्रिदैवतं ।
निहताः दानवाः सर्वे त्रिपुरस्त्र्यम्बकेण तु ॥८२॥
अष्टमे त्वसुराश्चैव राक्षसाश्चान्धकारकाः ।
जितदेवमनुष्यैस्तु पितृभिश्चैव सङ्गतान् ॥८३॥
संहतान् दानवांश्चैव सङ्गतान् कृत्स्नशश्च तान्[२] ।
तथा विष्णुसहायेन महेन्द्रेण निवर्हिताः ॥८४॥
हतोध्वजोमहेन्द्रेण मायाच्छन्नश्च योधयन् ।
ध्वजे लक्ष्यं समाविश्य विप्रवर्त्तिर्महाभुजः ॥८५॥
दैत्यांश्च दानवांश्चैव संहतान् कृत्स्नशश्च तान् ।
रजिः कोलाहले सर्वान् देवैः परिवृतोऽजयत् ।
यज्ञामृतेन[३] विजितौ षण्डामार्कौ तु दैवतैः ॥८६॥
एते देवाः पुरा वृत्ताः संग्रामा द्वादशैव तु ।
देवासुरक्षयकराः प्रजानामशिवाय च ॥८७॥

---

(१) सञ्जसो इति क० ज०, जसम्भो इति ख० ।
(२) प्राप्य इत्यध्याहार्य्यं । (३) यज्ञायत्तेनेति क० ।

हिरण्यकशिपूराजा वर्षाणामर्बुदं बभौ ।
तथा शतसहस्राणि ह्यधिकानि द्विसप्तति ।
अशीति च सहस्राणि त्रैलोक्यस्येश्वरोऽभवत् ॥८८॥
पर्याये तस्य राजाऽनु बलिर्वर्षार्बुदं पुनः ।
षष्टिं चैव सहस्राणि त्रिंशच्च नियुतानि च ॥८९॥
बलेराज्याधिकारस्तु यावत्कालं बभूवह ।
प्रह्लादेन गृहीतोऽभूत्तावत्कालं तदासुरैः ॥९०॥
इन्द्रास्त्रयस्ते विख्याता असुराणां महौजसः ।
दैत्यसंस्थमिदं सर्वमासीद्दशयुगं किल ॥९१॥
असपत्न ततः सर्वं राष्ट्रं दशयुगं पुरा(१) ।
त्रैलोक्यमव्ययमिदं महेन्द्रेण तु पाल्यते ॥९२॥
प्रह्लादस्य ततस्तस्मादत्त्रैलोक्यं कालपर्ययात् ।
पर्यायेण च संप्राप्ते त्रैलोक्ये पाकशासनः ॥९३॥
ततोऽसुरान् परित्यज्य यज्ञे देवा उपागमन् ।
यज्ञे देवानथ गते काव्यं ते ह्यसुराब्रुवन् ॥९४॥
हृतं नोमिषतां राष्ट्रं त्यक्ता यज्ञं पुनर्गताः ।
स्थातुं न शक्नुमोह्यद्य(२) प्रविशामोरसातलं॥९५॥
एवमुक्तोऽब्रवीदेतान् विषण्णः सान्त्वयन् गिरा ।
माभैष्ट धारयिष्यामि तेजसा स्वेन चासुराः(३) ॥९६॥

---

(१) पुनः इति ङ० च० ।
(२) पृथ्व्यां इति छ० ।
(३) वै पुरा इति ख०, ग० पुस्तके एतच्छ्लोकार्द्धाभावोवर्त्तते। ख० ग० पुस्तकव्यतिरिक्तपुस्तकेषु वै सुराः इति पाठोविद्यते, अयन्त्वपपाठः।

वृष्टिरोषधयश्चैव रसावसु च यद्वयं।
कृत्स्ना मयि च तिष्ठन्ति पादस्तेषां सुरेषु वै।
युष्मदर्थं प्रदास्यमि तत्सर्वं धार्यते मया॥९७॥
ततोदेवासुरान् दृष्ट्वा धृतान् काव्येन धीमता।
अमन्त्रयंस्तदा ते वै सविग्ना विजिगीषया॥९८॥
एष काव्य इदं सर्वं व्यावर्त्तयति नोबलात्।
साधु गच्छामहे तूर्णं क्षीणान्नाप्याययस्व तान्[१]।
प्रसह्य हत्वा शिष्टान् वै[२] पातालं प्रापयामहे॥९९॥
ततोदेवाः सुसंरब्धा दानवानभिसृत्य वै।
जघ्नुस्तैर्बध्यमानास्ते काव्यमेवाभिदुद्रुवुः॥१००॥
ततः काव्यस्तु तान् दृष्ट्वा तूर्णं देवैरभिद्रुतान्।
समरेऽस्त्रक्षताक्तांस्तान्[३] देवेभ्यस्तान् दितेः सुतान॥१०१॥
काव्योदृष्ट्वा स्थितान् देवान् तत्र देवोभ्यचिन्तयत्।
तानुवाच ततोध्यात्वा पूर्ववृत्तमनुस्मरन्॥१०२॥
त्रैलोक्यं विजितं सर्वं वामनेन त्रिभिः क्रमैः[४]।
बलिर्बद्धोहतोजम्भोनिहतश्च विरोचनः॥१०३॥

---

(१) क्षीणानाप्ययर्य्यादता इति क० ज०। क्षीणानाप्याययर्धिमान् इति ख०, एतच्छ्लोकार्द्धं ग० पुस्तके न विद्यते, क्षीणानाप्यायर्यद्दितान् इति ङ० च०, क्षीणानाप्यपर्य्यादतान् इति छ०। एते पाठा भ्रममूलाः।
(२) शिष्टास्तु इति आदर्शपुस्तकपाठोऽस्ति।
(३) सर्व्वेषु आदर्शपुस्तकेषु, समरक्षतशस्त्रार्त्तान् इति पाठोवर्त्तते, अयं न समीचीनः।
(४) त्रिविक्रमैः इति ख०।

महार्हेषु द्वादशसु संग्रामेषु सुरैर्हताः ।
तैस्तैरुपायैर्भूयिष्ठा निहता ये प्रधानतः ॥१०४॥
किञ्चिच्छिष्टास्तु[१] वै यूयं युद्धेष्वन्त्येषु वै स्वयं[२] ।
नीतिं वोहि विधास्यामि कालः कश्चित्प्रतीक्ष्यतां ॥१०५॥
यास्याम्यहं महादेवं मन्त्रार्थे विजयाय वः ।
अग्निमाप्याययेद्धोता मन्त्रैरेव बृहस्पतिः ॥१०६॥
ततोयास्याम्यहं देवं मन्त्रार्थे नीललोहितं ।
युष्माननुग्रहीष्यामि पुनः पश्चादिहागतः ॥१०७॥
यूयं तपश्चरध्वं वै संवृता वल्कलैर्वने ।
न वै देवा बधिष्यन्ति यावदागमनं मम ॥१०८॥
अप्रतीपांस्ततोमन्त्रान् देवात् प्राप्य महेश्वरात् ।
योत्स्यामहे पुनर्देवांस्ततः प्राप्स्यथ वै जयं ॥१०९॥
ततस्ते कृतसंवादा देवानूचुस्ततोऽसुराः ।
न्यस्तवादा वयं सर्वे लोकान् यूयं क्रमन्तु[३] वै ॥११०॥
वयं तपश्चरिष्यामः संवृता वल्कलैर्वने ।
प्रह्लादस्य वचः श्रुत्वा सत्यव्याहरणं तु तत् ॥१११॥
ततोदेवा निवृत्ता वै विज्वरा मुदिताश्च ह ।
न्यस्तशस्त्रेषु दैत्येषु स्वान् वै जग्मु र्यथागतान् ॥११२॥
ततस्तानब्रवीत्काव्यः कञ्चित्कालमुपास्यतां ।

---

(१) अल्पाः शिष्टास्तु इतिपाठः साधीयान् ।
(२) स्वयमिति ख० ग० ।
(३) आक्रामत इत्यर्थे क्रमन्तु इत्यार्षः ।

निरुत्सुकैस्तपोयुक्तैः कालं कार्य्यार्थसाधकैः ।
पितुर्म्ममाश्रमस्था वै सर्व्वे देवाः सवासवाः ॥११३॥
स सन्दिश्यासुरान् काव्योमहादेवं प्रपद्य च ।
प्रणम्यैनमुवाचाथ जगत्प्रभवमीश्वरं ॥११४॥
मन्त्रानिच्छाम्यहं देव ये न सन्ति वृहस्पतौ ।
पराभवाय देवानामसुरेष्वभयावहान् ॥११५॥
एवमुक्तोऽब्रवीद्देवोमन्त्रानिच्छसि वै द्विज ।
व्रतं चर मयोद्दिष्टं ब्रह्मचारी समाहितः ॥११६॥
पूर्णं वर्षसहस्रं वै कुण्डधूममवाक्‌छिराः ।
यद्युपास्यसि भद्रन्ते मत्तोमन्त्रमवाप्स्यसि ॥११७॥
तथोक्तोदेवदेवेन स शुक्रस्तु महातपाः ।
पादौ संस्पृश्य देवस्य बाढ़मित्यभ्यभाषत ॥११८॥
व्रतं चराम्यहं शेषं यथोद्दिष्टोस्मि वै प्रभो ।
ततोनियुक्तोदेवेन कुण्डधारोस्य धूमकृत् ॥११९॥
असुराणां हितार्थाय तस्मिन् शुक्रे गते तदा ।
मन्त्रार्थं तत्र वसति ब्रह्मचर्य्यौमहेश्वरः ॥१२०॥
तद्बुद्ध्वा नातिपूर्व्वन्तु(१) राज्यं न्यस्तं तदासुरैः ।
तस्मिन् छिद्रे तदामर्षा देवास्तान् समभिद्रवन् ।
निशितात्तायुधाः सर्व्वे वृहस्पतिपुरोगमाः ॥१२१॥
दृष्ट्वासुरगणा देवान् प्रगृहीतायुधान् पुनः ।

(१) तद्बुद्ध्वा नीतिपूर्व्वन्तु इति क० ख० च० ज०, ग० पुस्तके एतच्छ्लोकार्द्धाभावोदृश्यते ।

उत्पेतुः सहसा सर्वे सन्त्रस्तास्ते ततोऽभवन् ॥१२२॥
न्यस्तशस्त्रे जये दत्ते आचार्यव्रतमास्थिते ।
सन्त्यज्य समयं देवास्ते सपत्नजिघांसवः[१] ॥१२३॥
अनाचार्य्यास्तु[२] भद्रं वो विश्वस्तास्तपसि स्थिताः ।
चीरवल्काजिनधरा निष्क्रिया निष्परिग्रहाः ॥१२४॥
रणे विजेतुं देवान् वै न शक्यामः कथञ्चन ।
अयुद्धेन प्रपद्यामः शरणं काव्यमातरं ॥१२५॥
ज्ञापयामस्तत[३]मिदं यावदागमनं गुरोः ।
विनिवृत्ते ततः काव्ये योत्स्यामोयुधि तान् सुरान् ॥१२६॥
एवमुक्तासुरान् योग्यं शरणं काव्यमातरं ।
प्रापद्यन्त ततोभीतास्तदा चैव तदाऽभयं ॥१२७॥
दत्तन्तेषान्तु भीतानां दैत्यानामभयार्थिनां ।
न भेतव्यं न भेतव्यं भयन्त्यजत दानवाः ॥१२८॥
मत्सन्निधौ वर्त्ततां वोन भीर्भवितुमर्हति ।
भयाचाप्यभिपन्नांस्तान् दृष्ट्वा देवासुरांस्तदा ॥१२९॥
अभिजग्मुः प्रसह्यैतानविचार्य्य बलाबलं ।
तांस्तस्तान् बध्यमानांश्च देवैर्दृष्ट्वासुरांस्तदा ॥१३०॥
देवी क्रुद्धाब्रवीदेनाननिन्द्रत्वं करोम्यहं ।
संस्तभ्य शीघ्रं संरभादिन्द्रं साऽभ्यचरत्ततः ॥१३१॥
ततः संस्तंभितं दृष्ट्वा शक्रं देवास्तु यूपवत् ।

(१) आजग्मुरित्यूहनीयं ।
(२) वयमिति शेषः ।
(३) ह्यस्त्वमिति ख० ।

व्यद्रवन्त ततोभीता दृष्ट्वा शक्रं वशीकृतं ॥१२२॥
गतेषु सुरसंघेषु विष्णुरिन्द्रमभाषत ।
मां त्वं प्रविश भद्रन्ते नेष्यामि त्वां सुरेश्वर॥१२३॥
एवमुक्तस्ततोविष्णुं प्रविवेश पुरन्दरः ।
विष्णुना रक्षितं दृष्ट्वा देवी क्रुद्धा वचोऽवदत् ॥१२४॥
एषा[१]त्वां विष्णुना सार्द्धं दहामि मघवानिव ।
मिषतां सर्वभूतानां दृश्यतां मे तपोबलं ॥१२५॥
तयाभिभूतौ तौ देवाविन्द्रविष्णू जजल्पतुः ।
कथं मुच्येव[२] सहितौ विष्णुरिन्द्रमभाषत ॥१२६॥
इन्द्रोऽब्रवीज्जहि ह्येनां यावन्नौ न दहेद्विभो ।
विशेषेणाभिभूतोहमतस्त्वञ्जहि मा चिरं ॥१२७॥
ततः समीक्ष्य तां विष्णुः स्त्रीबधं कर्त्तुमास्थितः ।
अभिध्याय ततश्चक्रमापन्नः सत्वरं प्रभुः ॥१२८॥
तस्याः सत्वरमाणायाः शीघ्रकारी सुरारिहा ।
स्त्रियोविष्णुस्ततोदेव्याः क्रूरं बुद्धा चिकीर्षितं ।
क्रुद्धस्तदस्त्रमाविध्य शिरश्चिच्छेद माधवः ॥१२९॥
तं दृष्ट्वा स्त्रीबधं घोरं चुकोप भृगुरीश्वरः ।
ततोऽभिशस्तो[३]भृगुणा विष्णुर्भार्य्याबधे तदा ॥१४०॥
यस्मात्ते जानता धर्म्मानबध्या स्त्री निसूदिता ।
तस्मात्त्वं सप्तकृत्वोवै मानुषेषु प्रपत्स्यसि ॥१४१॥

(१) एका इति क० ज० ।
(२) मुच्याव इति पाठोविशुद्धः ।
(३) अभिशप्त इति पाठः सङ्गतः ।

ततस्तेनाभिशापेन नष्टे धर्मे पुनः पुनः ।
लोके सर्वहितार्थाय जायते मानुषेष्विह ॥१४२॥
अनुव्याहृत्य विष्णुं स तदादाय शिरः स्वयं ।
समानीय ततः काये अपोगृह्येदमब्रवीत् ॥१४३॥
एष त्वां विष्णुना सत्ये हतां संजीवयाम्यहं ।
यदि कृत्स्नोमया धर्मश्चरितोज्ञायतेऽपि वा ।
तेन सत्येन जीवस्व यदि सत्यं ब्रवीम्यहं ॥१४४॥
सत्याभिव्याहृता तस्य देवी संजीविता तदा ।
तदा तां प्रोक्ष्य शीताभिरद्भिर्जीवेति सोऽब्रवीत् ॥१४५॥
ततस्तां सर्व्वभूतानि दृष्ट्वा सुप्तोत्थितामिव ।
साधु साध्वित्यदृश्यानां वाचस्ताः सस्वरुर्दिशः ॥१४६॥
दृष्ट्वा सञ्जीवितामेवं देवीं तां भृगुणा तदा ।
मिषतां सर्वभूतानां तदद्भुतमिवाभवत् ॥१४७॥
असंभ्रान्तेन भृगुणा पत्नीं सञ्जीवितां ततः ।
दृष्ट्वा शक्रोन लेभेऽथ शर्म काव्यभयात्ततः ॥१४८॥
प्रजागरे(१) ततश्चेन्द्रोजयन्तीमात्मनः सुतां ।
प्रोवाच मतिमान् वाक्यं स्वां कन्यां पाकशासनः ॥१४९॥
एष काव्योह्यनिन्द्राय चरते दारुणं तपः ।

---

(१) प्रजागरे इति श्लोकार्द्धस्य ख० पुस्तके अभावोवर्त्तते, प्रजागार इति ग०, ख० ग०पुस्तकव्यतिरिक्तेषु प्रजागरे इति पाठोऽस्ति, अयन्त-लेखकप्रमादसम्भूत एव । प्रजागरे इत्यत्र प्रजागारे अथवा जजा-गार इति पाठः संगतार्थः ।

तेनाहं व्याकुलः पुत्रि कृतोधृतिमता दृढं ॥१५०॥
गच्छ सम्भावयस्वैनं श्रमापनयनैः शुभैः।
तैस्तैर्मनोनुकूलैश्च ह्युपचारैरतन्द्रिता ॥१५१॥
देवी सा हीन्द्रदुहिता जयन्ती शुभचारिणी।
युक्तध्यानञ्च ग्राम्यं(१) तन्दुर्बलं धृतिमास्थितं ॥१५२॥
पित्रा यथोक्तं काव्यं(२) सा काव्ये कृतवती तदा।
गीर्भिश्चैवानुकूलाभिः स्तुवती वल्गुभाषिणी ॥१५३॥
गात्रसंवाहनैः काले सेवमाना सुखावहैः।
शुश्रूषन्त्यनुकूला च उवास बहुलाः समाः ॥१५४॥
पूर्णे धूम्रवते चापि घोरे वर्षसहस्रिके।
वरेण छन्दयामास काव्यं प्रीतोऽभवत्तदा ॥१५५॥
एवं ब्रुवन् त्वयैकेन चीर्णं नान्येन केनचित्।
तस्मात्त्वं तपसा बुध्या श्रुतेन च बलेन च ॥१५६॥
तेजसा चापि विबुधान् सर्व्वानभिभविष्यसि।
यच्च किञ्चिन्मम ब्रह्मन् विद्यते भृगुनन्दन ॥१५७॥
साङ्गञ्च सरहस्यञ्च यज्ञोपनिषदान्तथा।
प्रतिभास्यति ते सर्वं तच्चाद्यन्तं न कस्यचित् ॥१५८॥

(१) मुडक्तयधानं ग्राम्यमिति क० ज०, युक्तध्यानञ्च ग्राम्यन्तमिति ख०, मुक्तं व्यानञ्च ग्राम्यं तमिति ग०, सुयड्कूप धनं ग्राम्यमिति ङ० च०, कुयड्पधानं ग्राम्यं तमिति छ०। एतेषामर्थरहितत्वान्नैकोऽपि व्यासभाषितः। मुक्तं व्यानञ्चेत्यत्र मुक्तोपधानमितिपाठः सङ्गतार्थः। ग्राम्यमित्यत्र ग्रान्तमिति पाठः साधुः।

(२) उपगम्येति क्रियापदमूहनीयं।

सर्वाभिभावी तेन त्वं द्विजश्रेष्ठोभविष्यसि ।
एवं दत्त्वा वरं[१]स्तस्मै भार्गवाय पुनः पुनः ॥१५९॥
अजेयत्वं धनेशत्वमवध्यत्वं च वै ददौ ।
एतान् लब्ध्वा वरान् काव्यः सम्प्रहृष्टतनूरुहः ॥१६०॥
हर्षात् प्रादुर्बभौ तस्य देवस्तोत्रं महेश्वरं ।
तदा तिर्यक्स्थितस्त्वेवं तुष्टुवे नीललोहितं ॥१६१॥
नमोऽस्तु शितिकण्ठाय सुरापायसुवर्चसे ।
रिरिहाणाय[२] लोपाय वत्सराय जगत्पते ॥१६२॥
कपर्दिने ह्यूर्द्धरोम्णे हयाय करणाय च ।
संस्कृताय सुतीर्थाय देवदेवाय रंहसे ॥ १६३॥
उष्णीषिणे सुवक्त्राय सहस्राक्षाय मील्ढ्वे[३] ।
वसुरेताय रुद्राय तपसे चीरवाससे ॥१६४॥
ह्रस्वाय मुक्तकेशाय सेनान्ये रोहिताय च ।
कवये राजवृद्धाय तक्षकक्रीडनाय[४] च ॥१६५॥
गिरिशायार्कनेत्राय यतिने[५] जाम्बवाय च ।
सुवृत्ताय सुहस्ताय धन्विने भार्गवाय च॥१६६॥
सहस्रबाहवे चैव सहस्रामलचक्षुषे ।

---

(१) वरमिति ख० ग० ङ० च० छ० ।
(२) रेरिहाणाय लोपायेति ङ० च० छ० । अत्र, अरिहननरूपाय इति पाठः समीचीनः ।
(३) मीढ्ढुषे इति क० ज०, मीढुषे छ० ।
(४) तक्षकाक्रीडनाय इति छ० ।
(५) पतये इति ख० ।

सहस्रकुक्षये चैव सहस्रचरणाय च ॥१६७॥
सहस्रशिरसे चैव बहुरूपाय वेधसे।
भवाय विश्वरूपाय श्वेताय पुरुषाय च ॥१६८॥
निषङ्गिने कवचिने सूक्ष्माय[१] क्षपणाय[२] च।
ताम्राय चैव भीमाय उग्राय च शिवाय च ॥१६९॥
बभ्रवे च पिशङ्गाय पिङ्गलायारुणाय च।
महादेवाय सर्व्वाय विश्वरूपशिवाय च ॥१७०॥
हिरण्याय च शिष्टाय श्रेष्ठाय मध्यमाय च।
पिनाकिने चेषुमते चित्राय रोहिताय च॥१७१॥
दुन्दुभ्यायैकपादाय अर्हाय बुद्धये तथा।
मृगव्याधाय सर्पाय स्थाणवे भीषणाय च ॥१७२॥
बहुरूपाय चोग्राय त्रिनेत्रायेश्वराय च।
कपिलायैकवीराय मृत्यवे त्र्यम्बकाय च ॥१७३॥
वास्तोस्पते पिनाकाय शङ्कराय शिवाय च।
आरण्याय[३] गृहस्थाय[४] यतिने ब्रह्मचारिणे॥१७४॥
सांख्याय चैव योगाय ध्यानिने दीक्षिताय च।
अन्तर्हिताय शर्व्वाय मान्याय मालिने तथा ॥१७५॥
बुद्धाय चैव शुद्धाय मुक्तये केवलाय च।

---

(१) शुष्माय इति ङ० च०।
(२) पक्षणाय इति ङ० च०।
(३) अरण्यायेति ङ० च०।
(४) गृहस्थायेति ङ० च०।

रोधसे चेकितानाय ब्रह्मिष्ठाय महर्षये ॥१७६॥
चतुष्पादाय मेध्याय धर्म्मिणे शीघ्रगाय च ।
शिखण्डिने कपालाय दण्डिने विश्वमेधसे ॥१७७॥
अप्रतीघाताय दीप्ताय भास्कराय सुमेधसे ।
क्रूराय विकृतायैव वीभत्साय शिवाय च ॥१७८॥
सौम्याय चैव पुण्याय धार्मिकाय शुभाय च ।
अवध्याय मृताङ्गाय नित्याय शाश्वताय च ॥१७९॥
साद्याय[१] शरभायैव शूलिने च त्रिचक्षुषे ।
सोमपायाज्यपायैव धूमपायोष्मपाय च ॥१८०॥
शुचये रेरिहाणाय सद्योजाताय मृत्यवे ।
पिशिताशाय खर्वाय मेधाय वैद्युताय च ॥१८१॥
व्याश्रिताय अविष्टाय भारतायान्तरिक्षये[२] ।
क्षमाय सहमानाय सत्याय तपनाय च ॥१८२॥
त्रिपुरघ्नाय दीप्ताय चक्राय रोमशाय च ।
तीग्मायुधाय मेध्याय सिद्धाय च पुनस्तये ॥१८३॥
रोचमानाय खण्डाय स्फीताय ऋषभाय च ।
भोगिने पुञ्जमानाय शान्तायैवोर्द्धरेतसे ।१८४॥
अघघ्नाय मखघ्नाय मृत्यवे यज्ञियाय च ।
कृशानवे प्रचेताय वह्नये किशलाय च ।१८५॥

(१) कव्यायेति ङ० च० ।
(२) भारतायान्तरिक्षवे इति ङ० च० ऋ० ।

सिकत्याय प्रसन्नाय वरेण्यायैव चक्षुषे[१]।
क्षिप्रगवे सुधन्वाय प्रमेध्याय पिवाय च ।१८६॥
रक्षोघ्नाय पशुघ्नाय विघ्नाय शयनाय च ।
विभ्रान्ताय महन्ताय अन्तये दुर्गमाय च ॥१८७॥
दक्षाय च जघन्याय लोकानामीश्वराय च ।
अनामयाय चोर्द्धाय संहत्याधिष्ठिताय च ॥१८८॥
हिरण्यबाहवे चैव सत्याय शमनाय च ।
असिकल्याय माघाय रीरिण्यायैकचक्षुषे ॥१८९॥
श्रेष्ठाय वामदेवाय ईशानाय च धीमते ।
महाकल्पाय दीप्ताय रोदनाय हसाय च ॥१९०॥
दृतधन्वने[२] कवचिने रथिने च वरूथिने ।
भृगुनाथाय शुक्राय वह्निरिष्टाय[३] धीमते ॥१९१॥
अघाय अघसंस्थाय विप्रियाय प्रियाय च ॥
दिग्वासःकृत्तिवासाय भगघ्नाय नमोऽस्तु ते[४] ॥१९२॥
पशूनां पतये चैव भूतानां पतये नमः ।
प्रणवे ऋग्यजुःसाम्ने स्वधायै च सुधाय च ॥१९३॥
वषट्कारतमायैव तुभ्यमन्तात्मने नमः ।

---

(१) वरेण्यायैकचक्षुषे इति ख० ।
(२) दृढधन्विने इति ख० ङ० च० छ० । दृढधन्वने इति प्रयोगः समीचीनः ।
(३) वह्निरेताय इति ख० ग० ।
(४) नमोनमः इति ख० ग० ।

स्रष्ट्रे धात्रे तथा होत्रे हर्त्रे च त्तपणाय[1] च ॥१९४॥
भूतभव्यभवायैव तुभ्यङ्कालात्मने नमः ।
वसवे चैव साध्याय रुद्रादित्याश्विनाय च ॥१९५॥
विश्वाय मरुते चैव तुभ्यन्देवात्मने नमः ।
अग्निसोमर्त्विगिज्याय पशुमन्त्रौषधाय च ॥१९६॥
दक्षिणावभृथायैव तुभ्यं यज्ञात्मने नमः ।
तपसे चैव सत्याय त्यागाय च शमाय च ॥१९७॥
अहिंसायाप्यलोभाय सुवेशायातिशाय च ।
सर्वभूतात्मभूताय तुभ्यं योगात्मने नमः ॥१९८॥
पृथिव्यै चान्तरिक्षाय दिवाय च महाय च ।
जनस्तपाय सत्याय तुभ्यं लोकात्मने नमः ॥१९९॥
अव्यक्तायाथ महते भूतायैवेन्द्रियाय च ।
तन्मात्राय महान्ताय तुभ्यन्तत्त्वात्मने नमः ॥२००॥
नित्याय चार्थलिङ्गाय[2] सूक्ष्माय चेतनाय च ।
शुद्धाय विभवे चैव तुभ्यं नित्यात्मने नमः ॥२०१॥
नमस्ते त्रिषु लोकेषु स्वरान्तेषु[3] भवादिषु ।
सत्यान्तेषु महान्तेषु चतुर्षु च नमोऽस्तु ते ॥२०२॥
नमः स्तोत्रे मया ह्यस्मिन् सदसद्वाहृतं विभो ।
मद्भक्त इति ब्रह्मण्य सर्वन्तत् क्षन्तुमर्हसि ॥२०३॥

इति श्रीमहापुराणे वायुप्रोक्ते विष्णुमाहात्म्ये शम्भुस्तवकीर्त्तनं नाम पञ्चत्रिंशोऽध्यायः समाप्तः ॥

---

(१) क्षेपणाय इति ख० ।
(२) चाथ लिङ्गाय इति ख० छ०, चाप्यलिङ्गाय इति च० ।
(३) स्वरितेषु इति ज० ।

अथ षट्त्रिंशोऽध्यायः ।

विष्णुमाहात्म्यकीर्त्तनं ।

सूत उवाच । एवमाराध्य देवेशमीशानं नीललोहितं ।
ब्रह्मेति प्रणतस्तस्मै प्राञ्जलिर्वाक्यमब्रवीत् ॥१॥
काव्यस्य गात्रं संस्पृश्य हस्तेन प्रीतिमान् भवः ।
निकामं दर्शनं दत्त्वा तत्रैवान्तरधीयत ॥२॥
ततः सोऽन्तर्हिते तस्मिन् देवेशानुचरे[१] तदा ।
तिष्ठन्तीं प्राञ्जलिर्भूत्वा जयन्तीमिदमब्रवीत् ॥३॥
कस्य त्वं सुभगे का वा दुःखिते मयि दुःखिता ।
महता तपसा युक्तं किमर्थं माञ्जुगोपसि[२] ॥४॥
अनया सततं भक्त्या प्रश्रयेण दमेन च ।
स्नेहेन चैव सुश्रोणि प्रीतोऽस्मि वरवर्णिनि ॥५॥
किमिच्छसि वरारोहे कस्ते[३] कामः समृध्यतां ।
तं ते संपूरयाम्यद्य यद्यपि स्यात् सुदुर्लभं ॥६॥
एवमुक्ताऽब्रवीदेनं तपसा ज्ञातुमर्हसि ।
चिकीर्षितं मे ब्रह्मिष्ठ त्वं हि वेत्थ यथातथं ॥७॥
एवमुक्तोऽब्रवीदेनां दृष्ट्वा दिव्येन चक्षुषा ।
माहेन्द्री त्वं वरारोहे मद्धितार्थमिहागता ॥८॥

---

(१) देवेशानुचरे इति पाठः आदर्शपुस्तकमात्रे वर्त्तते । अत्र देवेशेऽनुचरामिति पाठः समीचीनः ।

(२) किमर्थमनुगोपसि इति ख० ।

(३) यस्ते इति पाठः सुसङ्गतः ।

मया सह त्वं सुश्रोणि दश वर्षाणि भामिनि ।
अदृश्यं सर्व्वभूतैस्तु संप्रयोगमिहेच्छसि ॥९॥
देवेन्द्रानलवर्णाभे(१) वरारोहे सुलोचने ।
इमं वृणीष्व कामं ते मत्तोवै वल्गुभाषिणि ॥१०॥
एवं भवतु गच्छामोऽगृहान् वै मत्तकाशिनि ।
ततः स्वगृहमागम्य जयन्त्या सहितः प्रभुः ॥११॥
स तया संवसेद्देव्या दश वर्षाणि भार्गवः ।
अदृश्यः सर्वभूतानां मायया संवृतस्तदा ॥१२॥
कृतार्थमागतं दृष्ट्वा(२) काव्यं सर्वे दितेः सुताः ।
अभिजग्मुर्गृहं तस्य मुदितास्ते दिदृक्षवः ॥१३॥
गता यदा न पश्यन्तोजयन्त्या संवृतं गुरुं ।
दाक्षिण्यं तस्य तद्बुद्ध्वा प्रतिजग्मुर्यथागतं ॥१४॥
वृहस्पतिस्तु संरुद्धं ज्ञात्वा काव्यं चकार(३)ह ।
पित्रर्थे दश वर्षाणि जयन्त्या हितकाम्यया ॥१५॥
बुद्ध्वा तदन्तरं सोऽथ दैत्यानामिव चोदितः ।
काव्यस्य रूपमास्थाय सोऽसुरान् समभाषत ॥१६॥
ततः समागतान्(४) दृष्ट्वा वृहस्पतिरुवाच तान् ।

---

(१) देवेन्द्रानलवर्णासि इति क० ज०, देवेन्द्राननवर्णाभे इति ग० ।
(२) दृष्ट्वेत्यत्र ख० ग० पुस्तकव्यतिरिक्त आदर्शपुस्तकमात्रे कृत्वेतिपाठोऽस्ति । कृत्वेत्यत्र ज्ञात्वेति पाठः समीचीनः ।
(३) इदमिति कर्म्मपदमूहनीयं ।
(४) सेमान् गतान् इति क० ज०, सोमागतान् इति ङ० ज० । एतत्-पाठद्वयं लिपिकरप्रमादजनितं ।

स्वागतं मम याज्यानां संप्राप्तोऽस्मि हिताय च ॥१७॥
अहं बोध्यापयिष्यामि(१) प्राप्ता विद्या मया हि सा।
ततस्ते हृष्टमनसोविद्यार्थमुपपेदिरे ॥१८॥
पूर्व्वकाम्य(२) स्तदा तस्मिन् समये दशवार्षिके(३)।
ययौ च समकालं स सद्योत्पन्नमतिस्तदा ॥१९॥
समयान्ते देवयानी सद्योजाता सुता तदा।
बुद्धिं चक्रे ततश्चापि याज्यानां प्रत्यवेक्षणे ॥२०॥

शुक्र उवाच।

देवि गच्छामहे द्रष्टुं तव याज्यान् सुचिस्मिते।
विभ्रान्तप्रेक्षिते साध्वि त्रिवर्णायतलोचने ॥२१॥
एवमुक्ताऽब्रवीद्देवी भज भक्तान् महाव्रत।
एष ब्रह्मन् सतां धर्मान धर्मं लोपयामि ते ॥२२॥

सूत उवाच।

ततोगत्वासुरान् दृष्ट्वा देवाचार्य्येण धीमता।
वञ्चितान् काव्यरूपेण वेधसाऽसुरमब्रवीत् ॥२३॥
काव्यं मां तात जानीध्वं एष ह्याङ्गिरसोभुवि।
वञ्चिता वत यूयं वै मयि शक्ते तु दानवाः ॥२४॥
श्रुत्वा तथा ब्रुवाणन्तं सम्भ्रान्ता दितिजास्ततः।

---

(१) बोध्यापयिष्यामीत्यत्र वो ज्ञापयिष्यामीति पाठः साधुः।
(२) पूर्व्वकाम्य इत्यत्र पूर्णकामः इतिपाठः साधीयान्।
(३) पूर्णा काव्यस्य तु तदा समये दशवार्षिकी इति पाठोऽत्र सुसङ्गतः।

प्रेक्षन्ते स्म ह्युभौ तत्र सितासीत[१] शुचिस्मिताः[२] ॥२५॥
सम्प्रमूढाः स्थिताः सर्वे प्रापद्यन्त न किञ्चन ।
ततस्तेषु प्रमूढेषु काव्यस्तान् पुनरब्रवीत् ॥२६॥
आचार्य्यो वो ह्यहं[३] काव्यो देवाचार्योऽयमङ्गिराः ।
अनुगच्छत मां सर्वे त्यजतैनं[४] बृहस्पतिं ॥२७॥
एवमुक्तासुराः[५] सर्वे तावुभौ समवेक्षत[६] ।
तदाऽसुरा विशेषन्तु न व्यजानंस्तयोर्द्वयोः ॥२८॥
बृहस्पतिरुवाचैतानसम्भ्रान्तोऽयमङ्गिराः[७] ।
काव्योऽहं यो गुरुर्दैत्या मद्रूपोऽयं बृहस्पतिः ॥२९॥
स मोहयति रूपेण मामकेनैष वोऽसुरा ।
श्रुत्वा तस्य ततस्ते वै संमन्त्र्यार्थवचोऽब्रवीत् ॥३०॥
अयन्नोदश वर्षाणि सततं शास्ति वै प्रभुः ।
एष वै गुरुरस्माकमन्तरेप्सुरयं द्विजः ॥३१॥
ततस्ते दानवाः सर्वे प्रणिपत्याभिवाद्य च ।

---

(१) सितासीत इति क० ज०, स्थितासीन इति ख०, सीतास्वीना इति ङ०, स्थितासीना इति च०, स्थितासीता इति छ०। एते पाठा भ्रान्तिमूलाः अत्र स्थिता भीता इति पाठः समीचीनः ।
(२) शुचिस्मिताः इत्यत्र सुविस्मिता इति पाठः सङ्गतः ।
(३) ह्ययमिति क० ङ०, च० छ० ज० ।
(४) त्यजतेममिति ङ० च० ।
(५) एवमुक्तासुरा इत्यत्र विसर्गलोपे सन्धिरार्षः ।
(६) समवेक्षत इत्यत्र बहुवचनप्राप्तावेकवचनमार्षं ।
(७) सम्भ्रान्तोऽभार्गवोऽङ्गिराः इति ख० ।

वचनं जगृहुस्तस्य चिराभ्यासेन मोहिताः ॥३२॥
ऊचुस्तमसुराः सर्वे क्रुद्धाः संरक्तलोचनाः ।
अयङ्गुरुर्हितेऽस्माकं गच्छ त्वं नासि नो गुरुः ॥३३॥
भार्गवोऽङ्गिरसोवायं भवत्वेषैव नो गुरुः ।
स्थिता वयं निदेशेऽस्य गच्छ त्वं साधु मा चिरं ॥३४॥
एवमुक्त्वाऽसुराः सर्वे प्रापद्यन्त वृहस्पतिं ।
यदा न प्रतिपद्यन्ते[१] तेनोक्तं तन्महद्धितं ॥३५॥
चुकोप भार्गवस्तेषामवलेपेन वै तदा ।
बोधितापि मया यस्मान्न मां भजत दानवाः ॥३६॥
तस्मात् प्रनष्टसंज्ञा वै पराभवङ्गमिष्यथ ।
इति व्याहृत्य तान् काव्योजगामाथ यथागतं ॥३७॥
ज्ञात्वाऽभिशस्तानसुरान काव्येन तु वृहस्पतिः ।
कृतार्थः स तदा हृष्टः स्वरूपं प्रत्यपद्यत ।
बुद्ध्वाऽसुरांस्तदा भ्रष्टान् कृतार्थोऽन्तरधीयत ॥३८॥
ततः प्रनष्टे तस्मिंस्ते विभ्रान्ता दानवास्तदा ।
अहो धिग्वञ्चिताः स्मेह परस्परमथाब्रुवन् ॥३९॥
पृष्ठतोविमुखाश्चैव ताड़िता वेधसा वयं ।
दग्धाश्चैवोपयोगाच्च स्वेस्वे चार्थेषु मायया ॥४०॥
ततोऽसुराः परित्रस्ता देवेभ्यस्त्वरिता ययुः ।
प्रह्लादमग्रतः कृत्वा काव्यस्यानुगमं पुनः ॥४१॥

---

(१) प्रत्यपद्यन्त इति पाठः सङ्गतार्थः ।

ततः काव्यं समासाद्य अभितस्तुरवाङ्मुखाः ।
तानागतान् पुनर्दृष्ट्वा काव्योयाज्यानुवाच ह ॥४२॥
मयापि बोधिताः काले यतोमां नाभिनन्दथ ।
ततस्तेनावलेपेन गता यूयं पराभवं ॥४३॥
प्रह्लादस्तमथोवाच मानं त्वं त्यज भार्गव ।
स्वान् याज्यान्[१] भजमानांश्च भक्तांश्चैव विशेषतः ॥४४॥
त्वया पृष्टा वयं तेन देवाचार्य्येण मोहिताः ।
भक्तानर्हसि नस्त्रातुं ज्ञात्वा दीर्घेण चक्षुषा ॥४५॥
यदि नस्त्वं न कुरुषे प्रसादं भृगुनन्दन ।
अपध्यातास्त्वया ह्यद्य प्रवेक्ष्यामोरसातलं ॥४६॥
सूत उवाच । ज्ञात्वा काव्यो यथातत्त्वं कारुण्येनानुकम्पया ।
एवमुक्तोऽनुनीतः स स्नुतः कोपं न्ययच्छत ॥४७॥
उवाचेदञ्च भेतव्यं न गन्तव्यं रसातलं ।
अवश्यम्भावी ह्यर्थोऽयं प्राप्तोवो मयि जाग्रति ॥४८॥
न शक्यमन्यथाकर्तुं दृष्टं हि[२] बलवत्तरं ।
संज्ञा प्रनष्टा या वोऽद्य कामं तां प्रतिलप्स्यथ ॥४९॥
प्राप्तः पर्य्यायकालोव इति ब्रह्माऽभ्यभाषत ।
मत्प्रसादाच्च युष्माभिर्भुक्तं त्रैलोक्यमूर्ज्जितं ॥५०॥
युगाख्योदश संपूर्णोदेवानाक्रम्य मूर्द्धनि ।
तावन्तमेव कालं वै ब्रह्मा राज्यमभाषत ॥५१॥
सावर्णिके पुनस्तुभ्यं राज्यं किल भविष्यति ।

(१) भजास्मानिति पाठः समीचीनः ।
(२) अदृष्टमितिपाठः साधीयान् ।

लोकानामीश्वरोभावी पौत्रस्तव पुनर्बलिः ॥५२॥
एवं किलमहं प्रोक्तः पौत्रस्ते ब्रह्मणा स्वयं ।
तथाहृतेषु लोकेषु तपोऽस्य न किलाभवत् ॥५३॥
यस्मात् प्रवृत्तयश्चास्य न कामानभिसन्धिताः ।
तस्मादजेन प्रीतेन दत्तं सावर्णिकेऽन्तरे ॥५४॥
देवराज्यं बलेर्भाव्यमिति मामीश्वरोऽब्रवीत् ।
तस्माददृश्योभूतानां कालाकाङ्क्षी स तिष्ठति ॥५५॥
प्रीतेन चामरत्वं वै दत्तं तुभ्यं स्वयम्भुवा ।
तस्मात् निरुत्सुकस्त्वं वै पर्य्यायं सह माकुलः ॥५६॥
न च शक्यं मया तुभ्यं पुरस्ताद्वै विसर्पितुं ।
ब्रह्मणा प्रतिषिद्धोऽस्मि भविष्यं जानता प्रभो ॥५७॥
इमौ च शिष्यौ द्वौ मह्यं तुल्यावेतौ बृहस्पतेः ।
दैवतैः सह संरब्धान् सर्व्वान् वोधारयिष्यतः ॥५८॥
एवमुक्तस्तु दैतेयाः काव्येनाक्लिष्टकर्म्मणा ।
ततस्ताभ्यां ययुः सार्द्धं प्रह्लादप्रमुखास्तदा ॥५९॥
अवश्यम्भावमर्थत्वं(१) श्रुत्वा शुक्राच्च दानवाः ।
सकृदाशंसमानास्ते जयं काव्येन भाषितं ॥६०॥
दंशिताः सायुधाः सर्वे ततोदेवान् समाह्वयन् ।
अथ देवासुरान् दृष्ट्वा संग्रामे समुपस्थितान् ॥६१॥
ततः संवृत्तसन्नाहा देवास्तान् समयोधयन् ।
देवासुरे ततस्तस्मिन् वर्त्तमाने शतं समाः ॥६२॥

---

(१) अवश्यभाविनं ह्यर्थं मिति पाठः साधुः ।

अजयन्नसुरा देवान् भग्ना देवा अमन्त्रयन् ॥६२॥
देवा ऊचुः । षण्डामार्कप्रभावं न जानीमस्त्वसुरैर्वयं ।
तस्माद्यज्ञं समुद्दिश्य कार्य्यं चात्महितञ्च यत् ॥६३॥
तज्ज्ञानापहृतावेतौ कृत्वा जेष्यामहेऽसुरान् ।
अथोपामन्त्रयन् देवाः षण्डामार्कौ तु तावुभौ ॥६४॥
यज्ञे समाह्वयिष्यामस्त्यजतमसुरान् द्विजौ ।
ग्रहं तं वा[(१)] ग्रहीष्यामोह्यनुजित्य तु दानवान् ॥६५॥
एवं तत्यजतुस्तौ तु षण्डामार्कौ तदासुरान् ।
ततो देवा जयं प्राप्ता दानवाश्च पराभवान् ॥६६॥
देवासुरान् पराभाव्य षण्डामार्कावुपागमन् ।
काव्यशापाभिभूताश्च अनाधाराश्च ते पुनः ॥६७॥
बध्यमानास्तदा देवैर्विविशुस्ते रसातले ।
एवं निरुद्यमास्ते वै कृताः शक्रेण दानवाः ।
ततः प्रभृति शापेन भृगुनैमित्तकेन च ॥६८॥
जज्ञे पुनः पुनर्विष्णुर्यज्ञे च शिथिले प्रभुः ।
कर्त्तुं धर्म्मव्यवस्थानमधर्म्मस्य च नाशनं ॥६९॥
प्रह्लादस्य निदेशे तु येऽसुरा न व्यवस्थिताः ।
मनुष्यवध्यांस्तान् सर्व्वान् ब्रह्मा व्याहारयत् प्रभुः ॥७०॥
धर्म्मान्नारायणस्तस्मात् सम्भूतश्चाक्षुषेऽन्तरे ।
यज्ञं प्रवर्तयामास चैत्ये वैवस्वतेऽन्तरे ॥७१॥

---

(१) अुतं तस्माद्ग्रहीष्यामो इति ख० ।

प्रादुर्भावे तदान्यस्य ब्रह्मैवासीत् पुरोहितः ।
चतुर्थ्यान्तु युगाख्यायामापन्नेष्वसुरेष्वथ ॥७२॥
सम्भूतः स समुद्रान्तर्हिरण्यकशिपोर्वधे ।
द्वितीयो नरसिंहोऽभूत् रुद्रः सुरपुरस्सरः[१] ॥७३॥
बलिसंस्थेषु लोकेसु त्रेतायां सप्तमे युगे ।
दैत्यैस्त्रैलोक्य आक्रान्ते तृतीयोवामनोऽभवत् ॥७४॥
संचिप्यात्मानमङ्गेषु वृहस्पतिपुरस्सरं ।
यजमानन्तु दैत्येन्द्रमदित्याः कुलनन्दनः ।
द्विजोभूत्वा शुभे काले बलिं वैरोचनं पुरा[२] ॥॥७५॥
त्रैलोक्यस्य भवान् राजा त्वयि सर्व्वं प्रतिष्ठितं ।
दातुमर्हसि मे राजन् विक्रमांस्त्रीनिति प्रभुः ॥७६॥
ददामीत्येव तं राजा बलिर्वैरोचनोऽब्रवीत् ।
वामनन्तं च विज्ञाय ततोऽनुमुदितः स्वयं ॥७७॥
स वामनो दिवं खं च पृथिवीं च द्विजोत्तमाः ।
त्रिभिः क्रमैर्विश्वमिदं जगदाक्रामत प्रभुः ॥७८॥
अत्यरिच्यत भूतात्मा भास्करं स्वेन तेजसा ।
प्रकाशयन् दिशः सर्व्वा प्रदिशश्च महायशाः ॥७९॥
शुशुभे स महाबाहुः सर्व्वलोकान् प्रकाशयन् ।
आसुरीं श्रियमाहृत्य त्रीन् लोकांश्च जनार्द्दनः ।
सपुत्रपौत्रानसुरान् पातालतलमानयत् ॥८०॥

---

(१) सूतपुरःसर इति ख० ङ० च० छ० ।
(२) द्विजो भत्वा इति श्लोकार्द्धात् परं श्लोकार्द्धं पतितं ।

नमुचिः शम्बरश्चैव प्रह्लादश्चैव विष्णुना ।
क्रूरा हता विनिर्द्धूता दिशः संप्रतिपेदिरे ॥८१॥
महाभूतानि भूतात्मा सविशेषाणि माधवः ।
कालञ्च सकलं विप्रांस्तत्राद्भुतमदर्शयत् ॥८२॥
तस्य गात्रे जगत्सर्वमात्मानमनुपश्यति ।
न किञ्चिदस्ति लोकेषु यदव्याप्तं महात्मना ॥८३॥
तद्वै रूपमुपेन्द्रस्य देवदानवमानवाः ।
दृष्ट्वा सम्मुमुहुः सर्वे विष्णुतेजोविमोहिताः ॥८४॥
बलिः सितो महापाशैः सबन्धुः ससुहृद्गणः ।
विरोचनकुलं सर्वं पाताले सन्निवेशितं ॥८५॥
ततः सर्वामरैश्वर्यं दत्त्वेन्द्राय महात्मने ।
मानुषेषु महाबाहुः प्रादुरासीज्जनार्द्दनः ॥८६॥
एतास्तिस्रः स्मृतास्तस्य दिव्याः सम्भूतयः शुभाः ।
मानुष्याः सप्त यास्तस्य शापजांस्तान्निबोधत ॥८७॥
त्रेतायुगे तु दशमे दत्तात्रेयो बभूव ह ।
नष्टे धर्मे चतुर्थश्च मार्कण्डेयपुरःसरः ॥८८॥
पञ्चमः पञ्चदश्यां तु त्रेतायां सम्बभूव ह ।
मान्धातुश्चक्रवर्त्तित्वे तस्थौ तथ्यपुरःसरः ॥८९॥
एकोनविंशे त्रेतायां सर्व्वक्षत्रान्तकोऽभवत् ।
जामदग्न्यस्तथा षष्ठो विश्वामित्रपुरःसरः ॥९०॥
चतुर्विंशे युगे रामो वशिष्ठेन पुरोधसा ।
सप्तमो रावणस्यार्थे यज्ञे दशरथात्मजः ॥९१॥

अष्टमो द्वापरे विष्णुरष्टाविंशे पराशरात् ।
वेदव्यासस्ततो जज्ञे जातूकर्णपुरःसरः ॥९२॥
तथैव नवमो विष्णुरदित्याः कश्यपात्मजः ।
देवक्या वसुदेवात्तु ब्रह्मगार्ग्यपुरःसरः ॥९३॥
अप्रमेयो नियोज्यश्च यत्र कामचरो वशी ।
क्रीड़ते भगवान् लोके बालः क्रीड़नकैरिव ॥९४॥
न प्रमातुं महाबाहुः शक्योऽसौ मधुसूदनः ।
परं परम(१)मेतस्माद्विश्वरूपान्न विद्यते ॥९५॥
अष्टाविंशतिमे तद्वद्द्वापरस्यांशसङ्क्षये ।
नष्टे धर्मे तदा जज्ञे विष्णुर्वृष्णिकुले प्रभुः ॥९६॥
कर्त्तुं धर्मव्यवस्थानमसुराणां प्रणाशनं ।
मोहयन् सर्वभूतानि योगात्मा योगमायया ॥९७॥
प्रविष्टो मानुषीं योनिं प्रच्छन्नश्चरते महीं ।
विहारार्थं मनुष्येषु सान्दीपनिपुरःसरं ॥९८॥
यत्र कंसश्च साल्वश्च द्विविदश्च महासुरं ।
अरिष्टं वृषभञ्चैव पूतनां केशिनं हयं ॥९९॥
नागं कुवलयापीड़ं मल्लराजगृहाधिपम् ।
दैत्यान् मानुषदेहस्थान् सूदयामास वीर्यवान् ॥१००॥
छिन्नं बाहुसहस्रञ्च वाणस्याद्भुतकर्मणः ।
नरकस्य हतः सङ्ख्ये यवनस्य महाबलः ॥१०१॥

---

(१) द्वापर इति ख० च० छ० ।

हृतानि च महीपानां सर्वरत्नानि तेजसा ।
दुराचाराश्च निहता पार्थिवा ये रसातले ॥१०२॥
एते लोकहितार्थाय प्रादुर्भावा महात्मनः ।
अस्मिन्नेव युगे क्षीणे सन्ध्याश्लिष्टे भविष्यति ॥१०३॥
कल्किर्विष्णुयशा नाम पाराशर्यः प्रतापवान् ।
दशमो भाव्यसम्भूतो याज्ञवल्क्यपुरःसरः ॥१०४॥
अनुकर्षन् सर्वसेनां हस्त्यश्वरथसङ्कुलां ।
प्रगृहीतायुधैर्विप्रैर्वृतः शतसहस्रशः ॥१०५॥
नात्यर्थं धार्मिका ये च ये च धर्मद्विषः क्वचित् ।
उदीच्यान्मध्यदेशांश्च तथा विन्ध्यापरान्तिकान् ॥१०६॥
तथैव दाक्षिणात्यांश्च द्रविड़ान् सिंहलैः सह ।
गान्धारान् पारदांश्चैव पल्हवान् यवनान् शकान् ॥१०७॥
तुषारान् वर्वरांश्चैव पुलिन्दान् दरदान् खसान् ।
लम्पकानन्धकान् रुद्रान् किरातांश्चैव स प्रभुः ॥१०८॥
प्रवृत्तचक्रो बलवान् म्लेच्छानामन्तकृद्बली ।
अदृश्यः सर्वभूतानां पृथिवीं विचरिष्यति ॥१०९॥
मानवः स तु संजज्ञे देवस्यांशेन धीमतः ।
पूर्वजन्मनि विष्णुर्यः प्रमितिर्नाम वीर्यवान् ॥११०॥
गात्रेण वै चन्द्रसमः पूर्णे कलियुगेऽभवत् ।
इत्येतास्तस्य देवस्य दश सम्भूतयः स्मृताः ॥१११॥
तं तं कालञ्च कायञ्च तत्तदुद्दिश्य कारणं ।
अंशेन त्रिषु लोकेषु तास्ता योनीः प्रपत्स्यते ॥११२॥

पञ्चविंशोत्थिते कल्पे पञ्चविंशति वै समाः।
विनिघ्नन् सर्व्वभूतानि मानुषानेव सर्व्वशः ॥११३॥
कृत्वा वीजावशेषान्तु महीं क्रूरेण कर्म्मणा।
संशातयित्वा वृषलान् प्रायशस्तानधार्म्मिकान् ॥११४॥
ततः स वै तदा कल्किश्चरितार्थः ससैनिकः।
कर्मणा निहता ये तु सिद्धास्ते तु पुनः स्वयं ॥११५॥
अकस्मात् कुपितान्योन्यं भविष्यन्ति च मोहिताः।
क्षययित्वा[१] तु तान् सर्वान् भाविनार्थेन चोदितान्॥११६॥
गङ्गायमुनयोर्मध्ये निष्ठां प्राप्स्यति सानुगः।
ततो व्यतीते कल्कौ तु सामान्यैः सह सैनिकैः ॥११७॥
नृपेष्वथ विनष्टेषु तदा त्वप्रग्रहाः प्रजाः।
रक्षणे विनिवृत्ते तु हत्वा चान्योन्यमाहवे ॥११८॥
परस्परहृताश्वासा निराक्रन्दाः सुदुःखिताः।
पुराणि हित्वा ग्रामांश्च तुल्यास्ता निष्परिग्रहाः ॥११९॥
प्रनष्टश्रुतिधर्मास्च नष्टधर्माश्रमास्तथा।
ह्रस्वा अल्पायुषश्चैव वनौकस इमे स्मृताः ॥१२०॥
सरित्पर्वतसेविन्यः पत्रमूलफलाशनाः।
चीरपत्राजिनधराः सङ्करं घोरमास्थिताः ॥१२१॥
अल्पायुषो नष्टवार्त्ता बह्वाबाधाः सुदुःखिताः।
एवं कष्टमनुप्राप्ताः कलिसन्ध्यांशके तदा ॥१२२॥

---

(१) आदर्शपुस्तकमात्रे क्षपयित्वेतिपाठोवर्त्तते।

प्रजाः क्षयं प्रयास्यन्ति सार्द्धं कलियुगेन तु ।
क्षीणे कलियुगे तस्मिन् प्रवृत्ते च कृते पुनः ॥१२४॥
प्रपत्स्यन्ते यथान्यायं स्वभावादेव नान्यथा ।
इत्येतत् कीर्तितं सर्वं देवासुरविचेष्टितं ॥१२५॥
यदुवंशप्रसङ्गेन महद्वो वैष्णवं यशः ।
तुर्वशोस्तु प्रवक्ष्यामि पूरोर्द्रुह्योरनोस्तथा ॥१२६॥

इति श्रीमहापुराणे वायुप्रोक्ते विष्णुमाहात्म्यकथनं नाम षट्त्रिंशोऽध्यायः समाप्तः ॥

अथ सप्तत्रिंशोऽध्यायः ।

अनुषङ्गपादः ।

सूत उवाच । तुर्वसोस्तु सुतो वह्निर्वह्नेर्गोभानुरात्मजः ।
गोभानोस्तु सुतो वीरस्त्रिसानुरपराजितः ॥१॥
करन्धमस्त्रिशानोस्तु मरुत्तस्य न चात्मजः[(१)] ।
अन्यस्त्ववीक्षितो राजा मरुत्तः कथितः[(२)] पुरा ॥२॥
अनपत्यो मरुत्तस्तु स राजासीदिति श्रुतः ।
दुष्कृतं पौरवं चापि सर्वं पुत्रमकल्पयन्[(३)] ॥३॥
एवं ययातिशापेन जरायाः संक्रमेण तु[(४)] ।
तुर्वसोः पौरवं वंशं प्रविवेश पुरा किल ॥४॥
दुष्कृतस्य तु दायादः शरूथो नाम पार्थिवः ।
शरूथात्तु जनापीड[(५)]श्चत्वारस्तस्य चात्मजाः ॥५॥
पांड्यश्च केरलश्चैव चोलः कुल्यस्तथैव च ।
तेषां जनपदाः कुल्याः पांड्याश्चोलाः सकेरलाः ॥६॥
द्रुह्यस्य तनयौ वीरौ बभ्रुः सेतुश्च विश्रुतौ ।

---

(१) नुवात्यजः इति क० ङ० च० छ० ज०, रुचस्य चतुरात्मजः इति ख०, एतच्छ्लोकार्द्धं ग० पुस्तके नास्ति ।

(२) मरुत्त इति आर्षप्रयोगात् पञ्चम्यर्थे प्रथमा ।

(३) पूर्व्वापरसङ्गतिविरहादत्र कतिपयश्लोकाः पतिता इत्यवगन्तव्यम् ।

(४) जरा संक्रमणे पुरा इति ख० ग० ङ० च० छ० ज० ।

(५) तथाडीर इति च० ।

अरुद्धः सेतुपुत्रस्तु बाभ्रवो रिपुरुच्यते ॥७॥
यौवनाश्वेन समिति कृच्छ्रेण निहतो बली ।
युद्धं सुमहदासीत्तु मासान् परि चतुर्द्दश ॥८॥
अरुद्धस्य तु दायादो गान्धारो नाम पार्थिवः ।
ख्यायते यस्य नाम्ना तु गान्धारविषयो महान् ॥९॥
गान्धारदेशजाश्चापि तुरगा वाजिनां वराः ।
गान्धारपुत्रो धर्म्मस्तु घृतस्तस्य सुतोऽभवत् ॥१०॥
घृतस्य दुर्दमो जज्ञे प्रचेतास्तस्य चात्मजः ।
प्रचेतसः पुत्रशतं राजानः सर्व्व एव ते ॥११॥
म्लेच्छराष्ट्राधिपाः(१) सर्व्वे ह्युदीचीं दिशमाश्रिताः ।
अनोः पुत्रा महात्मानस्त्रयः परमधार्म्मिकाः ॥१२॥
सभानरश्च पक्षश्च परपक्षस्तथैव च ।
सभानरस्य पुत्रस्तु विद्वान् कालानलो नृपः ॥१३॥
कालानलस्य धर्म्मात्मा सृञ्जयो नाम धार्म्मिकः ।
सृञ्जयस्याभवत् पुत्रो वीरो राजा पुरञ्जयः ॥१४॥
जनमेजयो महासत्वः पुरञ्जयसुतोऽभवत् ।
जनमेजयस्य राजर्षेर्महाशालोऽभवन्नृपः ॥१५॥
आसीदिन्द्रसमो राजा प्रतिष्ठितयशा दिवि ।
महामनाः सुतस्तस्य महाशालस्य धार्म्मिकः ॥१६॥
सप्तद्वीपेश्वरो राजा चक्रवर्त्ती महायशाः ।
महामनास्तु पुत्रौ द्वौ जनयामास विश्रुतौ ॥१७॥

(१) म्लेच्छा राष्ट्राधिपा इति च० ।

उशीनरश्च धर्मज्ञं तितिक्षुञ्चैव धार्मिकम् ।
उशीनरस्य पत्न्यस्तु पञ्च राजर्षिवंशजाः ॥१८॥
मृगा कृमी नवा दर्वा पञ्चमी च दृषद्वती ।
उशीनरस्य पुत्रास्तु पञ्च तासु कुलोद्वहाः ।
तपसा ते सुमहता जातवृद्धाश्च धार्म्मिकाः ॥१९॥
मृगायास्तु मृगः पुत्रो नवाया नव एव तु ।
कृम्याः कृमिस्तु दर्वायाः सुव्रतो नाम धार्मिकः ॥२०॥
दृषद्वतीसुतश्चापि शिविरौशीनरो द्विजाः ।
शिवेः शिवपुरं ख्यातं यौधेयन्तु मृगस्य तु ॥२१॥
नवस्य नवराष्ट्रन्तु कृमेस्तु कृमिला पुरी ।
सुव्रतस्य तथा दृष्टा(१) शिविपुत्रान्निबोधत ॥२२॥
शिवेस्तु शिवयः पुत्राश्चत्वारो लोकसम्मताः ।
वृषदर्भः सुवीरस्तु(२) केकयो मद्रकस्तथा ॥२३॥
तेषां जनपदाः स्फीताः केकया माद्रकास्तथा ।
वृषदर्भाः सुवीदर्भास्तितिक्षोः शृणुत प्रजाः ॥२४॥
तैतिक्षुरभवद्राजा पूर्वस्यान्दिशि विश्रुतः ।
उशद्रथो महाबाहुस्तस्य हेमः सुतोऽभवत् ॥२५॥
हेमस्य सुतपा जज्ञे सुतः सुतयशा(३) बली ।
जातो मनुष्ययोन्यां वै क्षीणे वंशे प्रजेप्सया ॥२६॥
महायोगी स तु बलिर्बद्धो यः स महामनाः ।

(१) वष्टा इति च०, चेष्टा इति ख० ग०, चष्टा इति छ० ।
(२) सुधीरस्तु इति ख० ग० । अत्र सुवीदर्भः इतिपाठः समीचीनः ।
(३) सुतयसो इति आदर्शपुस्तकमात्रे पाठो वर्त्तते ।

पुत्रानुत्पादयामास चातुर्वर्ण्यकरान् भुवि ॥२७॥
अङ्गं स जनयामास वङ्गं सुल्हं[१] तथैव च ।
पुण्ड्रं कलिङ्गं च तथा बालेयं चत्रमुच्यते[२] ॥२८॥
बालेया ब्राह्मणाश्चैव तस्य वंशकराः प्रभोः ।
बलेस्तु ब्रह्मणा दत्ता वराः प्रीतेन धीमतः ॥२९॥
महायोगित्वमायुश्च कल्पायुःपरिमाणकं ।
संग्रामे चाप्यजेयत्वं धर्मे चैव प्रभावना ॥३०॥
त्रैलोक्यदर्शनञ्चैव प्राधान्यं प्रसवे तथा ।
बले चाप्रतिमत्वं वै धर्मतत्त्वार्थदर्शनं ॥३१॥
चतुरो नियतान् वर्णान् त्वं वै स्थापयतेति च ।
इत्युक्तो विभुना राजा बलिः शान्तिं परां ययौ ॥३२॥
कालेन महता विद्वान् स्वं वै स्थानमुपागतः ।
तेषां जनपदाः स्फीता वङ्गाङ्गसुल्हकास्तथा ॥३३॥
पुण्ड्राः कलिङ्गाश्च तथा तेषां वंशं निबोधत ।
तस्य ते तनयाः सर्वे चेत्रजा मुनिसम्भवाः ।
सम्भूता दीर्घतमसः सुदेष्णायां महौजसः ॥३४॥
ऋषय ऊचुः । कथं बलेः सुताः पञ्च जनिताः चेत्रजाः प्रभो ।
ऋषिणा दीर्घतमसा एतन्नो ब्रूहि पृच्छतां ॥३५॥
सूत उवाच । अग्निजो[३] नाम विख्यात आसीद्धीमानृषिः पुरा ।

---

(१) सुल्हमित्यत्र ब्रह्ममितिपाठः सङ्गतः उत्तरत्र तथादर्शनात् ।
(२) बालेयः च्त्र उच्यते इतिपाठः साधीयान् ।
(३) अग्नित इति ख० ग० ।

भार्या वै ममता नाम बभूवास्य महात्मनः ॥३६॥
अग्निजस्य कनीयांस्तु पुरोधायो दिवौकसां ।
बृहस्पतिर्बृहत्तेजाः ममतां सोऽभ्यपद्यत ॥३७॥
उवाच ममता तन्तु बृहस्पतिमनिच्छती ।
अन्तर्वत्न्यस्मि ते भ्रातुर्ज्येष्ठस्याष्टमिता इति ॥३८॥
अयं हि मे महागर्भो रोदतेऽति बृहस्पते ।
अग्निजं ब्रह्म चाभ्यस्य षड़ङ्गं वेदमुद्गिरन् ॥३९॥
अमोघरेतास्त्वञ्चापि न मां भजितुमर्हसि ।
अस्मिन्नेव गते काले यथा वा मन्यसे प्रभो ॥४०॥
एवमुक्तस्तया सम्यग्बृहत्तेजा बृहस्पतिः ।
कामात्मानं महात्मा च नात्मानं सोऽभ्यधारयत् ॥४१॥
सम्बभूवैव धर्मात्मा तया सार्द्धं बृहस्पतिः ।
उत्सृजन्तं तदा रतो गर्भस्थः सोऽभ्यभाषत ॥४२॥
नोस्तातक(१) न्यसे ह्यस्मिन् द्वयोर्नेहास्ति सम्भवः ।
अमोघरेतास्त्वञ्चापि पूर्वञ्चाहमिहागतः ॥४३॥
शशाप तं तदा क्रुद्ध एवमुक्तो बृहस्पतिः ।
आसिजन्तं सुतं भ्रातुर्गर्भस्थं भगवानृषिः ॥४४॥
यस्मात्त्वमीदृशे काले सर्वभूतेप्सिते सति ।
मामेवमुक्तवान् मोहात्तमो दीर्घं प्रवेक्ष्यसि ॥४५॥
ततो दीर्घतमा नाम शापादृषिरजायत ।

---

(१) नोस्तातक इत्यत्र नौ तातक इति पाठः सङ्गतार्थः ।

अथाश्विजो वृहत्कीर्त्तिर्वृहस्पतिरिवौजसा ॥४६॥
ऊर्द्ध्वरेतास्ततश्चापि न्यवसद्भ्रातुराश्रमे।
गोधर्मं सौरभेयात्तु वृषभाच्छ्रुतवान् प्रभो ॥४७॥
तस्य भ्राता पितृव्यस्तु चकार भवनं तदा।
तस्मिन् हि तत्र वसति यदृच्छाभ्यागतो वृषः ॥४८॥
दर्शार्थमाहृतान् दर्भांश्चचार सुरभीवृतः।
जग्राह तं दीर्घतमा विस्फुरन्तञ्च शृङ्गयोः ॥४९॥
स तेन निगृहीतस्तु न चचाल पदात्पदं।
ततोऽब्रवीद्वृषस्तं वै मुञ्च मां बलिनां वर ॥५०॥
न मयासादितस्तात बलवांस्त्वद्विधः क्वचित्।
त्र्यम्बकं वहता देवं यतो जातोऽस्मि भूतले ॥५१॥
मुञ्च मां बलिनां श्रेष्ठ प्रीतस्तेऽहं वरं वृणु।
एवमुक्तोऽब्रवीदेनं जीवंस्त्वं मे क्व यास्यसि ॥५२॥
तेन त्वाहं न मोक्ष्यामि परस्वाहं चतुष्पदं।
ततस्तं दीर्घतमसं स वृषः प्रत्युवाच ह ॥५३॥
नास्माकं विद्यते तात पातकं स्तेयमेव वा।
भक्ष्याभक्ष्यं न जानीमः पेयापेयञ्च सर्वशः ॥५४॥
कार्याकार्यं न वै विप्रो गम्यागम्यं तथैव च।
न पाप्मानो वयं विप्र धर्मो ह्येष गवां स्मृतः ॥५५॥
गवां नाम स वै श्रुत्वा संभ्रान्तस्त्वनुमुच्य तं।
भक्त्या चानुश्रविकया गोषु तं वै प्रसादयत् ॥५६॥
प्रसादिते गते तस्मिन् गोधर्मं भक्तितस्तु तं।

मनसैव तदादत्ते तन्निष्ठस्तत्परायणः ॥५७॥
ततो यवीयसः पत्नीमौतथ्यस्याभ्यमन्यत।
विचेष्टमानां रुदतीं दैवात् स मूढ़चेतनः ॥५८॥
अवलेपन्तु तं मत्वा शरद्वांस्तस्य नाक्षमत्।
गोधर्मं वै बलात्कृत्वा स्नुषां स समभन्यत ॥५९॥
विपर्ययन्तु तं दृष्ट्वा शरद्वान् प्रत्यचिन्तयत्।
भविष्यमर्थं ज्ञात्वा च महात्मा च न मृत्युतां ॥६०॥
प्रोवाच दीर्घतमसं क्रोधात् संरक्तलोचनः।
गम्यागम्यं न जानीषे गोधर्मात् प्रार्थयत् स्नुषां ॥६१॥
दुर्वृत्तस्त्वं त्यजाम्येव गच्छ त्वं स्वेन कर्मणा।
यस्मात्त्वमन्धो वृद्धश्च भर्त्तव्यो दुरनुष्ठितः।
तेनासि त्वं परित्यक्तो दुराचारोऽसि मे मतिः ॥६२॥
सूत उवाच। कर्मण्यस्मिंस्ततः क्रूरे तस्य बुद्धिरजायत।
निर्भर्त्स्य चैव बहुशो बाहुभ्यां परिगृह्य च।
कोष्ठे समुद्रे प्रक्षिप्य गङ्गाम्भसि समुत्सृजत्॥६३॥
उह्यमानः समुद्रस्तु(१) सप्ताहं स्रोतसा तदा।
तं सस्त्रीको बलिर्नाम राजा धर्मार्थतत्त्ववित्।
अपश्यन्मज्जमानन्तु स्रोतसाभ्याससमागतं ॥६४॥
तं गृहीत्वा स धर्मात्मा बलिर्वैरोचनस्तदा।
अन्तःपुरे जुगोपैनं भक्ष्यैर्भोज्यैश्च तर्पयन्॥६५॥
प्रीतः स वै वरेणाथ छन्दयामास वै बलिं।

(१) उह्यमानं समुद्रेण इतिपाठः सङ्गतः।

स च तस्माद्वरं वव्रे पुत्रार्थं दानवर्षभः ॥६६॥

बलिरुवाच। सन्तानार्थं महाभाग भार्य्यया मम मानद।

पुत्रान् धर्मार्थसंयुक्तान् उत्पादयितुमर्हसि ॥६७॥

एवमुक्तस्तु तेनर्षिस्तथास्त्वित्युक्तवान् हि तं।

सुदेष्णां नाम भार्य्यां वै राजास्मै प्राहिणोत्तदा ॥६८॥

अन्धं वृद्धञ्च तं दृष्ट्वा न सा देवी जगाम ह।

स्वाञ्च धात्रेयकीं तस्मै भूषयित्वा व्यसर्जयत् ॥६९॥

कक्षीवच्चक्षुषौ तस्यां शूद्रयोन्यामृषिर्वशी।

जनयामास धर्मात्मा पुत्रावेतौ महौजसौ ।७०॥

कक्षीवच्चक्षुषौ तौ तु दृष्ट्वा राजा बलिस्तदा।

प्राधीतौ[१] विधिवत्सम्यगीश्वरौ ब्रह्मवादिनौ ॥७१॥

सिद्धौ प्रत्यक्षधर्माणौ बुद्धौ श्रेष्ठतमावपि।

ममैताविति होवाच बलिर्वैरोचनस्त्वृषिं ॥७२॥

नेत्युवाच ततस्तन्तु ममैताविति चाब्रवीत्।

उत्पन्नौ शूद्रयोनौ तु भव च्छद्मा सुरोत्तमौ ॥७३॥

अन्धं वृद्धं च मां मत्वा सुदेष्णा महिषी तव।

प्राहिणोदवमानाय शूद्रां धात्रेयिकां मम ॥७४॥

ततः प्रसादयामास पुनस्तमृषिसत्तमं।

बलिर्भार्य्यां सुदेष्णां च भर्त्सयामास वै प्रभुः ॥७५॥

पुनश्चैनामलङ्कृत्य ऋषये प्रत्यपादयत्।

तां स दीर्घतमा देवीमब्रवीत् यदि मां शुभे ॥७६॥

(१) श्रीयुताविति ख० ग०, प्राद्योताविति ङ० च०।

दध्ना लवणमिश्रेण स्वव्यक्तं[१] नग्नकं तथा ।
लिहिष्यस्यजुगुप्सन्ती आपादतलमस्तकं ॥७७॥
ततस्त्वं प्राप्स्यसे देवि पुत्रांश्च मनसेप्सितान् ।
तस्य सा तद्वचो देवी सर्वं कृतवती तथा ॥७८॥
अपानञ्च समासाद्य जुगुप्सन्ती न्यवर्जयत् ।
तामुवाच ततः सर्षिर्यत्ते परिहृतं शुभे ।
विनापानं कुमारं त्वं जनयिष्यसि पूर्वजं ॥७९॥
ततस्तं दीर्घतमसं सा देवी प्रत्युवाच ह ।
नार्हसि त्वं महाभाग पुत्रं दातुं ममेदृशं ॥८०॥
ऋषिरुवाच। तवापराधो देव्येष नान्यथा भवितानु वै ।
देवीदानीञ्च ते पुत्रमहन्दास्यामि सुव्रते[२] ॥८१॥
तस्यापानं विना चैव योग्याभावो भविष्यति ।
तां स दीर्घतमास्त्वेव कुक्षौ स्पृष्ट्वेदमब्रवीत् ॥८२॥
प्राशितं दधि यत्तेऽद्य ममाङ्गाद्वै शुचिस्मिते ।
तेन ते पूरितो गर्भः पौर्णमास्यामिवोदधिः ॥८३॥
भविष्यन्ति कुमारास्ते पञ्च देवसुतोपमाः ।
तेजस्विनः पराक्रान्ता यज्वानो धार्मिकास्तथा ॥८४॥
ततोऽङ्गस्तु सुदेष्णाया ज्येष्ठपुत्रो व्यजायत ।
वङ्गस्तस्मात्कलिङ्गस्तु पुण्ड्रो ब्रह्मस्तथैव च ॥८५॥

---

(१) सुव्यक्तमिति पाठः साधुः ।
(२) शोभने इति ख० ग० ।

वंशभाजस्तु पञ्चैते बलेः क्षेत्रेऽभवंस्तदा ।
इत्येते दीर्घतमसा बलेर्दत्ताः सुताः पुरा ॥८६॥
प्रजास्त्वपहता[१] स्तस्य ब्रह्मणा कारणं प्रति ।
अपत्यामात्यदारेषु स्वेषु मा भून्महात्मनः ॥८७॥
ततो मनुष्ययोन्यां वै जनयामास स प्रजाः[२] ।
सुरभिर्दीर्घतमसमथ प्रीतो वचोऽब्रवीत् ॥८८॥
विचार्य यस्माद्गोधर्म्मं त्वमेवं कृतवानसि ।
तेन न्यायेन[३] सुमुचे अहं प्रीतोस्मि तेन ते ॥८९॥
तस्मात्तव तमो दीर्घं निस्तुदाम्यद्य पश्य वै ।
वार्हस्पत्यञ्च यत्तेऽन्यत्पापं सन्तिष्ठते तनौ ॥९०॥
जरामृत्युभयञ्चैव आघ्राय प्रणुदामि ते ।
आघ्रातमात्रः सोऽपश्यत् सद्यस्तमसि नाशिते ॥९१॥
आयुष्मांश्च युवा चैव चक्षुष्मांश्च ततोऽभवत् ।
गवा दीर्घतमाः सोऽथ गौतमः समपद्यत ॥९२॥
कक्षीवांस्तु ततो गत्वा सह पित्रा गिरिव्रजां ।
यथोद्दिष्टं हि पित्रर्थे चचार विपुलं तपः ॥९३॥

---

(१) प्रजास्वपहृता इति क०, प्रजात्युपहृता इति ख० ग०, प्रजास्तुपहृता इति छ०, प्राडात्युपहृता इति ज०, इत्येते दीर्घतमसा इत्यादि सन्तानाश्चोभयोस्तयोः इत्यन्तं ङ० च० पुस्तकयोर्न विद्यते ।

(२) प्रजास्त्वपहृता इत्यादि जनयामास स प्रजाः इत्यन्तं, एषां श्लोकार्द्धानां परस्परं सङ्गतिविरहात अत्र कतिपयश्लोकपतनं सम्भाव्यते ।

(३) न्यायास्म इति क० छ० ज०, एतत् श्लोकार्द्धं अन्येष्वादर्शपुस्तकेषु न विद्यते ।

ततः कालेन महता तपसा भावितः स वै ।
विधूय मनुजो दोषान् ब्रह्मण्यं प्राप्तवान् प्रभुः ॥९४॥
ततोऽब्रवीत् पिता चैनं पुत्रवानस्म्यहं प्रभो ।
सत्पुत्रेण त्वया तात कृतार्थोऽस्मि यशस्विना ॥९५॥
युक्तात्मा हि ततः सोऽथ प्राप्तवान् ब्रह्मणा चयं ।
ब्रह्मण्यं प्राप्य कक्षीवान् सहस्रमसृजत् सुतान् ॥९६॥
कृष्णाङ्गा[१] गौतमास्ते वै स्मृताः कक्षीवतः सुताः ।
इत्येष दीर्घतमसो बलेर्वैरोचनस्य वै ॥९७॥
समागमः समाख्यातः सन्तानाश्चोभयोस्तयोः ।
बलिस्तानभिषिच्येह पञ्चपुत्रानकल्मषान् ॥९८॥
कृतार्थः सोऽपि योगात्मा योगमाश्रित्य च प्रभुः ।
अदृश्यः सर्वभूतानां कालाकाङ्क्षी चरत्युत ॥९९॥
तत्राङ्गस्य तु राजर्षे राजासीद्दधिवाहनः ।
सापराधसुदेष्णाया अनपानोऽभवन्नृपः ॥१००॥
अनपानस्य पुत्रस्तु राजा दिविरथः स्मृतः ।
पुत्रो दिविरथस्यासीद् विद्वान् धर्मरथो नृपः ॥१०१॥
स वै धर्मरथः श्रीमान् येन विष्णुपदे गिरौ ।
सोमः शक्रेण सह वै यज्ञे पीतो महात्मना ॥१०२॥
शृणु धर्मरथस्यापि राजा चित्ररथोऽभवत् ।
लोमपाद इति ख्यातो यस्य शान्ता सुताऽभवत् ॥१०३॥

---

(१) कुष्माण्डा इति ख० ग० ङ० ज० ।

जज्ञे वै चण्डिकस्तस्य वारणः शक्रवारणः(१) ।
आनयामास स मही मन्योर्वाहनमुत्तमं ॥१०४॥
हर्य्यङ्गस्य तु दायादो राजा भद्ररथः किल ।
अथ भद्ररथस्यासीद्बृहत्कर्मा प्रजेश्वरः ॥१०५॥
बृहद्रथः सुतस्तस्य तस्माद्जज्ञे बृहन्मनाः ।
बृहन्मनास्तु राजेन्द्रं जनयामास वै सुतं ॥१०६॥
नाम्ना जयद्रथं नाम तस्माद्दृढरथो नृपः ।
आसीद्दृढरथस्यापि विश्वजिज्जनमेजयः ॥१०७॥
दायादस्तस्य चाङ्गेभ्यो यस्मात् कर्णोऽभवन्नृपः ।
कर्णस्य सुरसेनस्तु द्विजस्तस्यात्मजः स्मृतः ॥१०८॥
ऋषय ऊचुः । सूतात्मजः कथं कर्णः कथं चाङ्गस्य वंशजः ।
एतदिच्छामहे श्रोतुमत्यर्थं कुशलो ह्यसि ॥१०९॥
सूत उवाच । बृहद्भानोः सुतो जज्ञे नाम्ना राजा बृहन्मनाः ।
तस्य पत्नीद्वयं चासीत् चैद्यस्योभे च ते सुते ॥११०॥
यशोदेवी च सत्या च ताभ्यां वंशस्तु भिद्यते ।
जयद्रथस्तु राजेन्द्रो यशोदेव्यां व्यजायत ॥१११॥
ब्रह्मक्षत्रान्तरः(२) सत्याविजयो नाम विश्रुतः(३) ।
विजयस्य धृतिः पुत्रस्तस्य पुत्रो धृतव्रतः ॥११२॥
धृतव्रतस्य पुत्रस्तु सत्यकर्मा महायशाः ।
सत्यकर्मसुतश्चापि सूतस्त्वधिरथस्तु वै ॥११३॥

---

(१) चक्रवारण इति ग० ।
(२) ब्रह्मक्षेत्रान्तर इति ख० ग० ।
(३) ब्रह्मक्षत्रान्तरं सत्या विजयं नाम विश्रुतमिति पाठो विशुद्धः ।

स कर्णं परिजग्राह तेन कर्णस्तु सूतजः ।
एतद्वः कथितं सर्वं कर्णं यद्वै प्रचोदितं ॥११४॥
एतेऽङ्गवंशजाः सर्वे राजानः कीर्त्तिता मया ।
विस्तरेणानुपूर्व्या च पुरोस्तु शृणुत प्रजाः ॥११५॥
सूत उवाच । पुरोः पुत्रो महाबाहूराजासीज्जनमेजयः ।
अविद्धस्तु सुतस्तस्य यः प्राचीमजयद्दिशं ॥११६॥
अविद्धतः प्रवीरस्तु मनस्युरभवत्सुतः ।
राजाथो जयदो नाम मनस्योरभवत्सुतः ॥११७॥
दायादस्तस्य चाप्यासीद्धुन्धुर्नाम महीपतिः ।
धुन्धोर्बहुगवी पुत्रः सञ्जातिस्तस्य चात्मजः ॥११८॥
सञ्जातेरथ रौद्राश्वस्तस्य पुत्रान्निबोधत ।
रौद्राश्वस्य घृताच्यां वै दशाप्सरसि सूनवः ॥११९॥
रजेयुश्च कृतेयुश्च वहेयुः स्थण्डिलेयु च ।
घृतेयुश्च जलेयुश्च स्थलेयुश्चैव सप्तमः ॥१२०॥
धर्मेयुः सन्नतेयुश्च वनेयुर्दशमस्तु सः ।
रुद्रा शूद्रा च मद्रा च शुभा जामलजा तथा ॥१२१॥
तला खला च सप्तैता या च गोपजला स्मृता ।
तथा ताम्ररसा चैव रत्नकूटी च तादृशी ॥१२२॥
आत्रेयो वंशतस्तासां भर्त्ता नाम्ना प्रभाकरः ।
अनादृष्टस्तु राजर्षी रिवेयुस्तस्य चात्मजः ॥१२३॥
रिवेयोर्ज्वलना नाम भार्या वै तक्षकात्मजा ।
यस्यां देव्यां स राजर्षीरन्तिं नाम व्यजीजनत् ॥१२४॥

रन्तिनारः सरस्वत्यां पुत्रानजनयच्छुभान् ।
त्रसुं तथा प्रतिरथं ध्रुवञ्चैवातिधार्म्मिकं ॥१२५॥
गौरी कन्या च विख्याता मान्धातुर्जननी शुभा ।
धुर्य्यः प्रतिरथस्यापि कण्ठस्तस्याभवत् सुतः ॥१२६॥
मेधातिथिः सुतस्तस्य यस्मात् काण्ठायना द्विजाः ।
इतिनानुयमस्यासीत्[१] कन्या साजनयत्सुतान् ॥१२७॥
त्रसुः सुदयितं पुत्रं मलिनं ब्रह्मवादिनं ।
उपदातं ततो लेभे चतुरस्त्विति सात्मजान् ॥१२८॥
सुष्मन्त[२] मथ दुष्मन्तं प्रवीरमनघन्तथा ।
चक्रवर्त्ती ततो जज्ञे दौष्मान्तिर्नृपसत्तमः ॥१२९॥
शकुन्तलायां भरतो यस्य नाम्ना तु भारतं ।
दुष्मन्तं प्रति राजानं वागुवाचाशरीरिणी ॥१३०॥
माता भर्त्ता पितुः पुत्रो येन जातः स एव सः ।
भर स्वपुत्रं दुष्मन्त सत्यमाह शकुन्तला ॥१३१॥
रेतोधाः पुत्रं नयति नरदेव यमक्षयात् ।
त्वञ्चास्य धाता गर्भस्य मावमंस्थाः शकुन्तलां ॥१३२॥
भरतस्त्रिसृषु स्त्रीषु नव पुत्रानजीजनत् ।
नाभ्यनन्दच्च तान् राजा नानुरूपान्ममेत्युत ॥१३३॥
ततस्ता मातरः क्रुद्धाः पुत्रान्निन्युर्यमक्षयं ।

---

(१) इतिनानुभा यस्यासीदिति ख० । एतत् श्लोकार्द्धं ख० ङ० च० पुस्तकव्यतिरिक्तादर्शपुस्तकेषु न विद्यते ।

(२) समन्तमिति ख० ग० ।

ततस्तस्य नरेन्द्रस्य वितथं पुत्रजन्म तत् ॥१३४॥
ततोमरुद्भिरानीय पुत्रस्तु स बृहस्पतेः।
सङ्क्रामितो भरद्वाजो मरुद्भिः क्रतुभिर्विभुः ॥१३५॥
तत्रैवोदाहरन्तीदं भरद्वाजस्य धीमतः।
जन्मसङ्क्रमणञ्चैव मरुद्भिर्भरताय वै ॥१३६॥
पत्न्यामासन्नगर्भायामसिजः संस्थितः किल।
भ्रातुर्भार्यां स दृष्ट्वाथ बृहस्पतिरुवाच ह।
अलङ्कृत्य तनुं स्वान्तु मैथुनं देहि मे शुभे ॥१३७॥
एवमुक्ताऽब्रवीदेनमन्तर्वत्नी ह्यहं विभो।
गर्भः परिणतश्चायं ब्रह्म व्याहरते गिरा ॥१३८॥
अमोघरेतास्त्वञ्चापि धर्मश्चैव विगर्हितः।
एवमुक्तोऽब्रवीदेनां स्मयमानो बृहस्पतिः ॥१३९॥
विनयो नोपदेष्टव्यस्त्वया मम कथञ्चन।
हर्षमाणः प्रसह्यैनां मैथुनायोपचक्रमे ॥१४०॥
ततो बृहस्पतिं गर्भो हर्षमाणमुवाच ह।
सन्निविष्टो ह्यहं पूर्वमिह तात बृहस्पते ॥१४१॥
अमोघरेताश्च भवान्नावकाशोऽस्ति च द्वयोः।
एवमुक्तः स गर्भेण कुपितः प्रत्युवाच ह ॥१४२॥
यस्मान्मामीदृशे काले सर्वभूतेप्सिते सति।
प्रतिषेधसि तत्तस्मात् तमो दीर्घं प्रवेक्ष्यसि ॥१४३॥
पादाभ्यान्तेन तच्छन्नं मातुर्द्वारं बृहस्पतेः।
तद्रेतस्तु तयोर्मध्ये निवार्य्यः शिशुकोऽभवत् ॥१४४॥

सद्योजातं कुमारन्तं दृष्ट्वाऽथ ममताऽब्रवीत् ।
गमिष्यामि गृहं स्वं वै भर द्वाजं बृहस्पते ॥१४५॥
एवमुक्त्वा गतायां स पुत्रन्त्यजति तत्क्षणात् ।
भरस्व वाढमित्युक्तो भरद्वाजस्ततोऽभवत् ॥१४६॥
मातापितृभ्यां संत्यक्तं दृष्ट्वाथ मरुतः शिशुं ।
गृहीत्वैनं भरद्वाजं जग्मुस्ते कृपया ततः ॥१४७॥
तस्मिन् काले तु भरतो मरुद्भिः क्रतुभिः क्रमात् ।
काम्यनैमित्तिकैर्यज्ञैर्यजते पुत्रलिप्सया ॥१४८॥
यदा स यजमानो वै पुत्रान्नासादयत् प्रभुः ।
यज्ञं ततो मरुत्सोमं पुत्रार्थे पुनराहरत् ॥१४९॥
तेन ते मरुतस्तस्य मरुत्सोमेन तोषिताः ।
भरद्वाजं ततः पुत्रं वार्हस्पत्यं मनीषिणं ॥१५०॥
भरतस्तु भरद्वाजं पुत्रं प्राप्य तदाऽब्रवीत् ।
प्रजायां संहृतायां वै कृतार्थोऽहं त्वया विभो ॥१५१॥
पूर्वन्तु वितथं तस्य कृतं वै पुत्रजन्म हि ।
ततः स वितथो नाम भरद्वाजस्तथाऽभवत् ॥१५२॥
तस्माद्दिव्यो भरद्वाजो ब्राह्मणात् क्षत्रियोऽभवत् ।
द्विमुख्यायननामा स(१) स्मृतो द्विपितरस्तु(२) वै॥१५३॥
ततोऽथ वितथे जाते भरतः स दिवं ययौ ।

---

(१) अत्र, द्योमुख्यायननामा स इति पाठोऽपि सङ्गतः । द्यामुख्यायणा-नामानः इति ङ० च०, दामुख्यायणनानाम इति ख० ग० ।

(२) द्विपितृक इति पाठो विशुद्धः ।

वितथस्य तु दायादो भुवमन्युर्बभूव ह ॥१५४॥
महाभूतोपमाश्चासंश्चत्वारो भुवमन्युजाः ।
बृहत्क्षत्रो[१] महावीर्यो नरो गार्ग्यस्य वीर्यवान् ॥१५५॥
नरस्य साङ्कृतिः पुत्रस्तस्य पुत्रौ महौजसौ ।
गुरुवीर्यस्त्रिदेवश्च साङ्कृत्याववरौ स्मृतौ ॥१५६॥
दायादाश्चापि गार्ग्यस्य शिनिबद्धाद्[२] बभूव[३] ह ।
स्मृताश्चैते ततो गार्ग्याः क्षात्रोपेता द्विजातयः ॥१५७॥
महावीर्यसुतश्चापि भीमस्तस्मादुभक्षयः[४] ।
तस्य भार्या विशाला तु सुषुवे वै सुतांस्त्रयः[५] ॥१५८॥
त्र्य्यारुणिं पुष्करिणं तृतीयं सुषुवे कपिं ।
कपेः[६] क्षत्रवरा ह्येते तयोः प्रोक्ता महर्षयः ॥१५९॥
गार्ग्याः साङ्कृतयो वीर्याः क्षात्रोपेता द्विजातयः ।
संश्रिताङ्गिरसं पक्षं बृहत्क्षत्रस्य वक्ष्यति ॥१६०॥
बृहत्क्षत्रस्य दायादः सुहोत्रो नाम धार्मिकः ।
सुहोत्रस्यापि दायादो हस्ती नाम बभूव ह ।
तेनेदं निर्मितं पूर्वं नाम्ना वै हस्तिना पुरं ॥१६१॥
हस्तिनश्चापि दायादास्त्रयः परमधार्मिकाः ।
अजमीढो द्विजामीढः पुरुमीढस्तथैव च ॥१६२॥

---

(१) वृहत्क्षेत्र इति ख०, महत्क्षेत्र इति ग० ।
(२) शितिबन्धादिति ख० ।
(३) बभूव इत्यत्र आर्षप्रयोगादेकवचनम् ।
(४) दुदक्षयः इति ङ० ।
(५) त्रय इति द्वितीयार्थे प्रथमा ।
(६) कपेरित्यनन्तरं एकं द्वे वा वाक्यं पतितं ।

अजमीढस्य पुत्रास्तु(१) शुभाः शुभकुलोद्वहाः ।
तपसोऽन्ते सुमहतो राज्ञो वृद्धस्य धार्मिकाः ॥१६३॥
भरद्वाजप्रसादेन शृणुध्वं तस्य विस्तरं ।
अजमीढस्य केशिन्यां कण्ठः समभवत्किल ॥१६४॥
मेधातिथिः सुतस्तस्य तस्मात् कण्ठायना द्विजाः ।
अजमीढस्य धूमिन्यां जज्ञे वृहद्वसु(२)र्नृपः ॥१६५॥
वृहद्वसोर्वृहद्विष्णुः पुत्रस्तस्य महाबलः ।
वृहत्कर्मा सुतस्तस्य पुत्रस्तस्य वृहद्रथः ॥१६६॥
विश्वजित्तनयस्तस्य सेनजित्तस्य चात्मजः ।
अथ सेनजितः पुत्राश्चत्वारो लोकविश्रुताः ॥१६७॥
रुचिराश्वश्च काव्यश्च रामोदृढधनु(३) स्तथा ।
वत्स(४)श्चावन्तको(५) राजा यस्य ते परिवत्सराः ॥१६८॥
रुचिराश्वस्य दायादः पृथुषेणो महायशाः ।
पृथुषेणस्य पारस्तु पारान्नीपोऽथ जज्ञिवान् ॥१६९॥
यस्य चैकशतञ्चासीत् पुत्राणामिति नः श्रुतं ।
नीपा इति समाख्याता राजानः सर्व एव ते ॥१७०॥
तेषां वंशकरः श्रीमान् राजासीत्कीर्त्तिवर्द्धनः ।

(१) पतय इति ङ० च० ।
(२) वृहद्धनुरिति ङ० च० ।
(३) दृढ़तनुरिति ख० ग० ।
(४) वत्स इत्यत्र काव्यः रामो वा इति, अथवा काव्यस्य इत्यत्र वत्सस्य इति, अथवा राम इत्यत्र वत्स इति पाठः सम्भाव्यते ।
(५) स्वावन्तिको इति पाठः साधुः ।

काम्पिल्ये[१] समरो नाम स चेष्टसमरोऽभवत् ॥१७१॥
समरस्य परः पारः सत्वदश्व इति त्रयः ।
पुत्राः सर्वगुणोपेताः पारपुत्रो वृषुर्बभौ ॥१७२॥
वृषोस्तु सुकृतिर्नाम सुकृतेनेह कर्मणा ।
जज्ञे सर्वगुणोपेतो विभ्राजस्तस्य चात्मजः ॥१७३॥
विभ्राजस्य तु दायादस्त्वणुहो नाम पार्थिवः ।
बभूव शुकजामाता कृचीभर्त्ता महायशाः ॥१७४॥
अणुहस्य तु दायादो ब्रह्मदत्तो महातपाः ।
योगसूनुः सुतस्तस्य विष्वक्सेनोऽभवन्नृपः ॥१७५॥
[२]विभ्राजपुत्रा राजानः सुकृतेनेह कर्म्मणा ।
विष्वक्सेनस्य पुत्रस्तु उदक्सेनो बभूव ह ॥१७६॥
भल्लाटस्तस्य दायादो येन राजा पुरा हतः ।
भल्लाटस्य तु दायादो राजासीज्जनमेजयः ।
उग्रायुधेन तस्यार्थे सर्वे नीपाः प्रणाशिताः ॥१७७॥
ऋषय ऊचुः। उग्रायुधः कस्य सुतः कस्मिन् वंशे च कीर्त्यते ।
किमर्थञ्चैव नीपास्ते तेन सर्वे प्रणाशिताः ॥१७८॥
सूत उवाच। द्विमीटस्य तु दायादो विद्वान् जज्ञे यवी नरः ।
धृतिमांस्तस्य पुत्रस्तु तस्य सत्यधृतिः सुतः ॥१७९॥
अथ सत्यधृतेः पुत्रो दृढ़नेमिः प्रतापवान् ।
दृढ़नेमिसुतश्चापि सुवर्मा नाम पार्थिवः ॥१८०॥

---

(१) काम्भिल्ये इति ख० ग० ।

(२) विभ्राजपुत्रा इति श्लोकार्द्धं पूर्व्वापरश्लोकार्द्धाभ्यां सङ्गतिविरहात् लेखकेन भ्रमादन्यतः स्थानादत्रोद्धृतं ।

आसीत् सुवर्म्मणः पुत्रः सार्व्वभौमः प्रतापवान् ।
सार्वभौम इति ख्यातः पृथिव्यामेकराड्बभौ ॥१८१॥
तस्यान्वये च महति महत्पौरवनन्दनः ।
महत्पौरवपुत्रस्तु राजा रुक्मरथः स्मृतः ॥१८२॥
अथ रुक्मरथस्यापि सुपार्श्वो नाम पार्थिवः ।
सुपार्श्वतनयस्यापि सुमतिर्नाम धार्म्मिकः ॥१८३॥
सुमतेरपि धर्म्मात्मा राजा सन्नतिमान् प्रभुः ।
तस्यासीत्सनतिर्नाम कृत(१)स्तस्य सुतोऽभवत् ॥१८४॥
शिष्यो हिरण्यनाभेस्तु कौथुमस्य महात्मनः ।
चतुर्विंशतिधा तेन प्रोक्तास्ताः सामसंहिताः ॥१८५॥
स्मृतास्ते प्राच्यनामानः कार्त्ताः साम्नान्तु सामगः ।
कार्त्तिरुग्रायुधः सोऽथ वीरः पौरवनन्दनः ॥१८६॥
बभूव येन विक्रम्य पृषतस्य(२) पितामहः ।
नीलो नाम महाबाहुः पञ्चालाधिपतिर्हतः ॥१८७॥
उग्रायुधस्य दायादः क्षेमो नाम महायशाः ।
क्षेमात्सुवीरः संजज्ञे सुवीरस्य नृपञ्जयः ।
नृपञ्जयाद्वीररथो इत्येते पौरवाः स्मृताः ॥१८८॥
अजमीढस्य नीलिन्यां नीलः समभवन्नृपः ।
नीलस्य तपसोग्रेण सुशान्तिरभ्यजायत ॥१८९॥
पुरुजानुः सुशान्तेस्तु रिचस्तु पुरुजानुजः ।

---

(१) कृतिरिति ख० ग० ।
(२) प्रतपस्येति ख० ग०, यूषस्तस्येति ङ० च० । एष श्लोकः ख०ग० ङ०च० पुस्तकव्यतिक्तादर्शपुस्तकेषु न विद्यते ।

ततस्तु रिक्तदायादा भेदास्य तनयास्त्रिमे ॥ १९०॥
मुद्गलः सृञ्जयश्चैव राजा बृहदिषुस्तथा ।
यवीयांश्चापि विक्रान्तः कम्पिल्यश्चैव पञ्चमः ॥१९१॥
पञ्चानां रक्षणार्थाय पितैतानभ्यभाषत ।
पञ्चानां विद्धि पञ्चैतान् स्फीता जनपदा युताः ॥१९२॥
अलं संरक्षणे तेषां पञ्चाला इति विश्रुताः ।
मुद्गलस्यापि मौद्गल्याः क्षात्रोपेतद्विजातयः ॥१९३॥
एते ह्यङ्गिरसः पक्षे संश्रिताः कण्ठमुद्गलाः ।
मुद्गलस्य सुतो ज्येष्ठो ब्रह्मिष्ठः सुमहायशाः ॥१९४॥
इन्द्रसेना यतो गर्भं बध्यश्वं प्रत्यपद्यत ।
बध्यश्वान्मिथुनं जज्ञे मेनका इति नः श्रुतिः ॥१९५॥
दिवोदासस्य राजर्षिरहल्या च यशस्विनी ।
शारद्वतस्तु दायादमहल्या समसूयत ॥१९६॥
शतानन्दमृषिश्रेष्ठं तस्यापि सुमहायशाः ।
पुत्रः सत्यधृतिर्नाम धनुर्वेदस्य पारगः ॥१९७॥
अथ सत्यधृतेः शुक्रं दृष्ट्वाप्सरसमग्रतः ।
प्रचस्कन्दे शरस्तम्बे मैथुनं समपद्यत ॥१९८॥
कृपया तच्च जग्राह शन्तनुर्मृगयां गतः ।
कृपः स्मृतः स वै तस्माद्गौतमी च कृपी तथा ॥१९९॥
एते शारद्वताः प्रोक्ताः स्मृतथ्यो गौतमान्वयः ।
अत ऊर्द्धं प्रवक्ष्यामि दिवोदासस्य सन्ततिं ॥२००॥
दिवोदासस्य दायादो ब्रह्मिष्ठो मित्रयुर्नृपः ।

मैत्रेयस्तु ततो जज्ञे स्मृता एतेऽपि संश्रिताः ॥२०१॥
एतेऽपि संश्रिताः पक्षं क्षात्त्रोपेतास्तु भार्गवाः[१] ।
राजापि च्यवनो विद्वान् ततः प्रतिरथोऽभवत् ॥२०२॥
अथ वै च्यवनाद्धीमान् सुदासः समपद्यत ।
सौदासः सहदेवश्च सोमकस्तस्य चात्मजः ॥२०३॥
अजमीढः पुनर्जातः क्षीणे वंशे स सोमकः ।
सोमकस्य सुतो जन्तुर्हते तस्मिन् शतं विभो ॥२०४॥
[२]पुत्राणा[३]मजमीढस्य सोमकत्वे महात्मनः ।
तेषां यवीयान् पृषतो द्रुपदस्य पितामहः ॥२०५॥
धृष्टद्युम्नः सुतस्तस्य धृष्टकेतुश्च तत्सुतः ।
महिषी चाजमीढस्य धूमिनी पुत्रगर्धिनी ॥२०६॥
पुनर्भवे तपस्तेपे शतं वर्षाणि दुश्चरं ।
हुताग्न्यनिद्रा ह्यभवत् पवित्रमितभोजना ॥२०७॥
अहोरात्रं कुशेष्वेव सुष्वाप सुमहाव्रता ।
तस्यां वै धूम्रवर्णायामजमीढश्च वीर्यवान् ॥२०८॥
ऋक्षं संजनयामास धूम्रवर्णं सिताग्रजम् ।
ऋक्षात् संवरणो जज्ञे कुरुः संवरणादभूत् ॥२०९॥
यः प्रयागं पदाक्रम्य कुरुक्षेत्रञ्चकार ह ।
कृष्टैनं सुमहातेजा वर्षाणि सुबहून्यथ ॥२१०॥

---

(१) भार्गवमिति पाठः सङ्गतः ।
(२) पुत्राणामिति श्लोकात् प्राक् कतिपयश्लोकपतनं सम्भावनीयं अर्थसङ्गतिविरहात् ।
(३) पुत्राणामित्यत्र पृषतामिति पाठः सङ्गतः ।

कृष्यमाणे तदा शक्रस्तत्रास्य वरदो बभौ ।
पुण्यञ्च रमणीयञ्च पुण्यकृद्भिर्निषेवितं ॥२११॥
तस्यान्ववायजाः ख्याताः कुरवो नृपसत्तमाः ।
कुरोस्तु दयिताः पुत्राः सुधन्वा जह्नुरेव च ॥२१२॥
परिक्षितो महाराजः पुत्रकश्चारिमर्दनः ।
सुधन्वनस्तु दायादः सुहोत्रो मतिमान् स्मृतः ॥२१३॥
च्यवनस्तस्य पुत्रस्तु राजा धर्मार्थकोविदः ।
च्यवनस्य कृतः पुत्रः इष्ट्वा यज्ञैर्महातपाः ॥२१४॥
विश्रुतं जनयामास पुत्रमिन्द्रसखं नृपः ।
विद्योपरिचरं वीरं वसुं नामान्तरिक्षगं ॥२१५॥
विद्योपरिचराज्जज्ञे गिरिकासप्तसूनवः ।
महारथो भगधरो विश्रुतो यो वृहद्रथः ॥२१६॥
प्रत्यग्रहः कुशश्चैव यमाहुर्मणिवाहनं ।
मार्थेल्यश्च ललित्यश्च मत्स्यकालश्च सप्तमः ॥२१७॥
वृहद्रथस्य दायादः कुशाग्रो नाम विश्रुतः ।
कुशाग्रस्यात्मजश्चैव ऋषभो नाम वीर्यवान् ॥२१८॥
ऋषभस्यापि दायादः पुष्पवान्नाम धार्मिकः ।
विक्रान्तस्तस्य दायादो राजा सत्यहितः स्मृतः ॥२१९॥
तस्य पुत्रः सुधन्वा च तस्मादूर्ज्जः प्रतापवान् ।
ऊर्ज्जस्य नभसः पुत्रस्तस्माज्जज्ञे स वीर्यवान् ॥
शकले द्वे स वै जातो जरया सन्धितस्तु सः ।
जरासन्धो महाबाहुर्जरया सन्धितस्तु सः ॥२२०॥

सर्वक्षत्रस्य जेताऽसौ जरासन्धो महाबलः ।
जरासन्धस्य पुत्रस्तु सहदेवः प्रतापवान् ॥२२१॥
सहदेवात्मजः श्रीमान् सोमाधिः सुमहातपाः ।
श्रुतश्रवस्तु सोमाधेर्मागधः परिकीर्त्तितः ॥२२२॥

सूत उवाच । परिक्षितस्य दायादो बभूव जनमेजयः ।
(१)श्रुतसेनस्य दायादो भीमसेनोऽपि नामतः ॥२२३॥
जह्नुस्त्वजनयत् पुत्रं सुरथं नाम भूमिपं ।
सुरथस्य तु दायादो वीरो राजा विदूरथः ॥२२४॥
विदूरथसुतश्चापि सार्वभौम इति श्रुतिः ।
सार्वभौमाज्जयत्सेन आराधिस्तस्य चात्मजः ॥२२५॥
आराधितो महासत्व अयुतायुस्ततः स्मृतः ।
अक्रोधनोऽयुतायोऽस्तु तस्माद्देवातिथिः स्मृतः ॥२२६॥
देवातिथेस्तु दायाद ऋक्ष एव बभूव ह ।
भीमसेनस्तथा ऋक्षाद्दिलीपस्तस्य चात्मजः ॥२२७॥
दिलीपसूनुः प्रतिप(२)स्तस्य पुत्रास्त्रयः स्मृताः ।
देवापिः शन्तनुश्चैव वाह्लीकश्चैव ते त्रयः ॥२२८॥
(३)वाह्लीकस्य तु विज्ञेयः सप्तवाह्लीश्वरो नृपः ।
वाह्लीकस्य सुतश्चैव सोमदत्तो महायशाः ।
जज्ञिरे सोमदत्तात्तु भूरिर्भूरिश्रवाः शलः ॥२२९॥
देवापिस्तु प्रवव्राज वनं धर्म्मपरीप्सया ।

---

(१) श्रुतसेनस्येति श्लोकार्द्धात् प्राक् श्लोकैकः श्लोकार्द्धं वा पतितः ।
(२) प्रतिभ इति ख० ।
(३) एतत्श्लोकार्द्धं लिपिकरप्रमादाज्जनितम् ।

उपाध्यायस्तु देवानां देवापिरभवन्मुनिः ॥२३०॥
च्यवनोऽस्य हि पुत्रस्तु इष्टकस्य महात्मनः।
शन्तनुस्त्वभरद्राजा विद्वान् वै स महाभिषः ॥२३१॥
इमं चोदाहरन्त्यत्र श्लोकं प्रति महाभिषं।
यं यं राजा स्पृशति वै जीर्णं समयतो नरं ॥२३२॥
पुनर्युवा स भवति तस्मात्ते शन्तनुं विदुः।
ततोऽस्य शन्तनुत्वं वै प्रजास्विह परिश्रुतं।
स उपयेमे धर्म्मात्मा शन्तनुर्जाह्नवीं नृपः ॥२३३॥
तस्यां देवव्रतं भीष्मं पुत्रं सोऽजनयत्प्रभुः।
स च भीष्म(१) इति ख्यातः पाण्डवानां पितामहः ॥२३४॥
काले विचित्रवीर्यन्तु शान्तनुर्जनयत्सुतं।
शन्तनोर्दयितं पुत्रं प्रजाहितकरं प्रभुं।
कृष्णद्वैपायनस्यैव चेत्रे वैचित्रवीर्यके ॥२३५॥
धृतराष्ट्रञ्च पाण्डुञ्च विदुरञ्चाप्यजीजनत्।
धृतराष्ट्रात्तु गान्धारी पुत्राणां सुषुवे शतं ॥२३६॥
तेषां दुर्योधनो ज्येष्ठः सर्व्वत्तत्रस्य स प्रभुः।
माद्री राज्ञी पृथा चैव पाण्डोर्भार्य्ये बभूवतुः ॥२३७॥
देवदत्ताः सुतास्ताभ्यां पाण्डोरर्थे विजज्ञिरे।
धर्म्माद्युधिष्ठिरो जज्ञे वायोर्जज्ञे वृकोदरः ॥२३८॥
इन्द्राद्धनञ्जयो जज्ञे शक्रतुल्यपराक्रमः।
अश्विभ्यां सहदेवश्च नकुलश्चापि माद्रिजौ ॥२३९॥

---

(१) धर्म्म इति ख० ग०।

पञ्चैव पाण्डवेभ्यश्च द्रौपद्यां जज्ञिरे सुताः।
द्रौपद्यजनयत् ज्येष्ठं श्रुतिविद्धं[१] युधिष्ठिरात् ॥२४०॥
हिड़म्बा भीमसेनात्तु जज्ञे पुत्रं घटोत्कचम्।
काश्या पुनर्भीमसेनाद्जज्ञे सर्व्वहकं सुतं ॥२४१॥
सुहोत्रं विजया माद्री सहदेवादजायत।
करेमत्यान्तु वैद्यायां निरमित्रस्तु लाङ्गलिः[२] ॥२४२॥
सुभद्रायां रथी पार्थादभिमन्युरजायत।
उत्तरायान्तु वैराव्यां परिच्छिदभिमन्युजः ॥२४३॥
परिच्छितस्तु दायादो राजासीज्जनमेजयः।
ब्राह्मणान् स्थापयामास स वै वाजसनेयिकान् ॥२४४॥
असपत्नं तदामर्षाद्वैशम्पायन एव तु[३]।
नस्थास्यतीह दुर्बुद्धे तवैतद्वचनं भुवि ॥२४५॥
यावत् स्थास्याम्यहं लोके तावन्नैतत् प्रशस्यते।
अभितः संस्थितश्चापि ततः स जनमेजयः ॥२४६॥
पौर्णमास्येन हविषा देवमिष्ट्वा प्रजापतिं।
विज्ञाय संस्थितोऽपश्यत्तद्धधीष्टां[४] विभोर्मखे ॥२४७॥
परिच्छित्तनयश्चापि पौरवो जनमेजयः।
द्विरश्वमेधमाहृत्य ततो वाजनसेयकं।

---

(१) प्रतिविन्धिमिति ङ० च०।
(२) नाकुलिरिति ङ०।
(३) असपत्नमिति श्लोकार्द्धात् परं कानिचिद्वाक्यानि न सन्तीत्युपलभ्यन्ते सङ्गतिविरहात्।
(४) तत्तदिष्टमिति पाठोऽर्थप्रतिपत्तिकरः।

प्रवर्त्तयित्वा तद्ब्रह्म चिखर्व्वी जनमेजयः ॥२४८॥
खर्व्वमश्वक[१] मुख्यानां खर्व्वमङ्गनिवासिनां ।
खर्व्वञ्च मध्यदेशानां चिखर्व्वी जनमेजयः ।
विषादाद्[२] ब्राह्मणैः सार्द्धमभिशस्तः क्षयं ययौ ॥२४९॥
तस्य पुत्रः शतानीको बलवान् सत्यविक्रमः ।
ततः सुतं शतानीकं विप्रास्तमभ्यषेचयत् ॥२५०॥
पुत्रोऽश्वमेधदत्तोऽभूत् शतानीकस्य वीर्य्यवान् ।
पुत्रोऽश्वमेधदत्ताद्वै जातः परपुरंजयः ॥२५१॥
अधिसामकृष्णो धर्मात्मा साम्प्रतोयं महायशाः ।
यस्मिन् प्रशासति महीं युष्माभिरिदमाहृतं ॥२५२॥
दुरापं दीर्घसत्रं वै त्रीणि वर्षाणि दुस्तरं ।
वर्षद्वयं कुरुक्षेत्रे दृषद्वत्यां द्विजोत्तमाः ॥२५३॥
ऋषयः ऊचुः । श्रोतुं भविष्यमिच्छामः प्रजानां वै महामते ।
सूत सार्द्धं नृपैर्भाव्यं[३] व्यतीतं कीर्त्तितं त्वया ॥२५४॥
यत्तु संस्थास्यते क्षत्यमुत्पत्स्यन्ति च ये नृपाः ।
वर्षाग्रतोऽपि प्रब्रूहि नामतश्चैव तान्नृपान् ॥२५५॥
कालं युगप्रमाणञ्च गुणदोषान् भविष्यतः ।
सुखदुःखे प्रजानाञ्च धर्मतः कामतोऽर्थतः ॥२५६॥
एतत् सर्वं प्रसङ्ख्याय पृच्छतां ब्रूहि तत्वतः ।
स एवमुक्तो मुनिभिः सूतो बुद्धिमतां वरः ।

(१) मश्वक इति ङ० ।
(२) प्रमादादितिपाठः सङ्गतः ।
(३) वाच्यमितिपाठः सुसङ्गतः ।

आचचक्षे यथावृत्तं यथादृष्टं[१] यथाश्रुतं ॥२५७॥

सूत उवाच । यथा मे कीर्त्तितं सर्वं व्यासेनाद्भुतकर्म्मणा ।
भाव्यं कलियुगञ्चैव तथा मन्वन्तराणि तु ॥२५८॥
अनागतानि सर्वाणि ब्रुवतो मे निबोधत ।
अत ऊर्द्धं प्रवक्ष्यामि भविष्यन्ति नृपास्तु ये ॥२५९॥
ऐलांश्चैव तथेक्ष्वाकून् सौद्युम्नांश्चैव पार्थिवान् ।
येषु संस्थाप्यते क्षेत्रं ऐक्ष्वाकवमिदं शुभं ॥२६०॥
तान् सर्वान् कीर्त्तयिष्यामि भविष्ये पठितान्नृपान् ।
तेभ्यः परे च ये चान्ये उत्पत्स्यन्ते महीक्षितः ॥२६१॥
क्षत्राः पारशवाः शूद्रास्तथा ये च द्विजातयः ।
अन्ध्राः शकाः पुलिन्दाश्च तूलिका यवनैः सह ॥२६२॥
कैवर्त्ताभीरशवरा ये चान्ये म्लेच्छजातयः ।
वर्षाग्रतः प्रवक्ष्यामि नामतश्चैव तान्नृपान् ॥२६३॥
अधिसामकृष्णः सोऽयं साम्प्रतं पौरवान्नृपः[२] ।
तस्यान्ववाये वक्ष्यामि भविष्ये तावतो नृपान् ॥२६४॥
अधिसामकृष्णपुत्रो निर्वक्रो भविता किल ।
गङ्गयापहृते तस्मिन् नगरे नागसाह्वये ।
त्यक्त्वा च तं सुवासञ्च कौशाम्ब्यां स निवत्स्यति ॥२६५॥
भविष्यदुष्णस्तत्पुत्र उष्णाच्चित्ररथः स्मृतः ।
शुचिद्रथश्चित्ररथाद्वृतिमांश्च शुचिद्रथात् ॥२६६॥

---

(१) यथाज्ञानमिति पाठः साधुः ।
(२) पौरवो नृपः इति पाठः साधीयान् ।

सुषेणो वै महावीर्यो भविष्यति महायशाः ।
तस्मात्सुषेणाद्भविता सुतीर्थो नाम पार्थिवः ॥२६७॥
रुचः सुतीर्थाद्भविता त्रिचक्षो[१] भविता ततः ।
त्रिचक्षस्य तु दायादो भविता वै सुखीबलः[२] ॥२६८॥
सुखीबलसुतश्चापि भाव्यो राजा परिप्लुतः[३] ।
परिप्लुतसुतश्चापि भविता सुनयो नृपः ॥२६९॥
मेधावी सुनयस्याथ भविष्यति नराधिपः ।
मेधाविनः सुतश्चापि दण्डपाणिर्भविष्यति ॥२७०॥
दण्डपाणेर्निरामित्रो निरामित्राच्च क्षेमकः ।
पञ्चविंशनृपा ह्येते भविष्याः पूर्ववंशजाः ॥२७१॥
अत्रानुवंशश्लोकोऽयं गीतो विप्रैः पुराविदैः ।
ब्रह्मक्षत्रस्य यो योनिर्वंशादेवर्षिसत्कृतः ॥२७२॥
क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ।
इत्येष पौरवो वंशो यथावदनुकीर्त्तितः ॥२७३॥
धीमतः पाण्डुपुत्रस्य अर्जुनस्य महात्मनः ।
अत ऊर्द्धं प्रवक्ष्यामि इक्ष्वाकूणां महात्मनां ॥२७४॥
वृहद्रथस्य दायादो वीरो राजा वृहत्क्षयः ।
ततः क्षयः सुतस्तस्य वत्सव्यूहस्ततः क्षयात् ॥२७५॥
वत्सव्यूहात्प्रतिव्यूहस्तस्य पुत्रो दिवाकरः ।
✗ यस्य सांप्रतमध्यास्ते अयोध्यां नगरीं नृपः ॥२७६॥

---

(१) त्रिवक्ष इति ङ० च० ।
(२) सुधीबल इति ख० ग० ।
(३) परिप्लव इति ङ० ।

दिवाकरस्य भविता सहदेवो महायशाः ।
सहदेवस्य दायादो वृहदश्वो भविष्यति ॥२७७॥
तस्य भानुरथो भाव्यः प्रतीताश्वश्च तत्सुतः ।
प्रतीताश्वसुतश्चापि सुप्रतीतो भविष्यति ॥२७८॥
सहदेवः सुतस्तस्य सुनक्षत्रश्च तत्सुतः ॥२७९॥
किन्नरस्तु सुनक्षत्राद्भविष्यति परंतपः ।
भविता चान्तरिक्षस्तु किन्नरस्य सुतो महान् ॥२८०॥
अन्तरिक्षात्सुपर्णस्तु सुपर्णाच्चाप्यमित्रजित् ।
पुत्रस्तस्य भरद्वाजो धर्मी तस्य सुतः स्मृतः ॥२८१॥
पुत्रः कृतञ्जयो नाम धर्मिणः स भविष्यति ।
कृतञ्जयसुतो व्रातो तस्य पुत्रो रणञ्जयः ॥२८२॥
भविता सञ्जयश्चापि वीरो राजा रणञ्जयात् ॥
सञ्जयस्य सुतः शाक्यः शाक्यात् शुद्धोदनोऽभवत् ॥२८३॥
शुद्धोदनस्य भविता शाक्यार्थे राहुलः स्मृतः ।
प्रसेनजित्ततो भाव्यः क्षुद्रको भविता ततः ॥२८४॥
क्षुद्रकात् क्षुलिको भाव्यः क्षुलिकात्सुरथः स्मृतः ।
सुमित्रः सुरथस्यापि अन्त्यश्च भविता नृपः ॥२८५॥
एते ऐक्ष्वाकवाः प्रोक्ता भवितारः कलौ युगे ।
वृहद्वलान्वये जाता भवितारः कलौ युगे ।
शूराश्च कृतविद्याश्च सत्यसन्धा जितेन्द्रियाः ॥२८६॥
अत्रानुवंशश्लोकोऽयं भविष्यज्ञैरुदाहृतः ।
इक्ष्वाकूनामयं वंशः सुमित्रान्तो भविष्यति ॥२८७॥

सुमित्रं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ।
इत्येतन्मानवं क्षेत्रमैलस्य समुदाहृतम् ॥२८८॥
अतः ऊर्द्धं प्रवक्ष्यामि मागधेयान् वृहद्रथान् ।
जरासन्धस्य ये वंशे सहदेवान्वये नृपाः ॥२८९॥
अतीता वर्त्तमानाश्च भविष्याश्च तथा पुनः ।
प्राधान्यतः प्रवक्ष्यामि गदतो मे निबोधत ॥२९०॥
संग्रामे भारते तस्मिन् सहदेवो निपातितः ।
सोमाधिस्तस्य तनयो राजर्षिः स गिरिव्रजे ॥२९१॥
पञ्चाशतं तथाष्टौ च समा राज्यमकारयत् ।
श्रुतश्रवाः चतुःषष्टिसमास्तस्य सुतोऽभवत् ॥
अयुतायुस्तु षड्विंशं राज्यं वर्षाण्यकारयत् ।
समाः शतं निरामित्रो महीं भुक्त्वा दिवङ्गतः ॥२९२॥
पञ्चाशतं समाः षट्च सुक्षत्त्रः प्राप्तवान्महीं ।
त्रयोविंशं वृहत्कर्मा राज्यं वर्षाण्यकारयत् ॥२९३॥
सेनाजित्साम्प्रतं चापि एतां वै भुज्यते समाः ।
श्रुतंजयस्तु वर्षाणि चत्वारिंशत् भविष्यति ॥२९४॥
महाबाहुर्महाबुद्धिर्महाभीमपराक्रमः(१) ।
पञ्चत्रिंशत्तु वर्षाणि महीं पालयिता नृपः ॥२९५॥
अष्टपञ्चाशतं चाब्दान् राज्ये स्थास्यति वै शुचिः ।
अष्टाविंशत्समाः पूर्णाः क्षेमो राजा भविष्यति ॥२९६॥
भुवतस्तु(२) चतुःषष्टीराज्यं प्राप्स्यति वीर्य्यवान् ।

---

(१) महाबलो महाबाहुर्महाबुद्धिपराक्रमः इति क० ज० ।
() सुवत इति क०, युवत इति च० ज० ।

पञ्चवर्षाणि पूर्णाणि धर्मनेत्रो भविष्यति ॥२९७॥
(१)भोच्यते नृपतिश्चैव अष्टपञ्चाशतं समाः ।
अष्टात्रिंशत्समा राज्यं सुव्रतस्य भविष्यति ॥२९८॥
चत्वारिंशद्दशाष्टौ च दृढ़सेनो भविष्यति ।
त्रयस्त्रिंशत्तु वर्षाणि सुमतिः प्राप्स्यते ततः ॥२९९॥
द्वाविंशतिसमा राज्यं सुचलो(२) भोच्यते ततः ।
चत्वारिंशत्समा राजा सुनेत्रो भोच्यते ततः ॥३००॥
सत्यजित् पृथिवीराज्यं त्र्यशीतिं भोच्यते समाः ।
प्राप्येमां वीरजिच्चापि पञ्चत्रिंशद्भविष्यति ॥३०१॥
अरिञ्जयस्तु वर्षाणि पञ्चाशत्प्राप्स्यते महीं ।
द्वात्रिंशच्च नृपा ह्येते भवितारो बृहद्रथाः ॥३०२॥
पूर्णं वर्षसहस्रं वै तेषां राज्यं भविष्यति ।
बृहद्रथेष्वतीतेषु वीतहोत्रेषु वर्तिषु ॥३०३॥
मुनिकः स्वामिनं हत्वा पुत्रं समभिषेच्यति ।
मिषतां क्षत्रियाणां हि प्रद्योतो मुनिको बलात् ॥३०४॥
स वै प्रणतसामन्तो भविष्ये नयवर्ज्जितः ।
त्रयोविंशत्समा राजा भविता स नरोत्तमः ॥३०५॥
चतुर्विंशत्समा राजा पालको भविता ततः ।
विशाखयूपो भविता नृपः पञ्चाशतीं समाः ॥३०६॥
एकत्रिंशत्समा राज्यमजकस्य भविष्यति ।

---

(१) इतः प्राक् श्लोकार्द्धं पतितत्वेनोपलभ्यते ।
(२) सुचालो इति ङ० च० छ०, युवानौ इति ख० ।

भविष्यति समा विंशत् तत्सुतोवर्त्तिवर्द्धनः[१] ॥३०७॥
अष्टात्रिंशच्छतं भाव्याः प्राद्योताः पञ्च ते सुताः ।
हत्वा तेषां यशः कृत्स्नं शिशुनाको भविष्यति ॥३०८॥
बाराणस्यां सुतस्तस्य संप्राप्स्यति[२] गिरिव्रजं ।
शिशुनाकस्य वर्षाणि चत्वारिंशद्भविष्यति ॥३०९॥
शक्रवर्णः सुतस्तस्य षट्त्रिंशच्च भविष्यति ।
ततस्तु विंशतिं राजा क्षेमवर्मा भविष्यति ॥३१०॥
अजातशत्रुर्भविता पञ्चविंशत्समा नृपः ।
चत्वारिंशत्समा राज्यं क्षत्रौजाः प्राप्स्यते ततः ॥३११॥
अष्टाविंशत्समा राजा विविसारो भविष्यति ।
पञ्चविंशत्समा राजा दर्शकस्तु भविष्यति ॥३१२॥
उदायी भविता तस्मात्त्रयस्त्रिंशत्समा नृपः ।
स वै पुरवरं राजा पृथिव्यां कुसुमाह्वयं ।
गङ्गाया दक्षिणे कूले चतुर्थेऽब्दे करिष्यति ॥३१३॥
द्वाचत्वारिंशत्समा भाव्यो राजा वै नन्दिवर्द्धनः ।
चत्वारिंशत्त्रयश्चैव महानन्दी भविष्यति ॥३१४॥
इत्येते भवितारो वै शैशुनाका नृपा दश ।
शतानि त्रीणि वर्षाणि द्विषष्ट्यभ्यधिकानि तु ॥३१५॥
शैशुनाका भविष्यन्ति तावत्कालं नृपाः परे ।
राजानः क्षत्रबान्धवाः एतैः सार्द्धं भविष्यति ॥३१६॥

---

(१) वर्द्धिवर्द्धन इति क० ।
(२) स यास्यति इति ङ० च० क० ।

ऐक्ष्वाकवाश्चतुर्विंशत्पाञ्चालाः पञ्चविंशतिः ।
कालकास्तु चतुर्व्विंशच्चतुर्व्विंशत्तु हैहयाः ॥२१७॥
द्वात्रिंशद्वै कलिङ्गास्तु पञ्चविंशत्तथा शकाः ।
कुरवश्चापि षड्विंशदष्टाविंशतिमैथिलाः ॥२१८॥
शूरसेनास्त्रयोविंशद्वीतिहोत्राश्च विंशतिः ।
तुल्यकालं भविष्यन्ति सर्व्वं एव महीक्षितः ॥२१९॥
महानन्दिसुतश्चापि शूद्रायां कालसंवृतः ।
उत्पत्स्यते महापद्मः सर्व्वक्षत्रान्तरे नृपः ॥२२०॥
ततः प्रभृति राजानो भविष्याः शूद्रयोनयः ।
एकराट् स महापद्म एकच्छत्रो भविष्यति ॥२२१॥
अष्टाविंशतिवर्षाणि पृथिवीं पालयिष्यति ।
सर्व्वक्षत्रहृतोद्धृत्य(१) भाविनोऽर्थस्य वै बलात् ॥२२२॥
सहस्रा(२) त्सत्सुता ह्यष्टौ समा द्वादश ते नृपाः ।
महापद्मस्य पर्य्याये भविष्यन्ति नृपाः क्रमात् ॥२२३॥
उद्धरिष्यति तान् सर्व्वान् कौटिल्यो वै द्विरष्टभिः ।
भुक्त्वा महीं वर्षशतं नन्देन्दुः(३) स भविष्यति ॥२२४॥
चन्द्रगुप्तं नृपं राज्ये कौटिल्यः स्थापयिष्यति ।
चतुर्विंशत्समा राजा चन्द्रगुप्तो भविष्यति ॥२२५॥

---

(१) सर्व्वक्षत्रहृतोद्धृत्य इति ख० । सर्व्वक्षत्रान् समुद्धृत्य इति पाठो विशुद्धः ।

(२) सहस्रादिति क० ङ० च० ।

(३) नन्देन्दः इति च० ।

भविता भद्रसारस्तु पञ्चविंशत्समा नृपः ।
षड़्विंशत्तु समा राजा अशोको भविता नृषु ॥३२६॥
तस्य पुत्रः कुनालस्तु वर्षाण्यष्टौ भविष्यति ।
कुनालसूनुरष्टौ च भोक्ता वै बन्धुपालितः ॥३२७॥
बन्धुपालितदायादो दशमानी[१]न्द्रपालितः ।
[२]भविता सप्तवर्षाणि देववर्म्मा नराधिपः ॥३२८॥
राजा शतधरश्चाष्टौ तस्य पुत्रो भविष्यति ।
वृहदश्वश्च वर्षाणि सप्त वै भविता नृपः ॥३२९॥
इत्येते नव भूपा ये भोक्ष्यन्ति च वसुन्धरां ।
सप्तत्रिंशच्छतं पूर्णं तेभ्यस्तु गौर्भविष्यति ॥३३०॥
पुष्यमित्रस्तु सेनानीरुद्धृत्य वै वृहद्रथं ।
कारयिष्यति वै राज्यं समाः षष्टिं सदैव तु ॥३३१॥
पुष्यमित्रसुता श्चाष्टौ भविष्यन्ति समा नृपाः ।
भविता चापि तज्ज्येष्ठः सप्तवर्षाणि वै ततः ॥३३२॥
वसुमित्रः सुतो भाव्यो दशवर्षाणि पार्थिवः ।
ततो भ्रुकः[३] समा द्वे तु भविष्यति सुतश्च वै ॥३३३॥
भविष्यन्ति समास्तस्मात्तिस्र एव पुलिन्दकाः ।
राजा घोषसुतश्चापि वर्षाणि भविता त्रयः ॥३३४॥

---

(१) दशमानीत्यत्र दशाब्दानीति पाठः सङ्गतः ।
(२) भवितेति श्लोकार्द्धात् प्राक् श्लोकार्द्धं पतितम् ।
(३) वृक इति ख० ग० ।

ततो वै विक्रमित्रस्तु समा राजा ततः पुनः ।
द्वात्रिंशद्भविता चापि समा भागवतो नृपः ॥३३५॥
भविष्यति सुतस्तस्य क्षेमभूमिः समा दश ।
दशैते तुङ्गराजानो[१] भोक्ष्यन्तीमां वसुन्धरां ॥३३६॥
शतं पूर्णं दश द्वे च तेभ्यः किं वा गमिष्यति ।
अपार्थिवसुदेवन्तु बाल्याद्व्यसनिनं नृपं ॥३३७॥
देवभूमिस्ततोऽन्यश्च शुङ्गेषु भविता नृपः ।
भविष्यति समा राजा नवकण्ठायन[२]स्तु सः ॥३३८॥
भूतिमित्रः सुतस्तस्य चतुर्विंशद्भविष्यति ।
भविता द्वादश समा तस्मान्नारायणो नृपः ॥३३९॥
सुशर्म्मा तत्सुतश्चापि भविष्यति समा दश ।
चतुरस्तुङ्गकृत्यास्ते नृपाः कण्ठायना द्विजाः ॥३४०॥
भाव्याः प्रणतसामन्ताश्चत्वारिंशच्च पञ्च च ।
तेषां पर्य्यायकाले तु तरन्धा तु[३] भविष्यति ॥३४१॥
कण्ठायनमथोद्धृत्य सुशर्म्माणं प्रसह्य तं ।
शुङ्गानां चापि यच्छिष्टं क्षपयित्वा बलं तदा ।
सिन्धुको ह्यन्ध्रजातीयः प्राप्स्यतीमां वसुन्धरां ॥३४२॥
त्रयोविंशत्समा राजा सिन्धुको भविता त्वथ ।

---

(१) शुङ्गराजान इति ख० ग० ङ० च० ।
(२) नवकङ्कयन इति क० छ० ।
(३) नृपोऽन्ध्रो हि इति पाठः सुसङ्गतः ।

अष्टौ भातस्य[१] वर्षाणि तस्माद्दश भविष्यति ॥३४३॥
श्रीसातकर्णिर्भविता तस्य पुत्रस्तु वै महान्।
पञ्चाशतं समाः षट्च सातकर्णिर्भविष्यति ॥३४४॥
आपादबद्धो[२] दश वै तस्य पुत्रो भविष्यति।
[३]चतुर्व्विंशत्तु वर्षाणि षट् समा वै[४] भविष्यति ॥३४५॥
भविता नेमिकृष्णस्तु वर्षाणां पञ्चविंशतिं।
ततः संवत्सरं पूर्णं हालो राजा भविष्यति ॥३४६॥
पञ्च सप्तक[५] राजानो भविष्यन्ति महाबलाः।
भाव्यः पुत्रिकषेणस्तु समाः सोऽप्येकविंशतिं ॥३४७॥
सातकर्णि[६] र्वर्षमेकं भविष्यति नराधिपः।
अष्टाविंशत्तु वर्षाणि शिवस्वामी भविष्यति ॥३४८॥
राजा च गौतमीपुत्र एकविंशत्समा नृषु।
एकोनविंशतिं राजा यज्ञश्रीः सातकर्ण्यथ[७] ॥३४९॥
षडेव भविता तस्माद्विजयस्तु समा नृपः।
दण्डश्रीः सातकर्णी च तस्य पुत्रः समास्त्रयः ॥३५०॥
पुलोवापि समाः सप्त अन्येषाञ्च भविष्यति।

---

(१) भ्रातस्येति ङ० च० छ०, स्नातस्येति क०।
(२) आपोलवादा इति ङ० च० ज०, अपालवादा इति छ०।
(३) चतुर्व्विंशत्त्विति श्लोकार्द्धात् प्राक् श्लोकार्द्धं पतितम्।
(४) षडुमाविरिति ङ० च० छ० ज०।
(५) सप्त च इति पाठः साधुः।
(६) शान्तकीर्त्तिरिति ख०।
(७) सामकर्ण्यथ इति क० ज०।

इत्येते वै नृपास्त्रिंशदन्ध्रा भोक्ष्यन्ति ये महीं ॥३५१॥
समाः शतानि चत्वारि पञ्च षड्वै तथैव च ।
अन्ध्राणां[१] संस्थिताः पञ्च तेषां वंशाः समाः पुनः ॥३५२॥
सप्तैव तु भविष्यन्ति दशाभीरास्ततो नृपाः ।
सप्त गर्दभिनश्चापि ततोऽथ दश वै शकाः ॥३५३॥
यवनाष्टौ भविष्यन्ति तुषारास्तु चतुर्दश ।
त्रयोदश मरुण्डाश्च[२] मौना ह्यष्टादशैव तु ॥३५४॥
अन्ध्रा भोक्ष्यन्ति वसुधां शते द्वे च शतं च वै ।
शतानि त्रीण्यशीतिञ्च भोक्ष्यन्ति वसुधां शकाः ॥३५५॥
अशीतिञ्चैव वर्षाणि भोक्तारो यवना महीं ।
पञ्चवर्षशतानीह तुषाराणां मही स्मृता ॥३५६॥
शतान्यर्द्धचतुर्थानि भवितारस्त्रयोदश ।
मरुण्डा वृषलैः सार्द्धं भाव्यान्या म्लेच्छजातयः ॥३५७॥
शतानि त्रीणि भोक्ष्यन्ति म्लेच्छा एकादशैव तु ।
तच्छन्नेन च[३] कालेन ततः कोलिकिला वृषाः ॥३५८॥
ततः कोलिकिलेभ्यश्च विन्ध्यशक्तिर्भविष्यति ।
समाः षण्णवतिं ज्ञात्वा पृथिवीं च समेष्यति[४] ॥३५९॥
वृषान्[५] वै दिशकांश्चापि[६] भविष्यांश्च निबोधत ।

(१) अन्ध्राणामित्यनन्तरं कतिपयवाक्यानि न सन्ति कुत्र? ।
(२) मरुण्डाश्चेति ङ० च० ।
(३) उच्छिन्नेष्वेषु इति पाठः साधुः ।
(४) स भोक्ष्यति इति ख० ग० ।
(५) नृपानिति छ० ।
(६) वै दिशकानित्यत्र वैदेशिकानिति पाठः सम्भाव्यते ।

शेषस्य नागराजस्य पुत्रः स्वरपुरञ्जयः[(१)] ॥३६०॥
भोगी भविष्यते राजा नृपो नागकुलोद्वहः ।
सदाचन्द्रस्तु चन्द्रांशो द्वितीयो नखवांस्तथा ॥३६१॥
धनधर्मा ततश्चापि चतुर्थो विंशजः स्मृतः ।
भूतिनन्दस्ततश्चापि वैदेशे तु भविष्यति ॥३६२॥
अङ्गानां नन्दनस्यान्ते मधुनन्दिर्भविष्यति ।
तस्य भ्राता यवीयांस्तु नाम्ना नन्दियशाः किल ॥३६३॥
तस्यान्वये भविष्यन्ति राजानस्ते त्रयस्तु वै ।
दौहित्रः शिशुको नाम पुरिकायां नृपोऽभवत् ॥३६४॥
विन्ध्यशक्तिसुतश्चापि प्रवीरो नाम वीर्यवान् ।
भोक्ष्यन्ति च समाः षष्टिं पुरीं काञ्चनकाञ्च वै ॥३६५॥
यक्ष्यति वाजपेयैश्च समाप्तवरदक्षिणैः ।
तस्य पुत्रास्तु चत्वारो भविष्यन्ति नराधिपाः ॥३६६॥
विन्ध्यकानाङ्कुलेऽतीते नृपा वै वाह्लिकास्त्रयः ।
सुप्रतीको नभीरस्तु समा भोक्ष्यति त्रिंशतिं ॥३६७॥
शक्यमा नाम वै राजा माहिषीनां महीपतिः[(२)] ।
पुष्यमित्रा भविष्यन्ति पट्टमित्रास्त्रयोदश ॥३६८॥
मेकलायां नृपाः सप्त भविष्यन्ति च सत्तमाः[(३)] ।
कोमलायान्तु राजानो भविष्यन्ति महाबलाः ॥३६९॥

---

(१) परपुरञ्जयः इति ङ० च० ।
(२) सक्यमीमाभवो राजा महिषीणां महीपति रिति च० छ० ज० ।
(३) भविष्यति च सन्ततिरितिपाठ आदर्शपुस्तकमात्रे वर्त्तते ।

मेधा इति समाख्याता बुद्धिमन्तो नवैव तु ।
नैषधाः पार्थिवाः सर्व्वे भविष्यन्त्यामनुक्षयात् ॥३७०॥
नलवंशप्रसूतास्ते वीर्यवन्तो महाबलाः ।
मागधानां महावीर्यो विश्वस्फानि(१) र्भविष्यति ॥३७१॥
उत्साद्य पार्थिवान् सर्व्वान् सोऽन्यान् वर्णान् करिष्यति ।
कैवर्त्तान् पञ्चकांश्चैव पुलिन्दान् ब्राह्मणांस्तथा ॥३७२॥
स्थापयिष्यन्ति राजानो(२) नानादेशेषु तेजसा ।
विश्वस्फाणिर्महासत्त्वो युद्धे विष्णुसमो बली ॥३७३॥
विश्वस्फानिर्नरपतिः क्लीवाकृतिरिवोच्यते ।
उत्सादयित्वा क्षत्रन्तु क्षत्रमन्यत् करिष्यति ॥३७४॥
देवान् पितॄंश्च विप्रांश्च तर्पयित्वा सकृत्पुनः ।
जाह्नवीतीरमासाद्य शरीरं यस्यते(३) बली ॥३७५॥
सन्न्यस्य स्वशरीरन्तु शक्रलोकं गमिष्यति ।
नवनाकास्तु भोक्ष्यन्ति पुरीं चम्पावतीं नृपाः ॥३७६॥
मथुराञ्च पुरीं रम्यां नागा भोक्ष्यन्ति सप्त वै ।
अनुगङ्गं प्रयागञ्च साकेतं मगधांस्तथा ।
एतान् जनपदान् सर्वान् भोक्ष्यन्ते गुप्तवंशजाः ॥३७७॥
निषधान् यदुकांश्चैव शैशीतान् कालतोपकान् ।
एतान् जनपदान् सर्व्वान् भोक्ष्यन्ति मणिधान्यजाः ॥३७८॥

---

(१) विश्वस्फानिरित्यत्र विश्वप्सानिरितिपाठः साधुः ।
(२) राज्ञो वै इति पाठः साधुः ।
(३) त्यक्ष्यते इति पाठः सङ्गतः ।

कोशलांश्चान्ध्रपौण्ड्रांश्च ताम्रलिप्तान् ससागरान्।
चम्पां चैव पुरीं रम्यां भोच्यन्ति देवरक्षितां ॥३७९॥
कलिङ्गा महिषाश्चैव महेन्द्रनिलयाश्च ये ।
एतान् जनपदान् सर्वान् पालयिष्यति वै गुहः ॥३८०॥
स्त्रीराष्ट्रं भच्यकांश्चैव भोच्यते कनकाह्वयः ।
तुल्यकालं भविष्यन्ति सर्वे ह्येते महीक्षितः ॥३८१॥
अल्पप्रसादा ह्यनृता महाक्रोधाः ह्यधार्मिकाः ।
भविष्यन्तीह यवना धर्मतः कामतोऽर्थतः ॥३८२॥
नैव मूर्द्धाभिषिक्तास्ते भविष्यन्ति नराधिपाः ।
युगदोषदुराचारा भविष्यन्ति नृपास्तु ते ॥३८३॥
स्त्रीणां बलवधेनैव हत्वा चैव परस्परं ।
भोच्यन्ति कलिशेषे तु वसुधां पार्थिवास्तथा ॥ ३८४॥
उदितोदितवंशास्ते उदितास्तमितास्तथा ।
भविष्यन्तीह पर्याये कालेन पृथिवीक्षितः ॥३८५॥
विहीनास्तु भविष्यन्ति धर्मतः कामतोऽर्थतः ।
तैर्विमिश्रा जनपदा म्लेच्छाचाराश्च सर्वशः ॥३८६॥
विपर्ययेन वर्त्तन्ते नाशयिष्यन्ति वै प्रजाः ।
लुब्धानृतरताश्चैव भवितारस्तदा नृपाः ॥३८७॥
तेषां व्यतीते पर्य्याये बहुस्त्रीके युगे तदा ।
लवाल्लवं भ्रश्यमाना आयूरूपबलश्रुतैः ॥३८८॥
तथा गतास्तु वै काष्ठां प्रजासु जगतीश्वराः ।
राजानः सम्प्रणश्यन्ति कालेनोपहतास्तदा ॥३८९॥

कल्किनोपहताः[१] सर्वे म्लेच्छा यास्यन्ति सर्वशः ।
अधार्मिकाश्च तेऽत्यर्थं पाषण्डाश्चैव सर्वशः ॥३९०॥
प्रनष्टे नृपशब्दे च सन्ध्याश्लिष्टे कलौ युगे ।
किञ्चिच्छिष्टाः प्रजास्ता[२] वै धर्मे नष्टेऽपरिग्रहाः ॥३९१॥
असाधना हतास्वासा व्याधिशोकेन पीड़िताः ।
अनावृष्टिहताश्चैव परस्परवधेन च ॥३९२॥
अनाथा हि परित्रस्ता वार्त्तामुत्सृज्य दुःखिताः ।
त्यक्त्वा पुराणि ग्रामांश्च भविष्यन्ति वनौकसः ॥३९३॥
एवं नृपेषु नष्टेषु प्रजास्त्यक्त्वा गृहाणि तु ।
नष्टे स्नेहे दुरापन्ना भ्रष्टस्नेहाः सुहृज्जनाः ॥३९४॥
वर्णाश्रमपरिभ्रष्टाः सङ्करं घोरमास्थिताः ।
सरित्पर्वतसेविन्यो भविष्यन्ति प्रजास्तदा ॥३९५॥
सरितः सागरानूपान् सेवन्ते पर्वतानि च ।
अङ्गान् कलिङ्गान् वङ्गांश्च काश्मीरान् काशिकोशलान् ॥३९६॥
ऋषिकान्तगिरिद्रोणीः संश्रयिष्यन्ति मानवाः ।
कृत्स्नं हिमवतः पृष्ठं कूलं च लवणाम्भसः ॥३९७॥
अरण्यान्यभिपत्स्यन्ति आर्य्या म्लेच्छजनैः सह ।
मृगैर्मीनैर्विहङ्गैश्च श्वापदैस्तचुभि[३] स्तथा ।
मधुशाकफलैर्मूलैर्वर्त्तयिष्यन्ति मानवाः ॥३९८॥

---

(१) कलिनोपहता इति पाठः सुसङ्गतः ।
(२) नृपास्ते इति पाठः सङ्गतार्थः परत्र तथादर्शनात् ।
(३) तच्चकैः अथवा ऋत्त्वकैरितिपाठोऽर्थप्रतिपत्तिकरः ।

चीरं पर्णञ्च विविधं वल्कलान्यजिनानि च।
स्वयं कृत्वा विवत्स्यन्ति यथा मुनिजनास्तथा॥३९९॥
वीजान्नानि तथा निम्नेस्वीहन्तः काष्ठशङ्कुभिः।
अजैडकं खरोष्ट्रञ्च पालयिष्यन्ति यत्नतः॥४००॥
नदीर्वत्स्यन्ति तोयार्थं कूलमाश्रित्य मानवाः।
पार्थिवान् व्यवहारेण विबाधन्तः परस्परं॥४०१॥
बहुमन्याः प्रजाहीनाः शौचाचारविवर्जिताः।
एवं भविष्यन्ति नरास्तदाधर्म्मे व्यवस्थिताः॥४०२॥
हीनात् हीनान् तथा धर्मान् प्रजा समनुवर्त्तते।
आयु[१]स्तदा त्रयोविंशं न कश्चिदतिवर्तते॥४०३॥
दुर्बला विषयम्लाना जरया संपरिप्लुताः।
पत्रमूलफलाहाराः चीरकृष्णाजिनाम्बराः॥४०४॥
वृत्त्यर्थमभिलिप्सन्तश्चरिष्यन्ति वसुन्धरां।
एतत्काल[२]मनुप्राप्ताः प्रजाः कलियुगान्तके॥४०५॥
क्षीणे कलियुगे तस्मिन् दिव्ये वर्षसहस्रके।
निःशेषास्तु भविष्यन्ति सार्द्धं कलियुगेन तु।
ससन्ध्यांशे तु निःशेषे कृतं वै प्रतिपत्स्यते॥४०६॥
यदा चन्द्रश्च सूर्य्यश्च तथा तिष्यबृहस्पती।
एकराशे भविष्यन्ति तदा कृतयुगं भवेत्॥४०७॥
एष वंशक्रमः कृत्स्नं कीर्त्तितो वो यथाक्रमं।

---

(१) आयुरित्यत्र बहुत्वे एकवचनमार्षं।
(२) एतत्कालं एतदवस्थामित्यर्थः।

अतीता वर्त्तमानाश्च तथैवानागताश्च ये ॥४०८॥
महादेवाभिषेकात्तु जन्म यावत्परिक्षितः ।
एतद्वर्षसहस्रन्तु ज्ञेयं पञ्चाशदुत्तरं ॥४०९॥
प्रमाणं वै तथा चोक्तं[१] महापद्मान्तरं च यत् ।
अन्तरं तच्छतान्यष्टौ षट्त्रिंशच्च समाः स्मृताः ॥४१०॥
एतत्कालान्तरं भाव्या अन्ध्रान्ता ये प्रकीर्त्तिताः ।
भविष्यैस्तत्र सङ्ख्याताः पुराणज्ञैः श्रुतर्षिभिः ॥४११॥
सप्तर्षयस्तदा प्राहुः प्रतीपे राज्ञि वै शतं ।
सप्तविंशैः शतैर्भाव्या अन्ध्राणां ते[२] त्वया[३] पुनः ॥४१२॥
सप्तविंशतिपर्य्यन्ते कृत्स्ने नक्षत्रमण्डले ।
सप्तर्षयस्तु तिष्ठन्ति पर्य्यायेण शतं शतं ।
सप्तर्षीणां युगं ह्येतद्दिव्यया सङ्ख्यया स्मृतं ॥४१३॥
मासा दिव्या स्मृता षष्टिर्दिव्याह्नाश्चैव सप्तभिः[४] ।
तेभ्यः[५] प्रवर्त्तते कालो दिव्यः सप्तर्षिभिस्तु तैः ॥४१४॥
सप्तर्षीणान्तु ये पूर्वा दृश्यन्ते उत्तरादिशि ।
ततो मध्येन च क्षेत्रं दृश्यते यत्समं दिवि ॥४१५॥
तेन सप्तर्षयो युक्ता ज्ञेया व्योम्नि शतं समाः ।
नक्षत्राणामृषीणाञ्च योगस्यैतन्निदर्शनं ॥४१६॥

---

(१) वक्तमिति च० छ० ज० ।
(२) अन्ध्रान्तास्ते इति पाठः साधुः ।
(३) तदा इति पाठः सङ्गतः ।
(४) षष्टिर्दिव्याह्नाश्चैव सप्तभिरिति पाठो न समीचीनः ।
(५) तदा इति पाठः साधुः ।

सप्तर्षयो मघायुक्ताः काले पारिक्षिते शतं ।
अन्धांशे सचतुर्व्विंशे भविष्यन्ति मते मम ॥४१७॥
इमास्तदा तु प्रकृतिर्व्यापत्स्यन्ति प्रजा भृशं ।
अनृतोपहताः सर्वा धर्मतः कामतोऽर्थतः ॥४१८॥
श्रौतस्मार्त्ते प्रशिथिले धर्म्मे वर्णाश्रमे तदा ।
सङ्करं दुर्बलात्मानः प्रतिपत्स्यन्ति मोहिताः ॥४१९॥
संसक्ताश्च भविष्यन्ति शूद्राः सार्द्धं द्विजातिभिः ।
ब्राह्मणाः शूद्रयष्टारः शूद्रा वै मन्त्रयोनयः ॥४२०॥
उपस्थास्यन्ति तान् विप्रास्तदा वै वृत्तिलिप्सवः ।
लवं लवं भ्रस्यमानाः प्रजाः सर्वाः क्रमेण तु ॥४२१॥
क्षयमेव गमिष्यन्ति क्षीणशेषा युगक्षये ।
यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदा दिने ॥४२२॥
प्रतिपन्नः कलियुगस्तस्य सङ्ख्यां निबोधत ।
सहस्राणां शतानीह त्रीणि मानुषसङ्ख्यया ।
षष्टिं चैव सहस्राणि वर्षाणामुच्यते कलिः ॥४२३॥
दिव्ये वर्षसहस्रन्तु तत्सन्ध्यांशं(१) प्रकीर्त्तितं ।
निःशेषे च तदा तस्मिन् कृतं वै प्रतिपत्स्यते ॥४२४॥
ऐल इक्ष्वाकुवंशश्च सह भेदैः प्रकीर्त्तितौ ।
इक्ष्वाकोस्तु स्मृतः क्षत्रः सुमित्रान्तं विवस्वतः ॥४२५॥
ऐलं क्षत्रं क्षेमकान्तं सोमवंशविदो विदुः ।

---

(१) दिव्यवर्षसहस्रन्तु ससन्ध्यांशं इति पाठः साधीयान् ।

एते विवस्वतः पुत्राः कीर्त्तिताः कीर्त्तिवर्द्धनाः ॥४२६॥
अतीता वर्त्तमानाश्च तथैवानागताश्च ये ।
ब्राह्मणाः क्षत्रिया वैश्या शूद्राश्चैवान्वये स्मृताः ॥४२७॥
युगे युगे महात्मानः समतीताः सहस्रशः ।
बहुत्वान्नामधेयानां परिसंख्या(१) कुले कुले ॥४२८॥
पुनरुक्ता बहुत्वाच्च न मया परिकीर्त्तिता(२) ।
वैवस्वतेऽन्तरे ह्यस्मिन् निमिवंशः समाप्यते ॥४२९॥
एवायान्तु(३) युगाख्यायां यतः क्षत्रं प्रपत्स्यते ।
तथा हि कथयिष्यामि गदतो मे निबोधत ॥४३०॥
देवापिः पौरवो राजा इक्ष्वाकोश्चैव यो मतः ।
महायोगबलोपेतः कलापग्राममास्थितः ॥४३१॥
सुवर्च्चा सोमपुत्रस्तु इक्ष्वाकोस्तु भविष्यति ।
एतौ क्षत्रप्रणेतारौ चतुर्व्विंशे चतुर्युगे ॥४३२॥
न च विंशे युगे सोमवंशस्यादिर्भविष्यति ।
देवापिरसपत्नस्तु ऐलादिर्भविता नृपः ॥४३३॥
क्षत्रप्रावर्त्तकौ ह्येतौ भविष्येते चतुर्युगे ।
एवं सर्वत्र विज्ञेयं सन्तानार्थे तु लक्षणं ॥४३४॥
क्षीणे कलियुगे तस्मिन् भविष्ये तु कृते युगे ।
सप्तर्षिभिस्तु तैः सार्द्धमाद्ये त्रेतायुगे पुनः ॥४३५॥

---

(१) कतिपया इत्यूहनीयं ।
(२) सर्व्वा सङ्ख्या इत्यूह्यं ।
(३) एष्मायामिति च०, एप्यायामिति क्ष० ।

गोत्राणां क्षत्रियाणाञ्च भविष्येते प्रवर्त्तकौ।
द्वापरांशे न तिष्ठन्ति क्षत्रिया ऋषिभिः सह ॥४३६॥
काले कृतयुगे चैव क्षीणे त्रेतायुगे पुनः।
वीजार्थन्ते भविष्यन्ति ब्रह्मक्षत्रस्य वै पुनः ॥४३७॥
एवमेव तु सर्वेषु तिष्ठन्तीहान्तरेषु वै।
सप्तर्षयो नृपैः सार्द्धं सन्तानार्थं युगे युगे॥४३८॥
क्षत्रस्येव समुच्छेदः सम्बन्धो वै द्विजैः स्मृतः(१)।
मन्वन्तराणां सप्तानां सन्तानाश्च श्रुताश्च ते ॥४३९॥
परम्परा युगानाञ्च ब्रह्मक्षत्रस्य चोद्भवः।
यथा प्रवृत्तिस्तेषां वै प्रवृत्तानां तथा क्षयः ॥४४०॥
सप्तर्षयो विदुस्तेषां दीर्घपुष्ट्वात्क्षयन्तु(२) ते।
एतेन क्रमयोगेन ऐलेच्वाकन्वया द्विजाः ॥४४१॥
उत्पद्यमानास्त्रेतायां क्षीयमाणे कलौ पुनः।
अनुयान्ति युगाख्यां तु(३) यावन्मन्वन्तरक्षयः ॥४४२॥
जामदग्न्येन रामेण क्षत्रे निरवशेषिते।
कृते वंशकुलाः सर्वाः क्षत्रियैर्वसुधाधिपैः(४)।
द्विवंशकरणास्चैव कीर्त्तयिष्ये निबोधत ॥४४३॥
ऐलस्येच्वाकुनन्दस्य प्रकृतिः परिवर्त्तते।

---

(१) क्षत्रस्यैव इति श्लोकार्द्धात् परं श्लोकार्द्धं पतितं साकाङ्क्षत्वात्। स्मृत इत्यत्र सह इति पाठः सुसङ्गतः।
(२) दीर्घायुष्वात्क्षयमिति ख०।
(३) प्रतियुगमिति पाठः सङ्गतार्थः।
(४) कृते ध्वस्तकुलाः सर्व्व क्षत्रिया वसुधाधिपाः इति पाठो विशुद्धः।

राजानः श्रेणिबद्धास्तु तथान्ये क्षत्रिया नृपाः ॥४४४॥
ऐलवंशस्य ये ख्यातास्तथैवैक्ष्वाकवा नृपाः ।
तेषामेकशतं पूर्णं कुलानामभिषेकिनां ॥४४५॥
तावदेव तु भोजानां[१] विस्तरो द्विगुणः स्मृतः ।
भजते त्रिंशकं क्षत्रं चतुर्था तद्यथादिशं[२] ॥४४६॥
तेष्वतीताः समाना ये ब्रुवतस्तान्निबोधतः ।
शतं वै प्रतिविन्ध्यानां शतं नागाः शतं हयाः ॥४४७॥
धृतराष्ट्राश्चैकशतं अशीतिर्जनमेजयाः ।
शतञ्च ब्रह्मदत्तानां शीरिणां वीरिणां शतं ॥४४८॥
ततः शतं पुलोमानां श्वेतकाशकुशादयः ।
ततोऽपरे सहस्रं वै येऽतीताः शतविन्दवः ॥४४९॥
ईजिरे चाश्वमेधैस्ते सर्वे नियुतदक्षिणैः ।
एवं राजर्षयोऽतीताः शतशोऽथ सहस्रशः ॥४५०॥
मनोर्वैवस्वतस्यास्मिन् वर्त्तमानेऽन्तरे तु ये ।
तेषां[३] निबोधतोत्पन्ना लोके सन्ततयः स्मृताः[४] ॥४५१॥
न शक्यं विस्तरं तेषां सन्तानानां परम्परा ।
तत्पूर्व्वापरयोगेन वक्तुं वर्षशतैरपि ॥४५२॥
अष्टाविंशद्युगाख्या[५]स्तु गता वैवस्वतेऽन्तरे ।

---

(१) भोजानामित्यनन्तरं कतिपयवाक्यानि न सन्ति सङ्गतिविरहात् ।
(२) भजते इत्यादि श्लोकार्द्धं लिपिकरप्रमादजनितं ।
(३) तेषामिति पञ्चम्यर्थे षष्ठी ।
(४) स्मृता इत्यत्र द्विजा इति पाठः ससङ्गतः ।
(५) अष्टाविंशद्युगाख्या इत्यत्र सप्तविंशद्युगाख्या इति पाठोऽविरुद्धः ।

एता राजर्षिभिः सार्द्धं शिष्टा यास्ता निबोधत ॥४५३॥
चत्वारिंशच्च ये चैव भविष्या सह राजभिः ।
युगाख्यानां विशिष्टास्तु ततो वैवस्वतक्षये ॥४५४॥
एतद्वः कथितं सर्व्वं समासव्यासयोगतः ।
पुनरुक्तं बहुत्वाच्च न शक्यन्तु युगैः सह ॥४५५॥
एते ययातिपुत्राणां पञ्चविंशा विशां स्थिताः[१] ।
कीर्त्तिस्वामितता[२] ये ये लोकान् वै धारयन्त्युत ॥४५६॥
लभते च वरेण्यञ्च दुर्लभानिह लौकिकान् ।
आयुः कीर्त्तिं धनं पुत्रान् स्वर्गं चानन्त्यमश्नुते ॥४५७॥
धारणाच्छ्रवणाच्चैव ते लोकान् धारयन्त्युत[३] ।
इत्येष वो मया पादस्तृतीयः कथितो द्विजाः ।
विस्तरेणानुपूर्व्वी च किम्भूयो वर्त्तयाम्यहं ॥४५८॥

इति श्रीमहापुराणे वायुप्रोक्ते अनुषङ्गपादो नाम
सप्तत्रिंशोऽध्यायः समाप्तः ।

---

(१) हि संहिताः इति क०, स्थितास्तथा इति ख० ।
(२) कीर्त्तिस्वाभिमता इति पाठः समीचीनः ।
(३) पञ्चविंशस्य धीमतः इति ख०, च०, छ० ।

अथाष्टात्रिंशोऽध्यायः ।

अनुषङ्गपादः ।

श्रुत्वा पादं तृतीयन्तु क्रान्तं सूतेन धीमता ।
ततस्तुर्थं पप्रच्छुः पादं वै ऋषिसत्तमाः ॥१॥
ऋषय ऊचुः । पादः क्रान्तस्तृतीयोऽयमनुषङ्गेन यस्त्वया ।
चतुर्थं विस्तरात्पादं संहारं परिकीर्त्तय ॥२॥
मन्वन्तराणि सर्वाणि पूर्वाण्येवापरैः सह ।
सप्तर्षीणामथैतेषां साम्प्रतस्यान्तरे मनोः ॥३॥
विस्तरावयवञ्चैव निसर्गस्य महात्मनः ।
विस्तरेणानुपूर्व्या च सर्वमेव ब्रवीहि मे ॥४॥
सूत उवाच। भवतां कथयिष्यामि सर्वमेतद्यथातथं ।
पादं त्विमं ससंहारं चतुर्थं मुनिसत्तमाः ॥५॥
मनोर्वैवस्वतस्येमं सांप्रतस्य महात्मनः ।
विस्तरेणानुपूर्व्या च निसर्गं शृणुत द्विजाः ॥६॥
मन्वन्तराणां संक्षेपं भविष्यैः सह सप्तभिः ।
प्रलयञ्चैव लोकानां ब्रुवतो मे निबोधत ॥७॥
एतान्युक्तानि वै सम्यक् सप्तसप्तसु वै मया ।
मन्वन्तराणि संक्षेपात् शृणुतानागतानि मे ॥८॥
सावर्णस्य प्रवक्ष्यामि मनोर्वैवस्वतस्य ह ।

भविष्यस्य भविष्यन्ति[१] समासात्तु निबोधत ॥९॥
अनागताश्च सप्तैव स्मृतास्त्विह महर्षयः।
कौशिको गालवश्चैव जामदग्न्यश्च भार्गवः ॥१०॥
द्वैपायनो वसिष्ठश्च कृपः[२] शारद्वतस्तथा।
आत्रेयो दीप्तिमांश्चैव ऋष्यशृङ्गस्तु काश्यपः॥११॥
भारद्वाजस्तथा द्रौणिरश्वत्थामा महायशाः।
एते सप्त महात्मानो भविष्याः परमर्षयः ॥१२॥
सुतपाश्चामिताभाश्च सुखाश्चैव गणास्त्रयः।
तेषाङ्गणास्तु देवानां एकैको विंशकः स्मृतः॥१३॥
नामतस्तु प्रवक्ष्यामि निबोधध्वं समाहिताः।
रितस्तपश्च शुक्रश्च द्युतिर्ज्योतिःप्रभाकरौ ॥१४॥
प्रभासो भासकृद्धर्मस्तेजोरश्मिर्ऋतुर्विराट्।
अर्चिष्मान् द्योतनो भानुर्यशः कीर्तिर्बुधोधृतिः।
विंशतिः सुतपा ह्येते नामभिः परिकीर्तिताः॥१५॥
प्रभुर्विभुर्विभासश्च जेता हन्ताऽरिहा रितुः[३]।
सुमतिः प्रमतिर्दीप्तिः[४] समाख्यातो महोमहान्[५] ॥१६॥
देहो मुनिर्नयो ज्येष्ठः[६] समः सत्यश्च विश्रुतः।

---

(१) ये इति कल्पपदमूहनीयं।
(२) रूप इति क० छ०, कृत इति ख०।
(३) विभावसुरिति ख०।
(४) दीप्तः इति क०, दाप्तिः इति च० छ०।
(५) मतोमहान् इति ख०।
(६) दहातुमुनिनायोच्छे इति क० छ०।

इत्येते ह्यमिताभास्तु विंशतिः परिकीर्त्तिताः ॥१७॥
दमो[१] दाता विदः[२] सोमो वित्तवैद्यौ यमो[३] निधिः ।
होमं हव्यं हुतं दानं देयन्दाता तपः शमः ॥१८॥
ध्रुवं स्थानं विधानञ्च नियमश्चेति विंशतिः ।
मुख्या ह्येते समाख्याताः सावर्णे प्रथमेऽन्तरे ॥१९॥
मारीचस्यैव ते पुत्रा कश्यपस्य महात्मनः ।
साम्प्रतस्य[४] भविष्यन्ति सावर्णस्यान्तरे मनोः ॥२०॥
तेषामिन्द्रो भविष्यस्तु बलिर्वैरोचनः पुरा ।
वीरवांश्चावरीयांश्च निर्मोहः सत्यवाक् कृती ॥२१॥
चरिष्णुराज्यो विष्णुश्च वाचः[५] सुमतिरेव च ।
सावर्णस्य मनोः पुत्रा भविष्यन्ति नवैव तु ॥२२॥
नव चान्येषु वक्ष्यामि सावर्णस्यान्तरेषु वै ।
सावर्णमनवश्चान्ये भविष्या ब्राह्मणः सुताः ॥२३॥
मेरुसावर्णिनस्ते वै दृष्टा ये दिव्यदृष्टिभिः ।
दक्षस्य ते हि दौहित्राः प्रियाया दुहितुः सुताः ॥२४॥
महता तपसा युक्ता मेरुपृष्ठे महौजसः ।
ब्रह्मादिभिस्ते जनिता दक्षेणैव च धीमता ॥२५॥
महर्लोकगतात्त्य[६] भविष्या मेरुमाश्रिताः ।

---

(१) दामो इति क० ।
(२) रितः इति च० छ० ।
(३) नयो इति ख० ।
(४) भविष्यस्य इति पाठोऽविरुद्धः ।
(५) वाग्मीति पाठो विशुद्धः ।
(६) महर्लोकगतात्त्य इत्यत्र विसर्गलोपे सन्धिरार्षः ।

महाभावान्तु[१] ते पूर्वं जज्ञिरे चाक्षुषेऽन्तरे ॥२६॥

ऋषय ऊचुः । दक्षेण जनिताः पुत्राः कन्यायामात्मनः कथं ।
भवेत ब्रह्मणश्चैव धर्मेण च महात्मनः ॥२७॥

सूत उवाच । अतो भविष्यान् वक्ष्यामि सावर्णमनवस्तु ये ।
तेषां जन्म प्रभावञ्च नमस्कृत्य प्रचेतसे[२] ॥२८॥
वैवस्वते ह्युपसृष्टे किञ्चिच्छिष्टे च चाक्षुषे ।
जज्ञिरे मनवस्ते हि भविष्यानागतान्तरे[३] ॥२९॥
प्राचेतसस्य दक्षस्य दौहित्रा मनवस्तु ये ।
सावर्णा नामतः पञ्च चत्वारः परमर्षिजाः[४] ॥३०॥
संज्ञापुत्रस्तु सावर्ण एको वैवस्वतस्तथा ।
ज्येष्ठः संज्ञासुतो नाम मनुर्वैवस्वतः प्रभुः ॥३१॥
वैवस्वतेऽन्तरे प्राप्ते[५] समुत्पत्तिस्तयोः शुभा ।
चतुर्दशैते मनवः कीर्त्तिताः कीर्त्तिवर्द्धनाः ॥ ३२॥
वेदे श्रुतौ पुराणे च सर्वे ते प्रभविष्णवः ।
प्रजानां पतयः सर्वे भूतानाम्पतयः स्थिताः ॥३३॥
तैरियं पृथिवी सर्वा सप्तद्वीपा सपर्वता ।
पूर्णं युगसहस्रं वै परिपाल्या नरेश्वरैः ॥३४॥
प्रजाभिस्तपसा चैव विस्तरं तेषु वक्ष्यते ।
चतुर्द्दशैव ते ज्ञेयाः सर्गाः स्वायम्भुवादयः ॥३५॥

---

(१) महाभागाश्च इति ख० ।
(२) स्वयम्भुवे इति ग० ।
(३) भविष्यविगतान्तरे इति पाठः साधुः ।
(४) परमर्षयः इति पाठः साधीयान् ।
(५) प्रोक्ता इति ख० ।

मन्वन्तराधिकारेषु वर्त्तन्ते च सकृत् सकृत् ।
विनिवृत्ताधिकारास्ते महर्ल्लोकं समाश्रिताः ॥३६॥
समतीतास्तु ये तेषामष्टौ षष्ठा[१] स्तथापरे ।
पूर्वेषु[२] साम्प्रतस्त्वायं शान्तिर्वैवस्वतः प्रभुः ॥३७॥
ये शिष्टास्तान् प्रवक्ष्यामि सह देवर्षिदानवैः ।
सह प्रजानिसर्गेण सर्व्वांस्त्वनागतान्[३] द्विजान् ॥३८॥
वैवस्वतनिसर्गेण तेषां ज्ञेयस्तु विस्तरः ।
अन्यूना नातिरिक्तास्ते यस्मात् सर्व्वे विवस्वतः ॥३९॥
पुनरुक्ता बहुत्वात्तु[४] वक्ष्ये न तेषु विस्तरं ।
मन्वन्तरेषु भाव्येषु भूतेष्वपि तथैव च ॥४०॥
कुले कुले निसर्गांस्तु तस्माद्भूयो विभागशः ।
तेषामेव हि शिष्टार्थं[५] विस्तरेण क्रमेण च ॥४१॥
दक्षस्य कन्या धर्मिष्ठा सुव्रता नाम विश्रुता ।
सर्वकन्यावशिष्टा तु श्रेष्ठा[६] धर्मपरा[७]सुता ।
गृहीत्वा तां पिता कन्यां जगाम ब्रह्मणोऽन्तिके ॥४२॥
वैराजस्तमुपासीनं धर्मेण च भवेन च ।

---

(१) षड्वै इति पाठः साधुः ।
(२) पूर्व्वे षट् इति पाठोऽर्थप्रतिपत्तिकरः ।
(३) सर्व्वस्यानगतान् इति ख० ।
(४) पुनरुक्ते वहुत्वे तु इति ग० ।
(५) सिद्धार्थमिति च० छ० ।
(६) सर्व्वकन्या च शिष्टा च श्रेष्ठा इति छ० ज० ।
(७) पार्चारिणा इति क० ज०, सर्व्वकन्या च शिष्टास्तु ज्येष्ठा या वारणा इति च० ।

भवधर्मसमीपस्थं दक्षं ब्रह्माभ्यभाषत ॥४३॥
दक्ष कन्या तवेयं वै जनयिष्यति सुव्रता।
चतुरो वै मनून् पुत्रांश्चातुर्वर्ण्यकरान् शुभान् ॥४४॥
ब्रह्मणो वचनं श्रुत्वा दक्षो धर्मो भवस्तदा।
तां कन्यां मनसा जग्मुस्त्रयस्ते ब्रह्मणा सह ॥४५॥
सत्याभिध्यायिनां तेषां सद्यः कन्या व्यजायत।
सदृशानुरूपांस्तेषां चतुरो वै कुमारकान् ॥४६॥
संसिद्धाः कार्यकरणे सम्भूतास्ते श्रियान्विताः।
उपभोगसमर्थैश्च सद्योजातैः शरीरकैः ॥४७॥
ते दृष्ट्वा तान् स्वयम्बुद्ध्वा ब्रह्म व्याहारिणस्तदा।
संरब्धा वै व्यकर्षन्त मम पुत्रो ममेत्युत ॥४८॥
अभिध्यानान्मनोत्पन्नानूचुर्वै ते परस्परं।
यो यस्य वपुषा तुल्यो भजतां स तु तं सुतं ॥४९॥
यस्य यः सदृशश्चापि रूपे वीर्ये च नामतः।
तं गृह्णातु सुभद्रं वो वर्णतो यस्य यः समः ॥५०॥
ध्रुवं रूपं पितुः पुत्रः सोऽनुरुध्यति सर्वदा।
तस्मादात्मसमः पुत्रः पितुर्मातुश्च जायते(१) ॥५१॥
एवं ते समयं कृत्वा सवर्णान् जगृहुः सुतान्।
यस्मात् सवर्णास्तेषां वै ब्रह्मादीनां कुमारकाः ॥५२॥
सवर्णा मनवस्तस्मात् सवर्णत्वं हि ते यतः(२)।
मननान्माननाच्चैव तस्मात्ते मनवः स्मृताः ॥५३॥

---

(१) वीर्य्यतः इति च०।
(२) कथ्यन्ते ते मनीषिभिरिति पाठः साधुः।

चाक्षुषस्यान्तरेऽतीते प्राप्ते वैवस्वतस्य ह ।
रुचेः प्रजापतेः पुत्रो रौच्यो नामाभवत्सुतः ॥५४॥
भूत्यामुत्पादितो यस्तु भौत्यो नामाभवत् सुतः ।
वैवस्वतेऽन्तरे राजा द्वौ मनू तु विवस्वतः ॥५५॥
वैवस्वतो मनुर्यश्च सावर्णो यश्च विश्रुतः ।
ज्येष्ठः संज्ञासुतो विद्वान् मनुर्वैवस्वतः प्रभुः ॥५६॥
सवर्णायाः सुतश्चान्यः स्मृतो वैवस्वतो(१) मनुः ।
सवर्णा मनवो ये च चत्वारस्तु महर्षिजाः ॥५७॥
तपसा सम्भृतात्मानः स्वेषु मन्वन्तरेषु वै ।
भविष्येषु भविष्यन्ति सर्वकार्यार्थसाधकाः ॥५८॥
प्रथमं मेरुसावर्णेर्दक्षपुत्रस्य वै मनोः ।
पुत्रा(२) मरीचिगर्भाश्च सुशर्माणश्च ते त्रयः ।
सम्भूताश्च(३) महात्मानः सर्वे वैवस्वतेऽन्तरे ॥५९॥
दक्षपुत्रस्य पुत्रास्ते रोहितस्य प्रजापतेः ।
भविष्यस्य भविष्यस्तु एकैको द्वादशो गणः(४) ॥६०॥
ऐश्वर्यसंग्राह्यो राह्यो(५) बाहुवंशस्तथैव च(६) ।
पारा द्वादश विज्ञेया उत्तरांस्तु निबोधत ॥६१॥

---

(१) सावर्णिको इति पाठः साधुः ।
(२) पारा इति पाठः समीचीनः परत्र तथादर्शनात् ।
(३) सम्भृताश्चेति ख० छ० ।
(४) एकैका मनवो गणा इति छ० ।
(५) रैव्यो इति ख० च० ।
(६) इतः परं श्लोकार्द्धं पतितं ।

वाजियो[१] वाजिजिच्चैव प्रभूतिश्च ककुद्यथ ।
दधिक्रावायपक्वाश्च[२] प्रणीतो विजयो मधुः ॥६२॥
तेजस्वान्नथवो[३] द्वौ तु[४] द्वादशैते मरीचयः ।
सुशर्म्माणस्तु वक्ष्यामि नामतस्तु निबोधत ॥६३॥
वर्णस्तथाप्यङ्गविश्वौ[५] सुरण्यो व्रजनो मतः ।
अमितो[६] द्रवकेतुश्च जम्भोस्त्वाजस्तशक्रकाः ॥६४॥
सुनेमिर्द्युतपाश्चैव सुशर्माणः प्रकीर्त्तिताः ।
तेषामिन्द्रस्तदा भाव्यो अद्भुतो नाम नामतः ॥६५॥
स्कन्दः सोमप्रतीकाशः[७] कार्तिकेयस्तु पावकः[८] ।
माघा[९] तिथिश्च पौलस्त्यो वसुः काश्यप एव च ॥६६॥
ज्योतिष्मान् भार्गवश्चैव द्युतिमानङ्गिरास्तथा ।
वसितश्चैव वासिष्ठ आत्रेयो हव्यवाहनः ॥६७॥
सुतपाः पौलवश्चैव सप्तैते रोहितान्तरे ।
धृतिकेतुर्दीप्तिकेतुश्चापहस्तो निरामयः ॥६८॥

---

(१) वाजिनो इति क्०, वाजिपो इति ख० ।
(२) दधिक्वे दधिपच्चा इति इति ग०, दधिक्रावपिपक्वाश्च इति च०ङ० ।
(३) अयं पाठो न समीचीनः ।
(४) उन्मथ्यः प्रथितश्चैव इति ग० ।
(५) वर्णास्तथाथ गर्व्विश्च इति ख० च०, वर्णास्तथाथ गर्व्विश्च इति ङ० ज० ।
(६) आमित इति ङ० ज०, आमित्र इति ख० ग० ।
(७) स्कन्दो सौमां प्रतीयो वै इति क० च० ङ० ज० ।
(८) पावकिः इति क० च० ङ० ज० ।
(९) मघा इति ग० च० ङ० ।

पृथुश्रवास्तथा नाको(१) भूरिद्युम्नो बृहद्रथः(२)।
प्रथमस्य तु सावर्णेर्नव पुत्राः प्रकीर्त्तिताः॥६९॥
दशमे त्वथ पर्याये धर्मपुत्रस्य वै मनोः।
द्वितीयस्य तु सावर्णेर्भाव्यस्यैवान्तरे मनोः(३)॥७०॥
सुखामना(४) विरुद्धाश्च द्वावेव तु गणौ स्मृतौ।
त्विषिवन्तश्च(५) ते सर्वे शतसङ्ख्याश्च ते समाः॥७१॥
प्राणानायच्छतः प्रोक्ताः(६) ऋषिभिः पुरुषेषु वै(७)।
देवास्ते वै भविष्यन्ति धर्मपुत्रस्य वै मनोः॥७२॥
तेषामिन्द्रस्तथा विद्वान् भविष्यः शान्तिरुच्यते।
हविष्मान् पौलहः श्रीमान् सुकीर्त्तिश्चापि भार्गवः॥७३॥
आपोमूर्त्तिस्तथात्रेयो वसिष्ठश्चापि यः स्मृतः।
पौलस्त्यः प्रतिपश्चापि(८) नाभागश्चैव काश्यपः।
अभिमन्यु(९) श्चाङ्गिरसः सप्तैते परमर्षयः॥७४॥
सुक्षेत्रश्चोत्तमौजाश्च भूरिषेणश्च वीर्यवान्।
शतानीको निरामित्रो वृषसेनो जयद्रथः॥७५॥

---

(१) नीको इति ख० छ०।
(२) बृहत्तप इति ख०।
(३) मनोरिति पाठो न समीचीनः।
(४) सुखमनो इति च०, सुखवर्णा इति ख० ग०।
(५) त्विषावन्त इति पाठो विशुद्धः।
(६) प्राणानां यच्छृतं प्रोक्तमिति ख० च० छ०।
(७) पुरुषेऽन्तरे इति ख०।
(८) प्रतिषश्चापि इति ङ० च०
(९) अभ्यमन्युरिति छ०, अत्यमन्युरिति ज०।

भूरिद्युम्नः सुवर्चाश्च[1] दशैते मानवाः स्मृताः ।
एकादशे तु पर्य्याये सावर्णे वै तृतीयके ॥७६॥
निर्म्माणरतयो देवाः कामजा वै मनोजवाः ।
गणास्त्वेते त्रयः ख्याता देवतानां महात्मनां ॥७७॥
एकैकं त्रिंशतस्तेषां गणास्तु त्रिदिवौकसां ।
मासस्याहानि त्रिंशन्तु यानि वै कवयो विदुः ॥७८॥
निर्म्माणरतयो देवा रात्रयस्तु विहङ्गमाः ।
गणास्ते वै त्रयः प्रोक्ता देवतानां भविष्यति ॥७९॥
मनोजवा मुहूर्त्तास्तु इति देवाः प्रकीर्त्तिताः ।
एते हि ब्रह्मणः पुत्रा भविष्या मनवः स्मृताः ॥८०॥
तेषामिन्द्रो वृषो नाम भविष्यः सुरराट् ततः ।
तेषां सप्तर्षयश्चापि कीर्त्त्यमानान्निबोधत ॥८१॥
हविष्मान् काश्यपश्चापि वपुष्मान् यश्च भार्गवः ।
वारुणिश्चैव चात्रेयो वासिष्ठो भग[2] एव च ॥८२॥
पुष्टि[3]श्चाङ्गिरसो ज्ञेयः पौलस्त्यो निश्चरस्तथा ।
पौलहो ह्यग्नितेजाश्च देवा ह्येकादशेऽन्तरे ॥८३॥
सर्व्वेगः[4] सुधर्म्मा च देवानीकः पुरोवहः ।
क्षेमधर्मा गृहेषुश्च आदर्शः पौण्ड्रको मतः ॥८४॥

---

(१) सुवर्णाश्च इति क० ।
(२) नग इति च० छ० ।
(३) मुष्टिरिति ङ० ख० ।
(४) सर्व्वत्रग इति ङ० च० ।

सावर्णस्य तु ते पुत्राः प्राजापत्यस्य वै मनोः ।
द्वादशे त्वथ पर्याये रुद्रपुत्रस्य वै मनोः ॥८५॥
चतुर्थे ऋतुसावर्णे देवास्तस्यान्तरे शृणु ।
पञ्चैव तु गणाः प्रोक्ता देवतानामनागताः ॥८६॥
हरिता रोहिताश्चैव देवाः सुमनसस्तथा ।
सुकर्म्माणः सुपाराश्च पञ्च देवगणाः स्मृताः ॥८७॥
ब्रह्मणो मानसा ह्येते एकैको दशको गणः ।
अरुन्तिजो[१] हरिश्चैव विद्वान् यश्च[२] सहस्रशः ॥८८॥
पर्वतानुचरश्चैव अपोऽंशुश्च[३] मनोजवः ।
ऊर्ज्जा स्वाहा स्वधा तारा दशैते हरिताः स्मृताः ॥८९॥
तपोजानिर्म्मतिश्चैव वाचा बन्धुश्च यः स्मृतः ।
रजश्चैव तु राजश्च स्वर्णपादस्तथैव च ॥९०॥
व्युष्टिर्विधिश्च वै देवो दशैते रोहिताः स्मृताः ।
तुषिताद्यास्तु ये देवास्त्रयस्त्रिंशत् प्रकीर्तिताः ॥९१॥
देवान् सुमनसो विद्धि सुकर्माणो निबोधत ।
सुपर्वा वृषभः पृष्टः कपिद्युम्नो विपश्चितः ॥९२॥
विक्रमश्च क्रमश्चैव निभृतः कान्त एव च ।
एते सुकर्मणो देवा सुतांश्चैषां[४] निबोधत ॥९३॥

---

(१) अर्व्वान्तिजो इति ङ० च० ।
(२) विद्वांसश्च इति ग० ङ० ज० ।
(३) अप्यंशुश्च इति ङ० ।
(४) स्तेषामिति ख० ।

वर्य्योदित[१] स्तथा जिष्टो वर्चस्वी[२]द्युतिमान् हविः ।
शुभो हविष्कृतात्[३] प्राप्तिर्व्याप्टथो[४] दशमस्तथा ॥९४॥
सुपारा मानता[५] स्त्वेते देवा वै सम्प्रकीर्तिताः ।
तेषामिन्द्रस्तु विज्ञेय ऋतधामा महायशाः ॥९५॥
कृति[६] र्वसिष्ठपुत्रस्तु आत्रेयः सुतपास्तथा ।
तपोमूर्त्तिश्चाङ्गिरसस्तपस्वी काश्यपस्तथा ॥९६॥
तपोऽशयानः पौलस्त्यः पुलहश्च तपोरतिः ।
भार्गवः सप्तमस्त्वेषां विज्ञेयस्तु तपोमतिः[७] ॥९७॥
एते सप्तर्षयः सिद्धा अन्ये सावर्णिकेऽन्तरे ।
देववानुपदेवश्च देवश्रेष्ठो विदूरथः ॥९८॥
मित्रवान्[८] मित्रविन्दुश्च मित्रसेनो ह्यमित्रहा ।
मित्रबाहुः सुवर्चाश्च द्वादशैते[९] मनोः सुताः ॥९९॥
त्रयोदशे तु पर्याये भाव्या रौच्यान्तरे पुनः ।

---

(१) वर्षोदित इति क० ज० ।

(२) वर्षसिः इति ङ० क० ज० ।

(३) हविः कृतः इति पाठो विशुद्धः ।

(४) वाहथ इति ङ० च० क० ।

(५) मामता इति ङ० ज०, मामवा इति क० । अत्र सुपाराश्च गणा इति पाठः साधुः ।

(६) द्युतिरिति ङ० क० ।

(७) तपाद्दतिरिति ङ० च० क०, तपाद्दषिरिति क० ज० ।

(८) मित्रमित्रो इति ङ० च० ।

(९) अत्र द्वादशसंख्याश्रवणात् नाम्नां द्वादशसंख्यकत्वाभावाच्च अस्मात् श्लोकार्द्धात् प्राक् एको द्वौ वा श्लोकः पतितः ।

त्रय एव गणाः प्रोक्ता देवानान्तु स्वयम्भुवा ॥१००॥
ब्रह्मणो मानसाः पुत्रास्ते हि सर्वे महात्मनः ।
सुत्रामाणः सुधर्म्माणः सुकर्माणश्च ते त्रयः ॥१०१॥
त्रिदशानां गणाः प्रोक्ता भविष्याः सोमपायिनः ।
त्रयस्त्रिंशद्देवतायाः प्राभविष्यन्त[१] याज्ञिकैः ॥१०२॥
आज्येन पृषदाज्येन ग्रहश्रेष्ठेन[२] चैव हि[३] ।
देवैर्देवास्त्रयस्त्रिंशत् पृथक्त्वेन निबोधत ॥१०३॥
सुत्रामाणः प्रयाज्यास्तु आद्याज्यास्तु[४] साम्प्रतं ।
सुकर्मणोऽनुयाज्यास्तु पृषदाज्याशिनस्तु ये ॥१०४॥
उपयाज्याः सुधर्माण इति देवाः प्रकीर्तिताः ।
दिवस्पतिर्महासत्वस्तेषामिन्द्रो भविष्यति ॥१०५॥
पुलहात्मजपुत्रास्ते विज्ञेयास्तु रुचेः सुताः ।
अङ्गिराश्चैव धृतिमान् पौलस्त्यः पथ्यवांस्तु[५] सः ॥१०६॥
पौलहस्तत्त्वदर्शी च भार्गवश्च निरुत्सुकः[६] ।
निष्प्रकम्पस्तथात्रेयो निर्मोहः कश्यपस्तथा ॥१०७॥
स्वरूपश्चैव वासिष्ठः सप्तैते तु त्रयोदशे ।

---

(१) प्रविभात इति क० प्रतिभाज्य च इति ख० प्रतिभाष्यत इति ङ०, प्रतिभष्यत इति च० छ० प्रविष्यजा इति ज० ।

(२) ग्रहश्रेष्ठेनेति ङ० च० ।

(३) आर्थेन पृष्ठदोषेन ग्रहप्रष्ठेन वै वह इति क० ज०, आष्टेन पृष दोष्टेन ग्रहसेष्ठन वै वहा इति छ० ।

(४) आद्ये चाज्येन इति पाठो ऽत्र भवितुमर्हति ।

(५) पौलस्त्योपथ्ययास्तु इति ङ० च० ।

(६) निवत्सक इति ग० ।

चित्रसेनो विचित्रश्च तपोधर्मधृतो[१] भवः ॥१०८॥
अनेकक्षत्रबद्धश्च सुरसो निर्भयः पृथः[२]।
रौच्यस्यैते मनोः पुत्रा ह्यन्तरे तु त्रयोदशे ॥१०९॥
चतुर्दशे तु पर्याये भौतस्याप्यन्तरे[३] मनोः।
देवतानाङ्गणाः पञ्च प्रोक्ता ये तु भविष्यति ॥११०॥
चाक्षुषाश्च कनिष्ठाश्च पवित्रा भ्राजरास्तथा।
वाचावृद्धाश्च[४] इत्येते पञ्च देवगणाः स्मृताः ॥१११॥
सप्त तान् तान् भागान् विद्धि चाक्षुषसंज्ञकान्[५]।
वृहदाद्यानि सामानि कनिष्ठान् सप्त तान् विदुः।
सप्त लोकाः पवित्रास्ते भ्राजिराः सप्त सिन्धवः ॥११२॥
वाचावृद्धानृषीन् विद्धि मनोः स्वायम्भुवस्य वै।
सर्वे मन्वन्तरेन्द्राश्च विज्ञेयास्तुल्यलक्षणाः ॥११३॥
तेजसा तपसा बुध्या बलश्रुतपराक्रमैः।
त्रैलोक्ये यानि सत्वानि गतिमन्ति ध्रुवाणि च।
सर्वशः स्वैर्गुणैस्तानि इन्द्रास्तेऽभिभवन्ति वै ॥११४॥
भूतापवादिनो दृष्टा मध्यस्था भूतवादिनः।
भूतानुवादिनः सक्तास्त्रयो वेदाः प्रवादिनां ॥११५॥

---

(१) नयधर्म्मधृत इति ङ० च० छ०।

(२) दृढ़ इति ङ० च० छ०।

(३) भौत्यस्याप्यन्तरे इति च० छ०।

(४) वचोवृद्धा इति ग०।

(५) छं व्यतिरिक्त आदर्शपुस्तके एतच्छ्लोकार्द्धस्य पूर्व्वचरणं नास्ति उत्तरचरणे तु, सप्तैतान् विद्धि चाक्षुषानिति पाठो वर्त्तते।

अग्निध्रः काश्यप[१] श्चैव पौलस्त्यो मागधश्च यः ।
भार्गवो ह्यग्निबाहुश्च शुचिराङ्गिरसस्तथा ।
ओजस्वी सुबलश्चैव भौत्यश्चैते मनोः सुताः ॥११६॥
सवर्णा मनवो ह्येते चत्वारो ब्रह्मणः सुताः ।
एको वैवस्वतश्चैव सावर्णो मनुरुच्यते ॥११७॥
रौच्यो भौत्यश्च यौ तौ तु मनोः पौलहभार्गवौ ।
भौत्यस्यैवाधिपत्ये तु पूर्णः कल्पस्तु पूर्य्यते ॥११८॥
सूत उवाच । निःशेषेषु च सर्वेषु तदा मन्वन्तरेष्विह ।
अन्तेऽनेकयुगे तस्मिन् क्षीणे संहार उच्यते ॥११९॥
सप्तैते भार्गवा देवा अन्ते मन्वन्तरे तदा ।
भुक्त्वा त्रैलोक्यमध्यस्था युगाख्यां ह्येकसप्ततिं ॥१२०॥
पितृभिर्मनुभिश्चैव सार्द्धं सप्तर्षिभिस्तु ये ।
यज्वानश्चैव तेऽप्यन्ये तद्भक्ताश्चैव तैः सह ॥१२१॥
महर्लोकं गमिष्यन्ति त्यक्त्वा त्रैलोक्यमीश्वराः ।
ततस्तेषु गतेषूर्द्धं क्षीणे मन्वन्तरे तदा ।
अनाधारमिदं सर्वं त्रैलोक्यं वै भविष्यति ॥१२२॥
ततः स्थानानि शून्यानि स्थानिनां तानि वै द्विजाः ।
प्रभ्रश्यन्ति विमुक्तानि ताराऋक्षग्रहैस्तथा ॥१२३॥
ततस्तेषु व्यतीतेषु त्रैलोक्यस्येश्वरेष्विह ।
सेन्द्राद्येषु महर्लोकं यस्मिंस्ते कल्पवासिनः ॥१२४॥

---

(१) कश्यप इति ख० ङ० च० छ० ।

जिताद्यास्त्र[१] गणा ह्यत्र चाक्षुषान्ता स्तुर्दश ।
मन्वन्तरेषु सर्व्वेषु देवास्ते वै महौजसः ॥१२५॥
ततस्तेषु गतेषूर्द्ध्वं सायोज्यं कल्पवासिनां ।
समेत्य देवास्ते सर्वे प्राप्ते संकलने[२] तदा ॥१२६॥
महर्लोकं परित्यज्य गणास्ते वै चतुर्द्दश ।
सशरीराश्च श्रूयन्ते जनलोकं सहानुगाः[३] ॥१२७॥
एवं देवेष्वतीतेषु महर्लोकाज्जनं प्रति ।
भूतादिष्ववशिष्टेषु स्थावरान्तेषु चाप्युत ॥१२८॥
शून्येषु लोकस्थानेषु महान्तेषु भूरादिषु[४] ।
देवेषु च गतेषूर्द्ध्वं सायोज्यं कल्पवासिनां ॥१२९॥
संहृत्य तांस्ततो ब्रह्मा देवर्षिपितृदानवान् ।
संस्थापयति वै सर्गं महद्दृष्ट्या युगक्षये ॥१३०॥
तत्र युगसहस्रान्त[५] महर्यद्ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्ता[६] महोरात्रविदो जनाः[७] ॥१३१॥
नैमित्तिकः प्राकृतिको यश्चैवात्यन्तिकोऽर्थतः ।

---

(१) ये इति छ० ।
(२) कालानले इति पाठः साधीयान् ।
(३) सहानुगैः इति पाठः साधुः ।
(४) भूतादिष्ववशिष्टेषु इति श्लोकार्द्धात् परं ख० पुस्तके, गतेषु लोक भाण्डेषु महान्तेषु महार्णवे इति श्लोकार्द्धं वर्त्तते ।
(५) चतुर्युगसहस्रान्तमिति क० ङ० च० छ० ज० ।
(६) युग सहस्राणामिति ख० ।
(७) अहोरात्रं विदुर्जनाः इति पाठः समीचीनः ।

त्रिविधः सर्व्वभूतानामित्येष प्रतिसञ्चरः ॥१२२॥
ब्राह्मो नैमित्तिकस्तस्य[१] कल्पदाहः प्रसंयमः ।
प्रतिसर्गे तु भूतानां प्राकृतः करणत्रयः[२] ॥१२३॥
ज्ञानात्त्वात्यन्तिकः प्रोक्तः कारणानामसम्भवः ।
ततः संहृत्य तान् ब्रह्मा देवांस्त्रैलोक्यवासिनः ॥१२४॥
अहरन्ते प्रकुरुते सर्गस्य प्रलयं पुनः ।
सुषुप्सुर्भगवान् ब्रह्मा प्रजाः संहरते तदा ॥१२५॥
ततो युगसहस्रान्ते संप्राप्ते च युगक्षये ।
तत्रात्मस्थाः प्रजाः कर्त्तुं प्रपेदे स प्रजापतिः ॥१२६॥
तदा भवत्यनावृष्टिस्तदा सा शतवार्षिकी ।
तथा यान्यल्पसाराणि सत्वानि पृथिवीतले ॥ १२७॥
तान्येवात्र प्रलीयन्ते भूमित्वमुपयान्ति च ।
सप्तरश्मिरथो भूत्वा उदतिष्ठद्विभावसुः ॥१२८॥
असह्यरश्मिर्भगवान् पिबन्नम्भो गभस्तिभिः ।
हरिता रश्मयस्तस्य दीप्यमानास्तु सप्तभिः[३] ॥१२९॥
भूय एव विवर्तन्ते व्याप्नुवन्तो वनं[४] शनैः ।
भौमं काष्ठं[५] धनं तेजो ह्यश्मभिस्तु दीप्यते ॥१४०॥

---

(१) त्वत्रेति पाठः सङ्गतः ।
(२) करणात्ययः इति क० ज० ।
(३) सप्त हि इति पाठः सङ्गतः ।
(४) आदर्शपुस्तकमात्रे वरमिति पाठो वर्त्तते ।
(५) भौमकाष्ठे इति क० ङ० च० छ० ज० ।

तस्मादुदकं सूर्य्यस्य तपतोऽति हि(१) कथ्यते ।
नावृष्ट्या तपते सूर्यो नावृष्ट्या परिविष्यते ॥१४१॥
नावृष्ट्या परिचिन्वन्ति(२) वारिणा दीप्यते रविः ।
तस्मादपः पिबन् यो वै दीप्यते रविरम्बरे ॥१४२॥
तस्य ते रश्मयः सप्त पिबन्त्यम्भो महार्णवात् ।
तेनाहारेण सन्दीप्तः सूर्य्यः सप्त भवत्युत ॥१४३॥
ततस्ते रश्मयः सप्त सूर्य्यभूताश्चतुर्दिशं ।
चतुर्लोकमिमं सर्वं दहन्ति शिखिनस्तदा ॥१४४॥
प्राप्नुवन्ति च भाभिस्तु ऊर्द्धं चाधश्च रश्मिभिः ।
दीप्यन्ते भास्कराः सप्त युगान्ताग्निः प्रतापिनः ॥१४५॥
ते वारिणा च संदीप्ता बहुसाहस्ररश्मयः ।
खं समावृत्य तिष्ठन्ति निर्दहन्तो वसुन्धरां ॥१४६॥
ततस्तेषां प्रतापेन दह्यमाना वसुन्धरा ।
साद्रिनद्यर्णवा पृथ्वी विस्नेहा समपद्यत ॥१४७॥
दीप्ताभिः सन्तताभिश्च चित्राभिश्च समन्ततः ।
अधश्चोर्ध्वश्च तिर्यक् च संरुद्धं सूर्यरश्मिभिः ॥१४८॥
सूर्य्याग्नीनां प्रवृद्धानां संसृष्टानां परस्परं ।
एकत्वमुपयातानामेकज्वालं भवत्युत ॥१४९॥
सर्वलोकप्रणाशश्च सोऽग्निर्भूत्वा तु मण्डली ।

---

(१) तस्मातदकपूर्व्वस्य स्यपतेति हि इति क० ज०, तस्मात्तदकः सूर्य्यस्य तपताविह इति ङ० च०, तस्मान्तुदकसूर्य्यस्य स्तपतेति हि इति छ० ।

(२) एकत्वे वहुवचनमार्षं ।

चतुर्लोकमिदं सर्वं निर्दहत्याशु तेजसा ॥१५०॥
ततः प्रलीयते सर्व्वं जङ्गमं स्थावरं तदा ।
निर्वृक्षा निस्तृणा भूमिः कूर्मपृष्ठसमा भवेत् ॥१५१॥
अम्बरीषमिवाभाति सर्वं मारिषितं(१) जगत् ।
सर्वमेव तदार्च्चिर्भिः पूर्णं जज्वाल्यते नभः(२) ॥१५२॥
पाताले यानि भूतानि महोदधिगतानि च ।
ततस्तानि प्रलीयन्ते भूमित्वमुपयान्ति च ॥१५३॥
द्वीपाश्च पर्वताश्चैव वर्षाण्यथ महोदधिः ।
सर्व्वं तद्भस्मसाच्चक्रे सर्व्वात्मा पावकस्तु सः ॥१५४॥
समुद्रेभ्यो नदीभ्यश्च पातालेभ्यश्च सर्वतः ।
पिवन्नपः समिद्धोऽग्निः पृथिवीमाश्रितो ज्वलन् ॥१५५॥
ततः संवर्त्तकः शैलानतिक्रम्य महांस्तथा ।
लोकान् संहरते दीप्तो घोरः संवर्त्तकोऽनलः ॥१५६॥
ततः स पृथिवीं भित्त्वा रसातलमशोषयत् ।
निर्दह्य तांस्तु पातालान्नागलोकमथादहत् ॥१५७॥
अधस्तात्पृथिवीं दग्ध्वा ऊर्द्ध्वं स दहते दिवं ।
योजनानां सहस्राणि अयुतान्यर्व्बुदानि च ॥१५८॥
उदतिष्ठच्छिखास्तस्य वह्नेः संवर्त्तकस्य तु ।
गन्धर्वांश्च पिशाचांश्च समहोरगराक्षसान् ।
तदा दहति सन्दीप्तो गोलकं चैव सर्व्वशः ॥१५९॥

---

(१) मारीषतमिति ङ० च०, मारिषतमिति च० छ० ।
(२) ऽनलः इति ङ० च० ।

भूर्लोकन्तु भुवर्लोकं स्वर्लोकञ्च महस्तथा ।
घोरं दहति कालाग्निरेवं लोकचतुष्टयं ॥१६०॥
व्याप्तेषु तेषु लोकेषु तिर्य्यगूर्द्ध्वमथाग्निना ।
तत्तेजःसमनुप्राप्तं कृत्स्नं जगदिदं शनैः ।
अयोगुडनिभं सर्व्वं तदा ह्येवं प्रकाशते ॥१६१॥
ततो गजकुलाकारास्तडिद्भिः समलंकृताः ।
उत्तिष्ठन्ति तदा घोरा व्योम्नि संवर्त्तका घनाः ॥१६२॥
केचिन्नीलोत्पलश्यामाः केचित्कुमुदसन्निभाः ।
केचिद्वैदूर्य्यसंकाशा इन्द्रनीलनिभाः परे ॥१६३॥
शङ्खकुन्दनिभास्त्वन्ये जात्यञ्जननिभास्तथा ।
धूम्रवर्णा घनाः केचित् केचित् पीताः पयोधराः ॥१६४॥
केचिद्रासभवर्णाभा लाक्षारक्तनिभास्तथा ।
मनःशिलाभास्त्वपरे कपोताभास्तथाम्बुदाः ॥१६५॥
इन्द्रगोपनिभाः केचिदुत्तिष्ठन्ति घना दिवि ।
केचित् पुरधराकाराः केचिद्गजकुलोपमाः ॥१६६॥
केचित्पर्वतसंकाशाः केचित् स्थलनिभा घनाः ।
कुण्डागारनिभाः केचित्केचिन्मीनकुलोपमाः ॥१६७॥
बहुरूपा घोररूपा घोरस्वरानिनादिनः ।
तदा जलधराः सर्वे पूरयन्ति नभःस्थलं ॥१६८॥
ततस्ते जलदा घोरा नवीना भास्करात्मिकाः ।
सप्तधा संवृतात्मानस्तमग्निं शमयन्त्युत ॥१६९॥
ततस्ते जलदा वर्षं मुञ्चन्ति च महौघमं ।

सुघोरमशिवं सर्व्वं नाशयन्ति च पावकं ॥१७०॥
प्रवृष्टैश्च तथात्यर्थं वारिभिः पूर्य्यते जगत् ।
अद्भिस्तेजोऽभिभूतञ्च तदाग्निः प्राविशत्यपः ॥१७१॥
नष्टे चाग्नौ वर्षशते पयोदाः पाकसम्भवाः ।
प्लावयन्ति जगत्सर्वं वृहज्जालपरिस्रवैः ॥१७२॥
धाराभिः पूरयन्तीमं चोद्यमानाः स्वयम्भुवा ।
अन्ये तु[१] सलिलौघैस्तु वेलामभिभवन्त्यपि ।
साद्रिद्वीपान्तरं पृथ्वी अद्भिः संछाद्यते तदा ॥१७३॥
तस्य वृष्ट्या च तोयं तत्सर्व्वं हि परिमण्डितं ।
प्रविशत्युदधौ विप्राः पीतं सूर्य्यस्य रश्मिभिः ॥१७४॥
आदित्यरश्मिभिः पीतं जलमभ्रेषु तिष्ठति ।
पुनः पतति तद्भूमौ तेन पूर्य्यन्ति चार्णवाः ॥१७५॥
ततः समुद्राः स्वां वेलां परिक्रामन्ति सर्व्वशः ।
पर्व्वताश्च विशीर्य्यन्ते[२] मही चाप्सु निमज्जति ॥१७६॥
ततस्तु सहसोद्भ्रान्तः पयोदांस्तान् नभस्तले ।
संवेष्टयति घोरात्मा दिवि वायुः समन्ततः ॥१७७॥
तस्मिन्नेकार्णवे घोरे नष्टे स्थावरजङ्गमे ।
पूर्णे युगसहस्रे वै निःशेषः कल्प उच्यते ॥१७८॥
अथाम्भसा वृते लोके प्राहुरेकार्णवं बुधाः ।
अथ भूमितलं खञ्च वायुश्चैकार्णवे तदा ।

---

(१) सिन्धवः इति पाठः समीचीनः ।
(२) विपर्य्यन्ते इति च० ।

नष्टे भावेऽवलीनं तत्(१) प्राज्ञायत न किञ्चन ॥१७९॥
पार्थिवास्त्वथ सामुद्रा आपो हैमाश्च सर्व्वशः।
प्रसरन्त्यो व्रजन्त्येकं सलिलाख्यां भजन्त्युत ॥१८०॥
आगतागतिकं चैव तदा तत्सलिलं स्मृतं।
प्रच्छाद्य तिष्ठति महीमर्णवाख्यं च तज्जलं ॥१८१॥
आभान्ति यस्मात्ता भाभिर्भा शब्दव्याप्तिदीप्तिषु।
भस्म सर्व्वमनुप्राप्य तस्मादम्भो निरुच्यते ॥१८२॥
नानात्वे चैव शीघ्रे च धातुर्वै अर उच्यते।
एकार्णवे तदा यो वै न शीघ्रास्तेन ता नराः ॥१८३॥
तस्मिन् युगसहस्रान्ते दिवसे ब्रह्मणो गते।
तावन्तं कालमेवं तु भवत्येकार्णवं जगत्।
तदा तु सर्व्वव्यापारा निवर्त्तन्ते प्रजापतेः ॥१८४॥
एवमेकार्णवे तस्मिन् नष्टे स्थावरजङ्गमे।
तदा स भवति ब्रह्मा सहस्राक्षः सहस्रपात् ॥१८५॥
सहस्रशीर्षा सुमनाः सहस्रपात् सहस्रचक्षुर्वदनःसहस्रवाक्।
सहस्रबाहुः प्रथमः प्रजापतिस्त्रयीपथि यः पुरुषो निरुच्यते ॥१८६॥
आदित्यवर्णो भुवनस्य गोप्ता अपूर्व्व एकः प्रथमस्तुराषाट्।
हिरण्यगर्भः पुरुषो महान् वै संपद्यते वै तमसः परस्तात् ॥१८७॥
चतुर्युगसहस्रान्ते सर्वतः सलिलप्लुते।
सुषुप्सुरप्रकाशां स्वां रात्रिं तु कुरुते प्रभुः ॥१८८॥

(१) भावे वभी नून इति क०, मानेकलीनं तत् इति ङ०, ग्लानेकलीनं तत् इति च०, भावेवभीतन्त इति छ० ज०।

चतुर्विधा यदा शेते प्रजाः सर्व्वाण्डमण्डिताः ।
पश्यन्ते तं महात्मानं कालं सप्तमहर्षयः ॥१८९॥
जनलोकविवर्त्तन्तस्तपसा लब्धचक्षुषः ।
भृग्वादयो महात्मानः पूर्वं व्याख्यातलक्षणाः ॥१९०॥
सत्यादीन् सप्तलोकान् वै ते हि पश्यन्ति चक्षुषा ।
ब्रह्माणं ते तु पश्यन्ति महाब्राह्मीषु रात्रिषु ॥१९१॥
सप्तर्षयः प्रपश्यन्ति सुप्तकालं स्वरात्रिषु ।
कल्पानां परमेष्ठित्वात्तस्मादाद्यः स पद्यते ॥१९२॥
स यष्टा सर्वभूतानां कल्पादिषु पुनः पुनः ।
एवमावेशयित्वा तु स्वात्मन्येव प्रजापतिः ॥१९३॥
अथात्मनि महातेजाः सर्वमादाय सर्वकृत् ।
ततस्ते(१) वसते रात्रिं तमस्येकार्णवे जले ॥१९४॥
ततो रात्रिक्षये प्राप्ते प्रतिबुद्धः प्रजापतिः ।
मनः सिसृक्षया युक्तं सर्गाय निदधे पुनः ॥१९५॥
एवं सलोके निर्वृत्ते उपशान्ते प्रजापतौ ।
ब्रह्मनैमित्तिके तस्मिन् कल्पिते वै प्रसंयमे ॥१९६॥
देहैर्वियोगः सत्वानां तस्मिन् वै कृत्स्नशः स्मृतः ।
ततो दग्धेषु भूतेषु सर्व्वेष्वादित्यरश्मिभिः ।
देवर्षिमनुवर्य्येषु तस्मिन् सङ्कलने तदा ॥१९७॥
गन्धर्वादीनि सत्वानि पिशाचान्तानि सर्व्वशः ।

---

(१) ततः स इति पाठः समीचीनः ।

कल्पादावप्रतप्तानि जनमेवाश्रयन्ति वै ॥१९८॥
तिर्य्यग्योनीनि सत्वानि नारकेयानि यान्यपि ।
तदा तान्यपि दग्धानि धुतपापानि सर्व्वशः ।
जने तान्युपपद्यन्ते यावत् संप्लवते जगत् ॥१९९॥
व्युष्टायान्तु रजन्यां तु ब्रह्मणोऽव्यक्तयोनये ।
जायन्ते हि पुनस्तानि सर्व्वभूतानि कृत्स्नशः ॥२००॥
ऋषयो मनवो देवा प्रजाः सर्व्वाश्चतुर्विधाः ।
तेषामपीह सिद्धानां निधनोत्पत्तिरुच्यते ॥२०१॥
यथा सूर्य्यस्य लोकेऽस्मिन् उदयास्तमनं स्मृतं ।
तथा जन्मनिरोधश्च भूतानामिह दृश्यते ॥२०२॥
आभूतसंप्लवात्तस्माद्भवः संसार उच्यते ।
यथा सर्व्वाणि भूतानि जायन्ते हि वर्षास्विह ॥२०३॥
स्थावरादीनि सत्वानि(१) कल्पे कल्पे तथा प्रजाः ।
यथार्त्तावृतुलिङ्गानि नानारूपाणि पर्य्यये(२) ॥२०४॥
दृश्यन्ते तानि तान्येव तथा ब्रह्मान्तरात्रिषु ।
प्रत्याहारे च सर्गे च गतिमन्ति ध्रुवाणि च ॥२०५॥
निस्क्रमन्ते विशन्ते च प्रजाकारं प्रजापतिं ।
ब्रह्माणं सर्वभूतानि महायोगं महेश्वरं ॥२०६॥
संस्रष्टा सर्वभूतानां कल्पादिषु पुनः पुनः ।
व्यक्ताव्यक्तो महादेवस्तस्य सर्वमिदं जगत् ॥२०७॥

---

(१) स्थावरादीनियमान् इति आदर्शपुस्तकमात्रे पाठो वर्त्तते ।
(२) अयं पाठो न समीचीनः ।

येनैव सृष्टा प्रथमं प्रयाता
आपो हि मार्गेण महीतलेऽस्मिन् ।
पूर्वप्रयातेन तथा ह्यपोऽन्याः
तेनैव तेनैव तु संव्रजन्ति ॥२०८॥
यथा शुभेन त्वशुभेन चैव
तत्रैव तत्रैव विवर्त्तमानाः ।
मर्त्यास्तु देहान्तरभावितत्वा-
द्वेवर्वशादूर्द्धमधश्चरन्ति ॥२०९॥
ये चापि देवा मनवः प्रजेशा
अन्येपि ये स्वर्गगताश्च सिद्धाः ।
तद्भाविताख्यातिवशाच्च धर्म्म्याः
पुनर्निसर्गेण भवन्ति सत्वाः ॥२१०॥

अत ऊर्द्ध्वं प्रवक्ष्यामि कालमाभूतसंप्लवं ।
मन्वन्तराणि यानि स्युर्व्याख्यातानि मया द्विजाः ।
सह प्रज्ञानिसर्गेण सह देवैश्चतुर्द्दश ॥२११॥
स युगाख्यासहस्रं तु सर्वाण्येवान्तराणि वै ।
अस्याः सहस्रे द्वे पूर्णे निःशेषः कल्प उच्यते ॥२१२॥
एतद्ब्राह्ममहो ज्ञेयं तस्य संख्यां निबोधत ।
निमेषस्तुल्यमात्रा(१) हि कृतो लघ्वक्षरेण तु ॥२१३॥
मानुषाक्षिनिमेषास्तु काष्ठा पञ्चदश स्मृता ।
लवः क्षणास्तु पञ्चैव त्रिंशत्काष्ठा तु ते त्रयः ॥२१४॥

---

(१) तुल्यमात्रो इति च० छ० ज० तुल्यमात्रे इति ङ० ।

प्रस्थः सप्तोदकाश्चैव साधिकास्तु लवः स्मृतः[१] ।
लवास्त्रिंशत्कला ज्ञेया मुहूर्त्तस्त्रिंशतः कलाः ॥२१५॥
मुहूर्त्तास्तु पुनस्त्रिंशदहोरात्रमिति स्थितिः ।
अहोरात्रं कलानान्तु त्र्यधिकानि शतानि षट् ॥२१६॥
तास्चैव संख्यया[२] ज्ञेयं चन्द्रादित्यगतिर्यथा ।
निमेषा दश पञ्चैव काष्ठास्तास्त्रिंशतः कला ॥२१७॥
त्रिंशत्कला मुहूर्त्तस्तु दशभागः कला स्मृता ।
चत्वारिंशत्कालानान्तु[३] मुहूर्त्त इति संज्ञितः ॥ २१८॥
मुहूर्त्तास्च लवास्चापि प्रमाणज्ञैः प्रकल्पिताः ।
तस्यानेनाम्भसास्चापि[४] पलान्यथ त्रयोदश ॥२१९॥
मागधेनैव मानेन जलप्रस्थो विधीयते ।
एते चाप्युदकप्रस्थास्चत्वारो नालिको घटः ॥२२०॥
हेममाषैः कृतच्छिद्रैश्चतुर्भिश्चतुरङ्गुलैः ।
सम्माहनि च रात्रौ च मुहूर्त्तौ वै दिनालिकौ ॥२२१॥
रवेर्गतिविशेषेण सर्वेषु नृषु नित्यशः ।
अधिकं षट् शतं पञ्च[५] कलानां प्रविधीयते ॥२२२॥

---

(१) निमेषस्तुल्य मात्रा हि इत्यादि साधिकास्तु लवः स्मृतः इत्यन्तं पाठो न समीचीनः।

(२) त्र्यधिकानि शतानि षट् इत्यादि तास्चैव संख्यया इत्यन्तं पाठोऽसाधुः ।

(३) चत्वारिंशत्कला ज्ञेया इति ख० । चत्वारिंशत्कला काष्ठा इत क० ।

(४) पाठो ऽयमविशुद्धः । अत्र प्रस्थोऽनेनाम्भसाच्चापि इति पाठः सम्भवपरः ।

(५) यच इति ङ० च० क० ज० ।

तदहर्मानुषं ज्ञेयं नात्तत्रन्तु दशाधिकं ।
सावनेन तु मासेन अब्दोऽयं मानुषः स्मृतः ॥२२३॥
एतद्दिव्यमहोरात्रमिति शास्त्रविनिश्चयः ।
अङ्काऽनेन तु या सङ्ख्या मासर्त्वयनवार्षिकी ॥२२४॥
तदा वक्तुमिदं ज्ञानं संज्ञा या[१] ह्युपलक्ष्यतां ।
कलानां सुपरीमाणात्काल इत्यभिधीयते ॥ २२५॥
यदहर्ब्रह्मणः प्रोक्तं दिव्या कोटी तु तत् स्मृता ।
शतानाञ्च सहस्राणि दशद्विगुणितानि च ।
नवतिञ्च सहस्राणि तथैवान्यानि यानि तु ॥२२६॥
एतत् श्रुत्वा तु ऋषयो विस्मयं परमाद्भुतं ।
संख्यासम्भजनं ज्ञानमपृच्छन्नन्तरन्तदा ॥२२७॥
ऋषय ऊचुः। संप्लावनकालन्तु मानुषेणैव सम्मतं।
मानेन श्रोतुमिच्छामः संक्षेपार्थपदाक्षरं ॥२२८॥
तेषां श्रुत्वा स देवस्तु वायुर्लोकहिते रतः ।
संक्षेपाद्दिव्यचक्षुष्मान् प्रोवाच भगवान् प्रभुः ॥२२९॥
एते राच्यहनी पूर्वं कीर्त्तिते त्विह लौकिके ।
तासां सङ्ख्याय वर्षाग्रं ब्राह्मं वक्ष्याम्यहः क्षये ॥२३०॥
कोटिशतानि चत्वारि वर्षाणि मानुषाणि तु ।
द्वात्रिंशच्च तथा कोट्यः सङ्ख्याताः सङ्ख्यया द्विजैः ॥२३१॥
तथा शतसहस्राणि एकोननवतिः पुनः ।
अशीतिश्च सहस्राणि एष कालः प्लवस्य तु ॥२३२॥

---

(१) संख्याया इति ङ० च० ।

मानुषाख्येण सङ्ख्यातः कालो ह्याभूतसंप्लवः ।
सप्त सूर्य्यास्तदाऽग्रेषु तदा लोकेषु तेषु वै ॥२३३॥
महाभूतेषु लीयन्ते प्रजाः सर्व्वाश्चतुर्विधाः ।
सलिलेनाप्लुते लोके नष्टे स्थावरजङ्गमे ॥२३४॥
विनिवृत्ते च संहारे उपशान्ते प्रजापतौ ।
निरालोके प्रदग्धे तु नैशेन तु समावृते ।
ईश्वराधिष्ठिते ह्यस्मिंस्तदा ह्येकार्णवे तदा ॥२३५॥
तावदेकार्णवो ज्ञेयो यावदासीदहः प्रभोः ।
रात्रिस्तु सलिलावस्था निवृत्तौ चाप्यहः स्मृतं ॥२३६॥
अहोरात्रस्तथैवास्य क्रमेण परिवर्त्तते ।
आभूतसंप्लवो ह्येष अहोरात्रः स्मृतः प्रभोः ॥२३७॥
त्रैलोक्ये यानि सत्वानि गतिमन्ति ध्रुवाणि च ।
आभूतेभ्यः प्रलीयन्ते तस्मादाभूतसंप्लवः ॥२३८॥
अग्रे भूतः प्रजानान्तु तस्माद्भूतः प्रजापतिः ।
आभूतः प्लवते चैव तस्मादाभूतसंप्लवः ॥२३९॥
शाश्वते चामृतत्वे च शब्दे चाभूतसंप्लवः ।
अतीता वर्त्तमानाश्च तथैवानागताः प्रजाः ।
दिव्यसङ्ख्या प्रसङ्ख्याता अपरार्धगुणीकृता(१) ॥२४०॥
परार्धद्विगुणञ्चापि परमायुः प्रकीर्त्तितम् ।
एतावान् स्थितिकालस्तु अजस्येह प्रजापतेः ॥
स्थित्यन्ते प्रतिसर्गस्य ब्रह्मणः परमेष्ठिनः ॥२४१॥

---

(१) अपरार्द्धा गुणीकृता इति आदर्शपुस्तकमात्रे पाठो वर्त्तते ।

यथा वायुप्रवेगेन दीपार्च्चिरुपशाम्यति ।
तथैव प्रतिसर्गेण ब्रह्मा समुपशाम्यति ॥२४२॥
तथा ह्यप्रतिसंसृष्टे महदादौ महेश्वरे ।
महत्प्रलीयतेऽव्यक्ते गुणसाम्यन्ततो भवेत् ॥२४३॥
इत्येष च समाख्यातो मया ह्याभूतसंप्लवः ।
ब्रह्मनैमित्तिको ह्येष संप्रज्ञालनसंयमः ॥२४४॥
समासेन समाख्यातः भूयः किं वर्त्तयामि वः ।
य इदं धारयेन्नित्यं शृणुयाद्वाप्यभीक्ष्णशः ।
कीर्त्तनाच्छ्रवणाच्चापि महतीं सिद्धिमाप्नुयात् ॥२४५॥

इति श्रीमहापुराणे वायुप्रोक्ते अनुषङ्गपादो नाम
अष्टात्रिंशोऽध्यायः समाप्तः ।

अथ ऊनचत्वारिंशोऽध्यायः।

अनुषङ्गपादः।

वायुरुवाच। असाधारणवृत्तैस्तु कृतशेषादिभिर्द्विजैः।
धर्म्मैर्वैशेषिकैश्चैव आचूर्णसूक्ष्मदर्शिभिः ॥१॥
ते देवैः सह तिष्ठन्ति महर्लोकनिवासिनः।
चतुर्द्दशैते मनवः कीर्त्तिताः कीर्त्तिवर्धनाः ॥२॥
अतीता वर्त्तमानाश्च तथैवानागताश्च ये।
ऋषिभिर्दैवतैश्चैव सह गन्धर्वराक्षसैः ॥३॥
मन्वन्तराधिकारेषु जायन्तीह पुनः पुनः।
देवाः सप्तर्षयश्चैव मनवः पितरस्तथा ॥४॥
सर्व्वे ह्यपि क्रमातीता महर्लोकं समाश्रिताः।
ब्राह्मणैः क्षत्रियैर्वैश्यैर्धार्मिकैः सहितैः सुराः ॥५॥
तैस्तथ्यकारिभिर्युक्तैः श्रद्धावद्भिरदर्पितैः।
वर्णाश्रमाणां धर्म्मेषु श्रौतस्मार्त्तेषु संस्थितैः।
विनिवृत्ताधिकारास्ते यावन्मन्वन्तरक्षयः ॥६॥
ऋषयऊचुः। महर्लोकेति यत्प्रोक्तं मातरिश्वंस्त्वया विभो।
प्रतिलोके च कर्त्तव्य(१) मनेकैः समधिष्ठिताः ॥७॥
यावन्तश्चैव ते लोका दह्यन्ते ये न ते प्रभो।

---

(१) प्रतिलोकात्प्रकर्त्तव्यमिति च० प्रतिलोचति कर्त्तव्यमिति छ० ज०।

एतन्नः कथय प्रीत्या त्वं हि वेत्थ यथातथं ॥८॥
एवमुक्तस्ततो वायुर्मुनिभिर्विनयात्मभिः ।
प्रोवाच मधुरं वाक्यं यथातत्त्वेन तत्त्ववित् ॥९॥
वायुरुवाच । चतुर्द्दशैव स्थानानि वर्णितानि महर्षिभिः ।
लोकाख्यानि तु यानि स्युर्येषु तिष्ठन्ति मानवाः ॥१०॥
सप्त तेषु कृतान्याहुरकृतानि तु सप्त वै ।
भूरादयस्तु सङ्ख्याताः सप्त लोकाः कृतास्त्विह ॥११॥
अकृतानि तु सप्तैव प्राकृतानि तु यानि वै ।
स्थानानि स्थानिभिः सार्द्धं कृतानि तु निबन्धनं ॥१२॥
पृथिवीं चान्तरिक्षं च दिव्यं यच्च महः स्मृतं ।
स्थानान्येतानि चत्वारि स्मृतान्यावर्णकानि च ॥१३॥
क्षयातिशययुक्तानि तथा युक्तानि वक्ष्यते ।
यानि नैमित्तिकानि स्युस्तिष्ठन्त्याभूतसंप्लवं ॥१४॥
जनस्तपश्च सत्यञ्च स्थानान्येतानि त्रीणि तु ।
ऐकान्तिकानि सत्वानि(१) तिष्ठन्तीहाप्रसंयमात् ॥१५॥
व्यक्तानि तु प्रवक्ष्यामि स्थानान्येतानि सप्त वै ।
भूर्लोकः प्रथमस्तेषां द्वितीयस्तु भुवः स्मृतः ॥१६॥
स्वस्तृतीयस्तु विज्ञेयश्चतुर्थो वै महः स्मृतः ।
जनस्तु पञ्चमो लोकस्तपः षष्ठो विभाव्यते ॥१७॥
सत्यन्तु सप्तमो लोको निरालोकस्ततः परं ।
भूरिति व्याहृते पूर्वं भूर्लोकस्य ततोऽभवत् ॥१८॥

(१) तानि स्युः इति ङ० च० छ० ।

द्वितीयं भुव इत्युक्त अन्तरिक्षं ततोऽभवत्।
तृतीयं स्वरितीत्युक्ते दिवं प्रादुर्बभूव ह ॥१९॥
व्याहारैस्त्रिभिरेतैस्तु ब्रह्मलोकमकल्पयत्।
ततो भूःपार्थिवो लोकः अन्तरिक्षं भुवः स्मृतं ॥२०॥
स्वर्लोको वै दिवं ह्येतत्पुराणे निश्चयं गतं।
भूतस्याधिपतिश्चाग्निस्ततो भूतपतिः स्मृतः ॥२१॥
वायुर्भुवस्याधिपतिस्तेन वायुर्भुवस्पतिः।
भव्यस्य सूर्य्योऽधिपतिस्तेन सूर्य्यो दिवस्पतिः ॥२२॥
महेतिव्याहृतेनैवं महर्लोकस्ततोऽभवत्।
विनिवृत्ताधिकाराणां देवानां तत्र वै क्षयः ॥२३॥
जनस्तु पञ्चमो लोकस्तस्माज्जायन्ति वै जनाः।
तासां स्वायंभुवाद्यानां प्रजानां जननाज्जनः ॥२४॥
यास्ताः स्वायम्भुवाद्या हि पुरस्तात्परिकीर्त्तिताः।
कल्पदग्धे तदा लोके प्रतिष्ठन्ति तदा तपः ॥२५॥
ऋभुसनत्कुमाराद्या यत्र सन्त्यूर्द्ध्वरेतसः।
तपसा भावितात्मानस्तत्र सन्तीति वा तपः ॥२६॥
सत्येतिब्रह्मणः शब्दः सत्तामात्रस्तु स स्मृतः।
ब्रह्मलोकस्ततः सत्यं सप्तमः स तु भास्करः ॥२७॥
गन्धर्वाप्सरसो यक्षा गुह्यकास्तु सराक्षसाः।
सर्वभूतपिशाचाश्च नागाश्च सह मानुषैः।
स्वर्लोकवासिनः सर्वे देवा भुवि निवासिनः ॥२८॥
मरुतो मातरिश्वानो रुद्रा देवास्तथाश्विनौ।

अनिकेतान्तरिक्षास्ते भुवर्लोकाश्रया दिवौकसः ॥२९॥
आदित्या ऋभवो विश्वे साध्याश्च पितरस्तथा ।
ऋषयोऽङ्गिरसश्चैव भुवर्लोकं समाश्रिताः ॥३०॥
एते वैमानिका देवास्ताराग्रहनिवासिनः ।
इत्येते क्रमशः प्रोक्ता ब्रह्मव्याहारसम्भवाः ॥३१॥
भूर्लोकप्रथमा लोका महदन्ताश्च ते स्मृताः ।
आरभ्यन्ते तु तन्मात्रैः शुद्धास्तेषां[१] परस्परं ॥३२॥
शुक्राद्यास्त्वातुषान्ताश्च ये व्यतीता भुवं श्रिताः ।
महर्लोकश्चतुर्थस्तु तस्मिंस्ते कल्पवासिनः ॥३३॥
भूर्लोकप्रथमा लोका महदन्ताश्च ये स्मृताः ।
तान् सर्व्वान् सप्त सूर्य्यास्ते अर्च्चिभिर्निर्दहन्ति वै ॥३४॥
मरीचिः कश्यपो दक्षस्तथा स्वायम्भुवोऽङ्गिराः ।
भृगुः पुलस्त्यः पुलहः क्रतुरित्येवमादयः ॥३५॥
प्रजानां पतयः सर्वे वर्त्तन्ते तत्र तैः सह ।
निःमला निर्ममाश्चैव तत्र ते ह्यूर्द्धरेतसः ॥३६॥
ऋभुः सनत्कुमाराद्या वैराज्यास्ते तपोधनाः[२] ।
मन्वन्तराणां सर्वेषां सावर्णानां ततः स्मृताः ।
चतुर्द्दशानां सर्वेषां पुनरावृत्तिहेतवः ॥३७॥
योगन्तपश्च सत्यञ्च समाधाय तदात्मनि ।
षष्ठे काले निवर्त्तन्ते तत्तदाह विपर्य्यये ॥३८॥

---

(१) स्तेषामित्यत्र स्ते वै इति पाठः साधुः ।
(२) ऋभुः सनत्कुमाराद्या इति स्लोकार्द्धात्परं स्लोकार्द्धं पतितं ।

सत्यन्तु सप्तमो लोको अपुनर्मार्गगामिनां[१] ।
ब्रह्मलोकः समाख्यातो ह्यप्रतीघातलक्षणः ॥३९॥
पर्यासपारिमाण्येन भूर्लोकः समितिः[२] स्मृतः ।
भूम्यन्तरं यदादित्यादन्तरिक्षं भुवः स्मृतं ॥४०॥
सूर्य्यध्रुवान्तरं यच्च स्वर्गलोको दिवः स्मृतः ।
ध्रुवाज्जनान्तरं यच्च महर्लोकस्तदुच्यते ॥४१॥
विख्याताः सप्तलोकास्तु तेषां वक्ष्यामि सिद्धयः ।
भूर्लोकवासिनः सर्व्वे अन्नादास्तु रसात्मकाः ॥४२॥
भुवे स्वर्गे च ये सर्व्वे सोमपा अज्यपाश्च ते ।
चतुर्थे येऽपि वर्त्तन्ते महर्लोकं समाश्रिताः ॥४३॥
विज्ञेया मानसी तेषां सिद्धिर्वै पञ्चलक्षणा ।
सद्यश्चोत्पद्यते तेषां मनसा सर्व्वमीप्सितं ॥४४॥
एते देवा यजन्ते वै यज्ञैः सर्व्वैः परस्परं ।
अतीतान् वर्त्तमानांश्च वर्त्तमानाननागतान्[३] ॥४५।
प्रथमानन्तरैरिष्ट्वा अन्तराः साम्प्रतैः पुनः ।
निवर्त्ततीत्यासम्बन्धो[४]ऽतीते देवगणे ततः ॥४६॥
विनिवृत्ताधिकाराणां सिद्धिस्तेषान्तु मानसी ।
तेषान्तु मानसी ज्ञेया शुद्धा सिद्धिपरम्परा ॥४७॥
उक्ता लोकाश्च चत्वारो जनस्थानुविधिस्तथा ।

(१) अपुनर्मार्गगामिनामित्यत्र अपुनर्भोगगामिनामिति पाठः समीचीनः। अपुनर्मारगामिनामिति ङ० च० ।
(२) पर्य्यास इति समितिरिति च पाठः लिपिकरप्रमादजनितः ।
(३) पाठोऽयं लिपिकरप्रमादादुत्पन्नः ।
(४) पाठोऽयं न विशुद्धः ।

समासेन मया विप्रा भूयस्तं वर्त्तयामि वः ॥४८॥
वायुरुवाच । मरीचिः कश्यपोदक्षो वसिष्ठश्चाङ्गिरा भृगुः ।
पुलस्त्यः पुलहश्चैव क्रतुरित्येवमादयः ॥४९॥
पूर्व्वं ते संप्रसूयन्ते ब्रह्मणो मनसा इह ।
ततः प्रजाः प्रतिष्ठाप्य जनमेवाश्रयन्ति ते ॥५०॥
कल्पदाहप्रदीप्तेषु तदा कालेषु तेषु वै ।
भूरादिषु महान्तेषु भृशं व्याप्तेष्वथाग्निना ॥५१॥
शिखा संवर्त्तका ज्ञेया प्राप्नुवन्ति सदा जनाः ।
यामादयो गणाः सर्व्वे महर्लोकनिवासिनः ॥५२॥
महर्लोकेषु दीप्तेषु जनमेवाश्रयन्ति ते ।
सर्व्वे सूक्ष्मशरीरास्ते तत्रस्थास्तु भवन्ति ते ॥५३॥
तेषां ते तुल्यसामर्थ्यास्तुल्यमूर्त्तिधरास्तथा ।
जनलोके विवर्त्तन्ते यावत्संप्लवते जगत् ॥५४॥
व्युष्टायान्तु रजन्यां वै ब्रह्मणोऽव्यक्तयोनिनः ।
अहरादौ प्रसूयन्ते पूर्ववत्[१] क्रमशस्त्विह ॥५५॥
स्वायम्भुवादयः सर्वे मरीच्यन्तास्तु साधकाः ।
देवास्ते वै पुनस्तेषां जायन्ते निधनेष्विह[२] ॥५६॥
यामादयः क्रमेणैव कनिष्ठाद्याः प्रजापतेः ।
पूर्वं पूर्वं प्रसूयन्ते पश्चिमे पश्चिमास्तथा ॥५७॥
देवान्वये देवता हि सप्त सम्भूतयः स्मृताः ।
व्यतीताः कल्पजास्तेषां तिस्रः शिष्टास्तथा परे ॥५८॥

---

(१) पूर्व्वशः इति ङ० च० ।
(२) पुनर्येषां जायन्ते निधनन्त्विह इति पाठः साधीयान् ।

आवर्त्तमाना देवास्ते क्रमेणैते न सर्व्वशः ।
गत्वा जवन्तवीभाव[१]न्दशकृत्वः पुनः पुनः ॥५९॥
ततस्ते वै गणाः सर्व्वे दृष्ट्वा भावेष्वनित्यतां ।
भाविनोऽर्थस्य च बलात् पुण्याख्यातिबलेन च ॥६०॥
निवृत्तवृत्तयः सर्वे स्वस्थाः सुमनसस्तथा ।
वैराजे तूपपद्यन्ते लोकमुत्सृज्य तज्जनं ॥६१॥
ततोऽन्येनैव कालेन नित्ययुक्तास्तपस्विनः ।
कथनाच्चैव धर्मस्य तेषां ते जज्ञिरेऽन्वये ॥६२॥
इहोत्पन्नास्ततस्ते वै स्थाना[२] आपूरयन्त्युत ।
देवत्वे च ऋषित्वे च मनुष्यत्वे च सर्वशः ॥६३॥
एवं देवगणाः सर्व्वे दशकृत्वो निवर्त्य वै ।
वैराजेषूपपन्नास्ते दश तिष्ठन्त्युपप्लवान् ॥६४॥
पूर्णे पूर्णे ततः कल्पे स्थित्वा वैराजके पुनः ।
ब्रह्मलोके विवर्त्तन्ते पूर्व्वपूर्व्वक्रमेण तु ॥६५॥
एतस्मिन् ब्रह्मलोके तु कल्पे वैराजके गते ।
वैराजं पुनरप्येके कल्पस्थानमकल्पयन् ॥६६॥
एवं पूर्व्वानुपूर्व्वेण ब्रह्मलोकगतेन वै ।
एवं तेषु व्यतीतेषु तपसा परिकल्पिते ।
वैराजे तूपपद्यन्ते दशकृत्वो निवर्त्तते ॥६७॥
एवं देवयुगानीह व्यतीतानि सहस्रशः ।

---

(१) जीवं जवीभावमिति ख०, यवं यवीभावमिति ङ०। एते सर्व्वे पाठा लिपिकरप्रमादादुद्भूताः।
(२) अत्र स्थानान् इति पाठः सम्भवपरः।

निधनं ब्रह्मलोके तु गतानामृषिभिः सह ॥६८॥
सूत उवाच। न शक्यमानुपूर्व्वेण तेषां वक्तुं प्रविस्तरं ।
अनादित्वाच्च कालस्य असंख्यानाच्च सर्वशः ।
एवमेव न सन्देहो यथावत्कथितं मया॥६९॥
तदुपश्रुत्य वाक्यार्थमृषयः संशयान्विताः ।
सूतमाहुः पुराणज्ञं व्यासशिष्यं महामतिं ॥७०॥
ऋषय ऊचुः। वैराजास्ते यदाहारा यत्सत्वाश्च यदाश्रयाः ।
तिष्ठन्ति चैव यत्कालं तन्नो ब्रूहि यथातथं ॥७१॥
तदुक्तमृषिभिर्वाक्यं श्रुत्वा लोकार्थतत्त्ववित् ।
सूतः पौराणिको वाक्यं विनयेनेदमब्रवीत् ॥७२॥
ततः प्राप्यन्त ते सर्व्वे शुद्धिशुद्धतमाश्च ये ।
आभूतसंप्लवास्तत्र दश तिष्ठन्ति ते जनाः ॥७३॥
सर्वे सूक्ष्मशरीरास्ते विद्वांसो घनमूर्त्तयः ।
स्थितलोकास्थितत्वाच्च तेषां भूतं न विद्यते॥७४॥
ऊचुः सनत्कुमाराद्याः सिद्धास्ते योगधर्म्मिणः ।
ख्यातिं नैमित्तिकीं तेषां पर्य्याये समुपस्थिते ॥७५॥
स्थानत्यागे मनश्चापि युगपत्संप्रवर्त्तते ।
ऊचुः सर्व्वे तदान्योऽन्यं वैराजान् शुद्धबुद्धयः ॥७६॥
एवमेव महाभागाः प्रणवं सम्प्रविश्य ह ।
ब्रह्मलोके प्रवर्त्तामस्तन्नः श्रेयो भविष्यति ॥७७॥
एवमुक्त्वा तदा सर्वे ब्रह्मान्ते व्यवसायिनः ।
योजयित्वा तदा सर्व्वे वर्त्तन्ते योगधर्म्मिणः ॥७८॥

तत्रैव सम्प्रलीयन्ते शान्ता दीपार्च्चिषो यथा ।
ब्रह्मकायमवर्त्तन्त पुनरावृत्तिदुर्ल्लभं ॥७९॥
लोकान्तं समनुप्राप्य सर्व्वे ते भावनामयं ।
आनन्दं ब्रह्मणः प्राप्य अमृतत्वाय ते गताः ॥८०॥
वैराजेभ्यस्तथैवोर्द्धं अन्तरे षड्गुणे ततः ।
ब्रह्मलोकः समाख्यातो यत्र ब्रह्मा पुरोहितः ॥८१॥
ते सर्व्वे प्रणवात्मानो बुद्धशुद्धतपास्तथा ।
आनन्दं ब्रह्मणः प्राप्यामृतत्वञ्च भजन्त्युत ॥८२॥
द्वन्द्वैस्ते नाभिभूयन्ते भावत्रयविवर्ज्जिताः ।
आधिपत्यं विना तुल्या ब्रह्मणस्ते महौजसः ॥८३॥
प्रभावविजयैश्वर्य्यस्थितिवैराग्यदर्शनैः ।
ते ब्रह्मलौकिकाः सर्व्वे गतिं प्राप्य विवर्त्तनीं ॥८४॥
ब्रह्मणा सह देवैश्च सम्प्राप्ते प्रतिसञ्चरे ।
तपसोऽन्ते क्रियात्मानो बुद्धावस्था मनीषिणः ।
अव्यक्ते संप्रलीयन्ते सर्व्वे ते क्षणदर्शिनः ॥८५॥
इत्येतदमृतं शुक्रं नित्यमक्षयमव्ययं ।
देवर्षयो ब्रह्मसत्रं सनातनमुपासते ॥८६॥
अपुनर्मार्गगादीनां तेषां चैवोर्द्धरेतसां ।
कर्माभ्यासकृता शुद्धिर्वेदान्तेषूपलक्ष्यते ॥८७॥
तत्र तेऽभ्यासिनो युक्ताः परां काष्ठामुपासते ।
हित्वा शरीरं पाप्मानममृतत्वाय ते गताः ॥८८॥
वीतरागा जितक्रोधा निर्मोहा सत्यवादिनः ।

शान्ताः प्रणिहितात्मानो दयावन्तो जितेन्द्रियाः ॥८९॥
निःसङ्गाः शुचयश्चैव ब्रह्मसायोज्यगाः स्मृताः ।
अकामयुक्तैर्ये वीरास्तपोभिर्दग्धकिल्बिषाः ।
तेषामभ्रंशिनो लोका अप्रमेयसुखाः स्मृताः ॥९०॥
एतद्ब्रह्मपदन्दिव्यं परमं व्योम्नि भास्वरं ।
यत्र गत्वा न शोचन्ति ह्यमरा ब्रह्मणा सह ॥९१॥
ऋषय ऊचुः । कस्मादेष परार्द्धस्य कश्चैषः पर उच्यते ।
एतद्वेदितुमिच्छामस्तन्नो निगद सत्तम ॥९२॥
सूत उवाच । शृणुध्वं मे परार्द्धस्य परिसंख्यां परस्य च ।
एकं दश शतञ्चैव सहस्रञ्चैव सङ्ख्यया ॥९३॥
विज्ञेयमासहस्रन्तु सहस्राणि दशायुतं ।
एकं शतसहस्रन्तु नियुतं प्रोच्यते बुधैः ॥९४॥
तथा शतसहस्राणामर्बुदं कोटिरुच्यते ।
अर्वुदं दशकोट्यस्तु अब्जं कोटिशतं विदुः ॥९५॥
सहस्रमपि कोटीनां खर्वमाहुर्मनीषिणः ।
दशकोटिसहस्राणि निखर्वमिति तं विदुः ॥९६॥
शतं कोटिसहस्राणां शङ्कुरित्यभिधीयते ।
सहस्रन्तु सहस्राणां कोटीनां दशधा पुनः ।
गुणितानि समुद्रं वै प्राहुः संख्याविदो जनाः ॥९७॥
कोटीनां सहस्रमयुतमित्ययं मध्य उच्यते ।
कोटिसहस्रनियुता स चान्त इतिसंज्ञितः ॥९८॥
कोटिकोटिसहस्राणि परार्द्ध इति कीर्त्त्यते ।

पराईद्विगुणञ्चापि परमाहुर्मनीषिणः ॥९९॥
शतमाहुः परिवृढ़ं[१] सहस्रं परिपद्मकं[२] ।
विज्ञेयमयुतं तस्मान्नियुतं प्रयुतं ततः ॥१००॥
अर्वुदं निर्वुदञ्चैव खर्वुदञ्च[३] ततः स्मृतं ।
खर्वञ्चैव निखर्वञ्च शङ्कु पद्मन्तथैव च ॥१०१॥
समुद्रं मध्यमञ्चैव पराईमपरं ततः ।
एवमष्टादशैतानि स्थानानि गणनाविधौ ॥१०२॥
शतानीति विजानीयात् संज्ञितानि महर्षिभिः ।
कल्पसंख्या प्रवृत्तस्य पराईं ब्रह्मणः स्मृतं[४] ॥१०३॥
तावच्छेषोऽपि कालोऽस्य तस्यान्ते प्रतिसृज्यते ।
पर एष पराईश्च संख्यातः संख्यया मया ॥१०४॥
यस्मादस्य परं वीर्यं परमायुः परन्तपः ।
परा शक्तिः परो धर्म्मः परा विद्या परा धृतिः ॥१०५॥
परं ब्रह्म परं ज्ञानं परमैश्वर्यमेव च ।
तस्मात्परतरं भूतं ब्रह्मणोऽन्यन्न विद्यते ॥१०६॥
परे स्थितो ह्येष परः सर्वार्थेषु ततः परः ।
संख्यातस्तु परो ब्रह्मा[५] तस्याईं तु पराईता ॥१०७॥
संख्येयं चाप्यसंख्येयं सततं चापि तं त्रिकं[६] ।

(१) परिवृढं इति ङ० ।
(२) पद्मपत्रकमिति ख०, परिसद्मकमिति ङ० ।
(३) वृन्दञ्चैव इति ङ० च० ।
(४) पाठोऽयं न समीचीनः ।
(५) धर्म्म इति क० कृ० ।
(६) ते त्रयमिति क० ज० ।

संख्येयं संख्यया दृष्टं अपरार्द्धादिभाव्यते[१] ॥१०८॥
राशौ दृष्टे न संख्यास्ति तदसंख्यस्य[२] लक्षणं ।
अनपत्यं सिक्ताखेषु[३] दृष्टवान् पञ्चलक्षणं[४] ॥१०९॥
ईश्वरैस्तत्प्रसंख्यातं शुद्धत्वाद्दिव्यदृष्टिभिः ।
एवं ज्ञानप्रतिष्ठत्वात्[५] सर्व्वं ब्रह्मानुपश्यति[६] ॥११०॥
एतच्छ्रुत्वा तु ते सर्वे नैमिषेयास्तपस्विनः ।
वाष्पपर्य्याकुलाक्षास्तु प्रहर्षाद्गद्गदस्वराः ॥१११॥
पप्रच्छुर्मातरिश्वानं सर्व्वे ते ब्रह्मवादिनः ।
ब्रह्मलोकस्तु भगवन् यावन्मात्रान्तरः प्रभो ॥११२॥
योजनाग्रेण संख्यातः साधनं योजनस्य तु ।
क्रोशस्य च परीमाणं श्रोतुमिच्छामि तत्त्वतः ॥११३॥
तेषां तद्वचनं श्रुत्वा मातरिश्वा विनीतवाक् ।
उवाच मधुरं वाक्यं यथादृष्टं यथाक्रमं ॥११४॥
वायुरुवाच । एतद्वोऽहं प्रवक्ष्यामि शृणुध्वं मे विवक्षितं ।
अव्यक्ताद्व्यक्तभागो वै महास्थूलो विभाव्यते[७] ॥११५॥

---

(१) अपरार्द्धा च विद्यते इति ख० ।
(२) तदसङ्ख्यास्तु इति क० छ० ज० ।
(३) अनन्त्यसिक्ताखेषु इति क० छ०, सिक्ताद्ब्येषु ङ० च० ।
(४) दृष्टं चान्यं त्वलक्षणं इति छ० ।
(५) ज्ञानात्प्रतीद्यत्वादिति ङ० च० छ० ।
(६) संख्येयं चाप्यसंख्येयमित्यादि सर्व्वं ब्रह्मानुपश्यति इत्यन्तं पाठो न विशुद्धः ।
(७) विभाव्यते इति ङ० ।

दशैव महतां भागा भूतादिः स्थूल उच्यते ।
दशभागाधिकं चापि भूतादिः परमाणुकः ॥११६॥
परमाणुः सुसूक्ष्मस्तु[१] भावग्राह्यो न चक्षुषा ।
यदभेद्यतमं लोके विज्ञेयं परमाणु तत् ॥११७॥
ज्वालान्तरगतं भानोर्यत् सूक्ष्मं दृश्यते रजः ।
प्रथमं तत्प्रमाणानां परमाणुं प्रचक्षते ॥११८॥
अष्टानां परमाणूनां समवायो यदा भवेत् ।
त्रसरेणुः समाख्यातस्तत्पद्मरज उच्यते ॥११९॥
त्रसरेणवस्तु येऽप्यष्टौ रथरेणुस्तु स स्मृतः ।
तेऽप्यष्टौ समवायस्था वलाग्रं[२] तत्स्मृतं बुधैः ॥१२०॥
वलाग्राण्यष्ट लिक्षा स्याद्यूका तच्चाष्टकं[३] भवेत् ।
यूकाष्टकं यवं प्राहुरङ्गुलन्तु यवाष्टकं ॥१२१॥
द्वादशाङ्गुलपर्व्वाणि वितस्तिस्थानमुच्यते ।
रत्निश्चाङ्गुलपर्वाणि विज्ञेयो ह्येकविंशतिः ॥१२२॥
चत्वारि विंशतिश्चैव हस्तः स्यादङ्गुलानि तु ।
किष्कुर्द्विरत्निर्विज्ञेयो द्विचत्वारिंशदङ्गुलः ॥१२३॥
षण्णवत्यङ्गुलश्चैव धनुराहुर्मनीषिणः ।
एतद्गव्यूतिसंख्यायां पादानां धनुषः स्मृतः[४] ॥१२४॥

---

(१) परमाण्वतिसूक्ष्मस्तु इति ङ० ज० ।
(२) बालाग्रं इति ङ० च० ।
(३) तास्ताष्टका इति पाठो विशुद्धः ।
(४) पाठोऽयं लिपिकरप्रमादादुद्भूतः ।

धनुर्दण्डो युगं नाली तुल्यान्येतान्यथाङ्गुलैः ।
धनुषस्त्रिशतं नल्वमाहुः संख्याविदो जनाः ॥१२५॥
धनुःसहस्रे द्वे चापि गव्यूतिरुपदिश्यते ।
अष्टौ धनुःसहस्राणि योजनन्तु विधीयते ॥१२६॥
एतेन धनुषा चैव योजनन्तु समाप्यते ।
एतत्सहस्रं विज्ञेयं शक्रक्रोशान्तरन्तथा ॥१२७॥
योजनानान्तु संख्यातं संख्याज्ञानविशारदैः ।
एतेन योजनाग्रेण शृणुध्वं ब्रह्मणोऽन्तरं ॥१२८॥
महीतलात् सहस्राणां शतादूर्द्धं दिवाकरः ।
दिवाकरात्सहस्रेण तावदूर्द्धं निशाकरः ॥१२९॥
पूर्णं शतसहस्रन्तु योजनानां निशाकरात् ।
नक्षत्रमण्डलं कृत्स्नमुपरिष्टात् प्रकाशते ॥१३०॥
शतं सहस्रं संख्यातो मेरुर्द्विगुणितं पुनः ।
ग्रहान्तरमथैकैकमूर्द्धं नक्षत्रमण्डलात् ॥१३१॥
ताराग्रहाणां[१] सर्व्वेषामधस्ताच्चरते बुधः ।
तस्योर्द्धञ्चरते शुक्रस्तस्मादूर्द्धं च लोहितः ॥१३२॥
ततो बृहस्पतिश्चोर्द्धं तस्मादूर्द्धं शनैश्चरः ।
ऊर्द्धं शतसहस्रन्तु योजनानां शनैश्चरात् ॥१३३॥
सप्तर्षिमण्डलं कृत्स्नमुपरिष्टात्प्रकाशते ।
ऋषिभि[२]स्तु सहस्राणां शतादूर्द्धं विभाव्यते ॥१३४॥

---

(१) ताराग्रहाणामिति पाठो न समीचीनः ।
(२) ऋषिभ्य इति पाठः साधुः ।

योऽसौ तारामये दिव्ये विमाने ह्रस्वरूपके ।
उत्तानपादपुत्रोऽसौ मेधीभूतो ध्रुवो दिवि ॥१३५॥
त्रैलोक्यस्यैष उत्सेधो व्याख्यातो योजनैर्मया ।
मन्वन्तरेषु देवानामिज्या यत्रैव लौकिकी ॥१३६॥
वर्णाश्रमेभ्य इज्या तु लोकेऽस्मिन् या प्रवर्त्तते ।
सर्वेषां देवयोनीनां स्थितिहेतुः स वै स्मृतः ॥१३७॥
त्रैलोक्यमेतद्व्याख्यातमत ऊर्द्ध्वं निबोधत ।
ध्रुवादूर्द्ध्वं महर्लोको यस्मिंस्ते कल्पवासिनः ।
एकयोजनकोटी सा इत्येवं निश्चयं गतं ॥१३८॥
द्वे कोट्यौ तु महर्लोकात् यस्मिंस्ते कल्पवासिनः ।
यत्र ते ब्रह्मणः पुत्रा दक्षाद्याः साधकाः स्मृताः ॥१३९॥
चतुर्गुणोत्तरादूर्द्ध्वं जनलोकात्तपः स्मृतं ।
वैराजा यत्र ते देवा भूतदाहविवर्जिताः ॥१४०॥
षड्गुणन्तु तपोलोकात् सत्यलोकान्तरं स्मृतं ।
अपुनर्मारकामानां ब्रह्मलोकः स उच्यते ॥१४१॥
यस्मान्न च्यवते भूयो ब्रह्माणं स उपासते ।
एककोटिर्योजनानां पञ्चाशन्नियुतानि तु ॥१४२॥
ऊर्द्ध्वभागस्ततोऽण्डस्य ब्रह्मलोकात्परः स्मृतः ।
चतुरश्चैव कोट्यस्तु नियुता पञ्चषष्टि च ॥१४३॥
एषोऽर्द्धांशप्रचारोऽस्य गत्यन्तश्चापरः स्मृतः(१) ।

(१) पाठोऽयं लिपिकरप्रमादादुत्पन्नः ।

ध्रुवाग्रमेतद्व्याख्यातं योजनाग्राद्यथाश्रुतं ॥१४४॥
अधोगतीनां वक्ष्यामि भूतानां स्थानकल्पनां।
गच्छन्ति घोरकर्म्माणः प्राणिनो यत्र कर्म्मभिः॥१४५॥
नरको रौरवो रोधः सूकरस्ताल एव च।
तप्तकुम्भो महाज्वालः शवलोऽथ विमोचनः ॥१४६॥
कृमी च कृमिभक्षश्च लालाभक्षो विशंसनः।
अधःशिराः पूयवहो रुधिरान्धस्तथैव च ॥१४७॥
तथा वैतरणं कृष्णमसिपत्रवनं तथा।
अग्निज्वालो महाघोरः संदंशोऽथ श्वभोजनः॥१४८॥
तमश्च कृष्णसूत्रश्च लोहश्चाप्यसिजस्तथा।
अप्रतिष्ठोऽथ वीच्यश्च नरका ह्येवमादयः ॥१४९॥
तामसा नरकाः सर्वे यमस्य विषये स्थिताः।
येषु दुस्कृतकर्माणः पतन्तीह पृथक् पृथक्॥१५०॥
भूमेरधस्तात्ते सर्वे रौरवाद्याः प्रकीर्त्तिताः।
रौरवे कूटसाक्षी तु मिथ्या यश्चाभिशंसति।
कूटग्रहे पक्षवादी ह्यसत्यः पतते नरः॥१५१॥
रोधे गोघ्नो भ्रूणहा च अग्निदाता पुरस्य च।
सूकरे ब्रह्महा मज्जेत्सुरापः स्वर्णतस्करः ॥१५२॥
ताले पतेत् क्षत्रियहा हत्वा वैश्यञ्च दुर्गतिं।
ब्रह्महत्याञ्च यः कुर्याद्यश्च स्याद्गुरुतल्पगः ॥१५३॥
तप्तकुम्भी स्वसागामी तथा राजभटश्च यः।
तप्तलोहे चाश्ववणिक् तथा बन्धनरक्षिता ॥१५४॥

साध्वीविक्रयकर्त्ता च यस्तु भक्तं[१] परित्यजेत् ।
महाज्वाले दुहितरं स्नुषां गच्छति यस्तु वै ॥१५५॥
वेदो विक्रीयते येन वेदं दूषयते च यः ।
गुरूंश्चैवावमन्यन्ते वाक्शैस्ताडयन्ति च ॥१५६॥
अगम्यगामी च नरो नरकं शवलं व्रजेत् ।
विमोहे पतिते चौरे[२] मर्यादां यो भिनत्ति वै ॥१५७॥
दुरष्टं[३] कुरुते यस्तु कीटलोहं प्रपद्यते ।
देवब्राह्मणविद्वेष्टा गुरूणाञ्चाप्यपूजकः ।
रत्नं दूषयते यस्तु कृमिभक्ष्यं प्रपपद्यते ॥१५८॥
पर्य्यश्नाति च एकोऽन्यो ब्राह्मणीं[४] सुहृदः सुतां ।
लालाभक्षे स पतति दुर्गन्धे नरके गतः[५] ॥१५९॥
काण्डकर्त्ता[६] कुलालश्च निष्कहर्त्ता चिकित्सकः ।
आरामेष्वग्निदाता यः पतते स विशंसने ॥१६०॥
असत्प्रतिग्रही यश्च तथैवायाज्ययाजकः ।
नक्षत्रैर्जीवितो यश्च नरो गच्छत्यधोमुखं ॥१६१॥

---

(१) भक्तमिति पाठो लेखकप्रमादजनितः ।

(२) आदर्शपुस्तकमात्रे, विमोहे पतिते चौरे इति पाठो वर्त्तते । अत्र विमोहे पतते चौरो इति पाठोऽर्थसङ्गतिकरः ।

(३) दुरष्टमित्यत्र दुरध्व अथवा दुरुक्तमिति पाठोऽर्थप्रतिपत्तिकरः ।

(४) ब्राह्मणा इति ख० ङ० च० छ० । क० ग० ज० पुस्तकेषु एतच्छ्लोकार्द्धं न विद्यते ।

(५) गत इत्यत्र मृत इति पाठः साधुः ।

(६) भाण्डकर्त्ता इति ङ० ।

क्षीरं सुरां च मांसं च लाक्षां गन्धं रस[१]न्तिलान्।
एवमादीनि विक्रीणन् घोरे पूयवहे पतेत्॥१६२॥
यः कुक्कुटानि बध्नाति मार्जारान् सूकरांश्च तान्।
पक्षिणश्च मृगान् छागान् सोऽप्येनं नरकं व्रजेत्॥१६३॥
आजीविको माहिषकस्तथा चक्रध्वजी च यः।
रङ्गोपजीविको विप्रः शाकुनिग्रामयाजकः॥१६४॥
आगारदाही गरदः कुण्डाशी सोमविक्रयी।
सुरापो मांसभक्षश्च तथा च पशुघातकः॥१६५॥
विश्वस्ता महिषादीनां मृगहन्ता तथैव च।
पर्वकारश्च सूची च यश्च स्यान्मित्रघातकः।
रुधिरान्धे पतन्त्येते एवमाहुर्मनीषिणः॥१६६॥
उपविष्टमेकपङ्क्त्यां विषमं भोजयन्ति ये।
पतन्ति नरके घोरे विड्भुजे नात्र संशयः॥१६७॥
मृषावादी नरो यश्च तथा प्राक्रोशकोऽशुभः।
पतति नरके घोरे मूत्राकीर्णे स पापकृत्॥१६८॥
मधुग्राहाभिहन्तारो यान्ति वैतरणीं नराः।
उन्मत्ताश्चित्तभग्नाश्च शौचाचारविवर्ज्जिताः॥१६९॥
क्रोधना दुःखदाश्चैव[२] कुहकाकृष्टगामिनः।
असिपत्रवने छेदी[३] तथाह्यौरभ्रिकाश्च ये।

---

(१) गन्धरसमिति ख० ङ० च०।

(२) दुःखदाश्चैव इत्यत्र आदर्शपुस्तकमात्रे दुःखदाराश्च इति पाठो वर्त्तते।

(३) अयं पाठो न समीचीनः।

कर्त्तनैश्च विकृष्यन्ते मृगव्याधाः सुदारुणैः ॥१७०॥
आश्रमप्रत्यवसिता अग्निज्वाले पतन्ति वै ।
भोज्यन्ते श्यामशवलैरयस्तुण्डैश्च वायसैः ॥१७१॥
इज्यायां व्रतमालोपात्[१] सन्दंशे नरके पतेत् ॥
स्कन्दते यदि वा स्वप्ने व्रतिनो ब्रह्मचारिणः ॥१७२॥
पुत्रैरध्यापिता ये च पुत्रैराज्ञापिताश्च ये ।
ते सर्वे नरकं यान्ति नियतन्तु श्वभोजने ॥१७३॥
वर्णाश्रमविरुद्धानि क्रोधहर्षसमन्विताः ।
कर्माणि ये तु कुर्वन्ति सर्वे निरयगामिनः ॥१७४॥
उपरिष्टात्स्थितो घोर उष्णात्मा रौरवो महान् ।
सुदारुणस्तु शीतात्मा तस्याधस्तात्तपः स्मृतः[२] ॥१७५॥
एवमादिक्रमेणैव वर्ण्यमानान्निबोधत ।
भूमेरधस्तात्सप्तैव नरकाः परिकीर्तिताः ॥१७६॥
अधर्मसूनवस्ते स्युरन्धतामिस्रकादयः ।
रौरवः प्रथमस्तेषां महारौरव एव च ॥१७७॥
अस्याधः पुनरप्यन्यः शीतस्तप इति स्मृतः ।
तृतीयः कालसूत्रः स्यात् महाहविविधिः[३] स्मृतः ॥१७८॥
अप्रतिष्ठश्चतुर्थः स्यादवीची पञ्चमः स्मृतः ।
लोहपृष्ठस्तमस्तेषामविधेयस्तु सप्तमः ॥१७९॥

---

(१) इज्याव्रतसमालोपादिति पाठः साधुः ।
(२) तमोमय इति पाठः समीचीनः ।
(३) महाविविधिहविरिति ख० ।

घोरत्वाद्रौरवः प्रोक्तः साम्भको(१)दहनः स्मृतः ।
सुदारुणस्तु सीतात्मा तस्याधस्तात्तपो(२)ऽधमः ॥१८०॥
सर्पो निकृन्तनः प्रोक्तः कालसूत्रेति दारुणः ।
अप्रतिष्ठे स्थितिर्नास्ति भ्रमस्तस्मिन् सुदारुणः ॥१८१॥
अवीचिर्दारुणः प्रोक्तो यन्त्रसंपीडनाच्च सः ।
तस्मात्सुदारुणो लोहः कर्म्मणां चयणाच्च(३) सः ॥१८२॥
तथाभूते शरीरत्वा(४)दविवेभ्यस्तु(५) स स्मृतः ।
पीडबन्धबधासङ्गादप्रतीकारलक्षणः ॥१८३॥
ऊर्द्धं शैलमिता(६)स्ते तु निरालोकाश्च ते स्मृताः ।
दुःखोत्कर्षस्तु सर्वेषु अधर्मस्य निमित्ततः ॥१८४॥
ऊर्द्धं लोकैः समावेतौ निरालोकौ च तावुभौ ।
कूटाङ्गारप्रमाणैश्च(७) शरीरी मूत्रनायकः(८) ॥१८५॥
उपभोगसमर्थैस्तु सद्यो जायन्ति कर्मभिः ।
दुःखप्रकर्षश्चोग्रत्वं तेषु सर्वेषु वै स्मृतः ॥१८६॥

---

(१) सोष्ठको इति क०, सोम्भको इति ख० सोष्टको ङ० च० छ० ।
(२) त्तमो इति ङ० च० ।
(३) च्चपणाच्चेति ख० ङ० च० छ०
(४) तथाभूतोशरीरत्वादिति ङ० च० ।
(५) पाठोऽयं न विशुद्धः। अविवेभ्य इत्यत्र अविधिभ्य इति पाठः सम्भाव्यते ।
(६) शैलमिता इत्यत्र शैलमया इति पाठः सम्भवपरः ।
(७) स्तैरिति ङ० छ० ज० ।
(८) पाठोऽयं न समीचीनः । मूत्रनायक इत्यत्र । तत्र नायकः इति ख० ।

यातनाश्चाप्यसंख्येया नारकानां तथा स्मृताः ।
तत्रानुभूय ते दुःखं क्षीणे कर्म्मणि वै पुनः ॥१८७॥
तिर्य्यग्योनौ प्रसूयन्ते कर्म्मशेषे गते ततः[१] ।
देवाश्च नारकाश्चैव ऊर्द्धं चाधश्च संस्थिताः ॥१८८॥
धर्म्माधर्म्मनिमित्तेन सद्यो जायन्ति मूर्त्तयः ।
उपभोगार्थमुत्पत्तिरौपपत्तिककर्म्मतः ॥१८९॥
पश्यन्ति नारकान् देवा ह्यधोवक्त्रान् ह्यधोगतान् ।
नारकाश्च तथा देवान् सर्वान् पश्यन्त्यधोमुखान् ॥१९०॥
अनद्यमूलता यस्माद्धारणाश्च स्वभावतः[२] ।
तस्मादूर्द्धमधोभावो लोकालोके न विद्यते ॥१९१॥
एषा स्वाभाविकी संज्ञा लोकालोके प्रवर्त्तते[३] ।
अथाब्रुवन् पुनर्वायुं ब्राह्मणाः सत्रिणस्तदा ॥१९२॥
ऋषय ऊचुः । सर्वेषामेव भूतानां लोकालोकनिवासिनां ।
संसारे संसरन्तीह यावन्तः प्राणिनश्च तान् ॥१९३॥
सङ्ख्यया परिसङ्ख्याय ततः प्रब्रूहि कृत्स्नशः ।
ऋषीणां तद्वचः श्रुत्वा मारुतो वाक्यमब्रवीत् ॥१९४॥
वायुरुवाच । न शक्या जन्तवः कृत्स्नाः प्रसंख्यातुं कथञ्चन ।
अनाद्यन्ताश्च संकीर्णा ह्यप्यूहेन व्यवस्थिताः ।

---

(१) कर्म्मशेषे गोन्तगः इति क० कर्म्मशेषे तु गोमताः इति ख० कर्म्मशेषेन्तगे ततः इति च० कर्म्मशेषेन्तगोन्तग इति छ० ज० । कर्म्मशेषे गते ततः इत्यनन्तरं श्लोकार्द्धं पतितं ।

(२) स्वास्य भावतः इति क० ज० ।

(३) नारकाश्च तथा देवानित्यादि प्रवर्त्तते इत्यन्तं पाठो न साधुः ।

गणना विनिवृत्तैषामानन्त्येन प्रकीर्त्तिताः ॥१९५॥
न दिव्यचक्षुषा ज्ञातुं शक्या ज्ञानेन वा पुनः ।
चक्षुषा वै प्रसंख्यातुं अतो ह्यन्ते नराधिपः[१] ॥१९६॥
अनाध्याना[२]द्वेद्यत्वान्नैव प्रश्नो विधीयते ।
ब्रह्मणा संज्ञितं यत्तु संख्यया तन्निबोधत ॥१९७॥
यः सहस्रतमो भागः स्थावराणां भवेदिह ।
पार्थिवाः क्रिमयस्तावत्संसेकाद्येषु सम्भवाः[३] ॥१९८॥
संसेकज्ञानाभागेन सहस्रेणैव संमिताः ।
औदका जन्तवः सर्वे निश्चयात्तद्विचारितं ॥१९९॥
सहस्रेणैव भागेन सत्वानां सलिलौकसां ।
विहङ्गमास्तु विज्ञेया लौकिकास्ते च सर्वशः ॥२००॥
यः सहस्रतमोभागस्तेषां वै पक्षिणां भवेत् ।
पशवस्तत्समा ज्ञेया लौकिकास्तु चतुष्पदाः ॥२०१॥
चतुष्पदानां सर्वेषां सहस्रेनैव संमताः ।
भागेन द्विपदा ज्ञेया लौकिकेऽस्मिंस्तु सर्व्वशः ॥२०२॥
यः सहस्रतमो भागो भागे तु द्विपदां पुनः ।
धार्म्मिकास्तेन भागेन विज्ञेयाः सम्मिताः पुनः ॥२०३॥
सहस्रेनैव भागेन धार्मिकेभ्यो दिवङ्गताः ।
यः सहस्रतमो भागो धार्मिकाणां भवेद्दिवि ।

(१) पाठोऽयं न सम्यक् ।
(२) अनाख्यानादिति ख० ङ० च० ।
(३) पाठोऽयं न समीचीनः । संङ्काद्येषु च सम्भवा इति क० ।

संमितास्तेन भागेन मोक्षिणस्तावदेव हि ॥२०४॥
स्वर्गोपपादकैस्तुल्या यातनास्थानवासिनः ।
पतितास्तूर्णमुद्देशाद्दुरात्मानो म्रियन्ति ये ।
रौरवे तामसे ह्येते शीतोष्णं प्राप्नुवन्ति ते ॥२०५॥
वेदनाकटुकास्तब्धा यातनास्थानमागताः ।
उष्णस्तु रौरवो ज्ञेयस्तेजो(१) घोररसात्मकः ॥२०६॥
ततो घनात्मिकश्चापि शीतात्मा सततं तपः(२) ।
एवं सुदुर्लभाः सन्तः स्वर्गे च धार्मिका नराः ॥२०७॥
एषा संख्या कृता संख्याईश्वरेण स्वयम्भुवा ।
गणना विनिवृत्तैषा सञ्ज्ञा ब्राह्मी च मानुषी ॥२०८॥
ऋषय ऊचुः । महो जनस्तपः सत्यं भूतो भाव्यो भवस्तथा ।
उक्ता ह्येते त्वया लोका लोकानामन्तरेण च ।
लोकान्तरञ्च यादृग्वै तन्नो ब्रूहि यथातथं ॥२०९॥
तेषां तद्वचनं श्रुत्वा ऋषीणामूर्द्धरेतसां ।
स वायु र्दृष्टतत्त्वार्थ इदन्तत्त्वमुवाच ह ॥२१०॥
वायुरुवाच । व्यक्तं तर्केण पश्यन्ति योगात्प्रत्यक्षदर्शिनः ।
प्रत्याहारेण ध्यानेन तपसा च क्रियात्मनः ॥२११॥
ऋभुः सनत्कुमाराद्याः सम्बुद्धाः शुद्धबुद्धयः ।
व्यपेतशोका विरजाः सन्तो ब्रह्मे वसत्तमाः ॥२१२॥
अक्षयाः प्रीतिसंयुक्ता ब्रह्मे तिष्ठन्ति योगिनः ।

---

(१) स्तेन इति क० ।
(२) तमः इति पाठः साधीयान् ।

ऋषीणां बालखिल्यानां तैर्यथाहृतमीश्वरैः ॥२१३॥
यथा चैव मया दृष्टं सानिध्यन्तत्र कुर्वता ।
अनह्यसत्कृतार्थानामालयं चेश्वरस्य यत् ॥२१४॥
ईश्वरः परमाणुत्वाद्भावग्राह्यो मनीषिणां ।
ज्ञानं वैराग्यमैश्वर्यन्तपः सत्यं क्षमा धृतिः ॥२१५॥
द्रष्टृत्वमात्मसम्बन्धमधिष्ठानत्वमेव च ।
अव्ययानि दशैतानि तस्मिन् तिष्ठन्ति शङ्करे ॥२१६॥
विभुत्वात् खलु योगाग्नि(१) ब्रह्मणोऽनुग्रहे रतः ।
स लोकविग्रहो भूत्वा साहाय्यमुपतिष्ठते ॥२१७॥
अक्षरं ध्रुवमव्ययमष्टमन्त्वौपसर्गिकं ।
तस्येश्वरस्य यन्मात्रस्थानं(२) मायामयं परं ॥२१८॥
मायया कृतमाचष्टे मायी देवो महेश्वरः ।
देवानामुपसंहारस्तत्प्रमाणं हि कीर्त्त्यते ॥२१९॥
विस्तरेणानुपूर्व्या च ब्रुवतो मे निबोधत ।
त्रयोदशैव कोट्यस्तु नियुता दश पञ्च च ।
भूर्लोकाद्ब्रह्मलोको वै योजनैः सम्प्रकीर्त्त्यते ॥२२०॥
एकयोजनकोटी तु पञ्चाशन्नियुतानि च ।
ऊर्द्धं भागवताण्डन्तु ब्रह्मलोकात्परं स्मृतं ॥२२१॥
एषोर्द्धगप्रचारस्तु गत्यन्तश्च ततः स्मृतं ।

(१) योगाद्धि इति ख० यागाग्नि इति घ० ।
(२) यन्मात्रस्तानामिति ज० ।

नित्या ह्यपरिसंख्येयाः परस्परगुणाश्रयाः ॥१२२॥
सूक्ष्माः प्रसवधर्मिण्यस्ततः प्रकृतयः स्मृताः ।
येभ्यो[१]ऽधिकर्त्ता संजज्ञे क्षेत्रज्ञो ब्रह्मसंज्ञितः॥१२३॥
तासु प्रकृतिमत्सूक्ष्ममधिष्ठातृत्वमव्ययं।
अनुत्पाद्यं परन्धाम परमाणु परेश्वरं॥१२४॥
अक्षयश्चाप्यनुह्यश्च अमूर्त्तिर्मूर्त्तिमानसौ ।
प्रादुर्भावस्तिरोभावः स्थितिश्चैवाप्यनुग्रहः ॥१२५॥
विधिरन्यैरनौपम्यः परमाणुर्महेश्वरः।
सतेजा एष तमसो यः पुरस्तात् प्रकाशकः ॥१२६॥
यदण्डमासीत्सौवर्णं प्रथमन्त्वौपसर्गिकं ।
बृहतं सर्वतोवृत्तमीश्वराद्यवजायत॥१२७॥
ईश्वराद्वीजनिर्भेदः क्षेत्रज्ञो वीज इष्यते ।
योनिं प्रकृतिमाचष्टे सा च नारायणात्मिका॥१२८॥
विभुर्लोकस्य सूक्ष्मार्थं लोकसंस्थानमेव च।
सन्निसर्गः स तन्वा च[२] लोकधातुर्महात्मनः॥१२९॥
पुरस्ताद्ब्रह्मलोकस्य अण्डादर्वाक्च ब्रह्मणः।
तयोर्मध्ये पुरं दिव्यं स्थानं यस्य मनोमयं ॥१३०॥
तद्दिव्यदेवतः स्थानमीश्वरस्यामितौजसः।

---

(१) याभ्य इति पाठः साधुः।

(२) स निसर्गः स तन्वी च इति पाठः सम्भाव्यते। स्वतन्वा इत्यत्र सतत्वाच्च इति ङ० क० ज०, स्वतत्वाच्चेति च०।

शिवं नाम पुरं तत्र शरण्यं जन्मभीरूणां ॥२३१॥
सहस्राणां शतं पूर्णं योजनानां द्विजोत्तमाः ।
अभ्यन्तरे तु विस्तीर्णं महीमण्डलसंस्थितं ॥२३२॥
मध्याह्नार्कप्रकाशेन परतेजोऽभिमर्दिना ।
शातकौम्भेन महता प्राकारेणार्कवर्चसा ॥२३३॥
द्वारैश्चतुर्भिः सौवर्णैर्मुक्तादामविभूषितैः ।
तपनीयनिभैः शुभ्रैर्गाढ़ं सुकृतवेष्टनं ॥२३४॥
तत्राकाशे पुरं रम्यं दिव्यं घण्टादिनादितं ।
न तत्र क्रमते मृत्युर्न तपो न जरा श्रमाः ॥२३५॥
नददन्यैः पुराचारं रूपमासौतुमर्हति[१] ।
सहस्राणां शतं पूर्णं योजनानां दिशो दश ॥२३६॥
तत्पुरं गोवृषांकस्य तेजसा व्याप्य तिष्ठति ।
भावेन मनसो भूमिर्विन्यस्ता कनकामयी ॥२३७॥
रत्नवालुकया तत्र विन्यस्ता शुभ्रशुभेऽधिकं ।
शारदेन्दुप्रकाशानि बालसूर्य्यनिभानि च ॥२३८॥
अर्द्धश्वेतार्द्धरक्तानि सौवर्णानि तथैव च ।
रथचक्रप्रमाणानि नालैर्मरकतप्रभैः ॥२३९॥
सौकुमारेण रूपेण गन्धिना प्रतिभेन च ।
तत्र दिव्यानि पद्मानि वनेषूपवनेषु च ॥२४०॥
शङ्खपत्त्रनिकाशानि तपनीयानि यानि च ।

---

(१) पाठोऽयं न विशुद्धः । अत्र न हि तस्य पुरस्यान्यैरुपमां कर्त्तुमर्हति इति पाठः सम्भवितुमर्हति ।

अर्द्धकृष्णार्द्धरक्तानि सुकुमारान्तराणि च ॥२४१॥
आतपत्रप्रमाणानि पङ्कजैः संवृतानि च ।
भूयः सप्त महानद्यस्तासान्नामानि बोधत ॥२४२॥
वरा वरेण्या वरदा वरार्हा वरवर्णिनी ।
वरमा वरभद्रा च रम्यास्तस्मिन् पुरोत्तमे ॥२४३॥
पद्मोत्पलदलोन्मिश्रं फेनाद्यावर्त्तविग्रहं ।
जलं मणिदलप्रख्यमावहन्ति सरिद्वराः ॥२४४॥
न तु ब्रह्मर्षयो देवा नासुराः पितरस्तथा ।
न खल्वन्येऽप्रमेयस्य विदुरीशस्य तत्पुरं ॥२४५॥
तत्र ये ध्यानमव्यग्राः सुयुक्ता विजितेन्द्रियाः ।
पश्यन्तीह महात्मानः पुरन्तद्रोद्रपात्मनः ॥२४६॥
मध्ये पुरवरेन्द्रस्य तस्याप्रतिमतेजसः ।
सुमहान्मेरुसङ्काशो दिव्यो भद्रश्रिया वृतः ।२४७॥
सहस्रपादः प्रासादस्तपनीयमयः शुभः ।
अनुपमेयै(१)रत्नैश्च सर्वतः स विभूषितः ॥२४८॥
स्फटिकैश्चन्द्रसङ्काशैर्वैदूर्यैः सोमसंप्रभैः ।
बालसूर्य्यप्रभैश्चैव सौवर्णैश्चाग्निसंप्रभैः ॥२४९॥
राजतैश्चापि शुशुभे इन्द्रनीलमयैः शुभैः ।
दृढैर्वज्रमयैश्चैव इत्येवं सुमहाद्भितैः ॥२५०॥
जलैश्च विविधाकारैर्दीप्यद्भिरधिवासितं ।
चन्द्ररश्मिप्रकाशाभिः पातकाभिरलंकृतं ॥२५१॥

---

(१) अनुपम्यमानैरिति ङ० च० ।

रुक्मघण्टानिनादैश्च नित्यप्रमुदितोत्सवः ।
किन्नराणामधीवासैः सन्ध्याभ्राकारराजितैः ॥२५२॥
परिवारसमन्तात्तु हेमपुष्पोदकप्रभैः[१] ।
यथा हि मेरुशैलेन्द्रो हेमशृङ्गैर्विराजते ॥२५३॥
चामीकरमयीभिस्तु पातकाभिस्तथा पुरं ।
एवं प्रासादराजोऽसौ भूमिकाभिर्विराजते ॥२५४॥
वसन्तप्रतिमा[२] यत्र त्र्यम्बकस्य निवेशने ।
लक्ष्मीः श्रीश्च वपुर्म्माया कीर्त्तिः शोभा सरस्वती ॥२५५॥
देव्या वै सहिता ह्येता रूपगन्धसमन्विताः ।
नित्या ह्यपरिसङ्ख्याताः परस्परगुणाश्रयाः ।
भूषणं सर्वरत्नानां योन्यः कान्तिविलासयोः ॥२५६॥
कोटीशतं महाभागा विभज्यात्मानमात्मना ।
भगवन्तं महात्मानं प्रतिमोदन्त्यतन्द्रिताः ॥२५७॥
तासां सहस्रशश्चान्याः पृष्ठतः परिचारिकाः ।
रूपिण्यश्च श्रिया युक्ताः सर्वाः कमललोचनाः ॥२५८॥
लीलाविलाससंयुक्तैर्भावैरतिमनोहरैः ।
गणैस्ताः सह मोदन्ते शैलाभैः पावकोपमैः ॥२५९॥
कुब्जा कामनिकामैश्च वरगात्रा हयाननाः ॥
पुण्ड्राश्च विकटाश्चैव करालाश्चिपिटाननाः[३] ॥२६०॥

---

(१) हेमपुस्पोपगैङ्गमैः इति ङ० हेमपुस्पोपगैक्रीमैः इति च० ।
(२) रमत्यप्रतिमा इति ङ० च० ।
(३) स्व पिटाननाः इति ङ० च० ।

लम्बोदरा ह्रस्वभुजा विनेत्रा ह्रस्वपादिकाः ।
मृगेन्द्रवदनाश्चान्या गजवक्त्रोदरास्तथा ॥२६१॥
गजाननास्तथैवान्याः सिंहव्याघ्राननास्तथा ।
लोहिताक्षा महास्तन्यः सुभगाश्चारुलोचनाः ॥२६२॥
ह्रस्वकुञ्चितकेशाश्च सुन्दर्य्यश्चारुलोचनाः ।
अन्याश्च कामरूपिण्यो नानावेशधराः स्त्रियः ॥२६३॥
अभ्यन्तरपरिस्कन्धा देवावासगृहोचिताः ।
रराम भगवांस्तत्र दशबाहुर्महेश्वरः ॥२६४॥
नन्दिना च गणैः सार्द्धं विश्वरूपैर्महात्मभिः ।
तथा रुद्रगणैश्चापि तुल्यौदार्य्यपराक्रमैः ॥२६५॥
पावकात्मजसङ्काशैर्यूपदंष्ट्रोत्कटाननैः ।
वन्द्यमानो विमानश्च(१) पूज्यमानश्च तत्परैः ॥२६६॥
सर्वर्तुकुसुमां मालां जिघ्रमाणोरसि स्थितां ।
नीलोत्पलदलश्यामं पृथुताम्रायतेक्षणं ॥२६७॥
ईषत्कराललम्बोष्ठं तीक्ष्णदंष्ट्रागणाञ्चितं ।
षडूर्द्ध्वनेत्रं दुष्प्रेक्ष्यं रुचिरक्षीरवाससं ॥२६८॥
आहवेष्वपरिक्लिष्टं देवानामरिनाशनं ।
बाहुना बाहुमावेश्य पार्श्वे सव्येऽन्तरे स्थितं ॥२६९॥
रराजापदिश(२)न्तस्य वामाग्रकरगोचरं ।
महाभैरवनिर्घोषं बलेनाप्रतिमौजसं ।
दशवर्णधनुश्चैव विचित्रं शोभतेऽधिकं ॥२७०॥

---

(१) विमानश्च इत्यत्र विमानस्थैरिति पाठः साधीयान् ।
(२) अपदिशमितिपाठो लेखकप्रमादजनितः ।

त्रिशूलं विद्युताभासममोघं शत्रुनाशनं ।
जाज्वल्यमानं वपुषा परमं तत्त्विषा युतं ॥२७१॥
अग्निश्चैवौजसां श्रेष्ठः शीतरश्मिः शशी तथा ।
तेजसा वपुषा कान्त्या देवेशस्य महात्मनः ।
शुशुभेऽभ्यधिकं तत्र वेद्यामग्निशिखा इव ॥२७२॥
स्थितः पुरस्ताद्देवस्य शातकौम्भमयो महान् ।
शुशुभे रुचिरः श्रीमान् सोदकः स कमण्डलुः ॥२७३॥
अग्निमावेश्य चाङ्गेषु पाण्डुराम्बरधारिणी ।
उरश्छेदेन महता मौक्तिकेन विराजिता ।
चतुर्भुजा महाभागा विजया लोकसम्मता ॥२७४॥
देव्या आद्यः प्रतीहारी श्रीरिवाप्रतिमा परा ।
विभ्राजती स्थिता चैव कृत्वा देवस्य चाञ्जलिं ॥२७५॥
तस्याः पृष्ठानुगास्त्वान्याः स्त्रियोऽप्सरोगणान्विताः ।
ताः खल्वभिनवैः कान्तैरुपतिष्ठन्ति शङ्करं ॥२७६॥
सर्वलक्षणसम्पन्ना वादित्रैरुपसंहिताः ।
उपगायन्ति देवेशं गणा गन्धर्वयोनयः ॥२७७॥
अभ्युन्नतो महोरस्कः शरन्मेघसमद्युतिः ।
शोभते नन्दमानस्तु गोपतिस्तस्य वेश्मनि ॥२७८॥
स्कन्दस्तु सपरीवारः पुत्रोऽस्यामितवीर्य्यवान् ।
रक्ताम्बरधरः श्रीमान् वराम्बुजदलेक्षणः ॥२७९॥
तस्य शाखो विशाखस्तु नैगमेयस्तु चाष्टवान्[१] ।

(१) नष्टसा इति ङ० च० ।

व्यपेतव्यसनाक्रूराः प्रजानां पालने रताः ॥२८०॥
तैः सार्द्धं स महावीर्य्यः शोभते शिखिवाहनः ।
व्यालक्रीड़नकैस्तत्र क्रीड़ते विश्वतोमुखः ॥२८१॥
ये नृपा विबुधेन्द्राणां काञ्चनस्य प्रदायिनः ।
ये च स्वायतना(१) विप्रा गृहस्था ब्रह्मवादिनः ॥२८२॥
गूढस्वाध्यायतपसस्तथा चैवोञ्छवृत्तयः ।
एते सभासदस्तस्य देवेशस्य च सम्मताः ॥२८३॥
मन्वन्तराण्यनेकानि व्यवर्त्तन्त(२) पुनः पुनः ।
श्रूयतां देवदेवस्य भविष्याश्चर्य्यमुत्तमं ॥२८४॥
व्याघ्राश्चैवानुगास्तत्र काञ्चनाभास्तरस्विनः ।
स्वच्छन्दचारिणः सर्वे स्वयं देवेन निर्म्मिताः ॥२८५॥
मृत्योर्मृत्युसमास्ते तु यमदर्पापहारिणः ।
विभूतिमप्यसंख्येयां को न खल्वभिधास्यते ॥२८६॥
अतःपरमिदं भूयो भवेनाद्भुतमुत्तमं ।
भूतानामनुकंपार्थं यत्कृतं तन्निबोधत ॥२८७॥
मन्दराद्रिप्रकाशानां बलेनाप्रतिमौजसां ।
हारकुन्देन्दुवर्णानां विद्युद्घननिनादिनां ॥२८८॥
चूडामणिधराणां वै मेघसन्निभवाससां ।
श्रीवत्साङ्कितवक्षाणामङ्कुशोशूलपाणिनां ॥२८९॥
एवं दिशानां देवानां रूपेणोत्तमशालिनां ।

---

(१) स्वायतमनसो इति पाठोऽर्थप्रतिपत्तिकरः ।
(२) व्यवर्त्तयन्निति ङ० च० ।

तस्य प्रासादमुख्यस्य स्तम्भेषूत्तमशोभिषु ॥२९०॥
संयताग्निमयीभिस्तु शृङ्खलाभिः पृथक् पृथक्।
मायासहस्रं सिंहानां सुखं तत्र निवासिनां ॥२९१॥
स्तम्भेऽप्यपास्तताषष्ठ(१) त्र्यम्बकस्य निवेशने।
अथ तत्प्रातसंपूज्य वायोर्वाक्यं सुविस्मिताः।
ऋषयः प्रत्यभाषन्त नैमिषेयास्तपस्विनः ॥२९२॥
भगवन् सर्वभूतानां प्राण सर्वत्रग प्रभो।
के ते सिंहमहाभूताः क्व ते जाताः किमात्मकाः ॥२९३॥
सिंहाः केनापराधेन भूतानां प्रभविष्णुना।
वैश्वानरमयैः पाशैः संरुद्धास्तु पृथक् पृथक् ॥२९४॥
तेषां तद्वचनं श्रुत्वा वायुर्वाक्यं जगाद ह।
यद्वै सहस्रं सिंहानामीश्वरेण महात्मना।
व्यपनीय स्वकाद्देहात्क्रोधास्ते सिंहविग्रहाः ॥२९५॥
भूतानामभयं दत्त्वा पुरा बद्धाग्निबन्धने।
यज्ञभागनिमित्तं च ईश्वरस्याज्ञया तदा ॥२९६॥
तेषां(२) त्रिधानमुक्तेन सिंहेनैकेन लीलया।
देव्या मन्युं कृतं ज्ञात्वा हतो दक्षस्य स क्रतुः ॥२९७॥
निःसृता च महादेव्या महाकाली महेश्वरी।
आत्मनः कर्मसाक्षिण्या भूतैः सार्द्धं तदानुगैः ॥२९८॥
स एष भगवान्क्रोधो रुद्रावासकृतालयः।

---

(१) ऽप्यपास्तषष्ठमिति पाठो न विशुद्धः।
(२) तस्मादिति ङ० च०।

वीरभद्रोऽप्रमेयात्मा देव्या मन्युप्रमार्ज्जनः ॥२९९॥
तस्य वेश्म सुरेन्द्रस्य सर्वगुह्यतमस्य वै।
सन्निवेशस्त्वनौपम्या माया वः परिकीर्त्तितः ॥३००॥
अतः परं प्रवक्ष्यामि ये तत्र प्रतिवासिनः।
रम्ये पुरवरश्रेष्ठे तस्मिन् वैहायभूमिषु ॥३०१॥
नानारत्नविचित्रेषु पताकाबङ्कलेषु च।
सर्वकामसमृद्धेषु वनोपवनशोभिषु ॥३०२॥
राजतेषु महान्तेषु शातकौम्भमयेषु च।
सन्ध्याभ्रसन्निकाशेषु कैलासप्रतिमेषु च ॥३०३॥
इष्टैः शब्दादिभिर्भोगैर्ये भवस्यानुसारिणः।
प्रासादवरपृष्ठेषु तेषु मोदन्ति सुव्रताः ॥३०४॥
ब्रह्मघोषैरविरता कथास्तु विविधाः शुभाः।
गीतवादित्रघोषास्तु संस्तवास्तु(१) समन्ततः ॥३०५॥
संहतास्त्वैवमतुला नानाश्रयकृतास्तथा।
एवमादीनि वर्त्तन्ते तेषां प्रासादमूर्द्धनि ॥३०६॥
सहस्रपादः प्रासादस्तपनीयमयः शुभः।
अनौपम्यैर्वरै रत्नैः सर्वतः परिभूषितः ॥३०७॥
स्फटिकैश्चन्द्रसङ्काशैर्वैदूर्यमणिसम्प्रभैः।
बालसूर्य्यमयैश्चापि सौवर्णैश्चाग्निसम्प्रभैः ॥३०८॥
चुकुशुर्ऋषयः श्रुत्वा नैमिषेयास्तपस्विनः।

---

(१) स्वस्तिवाचः इति ख०।

आपन्नसंशयास्त्विमं वाक्यमूचुः समीरणं ॥३०९॥

ऋषय ऊचुः ।

के तु तत्र महात्मानो ये भवस्यानुसारिणः ।
अनुग्राह्यतमाः सम्यक् प्रमोदन्ते पुरोत्तमे ।
ऋषीणां वचनं श्रुत्वा वायुर्वाक्यमथाब्रवीत् ॥३१०॥

वायुरुवाच ।

श्रूयतां देवदेवस्य भक्तैर्यैरनुकल्पिता ।
ह्रीमन्तः सूर्जिता दान्ताः शौर्ययुक्ता ह्यलोलुपाः ॥३११॥
मध्याहारास्तु मात्रास्तु आत्मारामा जितेन्द्रियाः ।
जितद्वन्द्वा महोत्साहाः सौम्या विगतमत्सराः ॥३१२॥
भावस्थाः सर्व्वभूतानां अव्यापारा अनाकुलाः ।
कर्मणा मनसा वाचा विशुद्धेनान्तरात्मना ।
अनन्यमनसो भूत्वा प्रपन्ना ये महेश्वरं ॥३१३॥
तैर्लब्धं रुद्रसालोक्यं शाश्वतं पदमव्ययं ।
भवस्य रूपसादृश्यं नीतास्तेव ह्यनुत्तमं ॥३१४॥
वैश्वानरमुखाः सर्वे विश्वरूपाः कपर्द्दिनः ।
नीलकण्ठाः सितग्रीवास्तीक्ष्णदंष्ट्रास्त्रिलोचनाः ॥३१५॥
अर्द्धचन्द्रकृतोष्णीषा जटामुकुटधारिणः ।
सर्वे दशभुजा वीराः पद्मान्तरसुगन्धिनः ॥३१६॥
तरुणादित्यसङ्काशाः सर्वे ते पीतवाससः ।
पिनाकपाणयः सर्व्वे श्वेतगोवृषवाहनाः ॥३१७॥
श्रियान्विताः कुण्डलिनो मुक्ताहारविभूषिताः ।

तेजसोऽभ्यधिका देवैः सर्वज्ञाः सर्वदर्शिनः ॥३१८॥
विभज्य बहुधात्मानं जरामृत्युविवर्जिताः ।
क्रीड़न्ते विविधैर्भावैर्भोगान् प्राप्य सुदुर्लभान् ॥३१९॥
स्वच्छन्दगतयः सिद्धाः सिद्धैस्तान्यैर्विबोधिताः ।
एकादशानां रुद्राणां कोव्योऽनेकमहात्मनां ॥३२०॥
एभिः सह महात्मानो(१) देवदेवो महेश्वरः ।
भक्तानुकम्पी भगवान् मोदते पार्वतीप्रियः ॥३२१॥
नाहन्तेषान्तु रुद्राणां भवस्य च महात्मनः ।
नानात्वमनुपश्यामि सत्यमेतद्ब्रवीमि वः ॥३२२॥
मातरिश्वाऽब्रवीत्पुण्यामित्येतामीश्वरोऽच्युत ।
अथ ते ऋषयः सर्वे दिवाकरसमप्रभाः ।
श्रुत्वेमां परमां पुण्यां कथान्त्र्यम्बकीं ततः ॥३२३॥
भृशञ्चानुग्रहं प्राप्य हर्षं चैवाप्यनुत्तमं ।
सम्भावयित्वा चाप्येनां वायुमूचुर्महाबलं ॥३२४॥

ऋषय ऊचुः ।

समीरण महाभाग अस्माकं च त्वया विभो ।
ईश्वरस्योत्तमं पुण्यमष्टमन्वौपसर्गिकं ॥३२५॥
तस्य स्थानं प्रमाणञ्च यथावत्परिकीर्त्तितं ।
यो गन्धेन समृद्धं वै परमं परमात्मनः ॥३२६॥
महादेवस्य माहात्म्यं दुर्विज्ञेयं सुरैरपि ।
स्तेन माहात्म्ययोगेन सहस्रस्यामितौजसः ॥३२७॥

---

(१) महात्मा हीति पाठः समीचीनः ।

यस्य भक्तेष्वसंमोहो अनुकम्पार्थमेव च ।
[१]ब्राह्मलक्ष्मा स्वयं जुष्टा या साप्रतिमशालिनी ॥३२८॥
व्याप्य द्योस्तैरवं चन्द्रं विन्यस्ता विश्वरूपधृक्[२] ।
विभूतिर्भ्राजतेऽत्यर्थं देवदेवस्य वेश्मनि ॥३२९॥
महादेवस्य तुल्यानां रुद्राणान्तु महात्मनां[३] ।
तत्सर्वं निखिलेनेदं वक्त्रादमृतनिस्रवं ॥३३०॥
अपीत्वा खलु सर्वस्य भक्त्यास्माभिस्तु सुव्रताः ।
नास्ति किञ्चिदविज्ञेयं अन्यच्चैवानुगामिनः ।
[४]प्रश्नं देववर प्राण यथावद्वक्तुमर्हसि ॥३३१॥
सूत उवाच । स खलूवाच भगवान् किं भूयो वर्त्तयाम्यहं ।
किं मया वैच वक्तव्यं तद्वदिष्यामि सुव्रताः ॥३३२॥
ऋषय ऊचुः । आदित्याः पारिपार्श्वैया सिंहा वै क्रोधविक्रमाः ।
वैश्वानरा भूतगणा व्याघ्राश्चैवानुगामिनः ॥३३३॥
आभूतसंप्लवे घोरे सर्वप्राणभृतां क्षये ।
किमवस्था भवन्त्येते तन्नो ब्रूहि यथार्थवत् ॥३३४॥

---

(१) ब्राह्मलक्ष्म्या इति श्लोकार्द्धात्प्राक् कतिपयवाक्यानि न सन्ति ।

(२) व्यप्द्योश्वरं चन्द्रं विन्यस्ता विश्वरूपिणा इति ख०, व्यापज्योत्स्नैरवं चन्द्रं विन्यस्ता विश्वरूपिणा इति ङ०, ज्योत्स्नैरित्यत्र योत्स्नैरितिपाठव्यत्यासेन ङ०पुस्तकस्थितपाठः च० छ० चिह्नितपुस्तकयोर्वर्त्तते । एते सर्व्वे पाठा लिपिकरप्रमादोत्पन्नाः । अत्र,ज्योत्स्नाभिर्व्याप्य खं चन्द्रो विन्यस्तो विश्वरूपिणा इति पाठः सम्भावनीयः ।

(३) इतः श्लोकार्द्धात्प्राक् पश्चाद्वा श्लोकैकं श्लोकद्वयं वा पतितं ।

(४) एतच्छ्लोकार्द्धात्प्राक् श्लोकार्द्धं पतितं ।

एते ये वै त्वया प्रोक्ताः सिंहव्याघ्रगणैः सह ।
ये चान्ये सिद्धिसम्प्राप्ता मातरिश्वा जगाद ह ॥३३५॥
इदञ्च परमं तत्त्वं समाख्यास्यामि शृण्वतां ।
विज्ञातेश्वरसद्भावमव्यक्तं प्रभवं तथा ॥३३६॥
तत्र पूर्वगतास्तेषु कुमारा ब्रह्मणः सुताः ।
सनकश्च सनन्दश्च तृतीयश्च सनातनः ॥३३७॥
वोढुश्च कपिलस्तेषामासुरिश्च महायशाः ।
मुनिः पञ्चशिखश्चैव ये चान्येऽप्येवमादयः ॥३३८॥
ततः काले व्यतिक्रान्ते कल्पानां पर्य्यये गते ।
महाभूतविनाशान्ते प्रलये प्रत्युपस्थिते ॥३३९॥
अनेकरुद्रकोट्यस्तु याः प्रसन्ना महेश्वरी ।
शब्दादीन विषयान् भोगान् सत्यस्याष्टविधस्तयात् ॥३४०॥
प्रविश्य सर्वभूतानि ज्ञानयुक्तेन तेजसा ।
वैहायपदमव्यग्रं भूतानामनुकम्पया ॥३४१॥
तत्र यान्ति महात्मनः परमाणुं महेश्वरं ।
तरन्ति सुमहावर्त्तां जन्ममृत्यूदकां नदीं ॥३४२॥
ततः पश्यन्ति सर्वाणं(१) परं ब्रह्माणमेव च ।
देव्या वै सहिताः सप्त या देव्यः(२) परिकीर्त्तिताः॥३४३॥
यत्तत् सहस्रं सिंहानामादित्यानां तथैव च ।
वैश्वानरभूतभव्यव्याघ्राश्चैवानुगामिनः ॥३४४॥

---

(१) पश्यन्त्यपर्व्वाणमिति ङ० ।
(२) या देव्या इति क० ।

आवेश्यात्मनि तान् सर्वान् संख्यायोपद्रवां(१)स्तथा ।
लोकान् सप्त इमान् सर्व्वान् महाभूतानि पञ्च च ॥ ३४५॥
विष्णुना सह संयुक्तं करोति विकरोति च ।
स रुद्रो यः साममयस्तथैव च यजुर्मयः ॥ ३४६॥
स एष उत प्रोतश्च वहिरन्तश्च निश्चयात् ।
एको हि भगवान्नाथ(२) अभावी श्रान्तकृद्विजाः ॥ ३४७॥
ततस्ते ऋषयः सर्वे दिवाकरसमप्रभाः ।
अन्तश्चवास स(३)मारोप्यग्निं तथात्मनि ॥ ३४८॥
कर्मणा मनसा वाचा विशुद्धेनान्तरात्मनि ।
अनन्यमनसो भूत्वा प्रपद्यन्ते महेश्वरं ॥ ३४९॥
व्रतोपवासनिरताः सर्वभूतदयापराः ।
योगमनुपमन्दिव्यं प्राप्तं तैश्छिन्नसंशयैः ॥ ३५०॥
प्रपद्य परया भक्त्या ज्ञानयुक्तेन तेजसा ।
तैर्लब्धं रुद्रसालोक्यं शाश्वतं पदमव्ययं ॥ ३५१॥
यः पठेत्तपसा युक्तो वायुप्रोक्तामिमां स्तुतिं ।
ब्राह्मणः क्षत्रियो वापि वैश्यो वा स्वक्रियापरः ॥ ३५२॥
लभते रुद्रसालोक्यं भक्तिमान् विगतज्वरः ।

---

(१) अयं पाठो लेखकप्रमादात्समजनि ।

(२) न्नाद्य इति क० ।

(३) तस्य स्या अमसं वासमिति ङ० च०, सस्य अमश्च वाससमिति क०। एते पाठा अर्थैर्हीनाः। अत्र सं समाश्रमसंवासमितिपाठोऽर्थ-प्रतिपत्तिकरः।

अमद्यपश्च यः शूद्रो भवभक्तो जितेन्द्रियः ॥३५३॥
आभूतसंप्लवस्थायी अप्रतीघातलक्षणः ।
गाणपत्यं स लभेते स्थानं वा सर्वकामिकं ॥३५४॥
मद्यपो मद्यपैः सार्द्धं भूतसङ्गैश्च मोदते ।
सोऽर्च्यमानो महीपृष्ठे मर्त्यानां वरदो भवेत् ।
इतिहोवाच भगवान् वायुर्वाक्यमिदं वरः ॥३५५॥

इति श्रीमहापुराणे वायुप्रोक्ते अनुषङ्गपादे शिवपुरवर्णनं नाम ऊनचत्वारिंशोऽध्यायः समाप्तः ।

चत्वारिंशोऽध्यायः ।

अनुषङ्गपादः ।

सूत उवाच । (१)प्रत्याहारं प्रवक्ष्यामि परस्यान्ते स्वयम्भुवः ।
ब्रह्मणः स्थितिकाले तु क्षीणे तस्मिंस्तदा प्रभोः ॥१॥
यथेदं कुरुतेऽध्यात्मं सुसूक्ष्मं विश्वमीश्वरः ।
अव्यक्तान् ग्रसते व्यक्तं(२) प्रत्याहारेच कृत्स्नशः ॥२॥
परं तदनु कल्पानामपूर्णे कल्पसङ्क्षये ।
उपस्थिते महाघोरे ह्यप्रत्यक्षे तु कस्यचित् ॥३॥
अन्ते द्रुमस्य सम्प्राप्ते पश्चिमस्य मनोस्तदा ।
अन्ते कलियुगे तस्मिन् क्षीणे संहार उच्यते ॥४॥
सम्प्रक्षाले तदा वृत्ते प्रत्याहारे ह्युपस्थिते(३) ।
प्रत्याहारे तदा तस्मिन् भूततन्मात्रसंक्षये ॥५॥
महदादेर्विकारस्य विशेषान्तस्य संक्षये ।

---

(१) क० ङ० च० छ० पुस्तकेषु प्रत्याहारादिकतिपयविषयनिर्देशानन्तरं ग्रन्थसमाप्तिर्दृश्यते। तेषु गयामाहात्म्यवर्णनं नास्ति। ख० ग० पुस्तकयोस्तु प्रत्याहारादिविषयनिर्देशो नास्ति गयामाहात्म्यकथनानन्तरं ग्रन्थसमाप्तिर्लक्ष्यते। अस्मिन् पुस्तके प्रत्याहारादिविषयमुद्रणात्परं गयामाहात्म्यमुद्राङ्कनेन ग्रन्थसमाप्तिर्भविष्यति।

(२) अव्यक्तं ग्रसते व्यक्तान् इति पाठः समीचीनः।

(३) ह्युपस्थिते इति पाठः सम्भवपरः। सम्प्रक्षाले इति श्लोकार्द्धात्परं श्लोकार्द्धं पतितं साकाङ्क्षत्वात्।

स्वभावकारिते तस्मिन् प्रवृत्ते प्रतिसञ्चरे ॥६॥
आपो ग्रसन्ति वै पूर्व्वं भूमेर्गन्धात्मकं गुणं ।
आत्तगन्धा ततो भूमिः प्रलयत्वाय कल्पते ।
प्रविष्टे गन्धतन्मात्रे तोयावस्था धरा भवेत् ॥७॥
आपस्तदा प्रनष्टा वै वेगवत्यो महास्वनाः ।
सर्वमापूरयित्वेदं तिष्ठन्ति विचरन्ति च ॥८॥
अपामस्ति गुणो यस्तु ज्योतिषे लीयते रसः ।
नश्यन्त्यापस्तदान्ते च रसतन्मात्रसङ्क्षयात् ॥९॥
ताजवेत्यहृतरसा[१] ज्योतिष्टं प्राप्नुवन्त्युत ।
ग्रस्ते च सलिले तेजः सर्व्वतोमुखमीच्यते ॥१०॥
अथाग्निः सर्वतो व्याप्त आदत्ते तज्जलन्तदा ।
सर्वमापूर्य्यतेऽर्चिर्भिस्तदा जगदिदं शनैः ११॥
अर्चिर्भिः सन्तते तस्मिन् तिर्यगूर्द्धमधस्ततः ।
ज्योतिषोऽपि गुणं रूपं वायुरन्ति[२] प्रकाशकं ।
प्रलीयते तदा तस्मिन् दीपार्चिरिव मारुते ॥१२॥
प्रनष्टे रूपतन्मात्रे हृतरूपो विभावसुः ।
उपशाम्यति तेजो हि वायुना धूयते[३] महत् ॥१३॥
निरालोके तदा लोके वायुभूते च तेजसि ।

---

(१) ताजवेत्यहृतरसा इत्यत्र, तेजसा संहृतरसा इति पाठो विशुद्धः ॥

(२) रन्ति इति पाठो लेखकप्रमादजनितः। रन्ति इत्यत्र हन्ति इति पाठः समीचीनः।

(३) धयते इति ङ० च०।

ततस्तुमुल[१]मासाद्य वायुः सम्भवमात्मनः ॥१४॥
ऊर्द्धं चाधश्च तिर्यक्च दोधवीति[२] दिशो दश ।
वायोरपि गुणं स्पर्शमाकाशं ग्रसते च तत् ॥१५॥
प्रशाम्यति तदा वायुः खन्तु तिष्ठत्यनावृतं ।
अरूपमरसस्पर्शमगन्धं न च मूर्तिमत् ॥१६॥
सर्वमापूरयन्नादैः सुमहत्तत् प्रकाशते ।
परिमण्डलन्तच्छुषिरमाकाशं शब्दलक्षणं ॥१७॥
शब्दमात्रं तदाकाशं सर्वमावृत्य तिष्ठति ।
तन्तु शब्दगुणन्तस्य भूतादिः ग्रसते पुनः ॥१८॥
भूतेन्द्रियेषु युगपद्भूतादौ संस्थितेषु वै ।
अभिमानात्मको ह्येष भूतादिस्तामसः स्मृतः ॥१९॥
भूतादिं ग्रसते चापि महान् वै बुद्धिलक्षणः ।
महानात्मा तु विज्ञेयः संकल्पो व्यवसायकः ॥२०॥
बुद्धिर्मनश्च लिङ्गश्च महानक्षर एव च ।
पर्यायवाचकैः शब्दैस्तमाहुस्तत्त्वचिन्तकाः ॥२१॥
सम्प्रलीनेषु भूतेषु गुणसाम्ये तमोमये ।
स्वात्मन्येव स्थिते चैव कारणे लोककारणे ॥२२॥
विनिवृत्ते तदा सर्गे प्रकृत्यावस्थितेन वै ।
तदाद्यन्तपरोक्षत्वाददृष्टत्वाच्च कस्यचित् ॥२३॥

---

(१) ततः खं मूलमितिपाठः समीचीनः ।
(२) दोधीति इति क० ज० हो धवीति च० । एते सर्व्वे पाठा लिपिकरभ्रमादुद्भूताः ।

अनाख्यानादबोधत्वादज्ञानाद्ज्ञानिनामपि ।
आगतागतिकत्वाच्च ग्रहणं तन्न[१] विद्यते ॥२४॥
भावग्राह्यानुमानाच्च चिन्तयित्वेदमुच्यते ।
स्थिते तु कारणे तस्मिन् नित्ये सदसदात्मिके ॥२५॥
अनिर्द्देश्या प्रवृत्तिर्वै स्वात्मिका कारणेन तु ।
एवं सप्तादयोऽभ्यस्तात् क्रमात्प्रकृतयस्तु वै ॥२६॥
प्रत्याहारे तदा सर्गे प्रविशन्ति परस्परं ।
येनेदमावृतं सर्वं मण्डलस्तु प्रलीयते ॥२७॥
सप्तद्वीपसमुद्रान्तं सप्तलोकं सपर्व्वतं ।
उदकावरणं यच्च ज्योतिषां[२] लीयते तु तत् ॥२८॥
यत्तैजसं चावरणमाकाशं[३] ग्रसते तु तत् ।
यद्वायव्यं चावरणमाकाशं ग्रसते तु तत् ॥२९॥
आकाशावरणं यच्च भूतादिर्ग्रसते तु तत् ।
भूतादिं ग्रसते चापि महान् वै बुद्धिलक्षणः ॥३०॥
महान्तं ग्रसतेऽव्यक्तं गुणसाम्यं ततः परं ।
एतौ संहारविस्तारौ ब्रह्माव्यक्तौ ततः पुनः ॥३१॥
सृजते ग्रसते चैव विकारान् सर्गसंयमे ।
संक्रियाकरणाः संसिद्धा ज्ञानिनस्तु ये ॥३२॥
गत्वा जवञ्जवीभावे स्थानेष्वेषु प्रसंयमान् ।

---

(१) ग्रहस्तस्मिन्न इति पाठः समीचीनः ।
(२) ज्योतिषि इति पाठः साधुः ।
(३) मारुतो इति पाठः साधीयान् ।

प्रत्याहारे वियुज्यन्ते क्षेत्रज्ञाः करणैः पुनः ॥३३॥
अव्यक्तं क्षेत्रमित्याहुर्ब्रह्म क्षेत्रज्ञ उच्यते ।
साधर्म्यवैधर्म्यकृतसंयोगोऽनादिमांस्तयोः ॥३४॥
एवं सर्गेषु विज्ञेयं क्षेत्रज्ञेष्विह ब्राह्मणाः ।
ब्रह्मविच्चैव विज्ञेयः क्षेत्रज्ञानात् पृथक् पृथक् ॥३५॥
विषयाविषयत्वञ्च क्षेत्रक्षेत्रज्ञयोः(१) स्मृतं ।
ब्रह्मा तु विषयो ज्ञेयोऽविषयः क्षेत्रमुच्यते ॥३६॥
क्षेत्रज्ञाधिष्ठितं क्षेत्रं क्षेत्रज्ञार्थं प्रवर्त्तते ।
बहुत्वाच्च शरीराणां शरीरी बहुधा स्मृतः ॥३७॥
अव्यूहाशङ्कराच्चैव ज्योतिर्वच्च व्यवस्थितः ।
यस्मात्प्रतिशरीरं हि सुखदुःखोपलब्धिता ।
तस्मात्पुरुषनानात्वं विज्ञेयं तु विजानता ॥३८॥
यदा प्रवर्त्तते चैषां भेदानां चैव संयमाः ।
स्वभावकारिताः सर्वे कालेन महता तदा ॥३९॥
निवर्त्तते तदा तस्य(२) स्थितिरागः स्वयम्भुवः ।
सहसा योज्यकैः सर्वै(३) र्ब्रह्मलोकनिवासिभिः ॥४०॥
विनिवृत्ते तदा रागे स्थितावात्मनिवासिनां ।
तत्कालवासिनां तेषां तदा तद्दोषदर्शिनां ॥४१॥
उत्पद्यतेऽथ वैराग्यमात्मवादप्रनाशनं ।

(१) क्षेत्रज्ञक्षत्रयोरिति पाठः सुसङ्गतः ।
(२) तदावश्यं इति छ० ।
(३) सहसा ये स्वकैः सर्व्वे इति क० सहसा योग्यकैः सर्व्वैरिति छ० ज० ।

भोज्यभोक्तृत्वनानात्वे तेषां तद्भवदर्शिनां[१] ॥४२॥
पृथग्ज्ञानेन क्षेत्रज्ञास्ततस्ते ब्रह्मलौकिकाः।
प्रकृतौ करणा नीताः सर्व्वे नानाप्रदर्शिनः ॥४३॥
स्वात्मन्येवावतिष्ठन्ते प्रशान्ता दर्शनात्मकाः।
शुद्धा निरञ्जनाः सर्व्वे चेतनाचेतनास्तथा ॥४४॥
तत्रैव परिनिर्वाणाः स्मृता नागामिनस्तु ते[२]।
निर्गुणत्वान्निरात्मानः प्रकृत्यन्ते व्यतिक्रमात् ॥४५॥
इत्येवं प्राकृतः प्रोक्तः प्रतिसर्गः स्वयम्भुवः।
भिद्यन्ते सर्वभूतानां करणानि प्रसंयमे ॥४६॥
इत्येष संयमश्चैव तत्त्वानां करणैः सह।
तत्त्वप्रसंयमो ह्येष स्मृतो ह्यावर्त्तको द्विजाः ॥४७॥
सूत उवाच। धर्माधर्मौ तपो ज्ञानं शुभे सत्यानृते तथा।
ऊर्द्ध्वभावो ह्यधोभावो सुखदुःखे प्रियाप्रिये ॥४८॥
सर्वमेतत्प्रयातस्य[३] गुणमात्रात्मकं स्मृतं।
निरिन्द्रियाणां च तदा ज्ञानिनां यच्छुभाशुभं ॥४९॥
प्रकृत्यां चैव तत्सर्वं पुण्यं पापं प्रतिष्ठति।
योऽन्यवस्था स्वभावे च[४] देहिनां तु निषिच्यते[५] ॥५०॥
जन्तूनां पापपुण्यन्तु प्रकृतौ यत्प्रतिष्ठितं।

---

(१) भोज्यभोक्तृत्वनानात्वैस्तेषां तद्भावदर्शिनामिति च०।
(२) वै इति क० ज० ये इति ङ०।
(३) प्रयातस्येति ङ० च० छ०।
(४) सुतास्वेह इति ङ० च०।
(५) निषिध्यते इति क० छ० ज०।

अव्यक्तस्थानि तान्येव पुण्यपापानि जन्तवः ।
ये जयन्ति पुनर्देहे देहान्यत्वे तथैव च ॥५१॥
धर्म्माधर्म्मौ तु जन्तूनां गुणमात्रात्मकावुभौ ।
करणैः स्वैः प्रचीयेते कार्य्यत्वेनेह जन्तुभिः ॥५२॥
सुचेतनाः प्रलीयन्ते चेत्रज्ञाधिष्ठिता गुणाः ।
सर्गे च प्रतिसर्गे च संसारे चैव जन्तवः ।
संयुज्यन्ते वियुज्यन्ते करणैः सञ्चरन्ति च ॥५३॥
राजसी तामसी चैव सात्विकी चैव वृत्तयः ।
गुणमात्राः प्रवर्त्तन्ते पुरुषाधिष्ठितास्त्रिधा ॥५४॥
ऊर्द्धं देवात्मकं सत्त्वमधोभागात्मकं तमः ।
तयोः प्रवर्त्तकं मध्ये इहैवावर्त्तकं रजः ॥ ५५ ॥
इत्येवं परिवर्त्तन्ते त्रयः स्रोतोगुणात्मकाः ।
लोकेषु सर्वभूतानां तत्र कार्य्यं(१) विजानता ॥ ५६ ॥
अविद्याप्रत्ययारम्भा आरभ्यन्ते हि मानवैः ।
एतास्तु गतयस्तिस्रः शुभाः पापात्मिकाः स्मृताः ॥ ५७ ॥
तमसाभिभवाज्जन्तुर्यथातथ्यं न विन्दति ।
अतत्त्वदर्शनात् सोऽथ त्रिविधं बध्यते ततः ॥ ५८ ॥
प्राकृतेन च बन्धेन तथा वैकारिकेन च ।
दक्षिणाभिस्तृतीयेन बद्धोऽत्यन्तं विवर्त्तते ॥ ५९ ॥
इत्येते वै त्रयः प्रोक्ता बन्धा ह्यज्ञानहेतुकाः ।
अनित्ये नित्यसंज्ञा च दुःखे च सुखदर्शनं ॥ ६० ॥

(१) ते तु वार्य्या इति पाठः समीचीनः ।

अस्वे स्वमिति च ज्ञानमशुचौ शुचिनिश्चयः ।
येषामेते मनोदोषा ज्ञानदोषा विपर्य्ययात् ॥ ६१ ॥
रागद्वेषनिवृत्तिश्च तज्ज्ञानं समुदाहृतं ।
अज्ञानं तमसो मूलं कर्म्मद्वयफलं रजः ।
कर्म्मजस्तु पुनर्द्देहो महादुःखं प्रवर्त्तते ॥ ६२ ॥
श्रोत्रजा नेत्रजा चैव त्वग्जिह्वाघ्राणतस्तथा ।
पुनर्भवकरी दुःखा कर्म्मणां जायते तु सा(१) ॥ ६३ ॥
सतृष्णोऽभिहितो बालः स्वकृतैः कर्म्मणः फलैः ।
तैलपालीकवज्जीवस्तत्रैव परिवर्त्तते(२) ॥ ६४ ॥
तस्मात् स्थूलमनर्थानामज्ञानमुपदिश्यते ।
तं शक्र(३) मवधार्य्यैकं ज्ञाने यत्नं समाचरेत् ॥ ६५ ॥
ज्ञानाद्विजयते सर्वन्त्यागाद्बुद्धिर्विरज्यते ।
वैराग्याच्छुध्यते चापि शुद्धः सत्त्वेन मुच्यते ॥ ६६ ॥
अत ऊर्द्धं प्रवक्ष्यामि रागं भूतापहारिणं ।
अभिषङ्गाय यो यस्माद्विषयोऽप्यवशात्मनः(४) ॥ ६७ ॥
अनिष्टमभिषङ्गं हि प्रीतितापविषादनं(५) ।
दुःखलाभे न तापश्च सुखानुस्मरणं तथा ॥ ६८ ॥

---

(१) श्रोत्रजं नेत्रजं चैव त्वग्जिह्वाघ्राणतस्तथा। पुनर्भवकरं दुःखं कर्म्मणा जायते तु तत् इति पाठो विशुद्धः ।

(२) तैलपीडकवज्जीव इति क० तैलपीचकवज्जीव इति छ० ।

(३) शत्रुमिति पाठः समीचीनः ।

(४) इतः श्लोकार्द्धात्परं श्लोकार्द्धं पतितं ।

(५) प्रतीतापविषादनमिति ङ० च०। प्रीतितापविषादकृत् इति पाठः सुलभार्थः ।

इत्येष वैषयो रागः संभूत्याः कारणं स्मृतं।
ब्रह्मादौ स्थावरान्ते वै संसारे ह्याधिभौतिके।
अज्ञानपूर्वकं तस्मादज्ञानन्तु विवर्जयेत्॥ ६९ ॥
यस्य चार्षं न प्रमाणं शिष्टाचारं तथैव च।
वर्णाश्रमविरोधी यः शिष्टशास्त्रविरोधकः॥ ७० ॥
एष मार्गो हि निरधितिर्यग्योनौ च कारणं।
तिर्यग्योनिगतञ्चैव कारणं स निरुच्यते॥ ७१ ॥
विविधा यातना स्थाने तिर्यग्योनौ च षड्विधे।
कारणे विषये चैव प्रतिघातस्तु सर्वशः॥ ७२ ॥
अनैश्वर्य्यन्तु तत्सर्वं प्रतिघातात्मकं स्मृतं।
इत्येषा तामसी वृत्तिर्भूतादीनां चतुर्विधा॥ ७३ ॥
सत्तस्थमात्रकश्चित्तं यथा सत्त्वप्रदर्शनात्।
तत्त्वानाञ्च तथा तत्त्वं दृष्ट्वा वै तत्त्वदर्शनात्॥ ७४ ॥
सत्त्वक्षेत्रज्ञनानात्वमेतज्ज्ञानार्थदर्शनं।
नानात्वदर्शनं ज्ञानं ज्ञानाद्वैयोगमुच्यते॥ ७५ ॥
तेन बद्धस्य वै बन्धो मोक्षो मुक्तस्य तेन च।
संसारे विनिवृत्ते तु मुक्तो लिङ्गेन मुच्यते॥ ७६ ॥
निःसम्बन्धो ह्यचैतन्यः स्वात्मन्येवावतिष्ठते।
स्वात्मव्यवस्थितस्यापि विरूपाख्येन लिख्यते॥ ७७॥
इत्येतल्लक्षणं प्रोक्तं समासाज्ज्ञानमोक्षयोः।
स चापि त्रिविधः प्रोक्तो मोक्षो वै तत्त्वदर्शिभिः॥ ७८ ॥
पूर्वं वियोगो ज्ञानेन द्वितीयो रागसंक्षयात्।

लिङ्गाभावात्तु कैवल्यं कैवल्यात्तु निरञ्जनं ॥ ७९ ॥
निरञ्जनत्वाच्छुद्धस्तु ततो नेता[१] न विद्यते।
तृष्णाक्षयात्तृतीयस्तु व्याख्यातं मोक्षकारणं ॥ ८०॥
निमित्तमप्रतीघाते इष्टशब्दादिलक्षणे[२]।
अष्टावेतानि रूपाणि प्राकृतानि यथाक्रमं॥ ८१ ॥
क्षेत्रज्ञेष्ववसज्यन्ते गुणमात्रात्मकानि तु।
अत ऊर्द्धं प्रवक्ष्यामि वैराग्यं दोषदर्शनात् ॥ ८२ ॥
दिव्ये च मानुषे चैव विषये पञ्चलक्षणे।
अप्रद्वेषोऽनभिष्वङ्गः कर्त्तव्यो दोषदर्शनात् ॥ ८३ ॥
तापप्रीतिविषादानां कार्य्यन्तु परिवर्जनं।
एवं वैराग्यमास्थाप शरीरी निर्ममो भवेत् ॥ ८४ ॥
अनित्यमशिवं दुःखमिति बुद्धानुचिन्त्य च।
त्रिशुद्धं कार्य्यकरणं सत्वाम्येति चरान्तुय[३] ॥ ८५॥
परिपक्वकषायो हि कृत्स्नान् दोषान् प्रपश्यति।
ततः प्रयाणकाले हि दोषैर्नैमित्तिकैस्तथा ॥ ८६ ॥
ऊष्मा प्रकुपितः काये तीव्रवायुसमीरितः।
स शरीरमुपाश्रित्य कृत्स्नान् दोषान् रुणद्धि वै ॥ ८७ ॥
प्राणस्थानानि भिन्दन् हि छिन्दन्मर्माण्यतीत्य च।

---

(१) नेता नेता इति ङ० च०।
(२) लक्षणमिति क० छ०।
(३) सत्वान् पतिवशनुपे इति ङ० सत्वान्येतु वशन्तपा इति च० सत्वाम्येति वरांतुपा इति छ०। एते पाठा लेखकप्रमादोत्पन्नाः। अत्र, सत्वोऽभ्येति वसन् तपे इति पाठः सम्भावनीयः।

शैत्यात्प्रकुपितो वायुरूर्द्धन्तु क्रमते ततः ॥ ८८ ॥
स चायं सर्वभूतानां प्राणस्थानेष्ववस्थितः ।
समासात् संवृते ज्ञाने संवृतेषु च कर्म्मसु ॥ ८९ ॥
स जीवोऽनभ्यधिष्ठानः कर्म्मभिः स्वैः पुराकृतैः ।
अष्टाङ्गप्राणवृत्तीर्वै स विच्यावयते पुनः ॥९०॥
शरीरं प्रजहंसो वै निरुच्छासस्ततो भवेत् ।
एवं प्राणैः परित्यक्तो मृत इत्यभिधीयते ॥ ९१ ॥
यथेह लोके खद्योतं नीयमानमितस्ततः ।
रञ्जनं तद्वधे यत्तु नेता नेता न विद्यते ॥ ९२ ॥
तृष्णाक्षयस्तृतीयस्तु व्याख्यातं मोक्षलक्षणं ।
शब्दाद्ये विषये दोषविषये पञ्चलक्षणे ॥ ९३ ॥
अप्रद्वेषोऽनभिष्वङ्गः प्रीतितापविवर्जनं ।
वैराग्यकारणं ह्येते प्रकृतीनां लयस्य च ॥ ९४॥
अष्टौ प्रकृतयो ज्ञेया पूर्वोक्ता वै यथाक्रमं ।
अव्यक्ताद्यास्तु विज्ञेया भूतान्ता प्रकृतेर्लयाः ॥ ९५ ॥
वर्णाश्रमाचारयुक्ताः शिष्टाः शास्त्राविरोधिनः ।
वर्णाश्रमाणां धर्म्मोऽयं देवस्थानेषु कारणं ॥ ९६ ॥
ब्रह्मादीनि पिशाचान्तान्यष्टौ स्थानानि देवता ।
ऐश्वर्य्यमणिमाद्यं हि कारणं ह्यष्टलक्षणं ॥ ९७ ॥
निमित्तमप्रतीघाते दृष्टे शब्दादिलक्षणे ।
अष्टावेतानि रूपाणि प्राकृतानि यथाक्रमं ॥ ९८॥
क्षेत्रज्ञेष्वनुसज्यन्ते गुणमात्रात्मकानि तु ।

प्राव्हृट्काले पृथक्त्वेन पश्यन्तीह न चक्षुषा ॥ ९९ ॥
पश्यन्त्येवंविधं सिद्धा जीवं दिव्येन चक्षुषा ।
श्वाविति श्वानपानस्य(१) योनीः प्रविशतस्तथा ॥१००॥
तिर्य्यगूर्द्धमधस्ताच्च धावतोऽपि यथाक्रमं ।
जीवप्राणास्तथालिङ्गं कारणञ्च चतुष्टयं ॥१०१॥
पर्य्यायवाचकैः शब्दैरेकार्थैः सोऽभिलिख्यते ।
व्यक्ताव्यक्ते प्रमाणोऽयं स वै रूपं तु कृत्स्नशः ॥१०२॥
अव्यक्तान्तगृहीतं च क्षेत्रज्ञाधिष्ठितञ्च यत् ।
एवं ज्ञात्वा शुचिर्भूत्वा ज्ञानाद्वै विप्रमुच्यते ॥१०३॥
नष्टश्चेव यथा तत्त्वं तत्त्वानां तत्त्वदर्शनं ।
यथेष्टं परिनिर्य्याति भिन्ने देहे सुनिर्वृते ॥१०४॥
भिद्यते करणञ्चापि अव्यक्ताज्ञानिनस्ततः ।
मुक्तो गुणशरीरेण प्राणाद्येन तु सर्वशः ॥१०५॥
नान्यच्छरीरमादत्ते दग्धे वीजे यथाङ्कुरः ।
जीविकः(२) सर्वसंसाराद्वीजशारीरमानसः(३) ॥१०६॥
ज्ञानाच्चतुर्दशाच्छुद्धः प्रकृतिं सोऽनुवर्त्तते ।
प्रकृतिं सत्यमित्याहुर्विकारोऽनृतमुच्यते ॥१०७॥
तत्सद्भावोऽनृतं ज्ञेयं सद्भावः सत्यमुच्यते ।
अनामरूपक्षेत्रज्ञनामरूपं प्रचक्षते ॥१०८॥

---

(१) स्वारितं स्वानपानस्व इति ङ० स्वावितं स्वानपानस्व इति च० स्वाविति श्वान्तपानस्व इति छ० ।

(२) जालीक इति क० च० छ० ।

(३) विद्धं शरीरमानस इति ङ०च० छ० ।

यस्मात् क्षेत्रं विजानाति तस्मात् क्षेत्रज्ञः उच्यते ।
क्षेत्रप्रत्ययतो[१] यस्मात् क्षेत्रज्ञः शुभ उच्यते ॥ १०९ ॥
क्षेत्रज्ञः[२] स्मर्य्यते तस्मात् क्षेत्रन्तज्ज्ञैर्विभाव्यते ।
क्षेत्रत्वप्रत्ययं दृष्टं क्षेत्रज्ञः प्रत्ययी सदा ॥ ११० ॥
क्षयणात् करणाच्चैव क्षतत्राणात्तथैव च ।
भोज्यत्वाद्विषयत्वाच्च क्षेत्रं क्षेत्रविदो विदुः ॥ १११ ॥
महदाद्यं विशेषान्तं सवैरूप्यं विलक्षणं ।
विकारलक्षणं तद्वै साक्षरक्षरमेव[३] च ॥ ११२ ॥
तमेव च विकारन्तु यस्माद्वै क्षरते[४] पुनः ।
तस्माच्च कारणाच्चैव क्षरमित्यभिधीयते ॥ ११३ ॥
सुखदुःखमोहभावा भोज्यमित्यभिधीयते ।
अचेतत्वाद्धि विषयस्तद्धि धर्म्मविभुः स्मृतः ॥ ११४ ॥
न क्षीयते न क्षरति विकारप्रसृतन्तु तत् ।
अक्षरन्तेन चाप्युक्तमक्षीणत्वात्तथैव च ॥ ११५ ॥
यस्मात्पूर्य्यनुशेते च तस्मात् पुरुष उच्यते ।
पुरप्रत्ययिको[५] यस्मात् पुरुषेत्यभिधीयते ॥ ११६ ॥
पुरुषं कथयस्वाथ कथन्तज्ज्ञैर्विभाव्यते ।
शुद्धो निरञ्जनाभासो ज्ञानाज्ञानविवर्जितः ॥ ११७ ॥

---

(१) क्षत्रज्ञः प्रयतो इति ङ० च० ।
(२) क्षत्रज्ञैरिति पाठः साधुः ।
(३) त्वक्षरक्षरमिति पाठः समीचीनः ।
(४) रक्षते इति च० छ० ।
(५) पौरप्रत्ययिक इति पाठो विशुद्धः ।

अस्ति नास्तीति सोऽन्योवा बद्धो मुक्तो गतः स्थितः ।
नैर्द्वैतिकान्तनिर्द्दिश्यसूक्त(१) स्तस्मिन्न विद्यते॥ ११८॥
अङ्गत्वान्न तु देश्यो वै द्रष्टत्वात्समदर्शनः ।
आत्मप्रत्ययकारी सारनूनञ्चापि हेतुकं(२) ।
भावग्राह्यमनुमान्यं चिन्तयन्न प्रमुच्यते ॥११९॥
यदा पश्यति ज्ञातारं शान्तार्थं दर्शनात्मकं ।
दृश्यादृश्येषु निर्द्दिश्यन्तदा तदुद्धरं वरं ॥१२०॥
एवं ज्ञात्वा स विज्ञाता ततः शान्तिं नियच्छति ।
कार्य्ये च कारणे चैव बुद्ध्यादौ भौतिके तदा ॥१२१॥
संप्रयुक्तो वियुक्तो वा जीवतो वा मृतस्य च ।
विज्ञाता न च दृश्येत पृथक्त्वेनेह सर्व्वशः ॥१२२॥
स्वेनात्मानं तमात्मानं(३) कारणात्मा नियच्छति ।
प्रकृतौ कारणे चैव स्वात्मन्येवोपतिष्ठति॥१२३॥
अस्ति नास्तीति सोऽन्यो वा द्रष्टामुत्रेति वा पुनः ।
एकत्वं वा पृथक्त्वं वा क्षेत्रज्ञपुरुषेति वा॥१२४॥
आत्मवान् स निरात्मा वा चेतनोऽचेतनोऽपि वा ।
कर्त्ता वा सोऽप्यकर्त्ता वा भोक्ता वा भोज्यमेव वा॥१२५॥
यज्ज्ञात्वा न निवर्त्तन्ते क्षेत्रज्ञे तु निरञ्जने ।
अवाच्यं तदनाख्यानादग्राह्यत्वादहेतुनि ॥१२६॥

---

(१) नैर्द्वैतिका तु निर्द्दिश्य सूक्त इति क० च० छ० ।
(२) आत्मप्रत्ययकारी स न नूनं चाप्यहेतुकं इति पाठोऽत्र सम्भाव्यते ।
(३) तथात्मानमिति क० छ० ।

अप्रतर्क्यमचिन्त्यत्वादवाप्यत्वाच्च सर्व्वशः ।
नाभिलिम्पति तत्तत्त्वं सम्प्राप्य मनसा सह ॥१२७॥
क्षेत्रज्ञे निर्गुणे शुद्धे शान्ते क्षीणे निरञ्जने ।
व्यपेतसुखःदुखे च निरुद्धे शान्तिमागते ॥१२८॥
निरात्मके पुनस्तस्मिन् वाच्यावाच्यो न विद्यते ।
एतौ संहारविस्तारौ व्यक्ताव्यक्तौ ततः पुनः ॥१२९॥
सृजते ग्रसते चैव ग्रस्तः[१] पर्य्यवतिष्ठते ।
क्षेत्रज्ञाधिष्ठितं सर्वं पुनः सर्वं प्रवर्त्तते ॥१३०॥
अधिष्ठानप्रवृत्तेन तस्य ते[२] बुद्धिपूर्वकं ।
साधर्म्म्यवैधर्म्म्यकृतसंयोगो विधितस्तयोः ।
अनादिमान् स[३] संयोगो महापुरुषजः स्मृतः ॥१३१॥

यावच्च सर्गप्रतिसर्गकाल-
स्तावच्च तिष्ठति सुसन्निरुध्य ।
पूर्वं हितव्ये तदबुद्धिपूर्वं
प्रवर्त्तते तत्पुरुषार्थमेव ॥१३२॥
एषा निसर्गप्रतिसर्ग पूर्वं
प्रधानिकी चेश्वरकारिता च ।
अनाद्यनान्ता ह्यभिमानपूर्वकं
विचासयन्ती जगदभ्युपैति ॥१३३॥

---

(१) ग्रस्तौ इति क० ङ० छ० ज० ।
(२) अधिष्ठानप्रवृत्तैतत्तस्य वै इति पाठः शुद्धः ।
(३) अनादिमांस्वेत् इति क० छ० ज० ।

इत्येष प्राकृतः सर्गस्तृतीयो हेतुलक्षणः।
उक्तो ह्यस्मिंस्तदात्यन्तं करय(१)स्तत् प्रमुच्यते ॥१२४॥
इत्येष प्रतिसर्गो वस्त्रिविधः कीर्त्तितो मया।
विस्तरेणानुपूर्व्या च भूयः किं वर्त्तयाम्यहं ॥१२५॥

इति श्रीमहापुराणे वायुप्रोक्ते अनुषङ्गपादो नाम
चत्वारिंशोऽध्यायः समाप्तः।

---

(१) करञ्ज इति ङ० च० छ० करज इति ज०। अत्र कविभिरिति पाठः साधुः।

अथ एकचत्वारिंशोऽध्यायः ।

अनुषङ्गपादः ।

ऋषय ऊचुः । सूत सुमहदाख्यानं भवता परिकीर्त्तितं ।
प्रजानां मनुभिः सार्द्धं देवानामृषिभिः सह ॥१॥
पितृगन्धर्वभूतानां पिशाचोरगरक्षसां ।
दैत्यानां दानवानां च यक्षाणामेव पक्षिणां ॥२॥
अत्यद्भुतानि कर्म्माणि विधिमान् धर्म्मनिश्चयः ।
विचित्राश्च कथायोगा जन्म चाग्र्यमनुत्तमं ॥३॥
तत्कथ्यमानमस्माकं भवता श्लक्ष्णया गिरा ।
मनःकर्णसुखं सौते प्रीणात्याभूतसम्भवं ॥४॥
एवमाराध्य ते सूतं सत्कृत्य(१) च महर्षयः ।
पप्रच्छुः सत्रिणः सर्वे पुनः सर्गप्रवर्त्तनं ॥५॥
कथं सूत महाप्राज्ञ पुनः सर्गः प्रपत्स्यते ।
वन्धेषु सम्प्रलीनेषु गुणसाम्ये तमोमये ॥६॥
विकारेष्वविसृष्टेषु अव्यक्ते चात्मनि स्थिते ।
अप्रवृत्ते ब्राह्मणानु(२) महासायोज्यगैस्तदा ।
कथं प्रपत्स्यते सर्गस्तन्नः प्रब्रूहि पृच्छतां ॥७॥

---

(१) सत्कृताश्चेति क० ।
(२) अप्रवृत्तौ ब्रह्मणस्तु इति पाठोऽर्थप्रतिपत्तिकरः ।

एवमुक्तस्ततः सूतस्तदासौ लोमहर्षणः ।
व्याख्यातुमुपचक्राम पुनः सर्गप्रवर्त्तनं ॥८॥
अहं वो वर्त्तयिष्यामि यथा सर्गः प्रपत्स्यते ।
पूर्ववत्स तु विज्ञेयः समासात्तं निबोधत ॥ ९॥
दृष्टं चेवानुमेयञ्च तर्कं वक्ष्यामि युक्तितः ।
तस्माद्वाचो[(१)] निवर्त्तन्ते अप्राप्य मनसा सह ॥१०॥
अव्यक्तवत् परोक्षत्वाद्ग्रहणं तद्दुरासदं ।
विकारैः प्रतिसंदृष्टे[(२)] गुणसाम्ये निवर्त्तते ॥११॥
प्रधानं पुरुषाणाञ्च साधर्म्म्येणैव तिष्ठति ।
धर्म्माधर्म्मौ प्रलीयेते अव्यक्तौ प्राणिनां सदा ॥१२॥
सत्त्वमात्रात्मको धर्म्मो गुणसत्त्वे प्रतिष्ठितः ।
तमोमात्रात्मकोऽधर्म्मो गुणे तमसि तिष्ठति ॥१३॥
अविभागवतावेतौ गुणसाम्यस्थितावुभौ ।
सर्वकार्य्ये[(३)] बुद्धिपूर्वं प्रधानस्य प्रपत्स्यते ॥१४॥
अबुद्धिपूर्वं क्षेत्रज्ञ अधिष्ठास्यति तान् गुणान् ।
एवं तानभिमानेन प्रपत्स्येत पुरस्तदा[(४)] ॥१५॥
यदा प्रवर्त्तितव्यन्तु क्षेत्रक्षेत्रज्ञयोर्द्वयोः ।
भोज्यभोक्तृत्वसम्बन्धं प्रपत्स्येते युतावुभौ ॥१६॥

---

(१) यस्माद्वाचो इति पाठः सुसङ्गतः ।
(२) विकारैः प्रतिसंसृष्टो इति पाठो विशुद्धः ।
(३) सर्व्वकार्य्यमिति पाठः साधुः ।
(४) पुरःसरमिति ङ० च० ।

तस्माच्चरणमव्यक्तं साम्ये स्थित्वा गुणात्मकान्[१] ।
क्षेत्रज्ञाधिष्ठितं तच्च वैषम्यं भजते तु तत् ॥१७॥
ततः प्रपत्स्यते व्यक्तं क्षेत्रक्षेत्रज्ञयोर्द्वयोः ।
क्षेत्रज्ञाधिष्ठितं सत्वं विकारं जनयिष्यति ॥१८॥
महदाद्यं विशेषान्तं चतुर्विंशगुणात्मकं ।
क्षेत्रज्ञस्य प्रधानस्य पुरुषस्य प्रपत्स्यते ॥१९॥
ब्रह्माण्डे प्रथमः सोऽथ भविता चेश्वरः पुनः ।
ततो ज्ञेयस्य कृत्स्नस्य सर्वभूतपतिः शिवः ॥२०॥
ईश्वरः सर्व्वमुक्तानां ब्रह्मा ब्रह्ममयो महान् ।
आदिदेवः प्रधानस्यानुग्रहाय प्रवत्स्यते[२] ॥२१॥
अनाद्यौ वरमुत्पादौ[३] उभौ सूक्ष्मौ तु तौ स्मृतौ ।
अनादिसंयोगयुतौ सर्वक्षेत्रज्ञमेव च ॥२२॥
अबुद्धिपूर्वकं युक्तौ मशकौ तु वृतौ तदा ।
अप्रत्ययमनाद्यं च स्थितावुदकमस्यशः[४] ॥२३॥
प्रवृत्ते पूर्वतः पूर्वं पुनः सर्गे प्रपत्स्यते ।
अज्ञागुणैः प्रवर्त्तन्ते रजःसत्वतमात्मकं ॥२४॥

प्रवृत्तिकाले रजसाभिपन्न-
महत्त्वभूतादिविशेष्यताश्च ।

---

(१) गुणात्मकमिति पाठः समीचीनः ।
(२) प्रचक्षते इति ङ० ।
(३) स्वयमुत्पन्नौ इति पाठः साधीयान् ।
(४) एष श्लोको लिपिकरप्रमादाद्भ्रान्तिपूर्णः ।

विशेषतां चेन्द्रियताञ्च यान्ति
गुणावसाने[१] पतिभिर्मनुष्याः ॥२५॥
सत्याभिध्यायिन[२] स्तस्य ध्यायिनः सन्निमित्तकं ।
रजःसत्वतमा व्यक्ता विधर्म्माणः परस्परं ॥२६॥
आद्यन्ते संप्रपत्स्यन्ते चेत्रतज्ज्ञास्तु सर्वशः ।
संसिद्धकार्य्यकरणा उत्पद्यन्तेऽभिमानिनः ॥२७॥
सर्वे सत्वाः प्रपद्यन्ते अव्यक्तात्पूर्वमेव च ।
प्रसूते या च सुवहाः साधिकास्त्वाप्यसाधिका ॥२८॥
संसरन्तस्तु ते सर्वे स्थानप्रकरणैः सह ।
कार्य्याणि प्रतिपत्स्यन्ते उत्पद्यन्ते पुनः पुनः ॥२९॥
गुणमात्रात्मकाश्चैव धर्म्माधर्म्मौ परस्परं ।
आरम्भन्तीह चान्योन्यं वरेणानुग्रहेण च ॥३०॥
सर्वे तुल्याः प्रसृष्टार्थं सर्गादौ यान्ति विक्रियां ।
गुणास्तत् प्रतिधावन्ते तस्मात्तत् तस्य रोचते ॥३१॥
गुणास्ते यानि सर्वाणि प्राक् सृष्टेः प्रतिपेदिरे ।
तान्येव प्रतिपद्यन्ते सृष्टमानाः पुनः पुनः ॥३२॥
हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्मावृतानृते ।
तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते ॥३३॥
महाभूतेषु नानात्वमिन्द्रियार्थेषु मूर्त्तिषु ।
विप्रयोगाश्च भूतानां गुणेभ्यः संप्रवर्त्तते ॥३४॥

---

(१) गुणावधानौ इति ङ० च० ।
(२) सत्त्वाभिध्यायिन इति क० ।

इत्येष वो मया ख्यातः पुनः सर्गः समासतः ।
समासादेव वक्ष्यामि ब्रह्मणोऽथ समुद्भवं ॥ २५ ॥
अव्यक्तात्कारणात्तस्मान्नित्यात् सदसदात्मकात् ।
प्रधानपुरुषाभ्यान्तु जायते च महेश्वरः ॥ २६ ॥
स पुनः सम्भवपिता[१] जायते ब्रह्मसंज्ञितः ।
सृजते स पुनर्लोकानभिमानगुणात्मकान् ॥ २७ ॥
अहङ्कारस्तु महतस्तस्माद्भूतानि चात्मनः ।
युगपत् सम्प्रवर्त्तन्ते भूतान्येवेन्द्रियाणि च ।
भूतभेदाश्च भूतेभ्यः इति सर्गः प्रवर्त्तते ॥ २८ ॥
विस्तरावयवस्तेषां यथाप्रज्ञं यथाश्रुतं ।
कीर्त्तितं वो यथा पूर्वं तथैवाभ्युपधार्य्यतां ॥ २९ ॥
एतच्छ्रुत्वा नैमिषेयास्तदानीं
लोकोत्पत्तिं संस्थितिं च व्ययञ्च[२] ।
तस्मिन् सत्रे[३]ऽवभृथं[४] प्राप्य शुद्धाः
पुण्यं लोकमृषयः प्राप्नुवन्ति[५] ॥ ४० ॥
यथा यूयं विधिवद्देवतादी-
निष्ट्वा[६] चैवावभृथं प्राप्य शुद्धाः[७] ।

(१) सम्भावयिता इति ङ० च० ।
(२) चाव्ययञ्च इति ङ० च०, चाव्ययञ्च इति क० ।
(३) सेत्रे इति क० ।
(४) प्रभृथमिति ङ० च०, ऽवभृतमिति क० ।
(५) प्राप्नवन्तः इति पाठः समीचीनः ।
(६) विधिदेवतादीनिष्णा इति क० ।
(७) पुण्यं लोकमृषयः प्राप्नुवन्ति ॥ ४० ॥ यथा यूयं विधिवद्देवतादीनिष्ट्वा चैवावभृथं प्राप्य शुद्धाः इत्यन्तपाठो ङ० च० पुस्तकयोर्न विद्यते ।

त्यक्त्वा देहानायुषोऽन्ते कृतार्थान्
पुण्यान् लोकान् प्राप्य यथेष्टं चरिष्यथ[१] ॥४१॥
एते ते नैमिषेया वै दृष्ट्वा स्पृष्ट्वा च वै तदा।
जग्मुश्चावभृथस्नाताः स्वर्गं सर्वे तु सत्त्रिणः॥४२॥
विप्रास्तथा यूयमपि दृष्ट्वा बहुविधैर्मखैः।
आयुषोऽन्ते ततः स्वर्गं गन्तारः स्थः द्विजोत्तमाः ॥४३॥
प्रक्रिया प्रथमे पादे कथावस्तुपरिग्रहः।
अनुषङ्ग उपोद्घात उपसंहार एव च ॥४४॥
एवमेतच्चतुष्पादं पुराणं लोकसम्मतं।
उवाच भगवान् साक्षाद्वायुर्लोकहिते रतः ॥४५॥
नैमिषे सत्त्रमासाद्य मुनिभ्यो मुनिसत्तमाः।
तत्प्रसादादसंदिग्धं भूतोत्पत्तिलयानि च॥४६॥
प्राधानिकीमिमां सृष्टिं तथैवेश्वरकारितां।
सम्यग्विदित्वा मेधावी न मोहमधिगच्छति ॥४७॥
इदं यो ब्राह्मणो विद्वानितिहासं पुरातनं॥
शृणुयाच्छ्रावयेद्वापि तथाध्यापयतेऽपि च॥४८॥
स्थानेषु स महेन्द्रस्य मोदते शाश्वतीः समाः।
ब्रह्मसायोज्यगो भूत्वा ब्रह्मणा सह मोद्यते ॥४९॥
तेषां कीर्त्तिमतां कीर्त्तिं प्रजेशानां महात्मनां।

---

(१) आदर्शपुस्तकमात्रे, एतच्छ्रुत्वेत्यादिपद्यद्वये बहुलपाठान्तरदर्शना-च्छन्दोभङ्गदर्शनाच्च एतत्पद्यद्वयमशुद्धमेव मन्यामहे। अनयोश्छन्दः शालिनीति ज्ञेयं।

प्रथयन् पृथिवीशानां ब्रह्मभूयाय गच्छति ॥ ५० ॥
धन्यं यशस्यमायुष्यं पुण्यं वेदैश्च सम्मतं ।
कृष्णद्वैपायनेनोक्तं पुराणं ब्रह्मवादिना ॥ ५१ ॥
मन्वन्तरेश्वराणां च यः कीर्त्तिं प्रथयेदिमां ॥
देवतानामृषीणाञ्च भूरिद्रविणतेजसां ।
स सर्वैर्मुच्यते पापैः पुण्यञ्च महदाप्नुयात् ॥ ५२ ॥
यश्चेदं श्रावयेद्विद्वान् सदा पर्वणि पर्वणि ।
धूतपाप्मा जितस्वर्गो ब्रह्मभूयाय कल्पते ॥ ५३ ॥
यश्चेदं श्रावयेच्छ्राद्धे ब्राह्मणान् पादमन्ततः ।
अक्षयं सार्वकामीयं पितॄंस्तच्चोपतिष्ठति ॥ ५४ ॥
यस्मात्पुरा ह्यनन्तीदं पुराणन्तेन चोच्यते ।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥ ५५ ॥
तथैव त्रिषु वर्णेषु ये मनुष्याः प्रधानतः ।
इतिहासमिदं श्रुत्वा धर्माय विदधे मतिं ॥ ५६ ॥
यावन्त्यस्य शरीरेषु रोमकूपाणि सर्वशः ।
तावत्कोटिसहस्राणि वर्षाणां दिवि मोदते ।
ब्रह्मसायोज्यगो भूत्वा दैवतैः सह मोदते ॥ ५७ ॥
सर्व्वपापहरं पुन्यं पवित्रञ्च यशस्वि च ।
ब्रह्मा ददौ शास्त्रमिदं पुराणं मातरिश्वने ॥ ५८ ॥
तस्माच्चोशनसा प्राप्तं तस्माच्चापि बृहस्पतिः ।
बृहस्पतिस्तु प्रोवाच सवित्रे तदनन्तरं ॥ ५९ ॥
सविता मृत्यवे प्राह मृत्युश्चेन्द्राय वै पुनः ।

इन्द्रश्चापि वशिष्ठाय सोऽपि सारस्वताय च ॥६०॥
सारस्वतस्त्रिधाम्ने च त्रिधामा च शरद्वते ।
शरद्वतस्त्रिविष्टाय सोऽन्तरिक्षाय दत्तवान् ॥६१॥
वर्षिणे चान्तरिक्षो वै सोऽपि त्र्य्यारुणाय च ।
त्र्य्यारुणो धनञ्जये स च प्रादात् कृतञ्जये ॥६२॥
कृतञ्जयात्तृणञ्जयो भरद्वाजाय सोऽप्यथ ।
गौतमाय भरद्वाजः सोऽपि निर्य्यन्तरे पुनः ॥६३॥
निर्यन्तरस्तु प्रोवाच तथा वाजश्रवाय[१] च ।
स ददौ सोमशुष्माय स ददौ तृणविन्दवे ॥६४॥
तृणविन्दुस्तु दक्षाय दक्षः प्रोवाच शक्तये ।
शक्तेः पराशरश्चापि गर्भस्थः श्रुतवानिदं ॥६५॥
पराशराज्जातुकर्णस्तस्माद्द्वैपायनः प्रभुः ।
द्वैपायनात् पुनश्चापि मया प्रोक्तं द्विजोत्तमाः ॥६६॥
शांशपायन उवाच । मया वै तत्पुनः प्रोक्तं पुत्रायामितबुद्धये ।
इत्येव वाचा ब्रह्मादिगुरुणा समुदाहृता ॥६७॥
नमस्कार्य्याश्च गुरवः प्रयत्नेन मनीषिभिः ।
धन्यं यशस्यमायुष्यं पुण्यं सर्वार्थसाधकं ॥६८॥
पापघ्नं नियमेनेदं श्रोतव्यं ब्राह्मणैः सदा ।
नाशुचौ नापि पापाय नाप्यसंवत्सरोषिते ॥६९॥
नाश्रद्दधानाविदुषे नापुत्राय कथञ्चन ।
नाहिताय प्रदातव्यं पवित्रमिदमुत्तमं ॥७०॥

---

(१) वाजस्रवायेति च० ।

अव्यक्तं वै यस्य योनिं वदन्ति
व्यक्तं देहं कालमन्तर्गतञ्च।
वह्निं वक्त्रं चन्द्रसूर्य्यौ च नेत्रे
दिशः श्रोत्रे घ्राणमाहुश्च वायुं ॥७१॥
वाचो वेदांश्चान्तरिक्षं शरीरं
क्षितिं पादौ तारका रोमकूपान्।
सर्वाणि चाङ्गानि तथैव तानि
विद्याश्चाङ्गानि यस्य पुच्छं ॥७२॥
तं देवदेवं जननं जनानां
सर्व्वेषु लोकेषु प्रतिष्ठितञ्च[१]।
वरं वराणां वरदं महेश्वरं
ब्रह्माणमादिं प्रयतो नमस्ये ॥७३॥

इति श्रीमहापुराणे वायुप्रोक्ते अनुषङ्गपादे सृष्टिवर्णनं नाम एकचत्वारिंशोऽध्यायः समाप्तः।

---

(१) यज्ञात्मकं सत्यलोकप्रतिष्ठितञ्च इति क० ङ०।

अथ द्विचत्वारिंशोऽध्यायः।

व्याससंशयापनोदनं।

शौनकादिऋषयः ऊचुः।

सूत सूत महाभाग त्वया भगवता सता।
व्यासप्रसादाधिगतशास्त्रसम्बोधनेन च ॥१॥
अष्टादशपुराणानि सेतिहासानि चानघ।
उपक्रमोपसंहारविधिनोक्तानि कृत्स्नशः ॥२॥
चतुर्द्दशसहस्रं च मात्स्यं प्रोक्तमतिस्फुटम्।
तत्संख्यकं भविष्यञ्च प्रोक्तं पञ्चशताधिकम् ॥३॥
मार्कण्डेयं महारम्यं प्रोक्तं नवसहस्रकं।
कथितं ब्रह्मवैवर्त्तमष्टादशसहस्रकं ॥४॥
शतोत्तरञ्च ब्रह्माण्डं सूर्यसंख्यासहस्रकं।
अथ भागवतं दिव्यं अष्टादशसहस्रकं ॥५॥
सहस्राणि दशैवोक्तं पुराणं ब्रह्मनामकं।
अयुतश्लोकघटितं पुराणं वामनाभिधम् ॥६॥
तथैवायुतसंख्यातं षट्शताधिकमादिकं।
त्रयोविंशतिसाहस्रमनिलं तद्गतं शुभं ॥७॥
त्रयोविंशतिसाहस्रं नारदीयमुदाहृतं।
एकोनविंशसाहस्रं वैनतेयमुदाहृतं ॥८॥
सहस्रपञ्चपञ्चाशत् प्रोक्तं पाद्मं सुविस्तरं।
सप्तदशसहस्रन्तु कूर्मं प्रोक्तं मनोहरं ॥९॥

चतुर्विंशतिसाहस्रं शौकरं परमाद्भुतं ।
एकाशीतिसहस्राणि स्कान्दमुक्तं सुविस्तृतं ॥१०॥
एवमष्टादशोक्तानि पुराणानि वदन्ति च ।
पुराणेष्वेषु बहवो धर्मास्ते विनिरूपिताः ॥११॥
रागिणाञ्च विरागाणां यतीनां ब्रह्मचारिणां ।
गृहस्थानां वनस्थानां स्त्रीशूद्राणां विशेषतः ॥१२॥
ब्राह्मणक्षत्रियविशां ये च सङ्करजातयः ।
गङ्गाद्या या महानद्यो यज्ञव्रततपांसि च ॥१३॥
अनेकविधदानानि यमाश्च नियमैः सह ।
योगधर्मा बहुविधाः सांख्या भागवतास्तथा ॥१४॥
भक्तिमार्गा ज्ञानमार्गा वैराग्यानिलनीरजाः ।
उपासनविधिश्चोक्तः कर्मसंशुद्धिचेतसां ॥१५॥
ब्राह्मं शैवं वैष्णवं च सौरं शाक्तं तथार्हतं ।
षड्दर्शनानि चोक्तानि स्वभावनियतानि च ॥१६॥
एतदन्यच्च विविधं पुराणेषु निरूपितं ।
अतः परं किमप्यस्ति न वा बोद्धव्यमुत्तमं ॥१७॥
न ज्ञायेत यदि व्यासो गोपयेदथ वा भवान् ।
अत्र नः संशयं छिन्धि पूर्णः पौराणिको यतः ॥१८॥
सूत उवाच । शृणु शौनक वक्ष्यामि प्रश्नमेनं सुदुर्लभं ।
अतिगोप्यतरं दिव्यमनाख्येयं प्रचक्षते ॥१९॥
पराशरसुतो व्यासः कृत्वा पौराणिकीं कथां ।
सर्ववेदार्थघटितां चिन्तयायास चेतसि ॥२०॥

वर्णाश्रमवतां धर्मो मया सम्यगुदाहृतः ।
मुक्तिमार्गा बहुविधा उक्ता वेदाविरोधतः ॥२१॥
जीवेश्वरब्रह्मभेदो निरस्तः सूत्रनिर्णये ।
निरूपितं परं ब्रह्म श्रुतियुक्तविचारतः ॥२२॥
अक्षरं परमं ब्रह्म परमात्मा परं पदं ।
यदर्थं ब्रह्मचर्यादिवाणप्रस्थयतिव्रतं ॥२३॥
आचरन्ति महाप्राज्ञा धारणाञ्च पृथग्विधां ।
आसनं प्राणरोधश्च प्रत्याहारश्च धारणा ॥२४॥
ध्यानं समाधिरेतानि यमैश्च नियमैः सह ।
अष्टाङ्गानि यदर्थञ्च चरन्ति मुनिपुङ्गवाः ॥२५॥
यदर्थं कर्म कुर्वन्ति वेदाज्ञामात्रतत्पराः ।
परार्पणधिया सम्यग्निष्कामाः कलिलोज्झिताः ॥२६॥
यजज्ञप्तये निराकर्त्तुं पापाचरणमात्मनः ।
गङ्गादितीर्थचर्याणि निषेवन्ते शुचिव्रताः ॥२७॥
तद्ब्रह्म परमं शुद्धमनाद्यन्तमनामयं ।
नित्यं सर्वगतं स्थाणु कूटस्थं कूटवर्जितं ॥२८॥
सर्वेन्द्रियचराभासं प्राकृतेन्द्रियवर्जितं ।
दिक्कालाद्यनवच्छिन्नं नित्यञ्चिन्मात्रमव्ययं ॥२९॥
अध्यास्तं सर्ववद्यच्च विश्वमेतत्प्रकाशते ।
विश्वस्मिन्नपि चान्वेति निर्विकारश्च रज्जुवत् ॥३०॥
सम्यग्विचारितं यद्वत्फेनोर्मिबुद्बुदोदकं ।
तथा विचारितं ब्रह्म विश्वस्मान्न पृथग्भवेत् ॥३१॥

सर्वं ब्रह्मैव नानात्वं नास्तीति निगमा जगुः ।
यस्माद्भवन्ति ब्रह्माण्डकोटयो न भवन्ति(१) च ॥२२॥
यदुन्मेषनिमेषाभ्यां जगतां प्रलयोदयौ ।
भवेतां या परा शक्तिर्यदाधारतया स्थिता ॥२३॥
यस्मिन्निदं यतश्चेदं येनेदं यदिदं स्मृतं ।
यदज्ञानाज्जगद्भाति यस्मिन् ज्ञाते जगन्न हि ॥२४॥
असत्यं यज्जडं दुःखं अवस्थिति निरूपितं ।
विपरीतमतो यद्वै सच्चिदानन्दमूर्त्तिकं ॥२५॥
जीवे जाग्रति विश्वाख्यं स्वप्ने यत्तैजसं स्मृतं ।
सुषुप्तौ प्राज्ञसंज्ञं यत्सर्वावस्थासु संस्मृतं(२) ॥२६॥
यच्चक्षुषां चक्षुरथ श्रोत्राणां श्रोत्रमप्यति ।
त्वक् त्वचां रसनं तस्य घ्राणं घ्राणस्य यद्विदुः ॥२७॥
बुद्धिर्ज्ञानेन च प्राणाः क्रियाशक्त्या निरन्तरं ।
यन्नेशिरे समभ्येतुं ज्ञातुं च परमार्थतः ॥२८॥
रज्जावहिर्मरौ वारि नीलिमा गगने यथा ।
असद्विश्वमिदं भाति यस्मिन्नज्ञानकल्पितं ॥२९॥
घटावच्छिन्न एवायं महाकाशो विभिद्यते ।
कार्योपाधिपरिच्छिन्नं तद्वज्जीवसंज्ञिकं ॥४०॥
मायया चित्रकारिण्या विचित्रगुणशीलया ।
ब्रह्माण्डं चित्रमतुलं यस्मिन् भित्ताविवार्पितं ॥४१॥

---

(१) ब्रह्माण्डकोटयः प्रलयन्ति इति पाठः समीचीनः ।
(२) तत्स्मृतमिति पाठः साधुः ।

धावतोऽन्याननतिक्रान्तं वदतो वागगोचरं।
वेदवेदान्तसिद्धान्तैर्विनिर्णीतं तदक्षरं ॥४२॥
अक्षरान्न परं किञ्चित्सा काष्ठा सा परा गतिः।
इत्येवं श्रूयते वेदे बहुधाऽपि विचारिते ॥४३॥
अक्षरस्यात्मनश्चापि स्वात्मरूपतया स्थितं।
परमानन्दसन्दोहरूपमानन्दविग्रहं ॥४४॥
लीलाविलासरसिकं वल्लवीयूथमध्यगं।
शिखिपिच्छकिरीटेन भास्वद्रत्नचितेन च ॥४५॥
उल्लसद्विद्युदाटोपकुण्डलाभ्यां विराजितं।
कर्णोपान्तचरन्नेत्रखञ्जरीटमनोहरं ॥४६॥
कुञ्जकुञ्जप्रियावृन्दविलासरतिलम्पटम्।
पीताम्बरधरं दिव्यं चन्दनालेपमण्डितं ॥४७॥
अधरामृतसंसिक्तवेणुनादेन वल्लवीः।
मोहयन्तञ्चिदानन्दमनङ्गमदभञ्जनं ॥४८॥
कोटिकामकलापूर्णं कोटिचन्द्रांशुनिर्मलं।
त्रिरेखकण्ठविलसद्रत्नगुञ्जामृगाकुलं ॥४९॥
यमुनापुलिने तुङ्गे तमालवनकानने।
कदम्बचम्पकाशोकपारिजातमनोहरे ॥५०॥
शिखिपारावतशुकपिककोलाहलाकुले।
निरोधार्थं गवामेव धावमानमितस्ततः ॥५१॥
राधाविलासरसिकं कृष्णाख्यं पुरुषं परं।
श्रुतवानस्मि वेदेभ्यो यतस्तद्गोचरोऽभवत् ॥५२॥

एवं ब्रह्मणि चिन्मात्रे निर्गुणे भेदवर्जिते।
गोलोकसंज्ञिके कृष्णो दीव्यतीति श्रुतं मया ॥५३॥
नातः परतरं किञ्चिन्निगमागमयोरपि।
तथापि निगमो वक्ति ह्यक्षरात् परतः परः ॥५४॥
गोलोकवासी भगवानक्षरात् पर उच्यते।
तस्मादपि परः कोऽसौ गीयते श्रुतिभिः सदा ॥५५॥
उद्दिष्टो वेदवचनैर्विशेषो ज्ञायते कथं।
श्रुतेर्वार्थोऽन्यथा बोध्यः परतस्त्वक्षरादिति ॥५६॥
श्रुत्यर्थे संशयापन्नो व्यासः सत्यवतीसुतः।
विचारयामास चिरन्न प्रपेदे यथातथं ॥५७॥
सूत उवाच। विचारयन्नपि मुनिर्नाप वेदार्थनिश्चयं।
वेदो नारायणः साक्षाद्यत्र मुह्यन्ति सूरयः ॥५८॥
तदापि महतीमार्त्तिं सतां हृदयतापिनीं।
पुनर्विचारयामास कं व्रजामि करोमि किं ॥५९॥
पृच्छामि (१) न जगत्यस्मिन् सर्वज्ञं सर्वदर्शनं।
अज्ञात्वाऽन्यतमं लोके सन्देहविनिवर्त्तकं ॥६०॥
मेरोः कुहरिणीं गत्वा चचार परमन्तपः।
यत्र कार्त्तस्वरस्फूर्जज्ज्योत्स्नाजालैर्निरन्तरं ॥६१॥
सदा प्रबाधते विष्वक्तमःस्तोमं दृशन्तुदं।
चकास्ते यत्र परमं कान्तारमतिसुन्दरं ॥६२॥

(१) पश्यामीति पाठः साधीयान्।

नानाद्रुमलताकुञ्जकूजत्पक्षिनिनादितं ।
क्षुत्पिपासाभयक्रोधतापग्लानिविवर्जितं ॥६३॥
जलाशयैर्बहुविधैः पद्मिनीखण्डमण्डितैः ।
जातरूपशिलानद्धतटसञ्चारपक्षिभिः ॥६४॥
युक्तमम्भोजपवनैः सेव्यमानं समन्ततः ।
शिवैरध्यासितश्वाविर्हिंस्रैः सत्वैः समुज्झितं ॥६५॥
निर्जनं दिव्यलतिकाप्रियखण्डविराजितं।
शुकैः पारावतैर्हंसैरुन्मदन्मत्तकोकिलम् ॥६६॥
उत्पतत्पद्मरजसां पटलामोददिङ्मुखं।
तत्रापि काञ्चिनी दिव्या गुहा परमशोभना ॥६७॥
तां प्रविश्य जिताहारो जितचित्तो जितासनः।
सस्मार वेदांश्चतुरस्तदेकाग्रमना मुनिः ॥६८॥
त्रयी जगाम सरदां[1] शतस्य[2] स्मरतोऽस्य हि ।
प्रादुरासंस्ततो वेदाश्चत्वारश्चारुदर्शनाः ॥६९॥
स्फुरत्पद्मपलाशाक्षा जटामुकुटधारिणः।
कुशमुष्टिकराम्भोजा मृगत्वङ्मण्डितांसकाः ॥७०॥
स्वरैः षोड़शभिः क्लृप्तवदनाः प्रणवान्तराः ।
कचवर्गाङ्गवैर्वर्णैः पञ्चावयवपाणयः ॥७१॥
पवर्गदक्षचरणा वामपादास्तवर्गतः।
आन्तरन्त्यन्तवर्णाश्च येषां कुक्षिद्वयात्मकौ[3] ॥७२॥

---

(१) शुभदा इति पाठः समीचीनः ।
(२) तत्र तां इति पाठः साधुः ।
(३) कुक्षिद्वयात्मकाः इति पाठः सङ्गतः ।

नाभिनिद्राः कान्तपृष्ठा मोदराः यरलवोल्कचाः ।
अग्निदर्त्ताशरुचिरा धराग्रीवा भृतांसकाः ॥७३॥
अन्तस्थसन्धिसंस्थाना वैखरीवाग्विजृम्भिताः ।
अपश्यन्मथुरामेषां हृदयाम्भोजकल्पितां ॥७४॥
हरेर्भगवतः साक्षादाविर्भावस्थली हि सा ।
काशीमपश्यद्भ्रुमध्ये मायामाधारसंस्थितां ॥७५॥
लिङ्गदेशे ततः काञ्चीमवन्तीं नाभिमण्डले ।
कण्ठस्थां द्वारकामेषां प्रयागं प्राणगन्तथा ॥७६॥
सव्यापसव्ययोस्तेषां गङ्गाऽपि यमुना नदी ।
मध्ये सरस्वती साक्षाद्गयाक्षेत्रन्तथानने ॥७७॥
हनुग्रीवामध्यगतं प्रभासक्षेत्रमुत्तमं ।
वदर्य्याश्रममेतेषां ब्रह्मरन्ध्रे ददर्श ह ॥७८॥
पौण्ड्रवर्धननेपालपीठं नयनयोर्युगे ।
पीठम्पूर्णगिरिन्नाम ललाटे समदृश्यत ॥७९॥
कण्ठे च मथुरापीठं काञ्चीपीठं कटिस्थितं ।
जालन्धरं तथा पीठं स्तनदेशेष्वदृश्यत ॥८०॥
भृगुपीठं कर्णदेशे अयोध्यां नासिकापुटे ।
ब्रह्मरन्ध्रे स्थितं ब्राह्म्यं शैवं सीमन्तसीमनि ॥८१॥
शाक्तं जिह्वाग्रधिषणं वैष्णवं हृदयाम्बुजे ।
सौरञ्चक्षुःप्रदेशस्थं बौद्धञ्छायासुसङ्गतं ॥८२॥
सौत्रामणिं कण्ठदेशे पशुबन्धमथोरसि ।
वाजपेयं कटितटे अग्निहोत्रं तथानने ॥८३॥

अश्वमेधं कटितटे नरमेधमथोदरे।
राजसूयं शिरोदेशे आवसथ्यं तथाऽधरे॥८४॥
ऊर्द्धोष्ठे दक्षिणाग्निञ्च गार्हपत्यं मुखान्तरे।
हव्यं श्रुतौ मन्त्रभेदांस्तथा रोमस्ववस्थितान्।
भृत्यैरिव महाराजं पुराणैर्न्यायमिश्रितैः॥८५॥
संहिताभिश्च तन्त्रैश्च पृथक्पृथगुपासितान्।
कर्मज्ञानोपासनाभिर्जनानुग्रहकारकान्॥८६॥
दृष्ट्वा सुविस्मितमना मुनिः कृष्णो बभूव तान्।
ब्रह्मतेजोमयान् दिव्यांस्तपतोऽर्कानिव च्युतान्[१]।
ज्वलतोऽग्नीनिवोदर्कान् कोटीन्दुसमदर्शनान्॥८७॥
ववन्दे सहसोत्थाय दण्डवत् पतितो मुनिः।
कृतार्थोऽहं कृतार्थोऽहं कृतार्थोऽहमितीरयन्॥८८॥
अद्य मे सफलं जन्म अद्य मे सफलं मनः[२]।
अद्य मे सफलञ्चायुर्यद्भवन्तोऽक्षिगोचराः॥८९॥
अलौकिकं लौकिकञ्च यत् किञ्चिदपि विद्यते।
न तद्वोऽविदितं वेद्यं भूतं भव्यं भवच्च यत्॥९०॥
न प्रवृत्तिफला यूयं दर्शयन्तोऽपि तान् सदा।
यदृच्छाकरसङ्कोचविधानायेह[३] रागिणां॥९१॥
प्रपञ्चस्यापि मिथ्यात्वे ब्रह्मत्वे वा विधीतरौ।

(१) त्विषा इति पाठः साधुः।
(२) तपः इति पाठः समीचीनः।
(३) लक्षणाकरसङ्कोचविधानायेह इति अथवा यदृच्छाकरसङ्कोचविधानायेह इति पाठोऽर्थप्रतिपत्तिकरः।

न मृषारागविषयौ तत्सङ्कोचविधित्सयौ ॥९२॥
अतो लोकहितैर्नूनं परमार्थनिरूपणे ।
श्लोकाः स्वर्गादिविषया नश्वरा इति निन्दिताः ॥९३॥
अधिकारिविभेदेन कर्मज्ञानोपदेशतः ।
त्रातं सर्वं जगन्नूनं शब्दब्रह्मात्ममूर्त्तिभिः ॥९४॥
अतोऽहं प्रष्टुमिच्छामि भवन्तश्चेत् कृपालवः ।
कर्मणां फलमादिष्टं सर्गः कामैकचेतसाम् ॥९५॥
ईशार्पितधियां पुंसां कृतस्यापि च कर्मणः ।
चित्तशुद्धिस्ततो ज्ञानं मोक्षश्च तदनन्तरं ॥९६॥
मोक्षो ब्रह्मैक्यमित्येवं सच्चिदानन्दमेव यत् ।
सर्वं समाप्यते तस्मिन् ज्ञाते यद्धि कृताकृतं ॥९७॥
यन्निःसङ्गं चिदाकाशं ज्ञानरूपमसंवृतं ।
निरीहमचलं शुद्धमगुणं व्यापकं स्मृतं ॥९८॥
विकारेषु विनश्यत्सु निर्विकारं न नश्यति ।
यथान्धतमसा व्याप्तलोकस्य ररोजसा(१) ॥९९॥
लोहस्येव मणिस्तद्वद्मणियाश्चेतयिष्ट यत्(२) ।
यदाभासेन सा सत्तां प्रतिपद्य विजृम्भते ॥१००॥
जीवेश्वरादिरूपेण विश्वाकारेण चाप्यहो ।
तस्यामपि प्रलीनायां कूटस्थञ्च यदेकलं(३) ॥१०१॥

---

(१) रविरोजसा इति पाठोऽत्र सम्भाव्यते ।
(२) अरणिरनले यथा इति पाठोऽर्थावगतिसाधनः ।
(३) कूटस्थञ्चैव केवलं इति पाठः सुलभार्थः ।

भवद्भिरेवं निर्णीतं तत्तथैव न संशयः।
तथापि मम जिज्ञासा वर्त्तते केवलं हृदि ॥१०२॥
अतोऽपि परमं किञ्चिद्वर्त्तते किल वा न वा।
तद्वदन्तु महाभागा भवन्तस्तत्त्वदर्शनाः ॥१०३॥
यच्छ्रवःफलमेवेह जनुषो मे कृतार्थता।
एवं ब्रुवन्तमनघं व्यासं सत्यवतीसुतं।
साधु साध्विति सङ्कीर्त्य प्रत्यूचुर्निगमा वचः ॥१०४॥
वेदा ऊचुः। साधु साधु महाप्राज्ञ विष्णुरात्मा शरीरिणां।
अजोऽपि जन्म सम्पद्य लोकानुग्रहमीहसे ॥१०५॥
अन्यथा तेन घटते संसारकर्म्म बन्धनं।
अस्पृष्टो मायया देव्या कदाचिज्ज्ञानगूहया ॥१०६॥
बिभर्षि स्वेच्छया रूपं स्वेच्छयैव निगूहसे।
अस्मत्सम्मत एवार्थो भवता सम्प्रदर्शितः ॥१०७॥
पुराणेष्वितिहासेषु सूत्रेष्वपि च नैकधा।
अक्षरं ब्रह्म परमं सर्वकारणकारणं ॥१०८॥
तस्यात्मनोऽप्यात्मभावतया पुष्पस्य गन्धवत्।
रसवद्वा स्थितं रूपं अवेहि परमं हि तत् ॥१०९॥
अनुभूतं तदस्माभिर्जाते प्राकृतिके लये।
अक्षरात् परतस्तस्माद्यत् परं केवलो रसः(१)।
न च तत्र वयं शक्ताः शब्दातीते तदात्मकाः ॥११०॥
इति श्रीमहापुराणे वायुप्रोक्ते अनुषङ्गपादे व्याससंशयापनोदनं
नाम द्विचत्वारिंशोऽध्यायः।

(१) हि सः इति पाठः साधुः।

अथ त्रिचत्वारिंशोऽध्यायः[१]।

गयामाहात्म्यं ।

वायुरुवाच। अत ऊर्द्धं प्रवक्ष्यामि गयामाहात्म्यमुत्तमं ।
यच्छ्रुत्वा सर्व्वपापेभ्यो मुच्यते नात्रसंशयः ॥१॥
सूतउवाच। सनकाद्यैर्महाभागैर्देवर्षिः स च नारदः ।
सनत्कुमारं पप्रच्छ प्रणम्य विधिपूर्व्वकं[२] ॥२॥
नारद उवाच। सनत्कुमार मे ब्रूहि तीर्थं तीर्थोत्तमोत्तमं ।
तारकं सर्व्वभूतानां पठतां शृण्वतां तथा ॥३॥
सनत्कुमार उवाच। वक्ष्ये तीर्थवरं[३] पुण्यं श्राद्धादौ सर्व्वतावकं।

---

(१) ख० ग० आदर्शपुस्तकयोर्गयामाहात्म्येऽध्यायसंख्या न दृश्यते। मुद्रितपुस्तके तु गयामाहात्म्याध्यायेषु प्रथमद्वितीयतृतीय इत्यादिसंख्याः सन्ति। अस्मिन् पुस्तके क्रमानुरोधात् त्रिचत्वारिंशपञ्चचत्वारिंशइत्यादि-संख्याभिर्गयामाहात्म्यं मुद्रयामः।

(२) गयायात्रां प्रवक्ष्यामि शृणु नारद मुक्तिदां।
निष्कृतिस्त्विह कर्त्तॄणां ब्रह्मणा गीयते पुरा ॥ १ ॥
ब्रह्मज्ञानं गयाश्राद्धं गोगृहे मरणं तथा।
वासः पुंसां कुरुक्षेत्रे मुक्तिरेषा चतुर्विधा ॥ २ ॥
ब्रह्मज्ञानेन किं कार्य्यं गोगृहे मरणेन किं।
किं कुरुक्षेत्रवासेन यदि पुत्रो गयां व्रजेत् ॥ ३ ॥
गयायां पिण्डदानेन यत्फलं लभते नरः।
न तच्छक्यं मया वक्तुं कल्पकोटिशतैरपि ॥ ४ ॥
इति श्रुत्वा तदा वाक्यं नारदो मुनिसत्तमः।
सनत्कुमारं पप्रच्छ प्रणम्य विधिपूर्व्वकं ॥ ५ ॥
इति पाठो मुद्रितपुस्तके वर्त्तते।

(३) तीर्थं परमिति मुद्रितपु०।

गयातीर्थं सर्व्वदेशे(१) तीर्थेभ्योऽप्यधिकं शृणु ॥४॥
गयासुरस्तपस्तेपे ब्रह्मणा क्रतवेऽर्थितः।
प्राप्तस्य तस्य शिरसि शिलां धर्म्मो ह्यधारयत्(२) ॥५॥
तत्र ब्रह्माऽकरोद्यागं स्थितश्चापि गदाधरः(३)।
फल्गुतीर्थादिरूपेण निश्चलार्थमहर्निशं।
गयासुरस्य विप्रेन्द्र ब्रह्माद्यैर्दैवतैः सह(४) ॥६॥
कृतयज्ञो ददौ ब्रह्मा ब्राह्मणेभ्यो गृहादिकं।
श्वेतकल्पे तु वाराहे गयायागमकारयत् ॥७॥
गयानाम्ना गया ख्याता(५) चेत्रं ब्रह्माभिकाङ्क्षितं(६)।
काङ्क्षन्ति पितरः पुत्रान्नरकाद्भयभीरवः ॥८॥
गयां यास्यति यः पुत्रः स नस्त्राता भविष्यति।
गयाप्राप्तं सुतं दृष्ट्वा पितॄणामुत्सवो भवेत्।
पद्भ्यामपि जलं स्पृष्ट्वा सोऽस्मभ्यं किं न दास्यति ॥९॥
गयां गत्वान्नदाता यः पितरस्तेन पुत्रिणः।
पक्षत्रयनिवासी च पुनात्यासप्तमं कुलं।
नो चेत् पञ्चदशाहं वा सप्तरात्रिं त्रिरात्रिकं(७) ॥१०॥

---

(१) गयातीर्थम्त्र्षिश्रेष्ठ इति मुद्रितपु०।
(२) गयासुरस्तपस्तेपे ब्रह्मा तत्र जगाम ह। छलेन पातयित्वोर्व्व्यां शिलां तन्मूर्द्ध्न्यधारयत्॥ इति मुद्रितपु०।
(३) स्थापयित्वा गदाधरमिति मुद्रितपु०॥
(४) गयासुरस्य विप्रेन्द्र एतच्छ्लोकार्द्धं न साधु, मुद्रितपुस्तकेऽपि न विद्यते।
(५) गयाख्यानमिति मुद्रितपु०।
(६) ब्रह्मर्षिकाङ्क्षितमिति मुद्रितपु०।
(७) एतच्छ्लोकार्द्धं मुद्रितपुस्तके न दृश्यते।

महाकल्पकृतं पापं गयां प्राप्य विनश्यति ।
पिण्डं दद्याच्च पित्रादेरात्मनोऽपि तिलैर्विना ॥११॥
ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ।
पापं तत् सङ्गजं सर्व्वं गयाश्राद्धाद्विनश्यति[१] ॥१२॥
आत्मजोऽप्यन्यजो[२] वापि गयाभूमौ[३] यदा तदा ।
यन्नाम्ना पातयेत्पिण्डं तन्नयेद्ब्रह्म शाश्वतं ॥१३॥
ब्रह्मज्ञानं गयाश्राद्धं गोग्टहे मरणं तथा ।
वासः पुंसां कुरुक्षेत्रे मुक्तिरेषा चतुर्व्विधा ॥१४॥
ब्रह्मज्ञानेन किं कार्य्यं गोग्टहमरणेन किं ।
वासेन किं कुरुक्षेत्रे यदि पुत्रो गयां व्रजेत् ॥१५॥
गयायां सर्व्वकालेषु पिण्डं दद्याद्विचक्षणः ।
अधिमासे जन्मदिने चास्तेऽपि गुरुशुक्रयोः ॥१६॥
न त्यक्तव्यं गयाश्राद्धं सिंहस्थेऽपि वृहस्पतौ ।
तथा दैवप्रमादेन सुप्रहृत्सु[४] व्रणेषु च ।
पुनः कर्म्माधिकारी च श्राद्धकृद्ब्रह्मलोकभाक्[५] ॥१७॥
सकृद्गयाभिगमनं सकृत्पिण्डस्य पातनं[६] ।

---

(१) ब्रह्महत्यासुरापानमित्यादिगयाश्राद्धाद्विनश्यतिइत्यन्तपाठो मुद्रितपुस्तके न विद्यते ।

(२) आत्मजस्त्वान्यजो इति मुद्रितपु० ।

(३) गयाश्राद्धे इति मुद्रितपु० ।

(४) प्रहृतेषु इति पाठः समीचीनः । सुमहत्सु इति वा पाठः ।

(५) मुद्रितपुस्तके एतच्छ्लोकाभावो वर्त्तते ।

(६) पिण्डप्रपातनमिति मुद्रितपु० ।

दुर्लभं किं पुनर्न्नित्यमस्मिन्नेव व्यवस्थितिः ॥१८॥
प्रमादान्म्रियते क्षेत्रे ब्रह्मादेर्मुक्तिदायके(१)।
ब्रह्मज्ञानाद्यथा मुक्तिर्लभ्यते नात्र संशयः ॥१९॥
कीकटादिमृतानाञ्च पितॄणां तारणाय च।
तस्मात् सर्व्वप्रयत्नेन कर्त्तव्यं सुविचक्षणैः ॥२०॥
ब्रह्मप्रकल्पितान् विप्रान् हव्यकव्यादिनाऽर्च्चयेत्।
तैस्तुष्टैस्तोषिताः सर्व्वाः पितृभिः सह देवताः ॥२१॥
मुण्डनञ्चोपवासस्य सर्व्वतीर्थेष्वयं विधिः।
वर्जयित्वा कुरुक्षेत्रं विशालां विरजां गयां ॥२२॥
दण्डं प्रदर्शयेद्भिक्षुर्गयां गत्वा न पिण्डदः।
दण्डं न्यस्त्वा(२) विष्णुपदे पितृभिः सह मुच्यते॥ २३॥
न दण्डी किल्बिषं धत्ते पुयं(३) वा परमार्थतः।
अतः सर्व्वां क्रियां त्यक्त्वा विष्णुं ध्यायति भावुकः ॥२४॥
सन्न्यसेत सर्व्वकर्म्माणि वेदमेकं न सन्न्यसेत्(४)।
मुण्डं कुर्य्याच्च पूर्व्वेऽस्मिन् पश्चिमे दक्षिणोत्तरे ॥२५॥
सार्द्धक्रोशद्वयं मानं गयेति ब्रह्मणेरितं।
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ॥२६॥
तन्मध्ये सर्व्वतीर्थानि त्रैलोक्ये यानि सन्ति वै।

---

(१) मुक्तिदायकमिति मुद्रितपु०।
(२) स्पृष्ट्वा इति मुद्रितपु०।
(३) पुन्यमिति पाठः साधीयान्।
(४) न दण्डीइत्यादि वेदमेकं न सन्न्यसेदित्यन्तपाठो मुद्रितपुस्तके नावलोक्यते।

श्राद्धकृद्यो गयाक्षेत्रे पितॄणामनृणो हि सः ॥२७॥
शिरसि श्राद्धकृद्यस्तु[१] कुलानां शतमुद्धरेत् ।
गृहाच्चलितमात्रेण गयायां गमनं प्रति ।
स्वर्गारोहणसोपानं पितॄणाञ्च पदे पदे ॥२८॥
पदे पदेऽश्वमेधस्य यत्फलं गच्छतो गयां[२] ।
तत्फलञ्च भवेन्नूनं[३] समग्रं नात्र संशयः ॥२९॥
पायसेनापि चरुणा सक्तुना पिष्टकेन वा ।
तण्डुलैः फलमूलाद्यैर्गयायां पिण्डपातनं[४] ॥३०॥
तिलकल्केन खण्डेन गुडेन सघृतेन वा ।
केवलेनैव दध्ना वा ऊर्जेन मधुनाऽथ वा ॥३१॥
पिण्याकं सघृतं खण्डं पितृभ्योऽक्षयमित्युत ।
इज्यते वान्नवं भोज्यं हविष्यान्नं मुनीरितं ॥३२॥
एकतः सर्व्ववस्त्वानि रसवन्ति मधूनि हि ।
स्नात्वा गदाधराङ्घ्रिजं फल्गुतीर्थाम्बु चैकतः ॥३३॥
पिण्डासनं पिण्डदानं पुनः प्रत्यवनेजनं ।
दक्षिणा चान्नसङ्कल्पस्तीर्थश्राद्धेष्वयं विधिः ॥३४॥
नावाहनं न दिग्बन्धो[५] न दोषो दृष्टिसम्भवः ।

---

(१) यः स इति मुद्रितपु० ।
(२) भवेदिति मुद्रितपु० ।
(३) लभते नूनमिति मुद्रितपु० ।
(४) पिण्डदो भवेदिति मुद्रितपु० ।
(५) नाग्निदग्धो इति पाठोऽत्र सम्भाव्यते ।

सकारुण्येन(१) कर्त्तव्यं तीर्थश्राद्धं विचक्षणैः ॥३५॥
अन्यत्रावाहिताः काले पितरो यान्त्यमुं प्रति ।
तीर्थे सदा वसान्त्येते तस्मादावाहनं न हि ॥३६॥
तीर्थश्राद्धं प्रयच्छद्भिः पुरुषैः फलकाङ्क्षिभिः ।
कामं क्रोधं तथा लोभं त्यक्त्वा कार्य्या क्रियाऽनिशं ॥३७॥
ब्रह्मचार्य्येकभोजी च भूशायी सत्यवाक् शुचिः ।
सर्व्वभूतहिते रक्तः स तीर्थफलमश्नुते ॥३८॥
तीर्थान्यनुसरन् धीरः पाषण्डं पूर्व्वतस्त्यजेत् ।
पाषण्डः स च विज्ञेयो यो भवेत् कामकारकः ॥३९॥
तीर्थेषु ये नरा धीराः कर्म्म कुर्व्वन्ति तद्गताः ।
यथा ब्रह्मविदो वेद्यं वस्तु चानन्यचेतसः ।
प्रविशन्ति परेशाख्यं ब्रह्म ब्रह्मपरायणाः ॥४०॥
यास्ते वैतरणी नाम नदी त्रैलोक्यविश्रुता ।
साऽवतीर्णा गयाक्षेत्रे पितॄणां तारणाय वै ।
स्नातो गोदो वैतरण्यां त्रिःसप्तकुलमुद्धरेत् ॥४१॥
तथाऽक्षयवटं गत्वा विप्रान् सन्तोषयिष्यति ।
ब्रह्मप्रकल्पितान् विप्रान् हव्यकव्यादिनाऽर्च्चयेत्(२) ।
तैस्तुष्टैस्तोषिताः सर्व्वाः पितृभिः सह देवताः ॥४२॥
गयायां न हि तत् स्थानं यत्र तीर्थं न विद्यते ।

---

(१) सकारुण्यैर्न इति पाठः सङ्गतः ।
(२) मुद्रितपुस्तके,—तिलकल्केन खण्डेन इत्यादि हव्यकव्यादिनार्च्चयेदित्यन्तं पाठो न विद्यते ।

सान्निध्यं सर्व्वतीर्थानां गयातीर्थं ततो वरं ॥४३॥
मीने मेषे स्थिते सूर्य्ये कन्यायां कार्मुके घटे ।
दुर्लभं त्रिषु लोकेषु गयायां पिण्डपातनं ॥४४॥
मकरे वर्त्तमाने च ग्रहणे चन्द्रसूर्य्ययोः ।
दुर्लभं त्रिषु लोकेषु गयाश्राद्धं सुदुर्लभं ॥४५॥
गयायां पिण्डदानेन यत् फलं लभते नरः ।
न तच्छक्यं मया वक्तुं कल्पकोटिशतैरपि ॥४६॥

इति श्रीमहापुराणे वायुप्रोक्ते गयामाहात्म्यं नाम
त्रिचत्वारिंशोऽध्यायः समाप्तः ।

———

अथ चतुश्चत्वारिंशोऽध्यायः।

गयामाहात्म्यं।

नारद उवाच। गयासुरः कथं जातः किंप्रभावः किमात्मकः।
तपस्तप्तं कथं तेन कथं देहपवित्रता ॥१॥
सनत्कुमार उवाच। विष्णोर्नाभ्यम्बुजाज्जातो ब्रह्मा लोकपितामहः।
प्रजाः ससर्ज संप्रोक्तः पूर्व्वदेवेन विष्णुना ॥२॥
आसुरेणैव भावेन असुरानसृजत् पुरा।
सौमनस्येन भावेन देवान् सुमनसोऽसृजत् ॥३॥
गयासुरोऽसुराणाञ्च महाबलपराक्रमः।
योजनानां सपादञ्च शतं तस्योच्छ्रयः स्मृतः ॥४॥
स्थूलः षष्टिर्योजनानां श्रेष्ठोऽसौ वैष्णवः स्मृतः।
कोलाहलगिरिवरे तपस्तेपे सुदारुणं ॥५॥
बहुवर्षसहस्राणि निरुच्छ्वासं स्थिरो[२]ऽभवत्।
तत्तपस्तापिता देवाः संक्षोभं परमं गताः[३] ॥६॥
ब्रह्मलोकं गता देवाः प्रोचुस्तेऽथ पितामहं[४]।
गयासुराद्रक्ष देव ब्रह्मा देवांस्ततोऽब्रवीत् ॥७॥

---

(२) स्थितो इति मुद्रितपु०।
(३) ययुरिति मुद्रितपु०।
(४) ऊचुस्ते प्रपितामहमिति मुद्रितपु०।